पन्नगे च सुरेन्द्रे च कौशिके पादसंस्पृशि ।
निर्विशेषमनस्काय श्रीवीरस्वामिने नमः ॥ २ ॥

पन्नगस्य कौशिकत्वं पूर्वभव[1]स्थितकौशिकगोत्रत्वेन। बुध्यस्व कौशिकेति भगवता तथैव भाषितत्वेन च सुरेन्द्रस्य तु कौशिकत्वं कौशिकाभिधानात्। पादस्पर्शश्च पन्नगस्य दशनबुद्ध्या सुरेन्द्रस्य च भक्त्यतिशयेन। निर्विशेषमनस्कत्वं च भगवतो द्वेषरागविशेषरहितत्वेन माध्यस्थ्यात् ॥

सम्प्रदायगम्यश्चायमर्थस्तथाहि—

श्रीवीरः प्राणतस्वर्गपुष्पोत्तरविमानतः ।
पूर्वजन्मार्जितोजस्वितीर्थकृन्नामकर्मकः ॥ १ ॥
ज्ञानत्रयपवित्रात्मा सिद्धार्थनृपवेश्मनि ।
त्रिशलाकुक्षौ सरस्यां राजहंस इवागमत् ॥ २ ॥ (युग्मं)
सिंहो गजो वृषः साभिषेकश्रीः स्रक् शशी रविः ।
महाध्वजः पूर्णकुम्भः पद्मसरः सरित्पतिः ॥ ३ ॥
विमानं रत्नपुञ्जश्च निर्धूमाग्निरिति क्रमात् ।
देवी चतुर्दशस्वप्नानपश्यत्तत्र गर्भगे ॥ ४ ॥
त्रैलोक्योद्योतकृद्देवदानवासनकम्पकृत् ।
अपि नारकजन्तूनां क्षणदत्तसुखासिकम् ॥ ५ ॥
प्रभुः सुखं सुखेनैव जन्म प्राप शुभे दिने ।
तत्कालं दिक्कुमार्यश्च सूतिकर्माणि चक्रिरे ॥ ६ ॥

---

(१) ख ग -भूत- ।

अथ जन्माभिषेकाय कृत्वोत्सङ्गे जगत्प्रभुम् ।
मेरुमूर्द्धि सुधर्मेन्द्रः सिंहासनमशिश्रियत् ॥ ७ ॥
इयन्तं वारिसम्भारं कथं स्वामी सहिष्यते ।
इत्याशशङ्के शक्रेण भक्तिकोमलचेतसा ॥ ८ ॥
तदाशङ्कानिरासाय लीलया परमेश्वरः ।
मेरुशैलं वामपादाङ्गुष्ठाग्रेण न्यपीडयत् ॥ ९ ॥
शिरांसि मेरोरनमन्नमस्कर्त्तुमिव प्रभुम् ।
तदन्तिकमिवायातुमचलंश्च कुलाचलाः ॥ १० ॥
अतुच्छमुच्छलन्तिस्म स्नात्रं कर्त्तुमिवार्णवाः ।
चिक्षिपे सत्वरं तत्र नर्त्तनाभिमुखेव भूः ॥ ११ ॥
किमेतदिति सञ्चिन्त्यावधिज्ञानप्रयोगतः ।
लीलायितं भगवतो विदाञ्चक्रे बिडौजसा ॥ १२ ॥
स्वामिन्ननन्यसामान्यं सामान्यो मादृशो जनः ।
विदाङ्करोतु माहात्म्यं कथङ्कारं तवेदृशम् ॥ १३ ॥
तन्मिथ्यादुष्कृतं भूयाच्चिन्तितं यन्मयाऽन्यथा ।
इतीन्द्रेण ब्रुवाणेन प्रणेमे परमेश्वरः ॥ १४ ॥
आरब्धे वादितातोद्यं चक्रे शक्रैर्जगद्गुरोः ।
तीर्थगन्धोदकैः पुण्यैरभिषेकमहोत्सवः ॥ १५ ॥
अभिषेकान्ते तस्य सुरासुरनरोरगाः ।
ववन्दिरे मुहुः सर्वाङ्गीणं च परिचिक्षिपुः ॥ १६ ॥
प्रभुस्नात्रजलालोका वन्द्यमाना मृदप्यभूत् ।
गुरुत्वं हि जन संसर्गादीले लाघवापि ॥ १७ ॥

निविश्येशानशक्राङ्के सौधर्म्मेन्द्रोऽप्यथ प्रभुम् ।
स्नपयित्वा'ऽर्च्चयित्वारात्रिकं कृत्वेति तुष्टुवे ॥ १८ ॥
नमोऽर्हते भगवते स्वयम्बुद्धाय वेधसे ।
तीर्थङ्करायादिकृते पुरुषोत्तमाय ते ॥ १९ ॥
नमो लोकप्रदीपाय लोकप्रद्योतकारिणे ।
लोकोत्तमाय लोकाधीशाय लोकहिताय ते ॥ २० ॥
नमस्ते पुरुषवरपुण्डरीकाय शम्भवे ।
पुरुषसिंहाय पुरुषैकगन्धद्विपाय ते ॥ २१ ॥
चक्षुर्दायाभयदाय बोधिदायाध्वदायिने ।
धर्म्मदाय धर्म्मदेष्ट्रे नमः शरणदाय ते ॥ २२ ॥
धर्म्मसारथये धर्म्मनेत्रे धर्म्मैकचक्रिणे ।
व्यावृत्तच्छद्मने सम्यक्ज्ञानदर्शनधारिणे ॥ २३ ॥
जिनाय ते ज्ञापकाय तीर्णाय तारकाय च ।
विमुक्ताय मोचकाय नमो बुद्धाय बोधिने ॥ २४ ॥
सर्व्वज्ञाय नमस्तुभ्यं स्वामिने सर्वदर्शिने ।
सर्व्वातिशयपात्राय कर्म्माष्टकनिषूदिने ॥ २५ ॥
तुभ्यं क्षेत्राय पात्राय तीर्थाय परमात्मने ।
स्याद्वादवादिने वीतरागाय मुनये नमः ॥ २६ ॥
पूज्यानामपि पूज्याय महद्भ्योऽपि महीयसे ।
आचार्याणामाचार्याय ज्येष्ठानां ज्यायसे नमः ॥ २७ ॥

---

(१) क ख ग अर्च्चयित्वाथ कृत्वारात्रिकमस्तवीत् ।

अथ जन्माभिषेकाय कृत्वोत्सङ्गे जगत्प्रभुम् ।
मेरुमूर्ध्नि सुधर्मेन्द्रः सिंहासनमशिश्रियत् ॥ ७ ॥
इयन्तं वारिसम्भारं कथं स्वामी सहिष्यते ।
इत्याशशङ्के शक्रेण भक्तिकोमलचेतसा ॥ ८ ॥
तदाशङ्कानिरासाय लीलया परमेश्वरः ।
मेरुशैलं वामपादाङ्गुष्ठाग्रेण न्यपीडयत् ॥ ९ ॥
शिरांसि मेरोरनमन्नमस्कर्तुमिव प्रभुम् ।
तदन्तिकमिवायातुमचलंश्च कुलाचलाः ॥ १० ॥
अतुच्छमुच्छलन्तिस्म स्नातं कर्तुमिवार्णवाः ।
विवेपे सत्वरं तत्र नर्त्तनाभिमुखेव भूः ॥ ११ ॥
किमेतदिति सञ्चिन्त्यावधिज्ञानप्रयोगतः ।
लीलायितं भगवतो विदाञ्चक्रे बिडौजसा ॥ १२ ॥
स्वामिन्ननन्यसामान्यं सामान्यो मादृशो जनः ।
विदाङ्करोतु माहात्म्यं कथङ्कारं तवेदृशम् ॥ १३ ॥
तन्मिथ्यादुष्कृतं भूयाच्चिन्तितं यन्मयाऽन्यथा ।
इतीन्द्रेण ब्रुवाणेन प्रणेमे परमेश्वरः ॥ १४ ॥
मा[illegible]वादितातोद्यं चक्रे शक्रैर्जगद्गुरोः ।
तीर्थगन्धोदकैः पुण्यैरभिषेकमहोत्सवः ॥ १५ ॥
अभिषेकजलं तत्तु सुरासुरनरोरगाः ।
ववन्दिरे मुहुः सर्वाङ्गीणं च परिचिक्षिपुः ॥ १६ ॥
प्रभुस्नात्रजलालीढा वन्दनीया मृदप्यभूत् ।
गुरूणां किल संसर्गाद्गौरवं स्याल्लघोरपि ॥ १७ ॥

सोऽहंपूर्व्विकया भक्तैः सेव्यमानः सुरासुरैः ।
दृशा पीयूषवर्षिण्या सिञ्चन्निव वसुन्धराम् ॥ ३८ ॥
अष्टोत्तरसहस्रेण लक्षणैरुपलक्षितः ।
निसर्गेण गुणैर्वृद्धो वयसा ववृधे क्रमात् ॥ ३९ ॥
राजपुत्रैः सवयोभिः समं निःसीमविक्रमः ।
वयोऽनुरूपक्रीडाभिः कदाचित्क्रीडितुं ययौ ॥ ४० ॥
तदा ज्ञात्वावधिज्ञानान्मघ्वेसुरसभं हरिः ।
[1]धीरा अनुसहावीरमिति वीरमवर्णयत् ॥ ४१ ॥
क्षोभयिष्यामि तं [2]धीरमेषोऽहमिति मत्सरी ।
आजगामामरः कोऽपि यत्र क्रीडन्नभूद्विभुः ॥ ४२ ॥
कुर्व्वत्यामलकीक्रीडां राजपुत्रैः सह प्रभौ ।
सो[3]ऽववेष्टद्विटपिनं भुजगीभूय मायया ॥ ४३ ॥
तत्कालं राजपुत्रेषु वित्रस्तेषु दिशोदिशि ।
करित्वा रज्जुमिवोत्क्षिप्य तं चिक्षेप क्षितौ विभुः ॥ ४४ ॥
सव्रीडाः क्रीडितुं तत्र कुमाराः पुनराययुः ।
कुमारीभूय सोऽप्यागात्सर्व्वेऽप्यारुरुहुस्तरुम् ॥ ४५ ॥
पादपाग्रं कुमारेभ्यः प्राप प्रथमतः प्रभुः ।
यद्वा कियदमुष्येदं यो लोकाग्रं गमिष्यति ॥ ४६ ॥
शुशुभे भगवांस्तत्र मेरुशृङ्ग इवार्यमा ।
लम्बमाना बभुः शाखास्कन्धे शाखामृगा इव ॥ ४७ ॥

---

(१) क ख धीरा । (२) ख धीरम् । (३) ख आविवेष्टत् ।

जिग्ये भगवता तत्र कृतश्चासीदयं पणः ।
जयेद्यदिह स ह्यन्यान् पृष्ठमारुह्य वाहयेत् ॥ ४८ ॥
आरुह्यावाहयद्वाहानिव वीरः कुमारकान् ।
आरुरोह सुरस्यापि पृष्ठं पृष्ठो महौजसाम् ॥ ४९ ॥
ततः करालं वेतालरूपमाधाय दुष्टधीः ।
भूधरानप्यधरयन् प्रारब्धो वर्द्धितुं सुरः ॥ ५० ॥
वक्त्रे पातालकल्पेऽस्य जिह्वया तक्षकायितम् ।
पिङ्गैस्तुङ्गै शिरःशैले केशैर्दावानलायितम् ॥ ५१ ॥
तस्यातिदारुणे दंष्ट्रे अभूतां क्रकचाकृती ।
जाज्वल्यमाने अङ्गारशकट्याविव लोचने ॥ ५२ ॥
घोणारन्ध्रे महाघोरे महीधरगुहे इव ।
भृकुटीभङ्गुरे भीमे महोरग्याविव भ्रुवौ ॥ ५३ ॥
व्यरंसीद्वर्द्धनान्नासौ यावत्तावन्महौजसा ।
आहत्य मुष्टिना पृष्ठे स्वामिना वामनीकृतः ॥ ५४ ॥
एवं च भगवद्धैर्यं[1] साक्षात्[2]कृत्येन्द्रवर्णितम् ।
प्रभुं नत्वात्मरूपेण निजं धाम जगाम सः ॥ ५५ ॥
मातृपितृभ्यामन्येद्युः प्रारब्धेऽध्यापनोत्सवे ।
आः सर्वज्ञस्य शिष्यत्वमितीन्द्रस्तमुपास्थितः ॥ ५६ ॥
उपाध्यायासने तस्मिन्स्वामवेनोपवेशितः ।
प्रणम्य प्रार्थितः स्वामी शब्दपारायणं जगौ ॥ ५७ ॥

(१) क ख ङ वीर्यं । (२) क ख ङ -कृत्वे- ।

इदं भगवतेन्द्राय प्रोक्तं शब्दानुशासनम् ।
उपाध्यायेन तच्छ्रुत्वा लोकेष्वैन्द्रमितीरितम् ॥ ५८ ॥
मातापित्रोरनुरोधादष्टाविंशतिवत्सरीम् ।
कथञ्चिद्गृहवासेऽस्थात्प्रव्रज्योत्कण्ठितः प्रभुः ॥ ५९ ॥
अथ पूर्णायुषोः पित्रोर्देवभूयमुपेयुषोः ।
ईहाञ्चक्रे परिव्रज्यां निरीहो राज्यसम्पदः ॥ ६० ॥
भगवन्मा क्षते क्षारं क्षेप्सीरिति सगद्गदम् ।
भ्रात्रोक्ता ज्यायसा नन्दिवर्द्धनेनोपरोधितः ॥ ६१ ॥
भावतो यतिरेवाहं नानाभरणभूषितः ।
कायोत्सर्गं श्रयंश्चित्रशालिकायामवस्थितः ॥ ६२ ॥
एषणीयप्रासुकान्नपानवृत्तिर्महामनाः ।
वर्षमेकं कथमपि भगवानत्यवाहयत् ॥ ६३ ॥
तीर्थं प्रवर्त्तयेत्यभ्यर्थितो लोकान्तिकामरैः ।
यथाकामीनमर्थिभ्यो दानं दातुं प्रचक्रमे ॥ ६४ ॥
द्वितीयेकेन वर्षेण विनिर्मायानृणां भुवम् ।
श्रीऽभद्राज्यश्रियं स्वामी मन्यमानस्तृणाय ताम् ॥ ६५ ॥
सर्व्वैर्देवनिकायैश्च कृतनिष्क्रमणोत्सवः ।
सहस्रवाह्यामारुह्य शिबीं चन्द्रप्रभाभिधाम् ॥ ६६ ॥
ज्ञातखण्डवने गत्वा सर्वसावद्यवर्ज्जनात् ।
प्रव्रज्यामग्रहीदह्नश्चतुर्थप्रहरे प्रभुः ॥ ६७ ॥
जगन्मनोगतान् भावान् प्रकाशयदथ प्रभोः ।
ज्ञानं तुरीयं संजज्ञे मनःपर्ययसंज्ञकम् ॥ ६८ ॥

ततश्च गत्वा सन्ध्यायां कर्म्मारग्रामसन्निधौ।
गिरीन्द्र इव निष्कम्पः कायोत्सर्गं व्यधाद्विभुः॥ ६९॥
गोपालेनाथ यामिन्यां निष्कारणकृतक्रुधा।
उपद्रोतुं समारेभे भगवानात्मवैरिणा॥ ७०॥
अथेन्द्रेणावधिज्ञानाज्जज्ञे प्रभुमुपद्रवन्।
स दुःशीलो महाशैलमाखुश्चैव निखनन्निव॥ ७१॥
कल्याणीभक्तिरागाच्च शक्रः प्रभुपदान्तिकम्।
नष्टो मल्लुणनाशं च स गोपहतकः क्वचित्॥ ७२॥
ततः प्रदक्षिणीकृत्य त्रिर्मूर्द्ध्ना प्रणिपत्य च।
इति विज्ञापयाञ्चक्रे प्रभुः प्राचीनबर्हिषा॥ ७३॥
भविष्यति द्वादशाब्दान्युपसर्गपरम्परा।
तां निषेधितुमिच्छामि भगवन् पारिपार्श्विकः॥ ७४॥
समाधिं पारयित्वेन्द्रं भगवानूचिवानिति।
नापेक्षाञ्चक्रिरेऽर्हन्तः परसाहायिकं क्वचित्॥ ७५॥
ततो जगद्गुरुः शीतलेश्यः शीतमयूखवत्।
तपस्तेजोदुरालोकोऽधिपतिस्तेजसामिव॥ ७६॥
शौण्डीर्यवान् गज इव सुमेरुरिव निश्चलः।
सर्व्वंसहान् सहिष्णुश्च यथैव हि वसुन्धरा॥ ७७॥
अम्भोधिरिव गम्भीरो मृगेन्द्र इव निर्भयः।
मिथ्यादृशां दुरालोकः सुहुतो हव्यवाडिव॥ ७८॥
खड्गिशृङ्गमिवैकाकी जातस्थामा महोक्षवत्।
गुप्तेन्द्रियः कूर्म इवाक्षिरिवैकान्तदत्तदृक्॥ ७९॥

निरञ्जनः शङ्ख इव जातरूपः सुवर्णवत् ।
निर्लेपः कंस इव जीव इवाप्रतिहतगतिः ॥ ८० ॥
व्योमेवानाश्रयो भारुण्डपक्षिवदप्रमत्तः ।
स्वस्मात्क्रोधादेर्निरयाद्धनपथाद्विवर्जितः ॥ ८१ ॥
शत्रौ मित्रे तृणे स्त्रैणे स्वर्णेऽश्मनि मणौ मृदि ।
इहामुत्र सुखे दुःखे भवे मोक्षे समाशयः ॥ ८२ ॥
निष्कारणकरुणाकल्पपरायणमनस्तया ।
मज्जद्भवोदधौ मग्नमुद्धर्तुमिव जगत् ॥ ८३ ॥
प्रभुः प्रसन्न इवाभिग्रहोऽप्यसिकेसत्वनाम् ।
नानाग्रामपुरारण्यो विजहार वसुन्धराम् ॥ ८४ ॥
इतो दक्षिणभारतान्तमध्ये प्रभुरन्यदा ।
श्वेतम्बीं नगरीं गच्छन्नूचे गोपदारकैः ॥ ८५ ॥
देवार्यायमृजुः पन्थाः श्वेतम्बीमुपतिष्ठते ।
किन्त्वन्तरेऽस्य कनकखलाख्यस्तापसाश्रमः ॥ ८६ ॥
स हि दृग्विषसर्पेणाधिष्ठितो वर्त्ततेऽधुना ।
वायुमात्रैकसञ्चारोऽप्रचारः पक्षिणामपि ॥ ८७ ॥
विहाय तदमुं मार्गं वक्रेणाप्यमुना व्रज ।
सुवर्णेनापि किं तेन कर्णच्छेदो भवेद्यतः ॥ ८८ ॥
तं चाहिं प्रभुरज्ञासीद्यदसौ पूर्वजन्मनि ।
क्षपकः पारणार्थं विहर्त्तुं वसतेरगात् ॥ ८९ ॥
गच्छता तेन मण्डूकी पादपाताद्विराधिता ।
आलोचनार्थमेतस्य दर्शिता क्षुल्लकेन सा ॥ ९० ॥

सोऽय मत्युतमण्डूकीर्दर्शयन् लोकमारिताः ।
ऊचे क्षुल्लं मया क्षुद्र किमेता अपि मारिताः ॥ ८१ ॥
तूष्णीकोऽभूत्ततः क्षुल्लोऽमंस्त चैवं विशुद्धधीः ।
महानुभावो यदसौ सायमालोचयिष्यति ॥ ८२ ॥
[illegible]ऽप्यनालोच्य यावदेष निषेदिवान् ।
[illegible]विस्मृतास्य विराधना ॥ ८३ ॥
[illegible] तां भेकीमालोचयसि किं नहि ।
[illegible]ऽपि क्रुधोत्थाय क्षुल्लं हन्मीति धावितः ॥ ८४ ॥
[illegible] ततः स्तम्भे प्रतिफल्य व्यपद्यत ।
[illegible] ज्योतिष्केषूदपद्यत ॥ ८५ ॥
[illegible] तपस्विनाम् ।
[illegible] पुत्रोऽभूत्कौशिकाह्वयः ॥ ८६ ॥
[illegible]ऽपि कौशिकाः ।
[illegible] कौशिकः ॥ ८७ ॥
[illegible] कुलपतौ मृते ।
[illegible]जायत ॥ ८८ ॥
[illegible] निर्गमम् ।
[illegible] ॥ ८९ ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥

अन्येद्युः कनिष्ठकाले तापसेषु अनित्येष्वपि ।
अमात्यमुख्याः राजन्याः विनयमा परम नन्दनम् ॥ २ ॥
अथ आत्मगोपालस्य गोपालस्य स्पर्शादिवृन्दम् ।
प्रश्ने पण्य वन कौशिकस्यैव कथयन्ति नव ॥ ३ ॥
आत्मप्रमाणः कोपेन एकैव पुनागतः ।
अनुपन्नधावयुक्तस्य कुर्वते भाण्डघातन ॥ ४ ॥
राजपुत्रास्तथा नष्टः कोपादिव मद्भूतयः ।
सलिलत्वा च पयालाय मरणाद्धृत्यावर्ते ॥ ५ ॥
पतनः पतितस्तस्य सम्मुखः परशुः शिरः ।
शिरो द्विधाकृतं तेन सो विपाकः कुकर्मणाम् ॥ ६ ॥
स विपद्य वने तत्रैव चण्डकौशिकदृष्टिविषोऽभवत् ।
कोपस्तीव्रानुबन्धो हि सह याति भवान्तरे । ७ ॥
अवश्यं तेन गोपालैः प्रति पुरा जगद्गुरुः ।
आलापोऽश्मगणयन्नृजुनैव पथा ययौ ॥ ८ ॥
असञ्चरत्पथसञ्चारशुष्कनिकूलवालुकम् ।
उदपानावशुष्कार्धं शुष्काजीर्णपादपम् ॥ ९ ॥
जीर्णपर्णचयास्तीर्णं पीर्णं वल्मीकपर्वतैः ।
स्पर्शानुक्तोटजं जीर्णारण्यं न्यविशत प्रभुः ॥ १० ॥
तत्र चाथ जगन्नाथो यक्षमण्डपिकान्तरे ।
तस्थौ प्रतिमया नासाप्रान्तविश्रान्तलोचनः ॥ ११ ॥
ततो दृष्टिविषः सर्पः सदर्पो भ्रमितुं बहिः ।
निर्जगाम बिलात्क्रूरो कालरात्रिमुखादिव ॥ १२ ॥

भ्रमन् सोऽनुवनं रेणुसंक्रामद्भोगलेखया ।
स्वाज्ञालेखामिव लिखन्नीचाञ्चक्रे जगद्गुरुम् ॥ १३ ॥
अत्र मां किमविज्ञाय किमवज्ञाय कोऽप्यसौ ।
आः प्रविष्टो निराशङ्कं निष्कम्पः शङ्कुवत् स्थितः ॥ १४ ॥
तदेनं भस्मसादद्य करोमीति विचिन्तयन् ।
आध्मायमानं कोपेन फटाटोपं चकार सः ॥ १५ ॥
ज्वालामालामुद्वमन्त्या निर्दहन्त्या लताद्रुमान् ।
भगवन्तं दृशापश्यत्स्फारफूत्कारदारुणः ॥ १६ ॥
दृष्टिज्वालास्ततस्तस्य ज्वलन्त्यो भगवत्तनौ ।
विनिपेतुर्दुरालोका उल्का इव दिवो गिरौ ॥ १७ ॥
प्रभोर्महाप्रभावस्य प्रभवन्ति स्म नैव ताः ।
महत्यपि मरुन्मेरुं किं कम्पयितुमीश्वरः ॥ १८ ॥
दारुदाहं न दग्धोऽसावद्यापीति क्रुधा ज्वलन् ।
दर्शं दर्शं दिनकरं दृग्ज्वालाः सोऽमुचत्पुनः ॥ १९ ॥
सम्पन्नासु प्रभौ वारिधाराप्रायासु तास्वपि ।
ददंश दन्दशूकोऽसौ निःशूकः पादपङ्कजे ॥ २० ॥
दष्ट्वा दष्ट्वापचक्राम स्वविषोद्रेकदुर्मदः ।
पतन्मद्विषाक्रान्तो म्लानीयादपि मामपि ॥ २१ ॥
दशतोऽप्यमुष्यास्य न विषं प्राभवत्प्रभौ ।
गोक्षीरधाराधवलं केवलं रक्तमक्षरत् ॥ २२ ॥
ततश्च पुरतः स्थित्वा किमेतदिति चिन्तयन् ।
शान्ताकृतेर्भगवतो वीक्षापन्नः स पन्नगः ॥ २३ ॥

ततो निरूप्य रूपं तदनुरूपं जगद्गुरोः।
कान्तिसौम्यतया मङ्क्षु विध्याते तद्विलोचने ॥ २४ ॥
उपसन्नं च तं ज्ञात्वा बभाषे भगवानिति।
चण्डकौशिक बुध्यस्व बुध्यस्व ननु मामुहः ॥ २५ ॥
श्रुत्वा तद्भगवद्वाक्यमूहापोहं वितन्वतः।
पन्नगस्य समुत्पेदे स्मरणं पूर्व्वजन्मनाम् ॥ २६ ॥
स त्रिः प्रदक्षिणीकृत्य ततश्च परमेश्वरम्।
निष्कषायः सुमनसाऽनशनं प्रत्यपद्यत ॥ २७ ॥
कृतानशनकर्म्माणं निष्कर्म्माणं महोरगम्।
प्रशमापन्नमज्ञासीदन्वज्ञासीच्च तं प्रभुः ॥ २८ ॥
कुत्राप्यन्यत्र मा यासीद्दृष्टिर्मे विषभीषणा।
इति तुण्डं बिले क्षिप्त्वा पपौ स समतारसम् ॥ २९ ॥
तस्थौ तथैव तत्रैव स्वामी तदनुकम्पया।
परेषामुपकाराय महतां हि प्रवृत्तयः ॥ ३० ॥
भगवन्तं तथा दृष्ट्वा विस्मयस्मेरलोचनाः।
गोपाला वत्सपालाश्च तत्रोपसस्रुपुर्द्रुतम् ॥ ३१ ॥
वृक्षान्तरे तिरोभूय यथेष्टं ग्रावलोष्टुभिः।
प्रणिजघ्नुरनिघ्नास्ते पन्नगस्य महात्मनः ॥ ३२ ॥
तथाप्यविचलन्तं तं वीक्ष्य विस्रम्भभाजिनः।
यष्टिभिर्घट्टयामासुर्निकटीभूय तत्तनुम् ॥ ३३ ॥
आख्यन् जनानां ते गोपास्ततस्तत्रागमन् जनाः।
ववन्दिरे महावीरममहं च महोरगम् ॥ ३४ ॥

घृतविक्रयकारिण्यो गच्छन्त्यस्तेन वर्त्मना ।
नागं हैयङ्गवीनेनाभ्यञ्चयन् परस्पृश्य तम् ॥ ३५ ॥
आगत्य घृतगन्धेन तीक्ष्णतुण्डाः पिपीलिकाः ।
चक्रिरे तितउप्रायमहेस्तस्य कलेवरम् ॥ ३६ ॥
मत्कर्मणां कियदेतदित्यात्मानं विबोधयन् ।
वेदनामधिसेहे तां दुःसहां सोऽहिपुङ्गवः ॥ ३७ ॥
वराक्यो मास्म पीड्यन्त स्वल्पसाराः पिपीलिकाः ।
इत्यचीचलदङ्गं न मनागपि महोरगः ॥ ३८ ॥
सिक्तः कृपासुधावृष्ट्या दृष्ट्या भगवतोरगः ।
पश्चात्ते पञ्चतां प्राप्य सहस्रारदिवं ययौ ॥ ३९ ॥

विदधति विविधोपसर्गबाधां
फणिभृति दृष्टिविषे हरौ तु भक्तिम् ।
इति तुल्यमनस्कता प्रशंसे
चरमजिनस्य जगत्त्रयैकबन्धोः ॥ १४० ॥ २ ॥

प्रकारान्तरेण पुनर्योगगर्भामेव स्तुतिमाह—

कृतापराधेऽपि जने कृपामन्थरतारयोः ।
ईषद्बाष्पार्द्रयोर्भद्रं श्रीवीरजिननेत्रयोः ॥ ३ ॥

कृतविप्रियेऽपि जने सङ्गमकादौ कृपया मन्थरे इषन्नते तारि...
...निके ययोः ईषद्बाष्पश्चक्षुर्जलं स च करुणाकृत एव तेन आर्द्रे...
...े भगवतो नेत्रे तयोर्भद्रमिति सामर्थ्यान्नमस्कारप्रतीतिः ।

...ाह—

अपापामगमत्पुरं विहरन् विभुरन्यदा ।
रदभूमिमनुप्राप यक्षेन्द्रकुलाकुलाम् ॥ १ ॥
पेढालग्रामं निकषा पेढालाराममन्तरा ।
कृताष्टमतपःकर्मा पोलासं चैत्यमाविशत् ॥ २ ॥
जन्तूपरोधरहितमधिष्ठाय शिलातलम् ।
आजानुलम्बितभुजो दरावनतविग्रहः ॥ ३ ॥
स्थिरीकृतान्तःकरणो निर्निमेषविलोचनः ।
तस्थौ तत्रैकरात्रिक्या महाप्रतिमया प्रभुः ॥ ४ ॥
तदा शक्रः सुधर्मायां सभायां परिवारितः ।
सहस्रैश्चतुरशीत्या सामानिकदिवौकसाम् ॥ ५ ॥
त्रयस्त्रिंशत्त्रायस्त्रिंशैः पर्षद्भिस्तिसृभिस्तथा ।
चतुर्भिर्लोकपालैश्च संख्यातीतैः प्रकीर्णकैः ॥ ६ ॥
प्रत्येकं चतुरशीत्या सहस्रैरङ्गरक्षकैः ।
इष्टाग्रपरिवारैः ककुप्सु चतसृष्वपि ॥ ७ ॥
सेनाधिपतिभिः सेनापरिवीतैश्च सप्तभिः ।
देवदेवीगणैराभियोग्यैः किल्बिषिकादिभिः ॥ ८ ॥
तूर्यलयादिभिः कालं विनोदैरतिवाहयन् ।
गोप्ता दक्षिणलोकार्द्धं शक्रः सिंहासने स्थितः ॥ ९ ॥
अवधिज्ञानतो ज्ञात्वा भगवन्तं तथास्थितम् ।
उत्थाय पादुके त्यक्त्वोत्तरासङ्गं विधाय च ॥ १० ॥
जान्वसव्यं भुवि न्यस्य सव्यं च न्यञ्च्य किञ्चन ।
शक्रस्तवेनावन्दिष्ट भूतलन्यस्तमस्तकः ॥ ११ ॥

समुत्थाय च सर्व्वाङ्गोदञ्चद्रोमाञ्चकञ्चुकः ।
शचीपतिरुवाचेदमुद्दिश्य सकलां सभाम् ॥ १२ ॥
भो भोः सर्वेऽपि सौधर्म्मवासिनस्त्रिदशोत्तमाः ।
शृणुत श्रीमहावीरस्वामिनो महिमाद्भुतम् ॥ १३ ॥
दधानः पञ्चसमितीर्गुप्तित्रयपवित्रितः ।
क्रोधमानमायालोभानभिभूतो निरास्रवः ॥ १४ ॥
द्रव्ये क्षेत्रे च काले च भावे चाप्रतिबद्धधीः ।
रुद्धैकपुद्गलन्यस्तनयनो ध्यानमास्थितः ॥ १५ ॥
अमरैरसुरैर्यक्षैरक्षोभिरुरगैर्नरैः ।
त्रैलोक्येनापि शक्येत ध्यानाच्चालयितुं नहि ॥ १६ ॥
इत्याकर्ण्य वचः शाक्रं शक्रसामानिकः सुरः ।
ललाटपट्टघटितभ्रुकुटीभङ्गभीषणः ॥ १७ ॥
कम्पमानाधरः कोपाल्लोहितायितलोचनः ।
अभव्यो गाढमिथ्यात्वसङ्गः सङ्गमकोऽवदत् ॥ १८ ॥
मर्त्यः श्रमणमात्रोऽयं यद्देवं देव वर्ण्यते ।
स्वच्छन्दं सदसद्वादे प्रभुत्वं तत्र कारणम् ॥ १९ ॥
देवैरपि न चाल्योऽयं ध्यानादित्युद्भटं प्रभोः ।
कथं धार्य्येत हृदये श्रुते वा प्रोच्यते कथम् ॥ २० ॥
रुद्धान्तरिक्षः शिखरैर्मूलैरुद्धरसातलः ।
यैः किलोदस्यते दोष्णा सुमेरुर्लोष्टुलीलया ॥ २१ ॥
सकुलाचलमेदिन्याः प्लावनव्यक्तवैभवः ।
येषामेषोऽपि गण्डूषमुकरो मकराकरः ॥ २२ ॥

अप्येकभुजदण्डेन प्रचण्डाम्फालतलीलया ।
उद्धरन्ति सहानेकभूधरां ये वसुन्धराम् ॥ २३ ॥
तेषामसमऋद्धीनां सुराणाममितौजसाम् ।
इच्छासम्पन्नसिद्धीनां मर्त्यमात्रः कियानयम् ॥ २४ ॥
एषोऽहं चालयिष्यामि तं ध्यानादित्युदीर्य्य सः ।
करेण भूमिमाहत्योदस्थादास्थानमण्डपात् ॥ २५ ॥
अर्हन्तः परसाहाय्यात्तपः कुर्वन्त्यखण्डितम् ।
माज्ञासीदिति दुर्बुद्धिः शक्रेण स उपेक्षितः ॥ २६ ॥
ततो वेगानिलोत्पातपतापतघनाघनः ।
रौद्राकृतिर्दुरालोको भयापसरदप्सराः ॥ २७ ॥
विकटोरस्थलाघातपुञ्जितग्रहमण्डलः ।
स पापस्तत्र गतवान् यत्रासीत्परमेश्वरः ॥ २८ ॥
निष्कारणजगद्बन्धुं निराबाधं तथास्थितम् ।
श्रीवीरं पश्यतस्तस्य मत्सरो ववृधेऽधिकम् ॥ २९ ॥
गीर्व्वाणपांसनः पांशुवृष्टिं दुष्टोऽतनिष्ट सः ।
अकाण्डघटितारिष्टामुपरिष्टाज्जगत्प्रभोः ॥ ३० ॥
विधुर्विधुन्तुदेनेव दुर्दिनेनेव भास्करः ।
पिदधे पांशुपूरेण सर्व्वाङ्गीणं जगत्प्रभुः ॥ ३१ ॥
समन्ततोऽपि पूर्णानि तथा श्रोतांसि पांशुभिः ।
यथा समभवत्स्वामी निश्वासोच्छ्वासवर्ज्जितः ॥ ३२ ॥
तिलमात्रमपि ध्यानान्न चचाल जगद्गुरुः ।
कुलाचलश्चलति किं गजैः परिणतैरपि ॥ ३३ ॥

अपनीय ततः पांशु वज्रतुण्डाः पिपीलिकाः ।
स समुत्पादयामास प्रभोः सर्व्वाङ्गपीलिकाः ॥ ३४ ॥
प्राविशन्नेकतोऽङ्गेषु स्वैरं निर्ययुरन्यतः ।
विध्यन्तस्तीक्ष्णतुण्डाग्रैः सूच्यो निवसनेष्विव ॥ ३५ ॥
निर्भाग्यस्येव वाञ्छासु मोघीभूतासु तास्वपि ।
स दंशान् रचयामास नाक्षत्यान्तो दुरात्मनाम् ॥ ३६ ॥
तेषामेकप्रहारेण रक्तैर्गोचीरसोदरैः ।
क्षरद्भिरभवन्नाथः सनिर्झर इवाद्रिराट् ॥ ३७ ॥
तैरप्यक्षोभ्यमाणेऽथ जगन्नाथे स दुर्मतिः ।
चक्रे प्रचण्डतुण्डाग्रा दुर्निवारा घृतेलिकाः ॥ ३८ ॥
शरीरे परमेशस्य निमग्नमुखमण्डलाः ।
ततस्ताः समलक्ष्यन्त रोमाणीव सहोत्थिताः ॥ ३९ ॥
ततोऽप्यविचलच्चित्ते योगचित्ते जगद्गुरौ ।
स महावृश्चिकांश्चक्रे ध्यानप्रश्चननिश्चयी ॥ ४० ॥
प्रलयाग्निस्फुलिङ्गाभास्तप्ततोमरदारुणैः ।
तेऽभिन्दन् भगवद्देहं लाङ्गूलाङ्कुरकण्टकैः ॥ ४१ ॥
तैरप्यनाकुले नाथे कूटसङ्कल्पसङ्कुलः ।
सोऽनल्पान् कल्पयामास नकुलान् दशनाकुलान् ॥ ४२ ॥
खिखीति रसमानास्ते दंष्ट्राभिर्भगवत्तनुम् ।
त्रुण्डखण्डैस्त्रोटयन्तो मांसखण्डान्यपातयन् ॥ ४३ ॥
तैरप्यकृतकृत्योऽसौ यमदोर्दण्डदारुणान् ।
अत्युत्कटफटाटोपान् कोपात्प्रायुङ्क्त पन्नगान् ॥ ४४ ॥

धाविताः पादमार्गेण नखाग्रैर्महोरगाः ।
अवेष्टयन्महादुच्चं कपिकच्छूलता इव ॥ ४५ ॥
दंष्ट्राभृतस्तथा तत्र स्फुटन्ति स्म फटा यथा ।
तथा दशन्ति स्म यथाऽभज्यन्त दशना अपि ॥ ४६ ॥
उद्यानागारनिर्येषु भक्ष्यमाणेषु रज्जुवत् ।
स वज्रदशनानाखून् मूषकानुदपीपदत् ॥ ४७ ॥
खादन्तो भगवत्कायं नखैर्दन्तैर्मुखैः खरैः ।
ते मूत्रमाणास्तत्रैव क्षते क्षारं निचिक्षिपुः ॥ ४८ ॥
तेष्वप्यकिञ्चिद्भूतेषु भूताभूत इव क्रुधा ।
उद्दण्डदन्तमुशलं करिरूपं ससर्ज सः ॥ ४९ ॥
सोऽधावत्पादपातेन मेदिनीं नमयन्निव ।
उद्धूतहस्तदण्डेन नभस्त्रोटयन्निव ॥ ५० ॥
कराग्रेण गृहीत्वा च दुर्वारेण स वारणः ।
दूरमुच्छालयामास भगवन्तं नभस्तले ॥ ५१ ॥
विशीर्य कणशो गच्छत्वसाविति दुराशयः ।
दन्तावुन्नम्य स व्योम्नः पतन्तं च प्रतीच्छति ॥ ५२ ॥
पतितं दन्तघातेन विध्यति स्म मुहुर्मुहुः ।
तद्वक्षसो वज्रकठिनात् समुत्तस्थुः स्फुलिङ्गकाः ॥ ५३ ॥
न शशाक वराकोऽसौ कर्तुं किञ्चिदपि द्विपः ।
यावत्तावत्सुरश्चक्रे करिणीं वैरिणीमिव ॥ ५४ ॥
अखण्डशुण्डदन्ताभ्यां भगवन्तं बिभेद सा ।
स्वैरं शरीरनीरेण विषेणेव सिषेच च ॥ ५५ ॥

करेणौ रेणुसाङ्कृते तस्याः सारे सुराधमः।
पिशाचरूपमकरोन्मकरोत्कटदंष्ट्रकम् ॥ ५६ ॥
ज्वालाजालाकुलं व्यात्तं व्यायतं वक्त्रकोटरम्।
अभवद्भीषणं तस्य वह्निकुण्डमिव ज्वलत् ॥ ५७ ॥
यमौकस्तोरणस्तम्भाविव प्रोत्तम्भितौ भुजौ।
अभूच्च तस्य जङ्घोरु तुङ्गं तालद्रुमोपमम् ॥ ५८ ॥
स साट्टहासः फेत्कुर्वन् स्फूर्जत्किलकिलारवः।
कृत्तिवासाः कर्तृकाभृद्भगवन्तमुपाद्रवत् ॥ ५९ ॥
तस्मिन्नपि हि विध्याते क्षीणतैलप्रदीपवत्।
व्याघ्ररूपं क्षुधाघ्रातः शीघ्रं चक्रे स निर्घृणः ॥ ६० ॥
अथ पुच्छच्छटाच्छोटैः पाटयन्निव मेदिनीम्।
बूत्कारप्रतिशब्दैश्च रोदसीं रोदयन्निव ॥ ६१ ॥
दंष्ट्राभिर्वज्रसाराभिर्नखरैः शूलसोदरैः।
अव्यग्रं व्यापिपर्त्ति स्म व्याघ्रो भुवनभर्त्तरि ॥ ६२ ॥
तत्र विच्छायतां प्राप्ते दवदग्ध इव द्रुमे।
सिद्धार्थराजत्रिशलादेव्यो रूपं व्यधत्त सः ॥ ६३ ॥
किमेतद्भवता तात प्रक्रान्तमतिदुष्करम्।
प्रव्रज्यां मुञ्च मास्माकं प्रार्थनामवजीगणः ॥ ६४ ॥
वृद्धावशरणावावां त्यक्तवान्नन्दिवर्द्धनः।
त्रायस्वेति स्वरैर्दीनदीनैर्व्यलपतां च तौ ॥ ६५ ॥ (युग्मं)
ततस्तयोर्विलापैरप्यलिप्तमनसि प्रभौ।
आवासितं दुराचारः स्कन्धावारमकल्पयत् ॥ ६६ ॥

तत्रानासाद्य दृषदं सूदः सादर ओदने ।
चुल्लीपदे प्रभोः पादौ क्षत्वा स्थालीमकल्पयत् ॥ ६७ ॥
तत्कालं ज्वालितस्तेन जज्वाल ज्वलनोऽधिकम् ।
पादमूले जगद्भर्त्तुर्गिरेरिव दवानलः ॥ ६८ ॥
तप्तस्यापि प्रभोः स्वर्णस्येव न श्रीरहीयत ।
ततः सुराधमश्चक्रे पक्कणं दारुणक्कणम् ॥ ६९ ॥
पक्कणोऽपि प्रभोः कण्ठे कर्णयोर्भुजदण्डयोः ।
जङ्घयोश्च क्षुद्रपक्षिपञ्जराणि व्यलम्बयत् ॥ ७० ॥
खगैश्चञ्चुनखाघातैस्तथा दष्टे प्रभोस्तनुः ।
यथा च्छिद्रशताकीर्णा तत्पञ्जरनिभाभवत् ॥ ७१ ॥
तत्राप्यसारतां प्राप्ते पक्कणे पक्वपत्रवत् ।
उत्पादितमहोत्पातं खरवातमजीजनत् ॥ ७२ ॥
अन्तरिक्षे महाद्रुमांस्तृणोत्क्षेपं समुत्क्षिपन् ।
विक्षिपन् पांशुविक्षेपं दिक्षु च ग्रावकर्क्करान् ॥ ७३ ॥
सर्व्वतो रोदसीगर्भं भस्त्रापूरं च पूरयन् ।
उत्पाट्योत्पाट्य वातोऽसौ भगवन्तमपातयत् ॥ ७४ ॥ (युग्मं)
तेनापि खरवातेनापूर्णकामो विनिर्म्ममे ।
द्युसत्कुलकलङ्कोऽसौ द्राक्कुलं कलिकानिलम् ॥ ७५ ॥
भूभृतोऽपि भ्रमयितुमलङ्कर्म्मीणविक्रमः ।
भ्रमयामास चक्रस्थमृत्पिण्डमिव स प्रभुम् ॥ ७६ ॥
भ्राम्यमाणोऽर्णवावर्त्तेनेव तेन नभस्वता ।
तदेकताग्रो न ध्यानं मनागपि जहौ प्रभुः ॥ ७७ ॥

वज्रसारमनस्कोऽयं बहुधाऽपि कदर्थितः ।
न क्षोभ्यते कथमहं भग्नागूर्यामि तां सभाम् ॥ ७८ ॥
तदस्य प्राणनाशेन ध्यानं नश्यति नान्यथा ।
चिन्तयित्वेति चक्रे स कालचक्रं सुराधमः ॥ ७९ ॥
अज्ञाय तदयोभारसहस्रघटितं ततः ।
उद्दधार सुरः शैलं कैलासमिव रावणः ॥ ८० ॥
पृथिवीं सम्पुटीकर्त्तुं क्षतं मन्ये पुटान्तरम् ।
उत्पत्य कालचक्रं स प्रचिक्षेपोपरि प्रभोः ॥ ८१ ॥
ज्वालाजालैरुच्छलद्भिर्दिशः सर्व्वाः करालयन् ।
उत्पपात जगद्धर्त्तुर्यौर्वानल इवार्णवे ॥ ८२ ॥
कुलक्षितिधरक्षोदक्षमस्यास्य प्रभावतः ।
ममज्जाजानुभगवानन्तर्वसुमतीतलम् ॥ ८३ ॥
एवम्भूतोऽपि भगवानशोचदिदमस्य यत् ।
तितारयिषवो विश्वं वयं संसारकारणम् ॥ ८४ ॥
कालचक्रहतोऽप्येष प्रपेदे पञ्चतां न यत् ।
अगोचरस्तदस्त्राणामुपायः क इहापरः ॥ ८५ ॥
अनुकूलैरुपसर्गैः क्षुभ्येद्यदि कथञ्चन ।
इति बुद्धा विमानस्थः स पुरोऽस्यादुवाच च ॥ ८६ ॥
महर्षे तव तुष्टोऽस्मि सत्त्वेन तपसौजसा ।
प्राणानपेक्षभावेनारब्धनिर्वहणेन च ॥ ८७ ॥
पर्याप्तं तपसानेन शरीरक्लेशकारिणा ।
ब्रूहि याचस्व माकार्षीः शङ्कां यच्छामि किं तव ॥ ८८ ॥

इच्छामात्रेण पूर्य्यन्ते यत्र नित्यं मनोरथाः ।
किमनेनेव देहेन त्वां स्वर्गं प्रापयामि तम् ॥ ८९ ॥
अनादिभवसंरूढकर्म्मनिर्मोचलक्षणम् ।
एकान्तपरमानन्दं मोक्षं वा त्वां नयामि किम् ॥ ९० ॥
अशेषमण्डलाधीशमौलिलालितशासनम् ।
अथवात्रैव वच्छामि साम्राज्यं प्राज्यसृद्धिभिः ॥ ९१ ॥
इत्थं प्रलोभनावाक्यैरक्षोभ्यमनसि प्रभौ ।
अप्राप्तप्रतिवाक्यापः पुनरेवमचिन्तयत् ॥ ९२ ॥
मोघीकृतमनेनैतन्मम शक्तिविजृम्भितम् ।
तदिदानीममोघं स्यायदेकं कामशासनम् ॥ ९३ ॥
यतः कामास्त्रभूताभिः कामिनीभिः कटाक्षिताः ।
दृष्टा महापुमांसोऽपि लुम्पन्तः पुरुषव्रतम् ॥ ९४ ॥
इति निश्चित्य चित्तेन निर्द्दिदेश सुराङ्गनाः ।
तद्विभ्रमसहायान् षट् प्रायुङ्क्त स ऋतूनपि ॥ ९५ ॥
कृतप्रस्तावना मत्तकोकिलाकलकूजितैः ।
कन्दर्प्पनाटकनटी वसन्तश्रीरशोभत ॥ ९६ ॥
मुखवासं सज्जयन्ती विकसन्नीपरेणुभिः ।
सैरन्ध्रीव दिग्वधूनां ग्रीष्मलक्ष्मीरजृम्भत ॥ ९७ ॥
राज्याभिषेके कामस्य मङ्गल्यतिलकानिव ।
सर्वाङ्गं केतकव्याजात्कुर्व्वती प्रावृडावभौ ॥ ९८ ॥
सहस्रनयनीभूय नवनीलोत्पलच्छलात् ।
स्वसम्पदमिवोद्दामां पश्यन्ती शुशुभे शरत् ॥ ९९ ॥

जयप्रशस्तिं कामस्य श्वेताचरसहोदरैः ।
हेमन्तश्रीर्लिलेखेव प्रत्यग्रैः कुन्दकुड्मलैः ॥ १०० ॥
गणिकेवोपजीवन्ती हेमन्तसुरभीसमम् ।
कुन्दैश्च सिन्दुवारैश्च शिशिरश्रीरचीयत ॥ १ ॥
एवमुज्जृम्भमाणेषु सर्व्वर्त्तुषु समन्ततः ।
मीनध्वजपताकिन्यः प्रादुरासन् सुराङ्गनाः ॥ २ ॥
सङ्गीतमिव गीताढ्यः पुरो भगवतस्ततः ।
ताः प्रचक्रमिरे जैत्रं मन्त्रास्त्रमिव मान्मथम् ॥ ३ ॥
'तलाधिमूर्च्छितलयं गान्धारग्राम'बन्धुरम् ।
काभिश्चिदुदगीयन्त जातयः शुद्धवेसराः ॥ ४ ॥
क्रमव्युत्क्रमगैस्तानैर्व्यक्तैर्व्यञ्जनधातुभिः ।
सङ्गीताद्यवीणां काचित्सकलनिष्कलाम् ॥ ५ ॥
स्फुटधाकाद्योङ्कारप्रकारैर्मेघनिस्वनान् ।
काश्चिच्च वादयामासुर्मृदङ्गांस्त्रिविधानपि ॥ ६ ॥
ततोऽनुगतवादित्रं विचित्रकरणोत्कटम् ।
हारिभिर्नर्त्तनैः काश्चिदप्यनर्त्तिषुः ॥ ७ ॥
हावभावाभिनयैः मदस्फुटितकञ्चुका ।
[illegible] उच्चस्थिनं दोर्मूलं काप्यदीदृशत् ॥ ८ ॥
[illegible] मुहुर्मुहुः ।
[illegible] ॥ ९ ॥

* [illegible] (१) [illegible] पुस्तके ।

अथचण्डातकग्रन्थिहट्टीकरणलीलया ।
कापि प्राकाशयद्वापीसनाभिं नाभिमण्डलम् ॥ १० ॥
व्यपदिश्यभदन्ताख्यहस्तकाभिनयं मुहुः ।
गाढमङ्गपरिष्वङ्गसंज्ञा काचिच्च निर्म्ममे ॥ ११ ॥
सञ्चारयन्त्यन्तरीयं नीवीनिविडनच्छलात् ।
नितम्बविम्बफलकं काचिदाविरभावयत् ॥ १२ ॥
अङ्गभङ्गापदेशेन वक्षःपीनोन्नतस्तनम् ।
सुचिरं रोचयामास काचिद्रु रुचिरलोचना ॥ १३ ॥
यदि त्वं वीतरागोऽसि रागं तन्नस्तनोपि किम् ।
शरीरनिरपेक्षश्चेद्दत्से वक्षोऽपि किं न नः ॥ १४ ॥
दयालुर्यदि वासि त्वं तदानीं विपमायुधात् ।
अकाण्डाकृष्टकोदण्डादस्मान्न त्रायसे कथम् ॥ १५ ॥
उपेक्षसे कौतुकेन यदि नः प्रेमलालसाः ।
किञ्चिन्मात्रं हि तद्युक्तं मरणान्तं न युज्यते ॥ १६ ॥
स्वामिन् कठिनतां मुञ्च पूरयास्मन्मनोरथान् ।
प्रार्थनाविमुखो माभूः काश्चिदित्यूचिरे चिरम् ॥ १७ ॥
एवं गीतातोद्यनृत्तै'र्विकारैराङ्गिकैरपि ।
चाटुभिश्च सुरस्त्रीणां न चुक्षोभ जगत्प्रभुः ॥ १८ ॥
एवं रात्री व्यतीतायां ततो विहरतः प्रभोः ।
निराहारस्य षण्मासान् सुराधम उपाद्रवत् ॥ १९ ॥

(१' क च नृत्यैः ।

[illegible] –

...साग, सर्वविघ्नविनाशने पटुः स्थितः ।
...धर्मानुष्ठानं च कार्यसा निर्गतिग्रयः ॥ ४ ॥

...विघ्न आध्यात्मिक आधिभौतिक आधिदैविकलक्षणाः ...[illegible] विनाशः ...[illegible] ...फलम् । ...[illegible] ...परिहारेण कार्यं ... योगः कार्यस्य हि ...[illegible] । योगस्तु ...[illegible] ॥ ५ ॥

...[illegible]

...इति [illegible] –

...श्रयोऽपि हि पाप्मानः प्रलयं यान्ति योगतः ।
...प्रचण्डवाताद्धनपना घनाघनघटा इव ॥ ६ ॥

...पि पापानि योगात्प्रलयमुपयान्ति प्रचण्डवातोद्धूता घन-
...घनघटा इव ॥ ६ ॥

...ऐहिकजन्मोपार्जितं पापं योगः क्षिणुयादपि
...जन्मपरम्परोपात्तपापस्य तु निर्मूलनं
योगादसम्भावनीयमित्याह—

...क्षिणोति योगः पापानि चिरकालार्जितान्यपि ।
...चितानि यथैधांसि क्षणाद्वाशुशुक्षणिः ॥ ७

रा चिरकालमीलितान्यपीन्धनानि क्षणमात्रप्रचितोऽप्यकृशः शानुर्भस्मसात्करोति। एवं योगः क्षणमात्रेणैव चिरसञ्चितपापक्षयक्षमो भवतीति ॥ ७ ॥

योगस्य फलान्तरमाह—

कफविप्रुण्मलामर्शसर्वौषधिमहर्द्धयः ।
सम्भिन्नश्रोतोलब्धिश्च यौगं ताण्डवडम्बरम् ॥ ८ ॥

महर्द्धिशब्दः प्रत्येकमपि सम्बध्यते। कफ श्लेष्मा विप्रुडुच्चारः पुरीषमिति यावत्। मलः कर्णदन्तनासिकानयनजिह्वोद्भवः शरीरसम्भवश्च। आमर्शो हस्तादिना स्पर्शः सर्व्वे विण्मूत्रकेशनखादय उक्ता अनुक्ताश्च औषधयो योगप्रभावान्महर्द्धयो भवन्ति। अथवा महर्द्धयो विभिन्ना एवाणुत्वादयः। तथा श्रोतांसीन्द्रियाणि संभिन्नानि सङ्गतानि एकैकशः सर्व्वविषयैस्तेषां लब्धिर्योगस्येदं यौगं ताण्डवडम्बरं [1]दर्शितम्।

तथाहि योगमाहात्म्याद्योगिनां कफबिन्दवः ।
सनत्कुमारादेरिव जायन्ते सर्व्वरुक्छिदः ॥ १ ॥
सनत्कुमारो हि पुरा चतुर्थश्चक्रवर्त्त्यभूत् ।
षट्खण्डपृथिवीभोक्ता नगरे हस्तिनापुरे ॥ २ ॥
कदाचिच्च सुधर्म्मायां सभायां जातविस्मयः ।
रूपं तस्याप्रतिरूपं वर्णयामास वासवः ॥ ३ ॥

---

[1] क म भ विजृम्भितम्।

राज्ञः सनत्कुमारस्य कुरुवंशशिरोमणेः ।
यद्रूपं न तदन्यत्र देवेषु मनुजेषु वा ॥ ४ ॥
इति प्रशंसां रूपस्याश्रद्दधानावुभौ सुरौ ।
विजयो वैजयन्तश्च पृथिव्यामवतेरतुः ॥ ५ ॥
ततस्तौ विप्ररूपेण रूपान्वेषणहेतवे ।
प्रासादद्वारि नृपतेस्तस्थतुर्दौस्थसन्निधौ ॥ ६ ॥
पार्श्वात् सनत्कुमारोऽपि तदा प्रारब्धमज्जनः ।
मुक्तनिःशेषनैपथ्यः सर्वाङ्गाभ्यङ्गमुद्वहन् ॥ ७ ॥
प्रारब्धौ द्वारपालेन द्विजातौ तौ निवेदितौ ।
न्यायवर्त्ती चक्रवर्त्ती तदानीमप्यवीविशत् ॥ ८ ॥
सनत्कुमारमालोक्य विस्मयस्मेरमानसौ ।
धूनयामासतुर्मौलिं चिन्तयामासतुश्च तौ ॥ ९ ॥
ललाटपट्टः पर्यस्ताष्टमीरजनिजानिकः ।
नेत्रे कर्णान्तविश्रान्ते जितनीलोत्पलत्विषी ॥ १० ॥
दन्तच्छदौ पराभूतपक्वबिम्बीफलच्छवी ।
निरस्तशुक्तिकौ कर्णौ कण्ठोऽयं पाञ्चजन्यजित् ॥ ११ ॥
करिराजकराकारतिरस्कारकरौ भुजौ ।
स्वर्णशैलशिलालक्ष्मीविलुण्टाकमुरस्थलम् ॥ १२ ॥
मध्यभागो मृगारातिकिशोरोदरसोदरः ।
किमन्यदस्य सर्वाङ्गलक्ष्मीवाचां न गोचरः ॥ १३ ॥
अहो कोऽप्यस्य लावण्यसरित्पूरो निरर्गलः ।
येनाभ्यङ्गं न जानीमो ज्योत्स्नयोडुप्रभामिव ॥ १४ ॥

यथेन्द्रो वर्णयामास तथेदं भाति नान्यथा ।
मिथ्या न खलु भाषन्ते महात्मानः कदाचन ॥ १५ ॥
किं निमित्तमिहायातौ भवन्तौ द्विजसत्तमौ ।
इत्थं सनत्कुमारेण पृष्टौ तावेवमूचतुः ॥ १६ ॥
लोकोत्तरचमत्कारकारकं सचराचरे ।
भुवने भवतो रूपं नरशार्दूल गीयते ॥ १७ ॥
दूरतोऽपि तदाकर्ण्य तरङ्गितकुतूहलौ ।
विलोकयितुमायातावावामवनिवासव ॥ १८ ॥
वर्ण्यमानं यथा लोके शुश्रुवेऽस्माभिरद्भुतम् ।
रूपं नृप ततोऽप्येतत्सविशेषं निरीक्ष्यते ॥ १९ ॥
ऊचे सनत्कुमारोऽपि स्मितविस्फुरिताधरः ।
इयं हि कियती कान्तिरङ्गेऽभ्यङ्गतरङ्गिते ॥ २० ॥
इतो भूत्वा प्रतीक्षेयां क्षणमात्रं द्विजोत्तमौ ।
यावन्निवर्त्यतेऽस्माभिरेष मज्जनकक्षणः ॥ २१ ॥
विचित्ररचिताकल्पं भूरिभूषणभूषितम् ।
रूपं पुनर्निरीक्षेयां सरत्नमिव काञ्चनम् ॥ २२ ॥
ततोऽवनिपतिः स्नात्वा कल्पिताकल्पभूषणः ।
साडम्बरः सदोऽध्यास्तास्वररत्नमिवाम्बरम् ॥ २३ ॥
अनुज्ञातौ ततो विप्रौ पुरोभूय महीपतेः ।
निरध्यतुश्च तद्रूपं विषण्णौ दध्यतुश्च तौ ॥ २४ ॥
क्व तद्रूपं क्व सा कान्तिः क्व तल्लावण्यमप्यगात् ।
क्षणिनाश्वरा मर्त्यानां क्षणिकं सर्वमेव हि ॥ २५ ॥

नृप सादरं नौ तस्मादुद्द्रष्टुं नौ श्रुतिनौ पुरः ।
तस्मादकस्मादागत्य विप्रावसिलिङ्गिनौ ॥ १६ ॥
ततस्तावूचतुरिदं सुधासम्भ्रमा विभ ।
अस्माभिस्त्वं श्रुताख्यातो रूपसौन्दर्यवर्णिनौ ॥ १७ ॥
सदस्युक्तवान् शक्रः त्वद्रूपवर्णनम् ।
अश्रद्दधानौ तद्द्रष्टुं संप्रत्यावामागताविह ॥ १८ ॥
सहर्षं ऊचिवान् राजा नाद्य वपुर्वीक्षितम् ।
क्षणं नृप तत्स्नानादास्थानमध्यगम् ॥ १९ ॥
अधुना व्याधिभिर्ग्रस्तकान्तिरुच्छेदलक्षणैः ।
देवः समन्तादाक्रान्तो निःश्वासैरिव दर्पणः ॥ २० ॥
यथार्कस्तमितावेव द्रागवाप्यन्तरोत्सवाः ।
विच्छायं च वपुस्तेऽद्य हिमग्रस्तमिव कुसुमम् ॥ २१ ॥
श्रोत्रान्तरेण विविधं यदा तदपदं वपुः ।
वृथैव नृपाः कुर्वन्ति तन्मूर्तौ सुखसंश्रयः ॥ २२ ॥
शरीरमन्तर्मलमयं व्याधिभिर्विविधैरिदम् ।
दष्टितं दारुणैरेव दारुकीटगणैरिव ॥ २३ ॥
बहिः कथञ्चिद्यद्यपि प्ररोचेत तथापि हि ।
नैयग्रोधं फलमिव मध्ये कृमिकुलाकुलम् ॥ २४ ॥
रुजा लुम्पति कायस्य तत्कालं रूपसम्पदम् ।
महावातो यथैव पादपस्यान्तवल्लरीम् ॥ २५ ॥

---

(१) च न तादेव पुरोचितम् ।

शरीरं श्लथते नाशा रूपं याति न पापधीः ।
जरा स्फुरति न ज्ञानं धिग् स्वरूपं शरीरिणाम् ॥ ३६ ॥
रूपं लवणिमा कान्तिः शरीरं द्रविणान्यपि ।
संसारे तरलं सर्वं कुशाग्रजलविन्दुवत् ॥ ३७ ॥
अद्यश्वीनविनाशस्य शरीरस्य शरीरिणाम् ।
सकामनिर्ज्जरासारं तप एव महत्फलम् ॥ ३८ ॥
इति सञ्जातवैराग्यभावनः पृथिवीपतिः ।
प्रव्रज्यां स्वयमादित्सुः सुतं राज्ये न्यवीविशत् ॥ ३९ ॥
गत्वोद्याने सविनयं विनयन्धरसूरितः ।
सर्व्वसावद्यविरतिप्रधानं सोऽग्रहीत्तपः ॥ ४० ॥
महाव्रतधरस्यास्य दधानस्योत्तरान् गुणान् ।
ग्रामाद्ग्रामं विहरतः समतैकाग्रचेतसः ॥ ४१ ॥
गाढानुरागवन्धेन सर्व्वं प्रकृतिमण्डलम् ।
पृष्ठतोऽगात्करिकुलं महायूथपतेरिव ॥ ४२ ॥ (युग्मं)
निष्कषायमुदासीनं निर्म्ममं निष्परिग्रहम् ।
तं पर्य्युपास्य षण्मासान् कथञ्चित्तन्न्यवर्त्तत ॥ ४३ ॥
यथाविध्यात्तभिक्षाभिरकालापथ्यभोजनैः ।
व्याधयोऽस्य वत्वधिरे सम्पूर्णैर्दोहदैरिव ॥ ४४ ॥
कच्छूशोषज्वरश्वासारुचिकुक्षिविवेदनाः ।
सप्ताधिसेहे पुण्यात्मा सप्तवर्षशतानि सः ॥ ४५ ॥
दुःसहान् सहमानस्य तस्याशेषपरीषहान् ।
उपायनिरपेक्षस्य समपद्यन्त लब्धयः ॥ ४६ ॥

अन्तःस्थं सुरपति सम्पूज्य नि
ऋषि जानामसनत्कुमारेण
ब्रह्मर्षीणां नाम सनत्कुमा
अथ सनत्कुमाराणां नाम्ना सु
तथा मायाजालन्यस्य सन्त्य
अहं निरन्तराणां व्यवस्था नि
अनुष्ठानां महात्म वेदान्तपद
निजया वेजयन्ती नवांशधुं
अथवा सदाशाम कि योगः प
निदाना पाणिकानां निजं
यदि व्याधिज्ञानानि रोगपशु
तद्ज्ञान निवृत्त्यां रोगानुपा
अतः सनत्कुमारोऽपि प्रत्युवे '
त्रिविधा दोषणां रोगा द्रव्यतो
आपस्मानसायासोम्य मावरोग
अध्यात्मवस्त्वनुगामिनीऽन
नाधिकिल्विषमोघा येषुवां त
यथा विजिताधो द्रव्यरोगास्त

किञ्च—

श्लेष्मकणमपि यानि यदङ्गप्रत्यङ्गमलान्नौषध्यादिगतमपि सर्वरोगापहं भवति । तथा विप्रुण्मूत्रे वा अपि यदाङ्गावयवसंयुक्त-स्पर्शादेव निर्विषा भवन्ति । विषसंपृक्तमन्नमपि मुखप्रविष्टं निर्विषं भवति । सद्योविषव्याधिव्याधिता अपि तद्वचःश्रवणमात्रात्तद्दर्श-नाच्च वीतविकारा भवन्ति । एष सर्वोऽपि सर्वौषधिप्रकारः । एते कफाद्या महर्द्धिरूपाः । अथवा महर्द्धयो विविधा एव । वैक्रियात्मकाश्चानेकधा अणुत्व महत्त्व लघुत्व गुरुत्व प्राप्ति प्राकाम्य-ईशित्व वशित्व अप्रतिघातित्व अन्तर्द्धान कामरूपित्वादिभेदात् ।

अणुत्वमणुशरीरविकरणम् । येन बिसच्छिद्रमपि प्रविशति तत्र च चक्रवर्त्तिभोगानपि भुङ्क्ते । महत्त्वं मेरोरपि महत्तर-शरीरकरणसामर्थ्यम् । लघुत्वं वायोरपि लघुतरशरीरता । गुरुत्वं वज्रादपि गुरुतरशरीरतया इन्द्रादिभिरपि प्रकृष्टबलैर्दुःसहता । प्राप्तिर्भूमिस्थस्य अङ्गुल्यग्रेण मेरुपर्व्वताग्रमपि प्रभाकरादिस्पर्श-सामर्थ्यम् । प्राकाम्यमप्सु भूमाविव प्रविशतो गमनशक्तिः तथा अप्स्विव भूमावुन्मज्जननिमज्जने । ईशित्वं त्रैलोक्यस्य प्रभुता तीर्थकरत्रिदशेश्वरर्द्धिविकरणम् । वशित्वं सर्व्वजीववशीकरण-लब्धिः । अप्रतिघातित्वं अद्रिमध्येऽपि निःसङ्गगमनम् । अन्त-र्द्धानमदृश्यरूपता । कामरूपित्वं युगपदेव नानाकाररूप-विकरणशक्तिः । इत्येवमादयो महर्द्धयः । अथवा प्रकृष्टश्रुतावरण-वीर्यान्तरायक्षयोपशमाविर्भूतासाधारणमहाप्रज्ञर्द्धिलाभा अनधीत-द्वादशाङ्गचतुर्दशपूर्वा अपि सन्तो यमर्थं चतुर्दशपूर्वी निरूपयति

दप्यवगाहनादवदातमनसो मनोबलिनः। अन्तर्मुहूर्तेन सकलश्रुतवस्तूच्चारणसमर्था वाग्बलिनः। अथवा पदवाक्यालङ्कारोपेतां वाचमुच्चैरुच्चारयन्तो ऽविच्छिन्नवाक्क्रमा अक्षीणकण्ठा वाग्बलिनः। वीर्यान्तरायक्षयोपशमाविर्भूतासाधारणकायबलत्वात्प्रतिमया प्रतिष्ठमानाः श्रमक्लमविरहिता वर्षमात्रप्रतिमाधरा बाहुबलिप्रभृतयः कायबलिनः। तथा क्षीरमधुसर्पिरमृतास्रविणो येषां पात्रपतितं कदन्नमपि क्षीरमधुसर्पिरमृतरसवीर्यविपाकं जायते वचनं वा शारीरमानसदुःखप्राप्तानां देहिनां क्षीरादिवत्सन्तर्पकं भवति ते क्षीरास्रविणो मध्वास्रविणः सर्पिरास्रविणोऽमृतास्रविणश्च। केचिदक्षीणर्द्धियुक्तास्ते च द्विविधा अक्षीणमहानसा अक्षीणमहालयाश्च। येषामसाधारणान्तरायक्षयोपशमादल्पमात्रमपि पात्रपतितमन्नं गौतमादीनामिव बहुभ्यो दीयमानमपि न क्षीयते तेऽक्षीणमहानसाः। अक्षीणमहालयर्द्धिप्राप्ताश्च यत्र परिमितभूप्रदेशेऽवतिष्ठन्ते तत्रासंख्याता अपि देवास्तिर्यञ्चो मनुष्याश्च सपरिवाराः परस्परबाधारहितास्तीर्थकरपर्षदीव सुखमासते। इति प्रज्ञाश्रमणादिषु महाप्रज्ञाद्या महर्द्धयो दर्शिताः।

सर्वेन्द्रियाणां विषयान् गृह्णात्येकमपीन्द्रियम्।
यत्प्रभावेन सम्भिन्नश्रोतोलब्धिस्तु सा मता ॥ १ ॥ ८ ॥

तथा—

चारणाशीविषावधिमनःपर्यायसम्पदः।
योगकल्पद्रुमस्यैता विकासिकुसुमश्रियः ॥ ९ ॥

तस्मिन् विचारकृच्छ्रेऽप्यर्थेऽतिनिपुणप्रज्ञाः प्राज्ञश्रमणाः। अन्येऽधीतदशपूर्व्वा रोहिणीप्रज्ञप्त्यादिमहाविद्यादिभिरङ्गुष्ठप्रसेनिकाभिरल्पविद्यादिभिश्चोपनतानां भूयसीनामृद्धीनां अवशगा विद्यावेगधारणात् विद्याधरश्रमणाः। केचिद्बीजकोष्ठपदानुसारिबुद्धिविशेषर्द्धियुताः। सुकृष्टवसुमतीक्षते क्षेत्रे क्षित्युदकाद्यनेककारणविशेषापेक्षं बीजमनुपहतं यथानेकबीजकोटीप्रदं भवति तथैव ज्ञानावरणादिक्षयोपशमातिशयप्रतिलम्भादेकार्थबीजश्रवणे सति अनेकार्थबीजानां प्रतिपत्तारो बीजबुद्धयः। कोष्ठागारिकस्थापितानामसङ्कीर्णानामविनष्टानां भूयसां धान्यबीजानां यथा कोष्ठेऽवस्थानं तथा परोपदेशादवधारितानां श्रौतानामर्थग्रन्थबीजानां भूयसामनुस्मरणमन्तरेणाविनष्टानामवस्थानात्कोष्ठबुद्धयः। पदानुसारिणोऽनुश्रोतःपदानुसारिणः प्रतिश्रोतःपदानुसारिण उभयपदानुसारिणश्च। तत्रादिपदस्यार्थं ग्रन्थं च परत उपश्रुत्य आ अन्त्यपदादर्थग्रन्थविचारणानुसरणपटुतरमतयोऽनुश्रोतःपदानुसारिबुद्धयः। अन्त्यपदस्यार्थं ग्रन्थं च परत उपश्रुत्य ततः प्रातिकूल्येनादिपदादा अर्थग्रन्थविचारणापटवः प्रतिश्रोतःपदानुसारिबुद्धयः। मध्यपदस्यार्थं ग्रन्थं च [illegible] परिच्छिन्नपदसमूह- [illegible] अतिशयपटुविज्ञान- [illegible] पदानुसारिबुद्धयः। बीजबुद्धिकपदार्थ [illegible] [illegible] तत्र [illegible] [illegible]

द्वादशाङ्गार्थचिन्तनसमर्था मनोबलिनः। अन्तर्मुहूर्त्तेन सकलश्रुतवस्तूच्चारणसमर्था वाग्बलिनः। अथवा पदवाक्यालङ्कारोपेतां वाचमुच्चैरुच्चारयन्तोऽविरचितवाक्क्रमा अहीनकण्ठा वाग्बलिनः। वीर्यान्तरायक्षयोपशमाविर्भूतासाधारणकायबलत्वात्प्रतिमयावतिष्ठमानाः श्रमक्लमविरहिता वर्षमात्रप्रतिमाधरा बाहुबलिप्रभृतयः कायबलिनः। तथा क्षीरमधुसर्पिरमृतास्रविणो येषां पात्रपतितं कदन्नमपि क्षीरमधुसर्पिरमृतरसवीर्यविपाकं जायते वचनं वा शारीरमानसदुःखप्राप्तानां देहिनां क्षीरादिवत्सन्तर्पकं भवति ते क्षीरास्रविणो मध्वास्रविणः सर्पिरास्रविणोऽमृतास्रविणश्च। केचिदक्षीणर्द्धियुक्तास्ते च द्विविधा अक्षीणमहानसा अक्षीणमहालयाश्च। येषामसाधारणान्तरायक्षयोपशमात्स्वल्पमात्रमपि पात्रपतितमन्नं गौतमादीनामिव बहुभ्यो दीयमानमपि न क्षीयते तेऽक्षीणमहानसाः। अक्षीणमहालयर्द्धिप्राप्ताश्च यत्र परिमितभूप्रदेशेऽवतिष्ठन्ते तत्रासंख्याता अपि देवास्तिर्यञ्चो मनुष्याश्च सपरिवाराः परस्परबाधारहितास्तीर्थकरपर्षदीव सुखमासते। इति प्रज्ञाश्रमणादिषु महाप्रज्ञाद्यो महर्द्धयो दर्शिताः।

सर्वेन्द्रियाणां विषयान् गृह्णात्येकमपीन्द्रियम्।
यत्प्रभावेन सम्भिन्नश्रोतोलब्धिस्तु सा मता॥ १॥ ८॥

तथा—

चारणाशीविषावधिमनःपर्यायसम्पदः।
योगकल्पद्रुमस्यैता विकासिकुसुमश्रियः॥ ९॥

अतिशयचरणाच्चारणा अतिशयगमनादित्यर्थः। तत्सम्पन्नलब्धिरित्यर्थः। आशीविषलब्धिर्निग्रहानुग्रहसामर्थ्यम्। अवधिज्ञानलब्धिर्मूर्त्तद्रव्यविषयं ज्ञानम्। मनःपर्य्यायज्ञानलब्धिर्मनोद्रव्यप्रत्यक्षीकरणशक्तिः। एता लब्धयो योगकल्पवृक्षस्य कुसुमभूताः। फलं तु केवलज्ञानं मोक्षो वा। भरतमरुदेव्युदाहरणाभ्यां वक्ष्यते।

तथाहि—

द्विविधाश्चारणा ज्ञेया जङ्घाविद्योत्थशक्तितः।
तत्राद्या रुचकद्वीपं यान्त्येकोत्पातलीलया ॥ १ ॥
वलन्तो रुचकद्वीपादेकेनोत्पतनेन ते।
नन्दीश्वरे समायान्ति द्वितीयेन यतो गताः ॥ २ ॥
ते चोर्ध्वगत्यामेकेन समुत्पतनकर्म्मणा।
गच्छन्ति पाण्डुकवनं मेरुशैलशिरःस्थितम् ॥ ३ ॥
ततोऽपि वलिता एकोत्पातेनायान्ति नन्दनम्।
उत्पातेन द्वितीयेन प्रथमोत्पातभूमिकाम् ॥ ४ ॥
विद्याचारणास्तु गच्छन्त्येकेनोत्पातकर्म्मणा।
मानुषोत्तरमन्येन द्वीपं नन्दीश्वराह्वयम् ॥ ५ ॥
तस्मादायान्ति चैकेनोत्पातेनोत्पतिता यतः।
यान्त्यायान्त्यूर्द्धमार्गेऽपि तिर्य्यग्यानक्रमेण ते ॥ ६ ॥

अन्येऽपि बहुभेदाश्चारणा भवन्ति। तद्यथा आकाशगामिनः पर्य्यङ्कावस्थानिषण्णाः कायोत्सर्गशरीरा वा पादोत्क्षेपनिक्षेपक्रमादिना व्योमचारिणः। केचित्तु जलजङ्घाफलपुष्पपत्रश्रेण्यग्निशिखाधूमनीहारावश्यायमेघवारिधारामर्कटकतन्तुज्योतीरश्मिपवनाद्या

लम्बनगतिपरिणामकुशलाः । जलमुपेत्य वापीनिम्नगासमुद्रादिष्व-प्कायिकजीवानविराधयन्तो जले भूमाविव पादोत्क्षेपनिक्षेप-कुशला जलचारणाः । भुव उपरि चतुरङ्गुलप्रमिते आकाशे जङ्घा-निक्षेपोत्क्षेपनिपुणा जङ्घाचारणाः । नानाद्रुमफलान्युपादाय फला-श्रयप्राण्यविरोधेन फलतले पादोत्क्षेपनिक्षेपकुशलाः फलचारणाः । नानाद्रुमलतागुल्मपुष्पान्युपादाय पुष्पसूक्ष्मजीवानविराधयन्तः कुसुमतलदलावलम्बनसङ्गतयः पुष्पचारणाः। नानावृक्षगुल्मवीरु-ल्लतावितानानाप्रवालतरुणपल्लवालम्बनेन पर्णसूक्ष्मजीवानविरा-धयन्तश्चरणोत्क्षेपनिक्षेपपटवः पत्रचारणाः। चतुर्योजनशतोच्छ्रितस्य निषधस्य नीलस्य चाद्रेष्टङ्कच्छिन्नां श्रेणिमुपादायोपर्यधो वा पाद-पूर्वकमुत्तरणावतरणनिपुणाः श्रेणिचारणाः । अग्निशिखामुपादाय तेजःकायिकानविराधयन्तः स्वयमदह्यमानाः पादविहारनिपुणा अग्निशिखाचारणाः । धूमवर्त्तिं तिरश्चीनामूर्ध्वगां वा आलम्ब्या-स्खलितगमनास्कन्दिनो धूमचारणाः । नीहारमपष्टभ्याप्कायिक-पीडामजनयन्तो गतिमसङ्गामश्नुवाना नीहारचारणाः । अव-श्यायमाश्रित्य तदाश्रयजीवानुपरोधेन यान्तोऽवश्यायचारणाः । नभोवर्त्मनि प्रविततजलधरपटलपटास्तरणे जीवानुपघातिचङ्क्र-मणप्रभवो मेघचारणाः । प्रावृषेण्यादिजलधरादेर्विनिर्गतवारि-धारावलम्बनेन प्राणिपीडामन्तरेण यान्तो वारिधाराचारणाः । कुजवृक्षान्तरालभाविनभःप्रदेशेषु कुजवृक्षादिसम्बद्धमर्कटकतन्त्वा-लम्बनपादोद्धरणनिक्षेपायदाता मर्कटकतन्तूनच्छिन्दन्तो यान्तो मर्कटकतन्तुचारणाः । चन्द्रार्कग्रहनक्षत्राद्यन्यतमज्योतीरश्मिसम्ब-

अतिशयचरणाच्चारणा अतिशयगमनादित्यर्थः। तत्सम्पन्नलब्धिरित्यर्थः। आशीविषलब्धिर्निग्रहानुग्रहसामर्थ्यम्। अवधिज्ञानलब्धिर्मूर्त्तद्रव्यविषयं ज्ञानम्। मनःपर्य्यायज्ञानलब्धिर्मनोद्रव्यप्रत्यक्षीकरणशक्तिः। एता लब्धयो योगकल्पवृक्षस्य कुसुमभूताः। फलं तु केवलज्ञानं मोक्षो वा। भरतमरुदेव्युदाहरणाभ्यां वक्ष्यते।

तथाहि—

द्विविधाश्चारणा ज्ञेया जङ्घाविद्योत्थशक्तितः।
तत्राद्या रुचकद्वीपं यान्त्येकोत्पातलीलया ॥ १ ॥
वलन्तो रुचकद्वीपादेकेनोत्पतनेन ते।
नन्दीश्वरे समायान्ति द्वितीयेन यतो गताः ॥ २ ॥
ते चोर्ध्वगत्यामेकेन समुत्पतनकर्म्मणा।
गच्छन्ति पाण्डुकवनं मेरुशैलशिरःस्थितम् ॥ ३ ॥
ततोऽपि वलिता एकोत्पातेनायान्ति नन्दनम्।
उत्पातेन द्वितीयेन प्रथमोत्पातभूमिकाम् ॥ ४ ॥
विद्याचारणास्तु गच्छन्त्येकेनोत्पातकर्म्मणा।
मानुषोत्तरमन्येन द्वीपं नन्दीश्वराह्वयम् ॥ ५ ॥
तस्मादायान्ति चैकेनोत्पातेनोत्पतिता यतः।
यान्त्यायान्त्यूर्द्ध्वमार्गेऽपि तिर्य्यग्यानक्रमेण ते ॥ ६ ॥

अन्येऽपि बहुभेदाश्चारणा भवन्ति। तद्यथा आकाशगामिनः पर्य्यङ्कावस्थानिषण्णाः कायोत्सर्गशरीरा वा पादोत्क्षेपनिक्षेपक्रमं विना व्योमचारिणः। केचित्तु जलजङ्घाफलपुष्पपत्रश्रेण्यग्निशिखधूमनीहारावश्यायमेघवारिधारामर्कटकतन्तुज्योतीरश्मिपवनाद्य

लम्बनगतिपरिणामकुशलाः । जलमुपेत्य वापीनिम्नगासमुद्रादिष्व-प्कायिकजीवानविराधयन्तो जले भूमाविव पादोत्क्षेपनिक्षेप-कुशला जलचारणाः । भुव उपरि चतुरङ्गुलप्रमिते आकाशे जङ्घा-निक्षेपोत्क्षेपनिपुणा जङ्घाचारणाः । नानाद्रुमफलान्युपादाय फला-श्रयप्राण्यविरोधेन फलतले पादोत्क्षेपनिक्षेपकुशलाः फलचारणाः । नानाद्रुमलतागुल्मपुष्पान्युपादाय पुष्पसूक्ष्मजीवानविराधयन्तः कुसुमतलदलावलम्बनसङ्गतयः पुष्पचारणाः । नानावृक्षगुल्मवीरु-लतावितानानाप्रवालतरुणपल्लवालम्बनेन पर्णसूक्ष्मजीवानविरा-धयन्तश्चरणोत्क्षेपनिक्षेपपटवः पत्रचारणाः । चतुर्योजनशतोच्छ्रितस्य निषधस्य नीलस्य चाद्रेष्टङ्कच्छिन्नां श्रेणिमुपादायोपर्यधो वा पाद-पूर्वकमुत्तरणावतरणनिपुणाः श्रेणिचारणाः । अग्निशिखामुपादाय तेजःकायिकानविराधयन्तः स्वयमदह्यमानाः पादविहारनिपुणा अग्निशिखाचारणाः । धूमवर्त्तिं तिरश्चीनामूर्द्धगां वा आलम्ब्या-स्खलितगमनास्कन्दिनो धूमचारणाः । नीहारमपष्टभ्याप्कायिक-पीडामजनयन्तो गतिमसङ्गमामश्नुवाना नीहारचारणाः । अव-श्यायमाश्रित्य तदाश्रयजीवानुपरोधेन यान्तोऽवश्यायचारणाः । नभोवर्त्मनि प्रविततजलधरपटलपटास्तरणे जीवानुपघातिचङ्क्र-मणप्रभवो मेघचारणाः । प्रावृषेण्यादिजलधरादेर्विनिर्गतवारि-धारावलम्बनेन प्राणिपीडामन्तरेण यान्तो वारिधाराचारणाः । कुब्जवृक्षान्तरालभाविनभःप्रदेशेषु कुब्जवृक्षादिसम्बद्धमर्कटकतन्त्वा-लम्बनपादोद्धरणनिक्षेपायदाता मर्कटकतन्तूनच्छिन्दन्तो यान्तो मर्कटकतन्तुचारणाः । चन्द्रार्कग्रहनक्षत्राद्यन्यतमज्योतीरश्मिसम्ब-

अतिशयचरणाच्चारणा अतिशयगमनादित्यर्थः। तत्सम्पन्नलब्धिरित्यर्थः। आशीविषलब्धिर्निग्रहानुग्रहसामर्थ्यम्। अवधिज्ञानलब्धिर्मूर्त्तद्रव्यविषयं ज्ञानम्। मनःपर्य्यायज्ञानलब्धिर्मनोद्रव्यप्रत्यक्षीकरणशक्तिः। एता लब्धयो योगकल्पवृक्षस्य कुसुमभूताः। फल तु केवलज्ञानं मोक्षो वा। भरतमरुदेव्युदाहरणाभ्यां वक्ष्यते।

तथाहि—

द्विविधाश्चारणा ज्ञेया जङ्घाविद्योत्थशक्तितः।
तत्राद्या रुचकद्वीपं यान्त्येकोत्पातलीलया ॥ १ ॥
वलन्तो रुचकद्वीपादेकेनोत्पतनेन ते।
नन्दीश्वरे समायान्ति द्वितीयेन यतो गताः ॥ २ ॥
ते चोर्ध्वगत्यामेकेन समुत्पतनकर्म्मणा।
गच्छन्ति पाण्डुकवनं मेरुशैलशिरःस्थितम् ॥ ३ ॥
ततोऽपि वलिता एकोत्पातेनायान्ति नन्दनम्।
उत्पातेन द्वितीयेन प्रथमोत्पातभूमिकाम् ॥ ४ ॥
विद्याचारणास्तु गच्छन्त्येकेनोत्पातकर्म्मणा।
मानुषोत्तरमन्येन द्वीपं नन्दीश्वराह्वयम् ॥ ५ ॥
तस्मादायान्ति चैकेनोत्पातेनोत्पतिता यतः।
यान्त्यायान्त्यूर्द्धमार्गेऽपि तिर्य्यग्यानक्रमेण ते ॥ ६ ॥

अन्येऽपि बहुभेदाश्चारणा भवन्ति। तद्यथा आकाशगामिनः पर्य्यङ्कावस्थानिषण्णाः कायोत्सर्गशरीरा वा पादोत्क्षेपनिक्षेपक्रमादिना व्योमचारिणः। केचित्तु जलजङ्घाफलपुष्पपत्रश्रेण्यग्निशिखाधूमनीहारावश्यायमेघवारिधारामर्कटकतन्तुज्योतीरश्मिपवनाद्या-

नद्दिक्कोटाकोटिमिते सुषमदुःषमारके ।
पल्याष्टमांशशेषे च दक्षिणार्द्धस्य भारते ॥ ३ ॥
समाभूवन् कुलकरा इमे विमलवाहनः ।
चक्षुष्मांश्च यशस्वी चाभिचन्द्रोऽथ प्रसेनजित् ॥ ४ ॥
मरुदेवश्च नाभिश्च तत्र नाभेर्गृहिण्यभूत् ।
मरुदेवेति सच्छीलपवित्रितजगत्त्रया ॥ ५ ॥
तृतीयारस्य शेषेषु पूर्वलक्षेषु संख्यया ।
चतुरशीतौ सार्द्धाष्टमासे वर्षत्रयेऽपि च ॥ ६ ॥
तस्याश्च कुक्षौ सर्वार्थविमानादवतीर्णवान् ।
चतुर्दशमहास्वप्नसूचितः प्रथमो जिनः ॥ ७ ॥
नाभेश्च मरुदेव्याश्च तदा सम्यगजानतोः ।
स्वप्नार्थमिन्द्राः सर्वेऽपि व्याचख्युः प्रमदोन्मदाः ॥ ८ ॥
ततः सुखेन जातस्य शुभेऽह्नि परमेशितुः ।
षट्पञ्चाशत्दिक्कुमार्य्यः सूतिकर्म्म प्रचक्रिरे ॥ ९ ॥
मेरुमूर्द्ध्नि विभुं नीत्वा कृत्वोत्सङ्गे दिवस्पतिः ।
तीर्थोदकैरभ्यषिञ्चत्स्वं च हर्षाम्बुवारिभिः ॥ १० ॥
वासवेन ततो मातुरर्पितस्य जगद्गुरोः ।
धात्रीकर्म्माणि सर्व्वाणि विदधुर्विबुधस्त्रियः ॥ ११ ॥
निरीक्ष्य ऋषभाकारं लक्ष्मोरौ दक्षिणे प्रभोः ।
चक्रतुः पितरौ नाम ऋषभेति प्रमोदतः ॥ १२ ॥
अमन्दं ददानन्दं सुधारश्मिरिव प्रभुः ।
त्रिदशाहारयोगेन पोषितो ववृधे क्रमात् ॥ १३ ॥

न्धेन भुवीव पादविक्षेपकुशलाः ज्योतिश्चारणाः । पत्रे-ष्वनेकदिग्मुखोन्मुखेषु प्रतिलोमानुलोमगामिषु तदवलम्बनामुपादाय गतिमस्खलितचरणविन्यासामास्कन्दन्तो वायुचारणाः ।

तपश्चरणमाहात्म्यादुत्पादितलोऽपि ॥ ।
आशीविषाः समर्थाः स्युर्निग्रहेऽनुग्रहेऽपि च ॥ १ ॥
द्रव्याणि मूर्त्तिमन्त्येव विषयो यस्य सर्वतः ।
नैयत्यरक्षितं ज्ञानं तत्स्यादवधिलक्षणम् ॥ २ ॥
स्यान्मनःपर्य्ययो ज्ञानं मनुष्यक्षेत्रवर्त्तिनाम् ।
प्राणिनां समनस्कानां मनोद्रव्यप्रकाशकम् ॥ ३ ॥
ऋजुश्च विपुलश्चेति स्यान्मनःपर्य्ययो द्विधा ।
विशुद्धप्रतिपाताभ्यां विपुलस्तु विशिष्यते ॥ ४ ॥ ८ ॥

केवलज्ञानलक्षणफलोपदर्शनेन योगमेव स्तौति—

अहो योगस्य माहात्म्यं प्राज्यं साम्राज्यमुद्वहन् ।
अवाप केवलज्ञानं भरतो भरताधिपः ॥ १० ॥

अहो इत्याश्चर्य्ये प्राज्यं पुष्कलं साम्राज्यं चक्रवर्त्तित्वमुद्वहन्नेव न पुनस्त्यक्तराज्यसम्पत् । भरताधिपः षट्खण्डभरतक्षेत्रस्वामी । तथाहि—

एतस्यामवसर्प्पिण्यामेकान्तसुषमारके ।
सागरोपमकोटीनां चतुष्कोटिमिते गते ॥ १ ॥
सागरोपमकोटीनां तिसृभिः कोटिभिर्मिते ।
अरके सुषमानाम्नि द्वितीयेऽपि गते सति ॥ २ ॥

कन्दः पादाम्बुजस्येव पा
अङ्गुष्ठाङ्गुलिफणिनां फण
हेमारविन्दमुकुलकर्णिका
गूढौ गुल्फौ पितनाते नि
प्रभोः पादावुपर्यानुपूर्व्या
अप्रकाशसिरौ स्निग्धच्छ
अन्तर्मग्नास्थिपिशितपुष्
एणीजङ्घाविडम्बिन्यौ ज
जानुनी स्वामिनोऽधातां
तूलपूर्णपिधानान्तःक्षिप्त
ऊरू च मृदुलौ स्निग्धाव
बिभराश्चक्रतुः पीठकदल
स्वामिनः कुञ्जरस्येव मुष
अतिगूढं च पुंचिह्नं कुली
तथासिरमनिम्नोन्नतक्र
सरलं मृदु निर्लोम वर्त्तुल
शीतप्रदक्षिणावर्त्तमध्युत
अवीभक्तावर्त्ताकारकोश
आयता मांसला स्थूला

अन्येद्युर्गुणसंदोहः शक्रः प्रभुमुपागमत् ।
अचिन्तयद्भगवतो वंशः क इव स्थाप्यताम् ॥ १४ ॥
अवगत्य तदाकूतमवधिज्ञानतो विभुः ।
तत्करेक्षुलतां लातुं करौ प्रासारयत्तदा ॥ १५ ॥
तां समर्प्य जगद्भर्तुः प्रणम्य च बिडौजसा ।
इक्ष्वाकुरिति वंशस्य तदा नाम प्रतिष्ठितम् ॥ १६ ॥
बाल्यं कल्यमिवोल्लङ्घ्य मध्यन्दिनमिवांशुमान् ।
विभुर्विभक्तावयवं द्वितीयं शिश्रिये वयः ॥ १७ ॥
यौवनेऽपि मृदू रक्तौ कमलोदरसोदरौ ।
उष्णावकम्प्रावस्वेदौ पादौ समतलौ प्रभोः ॥ १८ ॥
नतार्त्तिच्छेदनायेव प्रपेदे चक्रमीयतुः ।
सदास्थितयोः करिणोरिव दामाङ्कुशध्वजाः ॥ १९ ॥
स्वामिनः पादयोर्लक्ष्मीलीलासदनयोरिव ।
शङ्खकुम्भौ तले पार्ष्णौ स्वस्तिकश्च विरेजिरे ॥ २० ॥
मांसलो वर्त्तुलस्तुङ्गो भुजङ्गमफणोपमः ।
अङ्गुष्ठः स्वामिनो वत्स इव श्रीवत्सलाञ्छितः ॥ २१ ॥
प्रभोर्निर्वातनिष्कम्पाः स्निग्धदीपशिखोपमाः ।
नीरन्ध्रा ऋजवोऽङ्गुल्यो दलानीव पदाब्जयोः ॥ २२ ॥
नन्द्यावर्त्ता जगद्भर्त्तुः पादाङ्गुलितलेष्वभान् ।
यद्विम्बानि क्षितौ धर्मप्रतिष्ठाहेतुतां ययुः ॥ २३ ॥
यवाः पर्वस्वङ्गुलीनामधोवापीभिराबभुः ।
उप्ता इव जगल्लक्ष्मीविवाहाय जगत्प्रभोः ॥ २४ ॥

कन्दः पादाम्बुजस्येव पार्ष्णिर्वृत्तायतः पृथुः ।
अङ्गुष्ठाङ्गुलिफणिनां फणामणिनिभा नखाः ॥ २५ ॥
हेमारविन्दमुकुलकर्णिकागोत्रकश्रियम् ।
गूढौ गुल्फौ वितेनाते नितान्तं स्वामिपादयोः ॥ २६ ॥
प्रभोः पादावुपर्यानुपूर्व्या कूर्मवदुन्नतौ ।
अप्रकाशसिरौ स्निग्धच्छवी लोमविवर्जितौ ॥ २७ ॥
अन्तर्मग्नास्थिपिशितपुष्कले क्रमवर्त्तुले ।
एणीजङ्घाविडम्बिन्यौ जङ्घे गौर्य्यौ जगत्पतेः ॥ २८ ॥
जानुनी स्वामिनोऽधातां वर्त्तुले मांसपूरिते ।
तूलपूर्णपिधानान्तःक्षिप्तदर्पणरूपताम् ॥ २९ ॥
ऊरू च मृदुलौ स्निग्धावानुपूर्व्येण पीवरौ ।
बिभराञ्चक्रतुः प्रौढकदलीस्तम्भविभ्रमम् ॥ ३० ॥
स्वामिनः कुञ्जरस्येव मुष्कौ गूढौ समस्थितौ ।
अतिगूढं च पुंश्चिह्नं कुलीनस्येव वाजिनः ॥ ३१ ॥
तथासिरमनिम्नोच्चमकृशादीर्घमश्लथम् ।
सरलं मृदु निर्लोम वर्त्तुलं सुरभीन्द्रियम् ॥ ३२ ॥
शीतप्रदक्षिणावर्त्तशब्दयुक्तैकधारकम् ।
अबीभत्सावर्त्ताकारकोशस्थं पिञ्जरं तथा ॥ ३३ ॥
आयता मांसला स्थूला विशाला कठिना कटिः ।
मध्यभागस्तनुत्वेन कुलिशोदरसोदरः ॥ ३४ ॥
नाभिर्बभार गम्भीरा सरिदावर्त्तविभ्रमम् ।
कुक्षी स्निग्धौ मांसवन्तौ कोमलौ सरलौ समौ ॥ ३५ ॥

अधाद्वक्षःस्थलं स्वर्णशिलापृथुलमुन्नतम् ।
श्रीवत्सरत्नपीठाङ्कं श्रीलीलावेदिकाश्रियम् ॥ ३६ ॥
दृढपीनोन्नतौ स्कन्धौ ककुद्मत्ककुदोपमौ ।
अल्परोमोन्नते कक्षे गन्धस्वेदमलोज्झिते ॥ ३७ ॥
पीनौ पाणिफणिच्छत्रौ भुजावाजानुलम्बितौ ।
चञ्चलाया नियमने नागपाशाविव श्रियः ॥ ३८ ॥
नवाम्रपल्लवाताम्रतलौ निष्कर्मकर्कशौ ।
अस्वेदनावपच्छिद्रावुष्णौ पाणी जगत्पतेः ॥ ३९ ॥
दण्डचक्रधनुर्मत्स्यश्रीवत्सकुलिशाङ्कुशैः ।
ध्वजाब्जचामरच्छत्रशङ्खकुम्भाब्धिमन्दरैः ॥ ४० ॥
मकरर्षभसिंहाश्वरथस्वस्तिकदिग्गजैः ।
प्रासादतोरणद्वीपैः पाणी पादाविवाङ्कितौ ॥ ४१ ॥
अङ्गुष्ठाङ्गुलयः शोणाः सरलाः शोणपाणिजाः ।
प्ररोहा इव कल्पद्रोः प्रान्तमाणिक्यपुष्पिताः ॥ ४२ ॥
यवाः स्पष्टमशोभन्त स्वामिनोऽङ्गुष्ठपर्वसु ।
यशोवरतुरङ्गस्य पुष्टिवैशिष्ट्यहेतवः ॥ ४३ ॥
अङ्गुलीमूर्द्धसु विभोः सर्वसम्पत्तिशंसिनः ।
दधुः प्रदक्षिणावर्त्ता दक्षिणावर्त्तशङ्खताम् ॥ ४४ ॥
कष्टादुद्धरणीयानि जगन्ति त्रीण्यपीत्यभान् ।
संख्यालेखा इव तिस्रो लेखा मूले कराब्जयोः ॥ ४५ ॥
वर्त्तुलोऽनतिदीर्घश्च लेखात्रयपवित्रितः ।
गम्भीरध्वनिराधत्त कण्ठः कम्बुविडम्बनाम् ॥ ४६ ॥

विमलं वर्त्तुलं कान्तितरङ्गि वदनं विभोः ।
पीयूषदीधितिरिवापरो लाञ्छनवर्जितः ॥ ४७ ॥
मसृणौ मांसलौ स्निग्धौ कपोलफलकौ प्रभोः ।
दर्पणाविव सौवर्णौ वाग्लक्ष्म्योः सद्मवासयोः ॥ ४८ ॥
अन्तरावर्त्तसुभगौ कर्णौ स्कन्धान्तलम्बितौ ।
प्रभोर्मुखप्रभासिन्धुतीरस्थे शुक्तिके इव ॥ ४९ ॥
ओष्ठौ बिम्बोपमौ दन्ता द्वात्रिंशत्कुन्दसोदराः ।
क्रमस्फारा क्रमोत्तुङ्गवंशा नासा महेशितुः ॥ ५० ॥
अङ्कस्वदोर्घं चिबुकं मांसलं वर्त्तुलं मृदु ।
मेचकं बहुलं स्निग्धं कोमलं श्मश्रु तायिनः ॥ ५१ ॥
प्रत्यग्रकल्पविटपिप्रवालारुणकोमला ।
प्रभोर्जिह्वानतिस्थूला द्वादशाङ्गागमार्थसूः ॥ ५२ ॥
अन्तरा कृष्णधवले प्रान्तरक्ते विलोचने ।
नीलस्फटिकशोणाश्ममणिन्यासमये इव ॥ ५३ ॥
ते च कर्णान्तविश्रान्ते कज्जलश्यामपक्ष्मणी ।
विकस्वरे तामरसे निलीनालिकुले इव ॥ ५४ ॥
बिभराञ्चक्रतुर्भर्त्तुः श्यामले कुटिले भ्रुवौ ।
दृष्टिपुष्करिणीतीरसमुद्भिन्नलताश्रियम् ॥ ५५ ॥
विशालं मांसलं वृत्तं मसृणं कठिनं समम् ।
भालस्थलं जगद्भर्त्तुरष्टमीसोमसोदरम् ॥ ५६ ॥
भुवनस्वामिनो मौलिरानुपूर्व्या समुन्नतः ।
दधावधोमुखीभूतच्छत्रसब्रह्मचारिताम् ॥ ५७ ॥

मौलिश्छत्रे महेशस्य जगदीशत्वशंसिनि ।
वृत्तमुत्तुङ्गमुष्णीषं शिश्रिये कलशश्रियम् ॥ ५८ ॥
केशाश्चकाशिरे मूर्द्ध्नि प्रभोर्भ्रमरमेचकाः ।
कुञ्चिताः कोमलाः स्निग्धाः कालिन्द्या इव वीचयः ॥५९॥
गोरोचनागर्भगौरी स्निग्धस्वच्छा त्वगाबभौ ।
स्वर्णद्रवविलिप्तेव तनौ त्रिजगदीशितुः ॥ ६० ॥
मृदूनि भ्रमरश्यामान्यद्वितीयोद्गमानि च ।
बिसतन्तुतनीयांसि लोमानि स्वामिनस्तनौ ॥ ६१ ॥
उत्फुल्लकुमुदामोदः श्वासो विस्रेतरत्पलम् ।
गोक्षीरधाराधवलं रुधिरं च जगत्पतेः ॥ ६२ ॥
इत्यसाधारणैर्नानालक्षणैर्लक्षितः प्रभुः ।
रत्नै रत्नाकर इव सेव्यः कस्येह नाभवत् ॥ ६३ ॥
अन्येद्युः क्रीडया क्रीडद्बालभावानुरूपया ।
मिथो मिथुनकं किञ्चित्तले तालतरोरगात् ॥ ६४ ॥
तदैव दैवदुर्योगात्तस्याध्यान्नरमूर्द्धनि ।
तडिद्दण्ड इवैरण्डेऽपतत्तालफलं महत् ॥ ६५ ॥
प्रहतः काकतालीयन्यायेनाश्वेव मर्मणि ।
विपन्नो दारकस्तत्र प्रथमेनापमृत्युना ॥ ६६ ॥
बालधर्म्यं गते तस्मिंस्तद्द्वितीया नितम्बिनी ।
यूथभ्रष्टा कुरङ्गीव किंकर्तव्यजडाभवत् ॥ ६७ ॥
अकाण्डभूकराघातेनेव तेनापमृत्युना ।
अमूर्च्छितानीव मिथुनान्यपराण्यपि ॥ ६८ ॥

तानि तामथतः कृत्वा नारीं पुरुषवर्ज्जिताम् ।
किंकर्त्तव्यविमूढानि श्रीनाभेरुपनिन्यिरे ॥ ६९ ॥
एषा वृषभनाथस्य धर्म्मपत्नी भवत्विति ।
प्रतिजग्राह तां नाभिर्नेत्रकैरवकौमुदीम् ॥ ७० ॥
अन्यदा तु [1]विभोरुग्रप्राग्भोगफलकर्म्मणः ।
आगादिन्द्रो विवाहार्थं वृन्दारकगणान्वितः ॥ ७१ ॥
ततः स्वर्णमयस्तम्भभ्राजिष्णुमणिपुत्रिकम् ।
अनेकनिर्गमद्वारमकार्षुर्मण्डपं सुराः ॥ ७२ ॥
श्वेतदिव्यांशुकोष्णीषोच्चूलेन गगनस्थया ।
गङ्गयेवाश्रितः सोऽभूद्भूरिशोभादिदृक्षया ॥ ७३ ॥
तोरणानि चतुर्दिक्षु सन्तानतरुपल्लवैः ।
तत्राभूवन् धनूंषीव सज्जितानि मनोभुवा ॥ ७४ ॥
चतस्रो रत्नकलशश्रेणयो[2]ऽभ्रंलिहाग्रगाः ।
पर्य्यस्थाप्यन्त देवीभिर्निधानानि रतेरिव ॥ ७५ ॥
वप्तुमण्डपद्वारि चेलोत्क्षेपं पयोमुचः ।
चक्रे मध्ये सुरीभिर्भूः पङ्किला यक्षकर्द्दमैः ॥ ७६ ॥
वाद्यमानेषु तूर्य्येषु गीयमाने च मङ्गले ।
अवादयन्नगायंश्च प्रतिशब्दैर्दिगङ्गनाः ॥ ७७ ॥
सुमङ्गलासुनन्दाभ्यां कुमारीभ्यामकारयत् ।
वासवः परमेशस्य पाणिग्रहमहोत्सवम् ॥ ७८ ॥

---

(१) क ख विभोरभ्युदयद्भोगफलकर्म्मणः । (२) ख ग अभ्रंलिहापकाः ।

ततः सुमङ्गलादेवी देवैः प्रकृतमङ्गला ।
अपत्ये भरतब्राह्मी युग्मरूपे प्रजीजनत् ॥ ७९ ॥
त्रैलोक्यजनितानन्दा सुनन्दा सुषुवे युगम् ।
सुबाहुं बाहुबलिनं सुन्दरीं चातिसुन्दरीम् ॥ ८० ॥
पुनरेकोनपञ्चाशत्पुंयुगानि सुमङ्गला ।
असूत बलिनो मूर्त्तान् द्वैरूप्येणेव मारुतान् ॥ ८१ ॥
अन्येद्युरन्याय इति पूत्कारोद्धृतबाहुभिः ।
नाभिर्व्यज्ञपि सम्भूय सर्व्वैर्मिथुनकैरिदम् ॥ ८२ ॥
तिस्रो हकारमकारधिक्काराख्याः सुनीतयः ।
न गण्यन्तेऽधुना पुम्भिः कुर्व्वद्भिरसमञ्जसम् ॥ ८३ ॥
ततः कुलकरोऽप्यूचे त्रातास्मादसमञ्जसात् ।
एष वो वृषभः स्वामी तद्वर्त्तध्वं तदाज्ञया ॥ ८४ ॥
तदा कुलकराज्ञातः कर्त्तुं राज्यस्थितिं स्फुटाम् ।
प्रभुर्ज्ञानत्रयमयो मिथुनान्येवमन्वशात् ॥ ८५ ॥
राजा भवति मर्य्यादाव्यतिक्रमनिरोधकः ।
तस्योच्चासनदानेनाभिषेकः क्रियते जलैः ॥ ८६ ॥
आकर्ण्य वचनं भर्त्तुस्ते सर्व्वे युग्मधर्म्मिणः ।
तच्छिच्चया ययुः पद्मपुटैर्जलजिघृक्षया ॥ ८७ ॥
तदा चासनकम्पेनावधिज्ञानप्रयोगतः ।
विज्ञातभगवद्राज्यसमयः शक्र आययौ ॥ ८८ ॥
रत्नसिंहासनेऽध्यास्य वासवः परमेश्वरम् ।
साम्राज्येऽभिषिषेचालञ्चक्रे च मुकुटादिभिः ॥ ८९ ॥

इतश्चाम्भोजिनीपत्रपुटैरञ्जलिधारितैः ।
निजं मन इव स्वच्छमानिन्ये मिथुनैर्जलम् ॥ ९० ॥
उदयाद्रिमिवार्केण मुकुटेनोपशोभितम् ।
अत्यन्तविमलैर्वस्त्रैर्व्योमेव शरदम्बुदैः ॥ ९१ ॥
हंसैरिव शरत्कालं सत्वरश्चारुचामरैः ।
कृताभिषेकं नाभेयं दृष्ट्वास्तानि विस्मयात् ॥ ९२ ॥ (युग्मं)
नैतद्युक्तं प्रभोर्मूर्ध्नि क्षेप्तुमेवं विमर्शिभिः ।
विनीतैर्मिथुनैर्वारि निदधे पादपद्मयोः ॥ ९३ ॥
योजनान्यथ विस्तीर्णां नव द्वादश चायताम् ।
विनीताख्यां पुरीं कर्त्तुं श्रीदमुक्त्वा हरिर्ययौ ॥ ९४ ॥
सोऽपि रत्नमयीं भूमेर्माणिक्यमुकुटोपमाम् ।
व्यधात् द्विषामयोध्येति तामयोध्यापराभिधाम् ॥ ९५ ॥
तां च निर्माय निर्मायः पूरयामास यक्षराट् ।
अक्षय्यरत्नवसनधनधान्यैर्निरन्तरम् ॥ ९६ ॥
वज्रेन्द्रनीलवैडूर्यहर्म्यकिर्म्मीररश्मिभिः ।
भित्तिं विनापि खे तत्र चित्रकर्म्म विरच्यते ॥ ९७ ॥
तदग्रे दीप्रमाणिक्यकपिशीर्षपरम्पराः ।
अयत्नादर्शतां यान्ति चिरं खेचरयोषिताम् ॥ ९८ ॥
तस्यां गृहाङ्गणभुवि स्वस्तिकन्यस्तमौक्तिकैः ।
स्वैरं कर्क्करकक्रीडां कुरुते बालिकाजनः ॥ ९९ ॥
तत्रोद्यानोच्चवृक्षाग्रस्खलन्मानान्यहर्निशम् ।
खेचरीणां विमानानि क्षणं यान्ति कुलायताम् ॥ १०० ॥

तत्र दृष्ट्वाऽट्टहर्म्येषु रत्नराशीन् समुच्छ्रितान् ।
तदवकरकूटोऽयं तर्क्यते रोहणाचलः ॥ १ ॥
संसारिणो द्विधा जीवाः स्थावरत्रसभेदतः ।
द्वितीयेऽपि द्विधा पर्याप्तापर्याप्तविशेषतः ॥ ४ ॥
पर्याप्तयस्तु षड़िमाः पर्याप्तत्वनिबन्धनम् ।
आहारो वपुरक्षाणि प्राणा भाषा मनोऽपि च ॥ ५ ॥
स्युरेकाक्षविकलाक्षपञ्चाक्षाणां शरीरिणाम् ।
चतस्रः पञ्च षड्वापि पर्याप्तयो यथाक्रमम् ॥ ६ ॥
एकाक्षाः स्थावरा भूम्यप्तेजोवायुमहीरुहः ।
तेषां तु पूर्वे चत्वारः स्युः सूक्ष्मा बादरा अपि ॥ ७ ॥
प्रत्येकाः साधारणाश्च द्विप्रकारा महीरुहः ।
तत्र पूर्वे बादराः स्युरुत्तरे सूक्ष्मबादराः ॥ ८ ॥
त्रसा द्वित्रिचतुष्पञ्चेन्द्रियत्वेन चतुर्विधाः ।
तत्र पञ्चेन्द्रिया द्वेधा संज्ञिनोऽसंज्ञिनोऽपि च ॥ ९ ॥
शिक्षोपदेशालापान्ये जानते तेऽत्र संज्ञिनः ।
संप्रवृत्तमनःप्राणास्तेभ्योऽन्ये स्युरसंज्ञिनः ॥ १० ॥
स्पर्शनं रसनं घ्राणं चक्षुः श्रोत्रमितीन्द्रियम् ।
तस्य स्पर्शो रसो गन्धो रूपं शब्दश्च गोचरः ॥ ११ ॥
द्वीन्द्रियाः कृमयः शङ्खा गण्डूपदजलौकसः ।
कपर्दाः शुक्तिकाद्याश्च विविधाकृतयो मताः ॥ १२ ॥
यूकामत्कुणमत्कोटलिक्षाद्यास्त्रीन्द्रिया मताः ।
पतङ्गमक्षिकाभृङ्गदंशाद्याश्चतुरिन्द्रियाः ॥ १३ ॥

ऐहिकामुष्मिकसुखसाधनत्वेन अर्थकामाभ्यां यद्यप्युत्कृष्यते तथापि कनकनिगडरूपपुण्यकर्मबन्धननिबन्धनत्वाद्भवभ्रमणहेतुरिति नाग्रणीः। मोक्षस्तु पुण्यपापक्षयलक्षणो न क्लेशबहुलो न वा विषसम्पृक्तान्नवदापातरमणीयः परिणामदुःखदायी नवा ऐहिकामुष्मिकफलाशंसादोषदूषित इति भवति परमानन्दमयश्चतुर्वर्गेऽग्रणीः यः। तस्य च कारणं साधकतमं करणं योगः। तस्य किं रूपमित्याह। रत्नत्रयं मरकतादिव्यवच्छेदेनाह। ज्ञानश्रद्धानचारित्ररूपमिति ॥ १५ ॥

रत्नत्रये प्रथमं ज्ञानस्वरूपमाह—

यथावस्थिततत्त्वानां संक्षेपाद्विस्तरेण वा।
योऽवबोधस्तमत्राहुः सम्यग्ज्ञानं मनीषिणः ॥ १६ ॥

यथावस्थितानि नयप्रमाणप्रतिष्ठितस्वरूपाणि यानि तत्त्वानि जीवाजीवाश्रवसंवरनिर्जराबन्धमोक्षलक्षणानि तेषां योऽवबोधस्तत्सम्यग्ज्ञानं स चावबोधः क्षयोपशमविशेषात्कस्यचित्संक्षेपेण कर्मक्षयाच्च कस्यचिद्विस्तरेण।

तथाहि—

जीवाजीवावाश्रवश्च संवरो निर्जरा तथा।
बन्धो मोक्षश्चेति सप्त तत्त्वान्याहुर्मनीषिणः ॥ १ ॥
तत्र जीवा द्विधा ज्ञेया मुक्तसंसारिभेदतः।
अनादिनिधनाः सर्वे ज्ञानदर्शनलक्षणाः ॥ २ ॥

एवं स्थानानि जीवानामशेषाणि चतुर्दश ।
सर्वज्ञोपज्ञमुक्तानि सर्वेषामपि जन्मिनाम् ॥ २३ ॥
एकाक्षा बादराः सूक्ष्माः पञ्चाक्षाः संज्ञ्यसंज्ञिनः ।
स्युर्द्वित्रिचतुरक्षाश्च पर्याप्ता इतरेऽपि च ॥ २४ ॥
एतानि जीवस्थानानि जिनोक्तानि चतुर्दश ।
मार्गणा अपि तावन्त्यो ज्ञेयास्ता नामतो यथा ॥ २५ ॥
गतीन्द्रियवपुर्योगवेदज्ञानक्रुदादयः ।
संयमाहारदृग्लेश्याभव्यसम्यक्त्वसंज्ञिनः ॥ २६ ॥
मिथ्यादृष्टिः सास्वादनसम्यग्मिथ्यादृशावपि ।
अविरतसम्यग्दृष्टिर्विरताविरतोऽपि च ॥ २७ ॥
प्रमत्तश्चाप्रमत्तश्च निवृत्तिबादरस्ततः ।
अनिवृत्तिबादरश्चाथ सूक्ष्मसंपरायकः ॥ २८ ॥
ततः प्रशान्तमोहश्च क्षीणमोहश्च योगवान् ।
अयोगवानिति गुणस्थानानि स्युश्चतुर्दश ॥ २९ ॥
मिथ्यादृष्टिर्भवेन्मिथ्यादर्शनस्योदये सति ।
गुणस्थानत्वमेतस्य भद्रकत्वाद्यपेक्षया ॥ ३० ॥
मिथ्यात्वस्यानुदयेऽनन्तानुबन्ध्युदये सति ।
सास्वादनः सम्यग्दृष्टिः स्यादुत्कर्षात् षडावलीः ॥ ३१ ॥
सम्यक्त्वमिथ्यात्वयोगान्मुहूर्त्तं मिश्रदर्शनः ।
अविरतसम्यग्दृष्टिरप्रत्याख्यानकोदये ॥ ३२ ॥
विरताविरतस्तु स्यात्प्रत्याख्यानोदये सति ।
प्रमत्तसंयतः प्राप्तसंयमो यः प्रमाद्यति ॥ ३३ ॥

तिर्यग्योनिभवाः शेषा जलस्थलखचारिणः ।
नारका [1]मानवा देवाः सर्वे पञ्चेन्द्रिया मताः ॥ १४ ॥

मनोभाषाकायबलत्रयमिन्द्रियपञ्चकम् ।
आयुरुच्छ्वासनिःश्वासमिति प्राणा दश स्मृताः ॥ १५ ॥

सर्वजीवेषु देहायुरुच्छ्वासा इन्द्रियाणि च ।
विकलासंज्ञिनां भाषा पूर्णानां संज्ञिनां मनः ॥ १६ ॥

उपपादभवा [2]देवा नारका गर्भजाः पुनः ।
जरायुपोताण्डभवाः शेषाः सम्मूर्च्छनोद्भवाः ॥ १७ ॥

सम्मूर्च्छिनो नारकाश्च जीवाः पापा नपुंसकाः ।
देवास्तु स्त्रीपुंवेदाः[3] स्युर्वेदत्रयजुषः परे ॥ १८ ॥

सर्वे जीवा व्यवहार्यव्यवहारितया द्विधा ।
सूक्ष्मनिगोदा एवान्त्या[4]स्तेभ्योऽन्ये व्यवहारिणः ॥ १९ ॥

सचित्तः संवृत्तः शीतस्तदन्यो मिश्रितोऽपि वा ।
विभेदैरान्तरैर्भिन्नो नवधा योनिरङ्गिनाम् ॥ २० ॥

प्रत्येकं सप्तलक्षाणि पृथ्वीवार्यग्निवायुषु ।
प्रत्येकानन्तकायेषु क्रमाद्दश चतुर्दश ॥ २१ ॥

षट् पुनर्विकलाक्षेषु मनुष्येषु चतुर्दश ।
स्युश्चतस्रश्चतस्रश्च श्वभ्रतिर्यक्सुरेषु तु ॥ २२ ॥

---

(१) खं ङ मनुजाः ।
(२) क ख ङ देवनारकाः ।
(३) ख ग च देवाः स्त्रीपुंसवेदाः ।
(४) ख ग ङ तेऽन्येऽपि व्यवहारिणः ।

तिर्यग्योनिभवाः शेषा जलस्थलखचारिणः ।
नारका [1]मानवा देवाः सर्वे पञ्चेन्द्रिया मताः ॥ १४ ॥

मनोभाषाकायबलत्रयमिन्द्रियपञ्चकम् ।
आयुरुच्छ्वासनिःश्वासमिति प्राणा दश स्मृताः ॥ १५ ॥

सर्वजीवेषु देहायुरुच्छ्वासा इन्द्रियाणि च ।
विकलासंज्ञिनां भाषा पूर्णानां संज्ञिनां मनः ॥ १६ ॥

उपपादभवा [2]देवा नारका गर्भजाः पुनः ।
जरायुपोताण्डभवाः शेषाः सम्मूर्च्छनोद्भवाः ॥ १७ ॥

सम्मूर्च्छिनो नारकाश्च जीवाः पापा नपुंसकाः ।
देवास्तु स्त्रीपुंवेदाः[3] स्युर्वेदत्रयजुषः परे ॥ १८ ॥

सर्वे जीवा व्यवहार्यव्यवहारितया द्विधा ।
सूक्ष्मनिगोदा एवान्त्या[4]स्तेभ्योऽन्ये व्यवहारिणः ॥ १९ ॥

सचित्तः संवृत्तः शीतस्तदन्यो मिश्रितोऽपि वा ।
त्रिभेदैरान्तरैर्भिन्नो नवधा योनिरङ्गिनाम् ॥ २० ॥

प्रत्येकं सप्तलक्षाणि पृथ्वीवार्यग्निवायुषु ।
प्रत्येकानन्तकायेषु क्रमाद्दश चतुर्दश ॥ २१ ॥

षट् पुनर्विकलाक्षेषु मनुष्येषु चतुर्दश ।
स्युश्चतस्रश्चतस्रश्च श्वभ्रतिर्यक्सुरेषु तु ॥ २२ ॥

---

१ [illegible]
२ [illegible]
३ [illegible] देवाः स्त्रीपुंवेदाः ।
४ [illegible] तेऽन्येऽपि व्यवहारिणः ।

एवं लक्षाणि योनीनामशीतिश्चतुरुत्तरा ।
सर्वज्ञोपज्ञमुक्तानि सर्वेषामपि जन्मिनाम् ॥ २३ ॥

एकाक्षा बादराः सूक्ष्माः पञ्चाक्षाः संज्ञसंज्ञिनः ।
स्युर्द्वित्रिचतुरक्षाश्च पर्याप्ता इतरेऽपि च ॥ २४ ॥

एतानि जीवस्थानानि जिनोक्तानि चतुर्दश ।
मार्गणा अपि तावन्त्यो ज्ञेयास्ता नामतो यथा ॥ २

गतीन्द्रियवपुर्योगवेदज्ञानक्रुदादयः ।
संयमाहारदृग्लेश्याभव्यसम्यक्त्वसंज्ञिनः ॥ २६ ॥

मिथ्यादृष्टिः सास्वादनसम्यग्मिथ्यादृशावपि ।
अविरतसम्यग्दृष्टिर्विरताविरतोऽपि च ॥ २७ ॥

प्रमत्तश्चाप्रमत्तश्च निवृत्तिबादरस्ततः ।
अनिवृत्तिबादरश्चाथ सूक्ष्मसंपरायकः ॥ २८ ॥

ततः प्रशान्तमोहश्च क्षीणमोहश्च योगवान् ।
अयोगवानिति गुणस्थानानि स्युश्चतुर्दश ॥ २९ ॥

मिथ्यादृष्टिर्भवेन्मिथ्यादर्शनस्योदये सति ।
गुणस्थानत्वमेतस्य भद्रकत्वाद्यपेक्षया ॥ ३० ॥

मिथ्यात्वस्यानुदयेऽनन्तानुबन्ध्युदये सति ।
सास्वादनः सम्यग्दृष्टिः स्यादुत्कर्षात् षडावलीः ॥ ३

सम्यक्त्वमिथ्यात्वयोगान्मुहूर्त्तं मिश्रदर्शनः ।
अविरतसम्यग्दृष्टिरप्रत्याख्यानकोदये ॥ ३२ ॥

विरताविरतस्तु स्यात्प्रत्याख्यानोदये सति ।
प्रमत्तसंयतः प्राप्तसंयमो यः प्रमाद्यति ॥ ३३ ॥

तिर्यग्योनिभवाः शेषा जलस्थलखचारिणः ।
नारका [1]मानवा देवाः सर्वे पञ्चेन्द्रिया मताः ॥ १४ ॥

मनोभाषाकायबलत्रयमिन्द्रियपञ्चकम् ।
आयुरुच्छ्वासनिःश्वासमिति प्राणा दश स्मृताः ॥ १५ ॥

सर्वजीवेषु देहायुरुच्छ्वासा इन्द्रियाणि च ।
विकलासंज्ञिनां भाषा पूर्णानां संज्ञिनां मनः ॥ १६ ॥

उपपादभवा [2]देवा नारका गर्भजाः पुनः ।
जरायुपोताण्डभवाः शेषाः सम्मूर्च्छनोद्भवाः ॥ १७ ॥

सम्मूर्च्छिनो नारकाश्च जीवाः पापा नपुंसकाः ।
देवास्तु स्त्रीपुंवेदाः[3] स्युर्वेदत्रयजुषः परे ॥ १८ ॥

सर्वे जीवा व्यवहार्यव्यवहारितया द्विधा ।
सूक्ष्मनिगोदा एवान्त्या[4]स्तेभ्योऽन्ये व्यवहारिणः ॥ १९ ॥

सचित्तः संवृत्तः शीतस्तदन्यो मिश्रितोऽपि वा ।
विभेदैरान्तरैर्भिन्नो नवधा योनिरङ्गिनाम् ॥ २० ॥

प्रत्येकं सप्तलक्षाणि पृथ्वीवार्यग्निवायुषु ।
प्रत्येकानन्तकायेषु क्रमाद्दश चतुर्दश ॥ २१ ॥

षट् पुनर्विकलाक्षेषु मनुष्येषु चतुर्दश ।
स्युश्चतस्रश्चतस्रश्च श्वभ्रतिर्यक्सुरेषु तु ॥ २२ ॥

---

(१) क छ मनुजाः । (२) क ख छ देवनारकाः ।
(३) ख ग च देवाः स्त्रीपुंसवेदाः । (४) ख ग छ तेऽन्येऽपि व्यवहारिणः ।

[illegible] क्व [illegible] ।
[illegible] ॥ ४४ ॥
[illegible] ।
[illegible] ॥ ४५ ॥
[illegible] ।
[illegible] ॥ ४६ ॥
[illegible] सर्वत्रापि च ।
[illegible] विपरीतान्यपि च सर्वदा ॥ ४७ ॥
[illegible] ।
[illegible] सर्वात्मना [illegible] ॥ ४८ ॥
[illegible] ।
[illegible] वाञ्छताम् ॥ ४९ ॥
जीवानां पुद्गलानां च [illegible] स्थितिम् ।
[illegible] ॥ ५० ॥
[illegible] ।
लोकालोकौ स्थितं व्याप्य तदनन्तप्रदेशभाक् ॥ ५१ ॥
लोकाकाशप्रदेशस्था भिन्नाः कालाणवस्तु ये ।
भावानां परिवर्ताय मुख्यः कालः स उच्यते ॥ ५२ ॥
ज्योतिःशास्त्रे यस्य मानमुच्यते समयादिकम् ।
स व्यावहारिकः कालः कालवेदिभिराहतः ॥ ५३ ॥

---

(१) [illegible] सर्वत्रापि ।

नवजीर्णादिरूपेण यदमी भुवनोदरे ।
पदार्थाः परिवर्त्तन्ते तत्कालस्यैव चेष्टितम् ॥ ५४ ॥
वर्त्तमाना अतीतत्वं भाविनो वर्त्तमानताम् ।
पदार्थाः प्रतिपद्यन्ते कालक्रीडाविडम्बिताः ॥ ५५ ॥

॥ इति अजीवतत्त्वम् ॥

मनोवचनकायानां यत्स्यात्कर्म्म स आश्रवः ।
शुभः शुभस्य हेतुः स्यादशुभस्त्वशुभस्य च ॥ ५६ ॥

॥ इति आश्रवः ॥

सर्वेषामास्रवाणां यो रोधहेतुः स संवरः ।
कर्मणां भवहेतूनां जरणादिह निर्जरा ॥ ५७ ॥

॥ इति संवरनिर्जरे ॥

वक्ष्यन्ते भावनास्वेवास्रवसंवरनिर्जराः ।
तन्नात्र विस्तरेणोक्ताः पुनरुक्तत्वभीरुभिः ॥ ५८ ॥
सकषायतया जीवः कर्म्मयोग्यांस्तु पुद्गलान् ।
यदादत्ते स बन्धः स्याज्जीवास्वातन्त्र्यकारणम् ॥ ५९ ॥
प्रकृतिस्थित्यनुभागप्रदेशा विधयोऽस्य तु ।
प्रकृतिस्तु स्वभावः स्यात् ज्ञानावृत्त्यादिरष्टधा ॥ ६० ॥
ज्ञानदृष्ट्यावृती वेद्यं मोहनीयायुषी अपि ।
नामगोत्रान्तरायाश्च मूलप्रकृतयो मताः ॥ ६१ ॥
निकर्षोत्कर्षतः कालनियमः कर्म्मणां स्थितिः ।
अनुभागो विपाकः स्यात्प्रदेशोऽंशप्रकल्पनम् ॥ ६२ ॥

अशेषद्रव्यपर्यायविषयं विश्वलोचनम् ।
अनन्तमेकमत्यक्षं [1]केवलज्ञानमुच्यते ॥ ७२ ॥
एवं च पञ्चभिर्ज्ञानैर्ज्ञाततत्त्वसमुच्चयः ।
अपवर्गहेतो रत्नत्रयस्याद्याङ्गभाग्भवेत् ॥ ७३ ॥
भवविटपिसमूलोन्मूलने मत्तदन्ती
जडिमतिमिरनाशे पद्मिनीप्राणनाथः ।
नयनमपरमेतद्विश्वतत्त्वप्रकाशे ।
करणहरिणबन्धे वागुरा ज्ञानमेव ॥ ७४ ॥ १६ ॥

द्वितीयं रत्नमाह—

रुचिर्जिनोक्ततत्त्वेषु सम्यक्श्रद्धानमुच्यते ।
जायते तन्निसर्गेण गुरोरधिगमेन वा ॥ १७ ॥

जिनोक्तेषु तत्त्वेषु जीवादिसूक्तस्वरूपेषु या रुचिस्तत् श्रद्धानम्। न
ज्ञानमित्येव रुचिं विना फलसिद्धिः । शाकान्नादिस्वरूपवेदिना
रुचिरहितेन न सौहित्यलक्षणं फलमवाप्यते । श्रुतज्ञानवतो
ङ्गारमर्दकादेरभव्यस्य दूरभव्यस्य वा जिनोक्ततत्त्वेषु रुचिरहि
न विवक्षितं फलमुपभुज्यते । तस्य चोत्पादे द्वयी गतिः नि
ऽधिगमश्च । निसर्गः स्वभावो गुरूपदेशादिनिरपेक्षः सम्यक्श्र
कारणम् ।

(१) ध अ केवलं ज्ञानम् ।

पात्रमु[illegible]ति [illegible] ।
निसर्गे[illegible] तदिदं सम्यक्श्रद्धानमुच्यते ॥ १० ॥
गुरूपदेशमालम्ब्य सर्वेषामपि देहिनाम् ।
यत्तु सम्यक्श्रद्धानं तदाधिगमजं परम् ॥ ११ ॥
यमप्रशमजीवातुर्बीजं ज्ञानचरित्रयोः ।
हेतुस्तपःश्रुतादीनां सद्दर्शनमुदीरितम् ॥ १२ ॥
श्लाघ्यं हि चरणज्ञानवियुक्तमपि दर्शनम् ।
न पुनर्ज्ञानचारित्रे मिथ्यात्वविषदूषिते ॥ १३ ॥
ज्ञानचारित्रहीनोऽपि श्रूयते श्रेणिकः किल ।
सम्यग्दर्शनमाहात्म्यात्तीर्थकृत्त्वं प्रपत्स्यते ॥ १४ ॥
अश्रुतचरणबोधाः प्राणिनो यत्प्रभावा-
दसमसुखनिधानं मोक्षमासादयन्ति ।
भवजलनिधिपोतं दुःखकान्तारदावम् ।
श्रयत तदिह सम्यग्दर्शनं रत्नमेकम् ॥ १५ ॥ १७ ॥

तृतीयं रत्नमाह—

सर्वसावद्ययोगानां त्यागश्चारित्रमिष्यते ।
कीर्त्तितं तदहिंसादिव्रतभेदेन पञ्चधा ॥ १८ ॥

सर्वे न तु कतिपये ये सावद्ययोगाः सपापव्यापारास्तेषां त्यागो ज्ञानश्रद्धानपूर्वकं परिहारः स सम्यक्चारित्रं ज्ञानदर्शनं विना कृतस्य चारित्रस्य सम्यक्चारित्रत्वानुपपत्तेः । सर्वग्रहणं देशचारित्रव्यवच्छेदार्थम् । इदं च चारित्रं मूलोत्तरगुणभेदेन

ं कीर्तितमित्यादिना मूलगुणरूपं चारित्रमाह । पञ्चेति
ेदेन न तु स्वरूपतः ॥ १८ ॥

मूलगुणानेव कीर्तयति —

अहिंसासूनृतास्तेयब्रह्मचर्यापरिग्रहाः ।
पञ्चभिः पञ्चभिर्युक्ता भावनाभिर्विमुक्तये ॥१९॥

हिंसादयश्च पञ्चापि प्रत्येकं पञ्चविधभावनाभ्यर्हिताः सन्तः स्व-
र्यजननं प्रति अप्रतिबद्धसामर्थ्या भवन्तीति पञ्चभिरित्या-
क्तम् ॥ १९ ॥

प्रथमं मूलगुणमाह —

न यत्प्रमादयोगेन जीवितव्यपरोपणम् ।
त्रसानां स्थावराणां च तदहिंसाव्रतं मतम् ॥२०॥

ादोऽज्ञानसंशयविपर्ययरागद्वेषस्मृतिभ्रंशयोगदुष्प्रणिधानधर्मा—
दरभेदादष्टविधः । तद्योगात्त्रसानां स्थावराणां च जीवानां
तव्यपरोपणं हिंसा । तन्निषेधादहिंसा प्रथमं व्रतम् ॥ २० ॥

द्वितीयमाह—

प्रियं पथ्यं वचस्तथ्यं सूनृतव्रतमुच्यते ।
तत्तथ्यमपि नो तथ्यमप्रियं चाहितं च यत् ॥२१॥

यं वचोऽमृषारूपमुच्यमानं सूनृतव्रतमुच्यते । किं विशिष्टं तथ्यं

प्रियं पथ्यं च तत्र प्रियं यत् श्रुतमात्रं प्रीणयति पथ्यं यदायतौ हितम्। ननु तथ्यमेवैकं विशेषणमस्तु सत्यव्रताभिधानात् किं पथ्याभ्यां कोऽभिप्रायः। सत्यमाह। न तथ्यमपीति [illegible] तथ्यमपि यदप्रियं यथा चौरं प्रति चौरस्त्वं कुष्ठिनं प्रति कुष्ठी त्वमिति तदप्रियत्वान्न तथ्यम्। तथ्यमप्यहितं यथा। मृगयुभिः पृष्टस्यारण्ये मृगान् दृष्टवतो मया मृगा दृष्टा इति तदनुघातहेतुत्वान्न तथ्यम् ॥ २१ ॥

तृतीयमाह—

अनादानमदत्तस्यास्तेयव्रतमुदीरितम्।
बाह्याः प्राणा नृणामर्थो हरता तं हता हि ते ॥२२॥

वित्तस्वामिना अदत्तस्य वित्तस्य यदनादानं तदस्तेयव्रतम्। त स्वामिजीवतीर्थकरगुर्व्वदत्तभेदेन चतुर्विधम्। तत्र स्वाम्यद तृणोपलकाष्ठादिकं तत्स्वामिना यददत्तम्। जीवादत्तं यत्स्वामि नादत्तमपि जीवेनादत्तं यथा प्रव्रज्यापरिणामविकलो मातापितृ पुत्रादि गुरुभ्यो दीयते। तीर्थंकरादत्तं यत्तीर्थंकरैः प्रतिषिद्धमाध कर्मिकादि गृह्यते। गुर्व्वदत्तं नाम स्वामिना दत्तमाधाक कादिदोषरहितं गुरूननुज्ञाप्य यद्गृह्यते। नन्वहिंसापरिक सर्व्वव्रतानामदत्तादाने तु केव हिंसा येनाहिंसापरिक स्यादित्युक्तं बाह्याः प्राणा इत्यादि। यदि स्तेयस्य प्राणहरणस मृग्यते तदा तदस्त्येव ॥ २२ ॥

चतुर्थमाह

दिव्यौदारिककामानां कृतानुमतिकारितैः ।

मनोवाक्कायतस्त्यागो ब्रह्माष्टादशधा मतम् ॥२३॥

दिवि भवा दिव्याः, ते च वैक्रियशरीरसम्भवाः । औदारिकाश्
...स्यादिकतिर्यङ्मनुष्यौदारिकसम्भवास्ते च ते कामाश्च इति कामास्
तेषां त्यागो ब्रह्मनिरूपणमत्र ब्रह्मचर्यव्रतम् । तच्चाष्टादशधा
मनसा स्वयं न करोमि न कारयामि कुर्वन्तमपि परं नानुमन्ये
एवं च वचसा कायेन चेति दिव्ये त्रयाणि नवभेदाः । एवमौदा
रिकेऽपीत्यष्टादश ।

यदाह

दिव्यात्कामरतिसुखात् त्रिविधं त्रिविधेन विरतिरिति नवकम् ।
औदारिकादपि तथा तद्ब्रह्माष्टादशविकल्पम् ॥ १ ॥ इति ॥

कृतानुमतिकारितैरिति मनोवाक्कायत इति च मध्ये कृतत्वात्पूर्वो
त्तरत्रापि सम्बन्धनीयम् ॥ २३ ॥

पञ्चममाह

सर्वभावेषु मूर्च्छायास्त्यागः स्यादपरिग्रहः ।

यदसत्स्वपि जायेत मूर्च्छया चित्तविप्लवः ॥२४॥

सर्वभावेषु द्रव्यक्षेत्रकालभावरूपेषु यो मूर्च्छया गार्द्ध्यस्य त्यागो न तु
द्रव्यादित्यागमात्रं सोऽपरिग्रहव्रतम् । ननु परिग्रहत्यागोऽपरिग्रहव्रत
स्यात् किं मूर्च्छात्यागलक्षणेन तल्लक्षणेन इत्याह । यदसत्स्वपीति ।

यस्मादसत्स्वपि विद्यमानेष्वपि द्रव्येष्वभिलाषेण मूर्च्छया चित्त-विप्लवः स्यात्। चित्तविप्लवात् प्रशमसौख्यविनाशः। प्रशमनाशे च धनगर्ववतो रागग्रहग्रस्तमनसश्च निःशङ्कतया दुर्गतिपात-निबन्धनं भवति। सत्यपि वा द्रव्येऽनभिलाषात्मनि प्रशम-विशेषे तृष्णाकृष्णाहिनिरुपद्रवमनसां प्रशमसुखप्राप्त्या चित्त-विप्लवाभावः। अत एव धर्मोपकरणधारिणां यतीनां शरीरे उपकरणे च निर्ममत्वानामपरिग्रहत्वम्।

यदाह —

यद्वत्तुरगः सत्स्वप्याभरणभूषणेष्वनभिषक्तः।
तद्वदुपग्रहवानपि न सङ्गमुपयाति निर्ग्रन्थः॥ १॥

यथा च धर्मोपकरणवतामपि मूर्च्छारहितानां मुनीनां न परिग्रहग्रहिलदोषस्तथा व्रतिनीनामपि गुरूपदिष्टधर्मोपकरण-धारिणीनां रत्नत्रयवतीनां तेन तासां धर्मोपकरणपरिग्रहमात्रेण मोक्षापवादः प्रलापमात्रम्॥ २४॥

पञ्चभिः पञ्चभिर्युक्ता भावनाभिर्विमुक्तये इत्युक्तं तत्प्रस्तौति—

भावनाभिर्भावितानि पञ्चभिः पञ्चभिः क्रमात्।
महाव्रतानि नो कस्य साधयन्त्यव्ययं पदम्॥ २५॥

भाव्यन्ते वास्यन्ते गुणविशेषमारोप्यन्ते महाव्रतानि [illegible] भावनाः॥ २५॥

अथ प्रथमव्रतस्य भावना आह—

मनोगुप्त्यैषणादानेर्याभिः समितिभिः सदा ।
दृष्टान्नपानग्रहणे नाहिंसां भावयेत् सुधीः ॥२६॥

मनोगुप्तिर्वक्ष्यमाणलक्षणा तयेत्येका भावना । एषणा विशुद्धपिण्ड-ग्रहणलक्षणा तस्यां या समितिः । आदानग्रहणेन निक्षेप उपलक्ष्यते । तेन पीठादेर्ग्रहणे स्थापने च या समितिः । ईरणमीर्या गमनं तत्र या समितिः । आभिरेषणादानेर्यास-मितिभिर्दृष्टयोरन्नपानयोर्ग्रहणेनोपलक्षणत्वात् तदभ्यासेनाहिंसां भावयेदिति सम्बन्धः । इह च गुप्तिसमितीनां महाव्रतभावनात्वेन गतार्थानामपि अथवा पञ्चसमितीत्यादिग्रन्थेन पुनरुत्कीर्त्तनं गुप्तिसमितीनामुत्तरगुणत्वज्ञापनार्थम् ।

यदाह—

पिण्डस्स जा विसोही समिईओ भावणा तवो दुविहो ।
पडिमा अभिग्गहो चिय उत्तरगुणगोवियाणाहिं ॥ १ ॥

इह च मनोगुप्तेर्भावनात्वं हिंसायां मनोव्यापारस्य प्राधान्यात् । श्रूयते हि प्रसन्नचन्द्रराजर्षिर्मनोगुप्त्या अभाविताहिंसाव्रतो हिंसा-मकुर्वन्नपि सप्तमनरकपृथ्वीयोग्यं कर्म्म निर्ममे एषणादानेर्यास-मितयस्तु अहिंसायां नितरामुपकारिण्य इति युक्तं भावनात्वम् । दृष्टान्नपानग्रहणं च संसक्तान्नपानपरिहारेणाहिंसाव्रतोपकारायेति पञ्चमी भावना ॥ २६ ॥

तस्यावग्रहो भारतादिवर्षम्। गृहपतिर्मण्डलाधिपतिस्तस्यावग्रह ग्राममण्डलादि। शय्यातरो वसतिस्वामी तदवग्रहो वसतिरेव। साधर्मिकाः साधवस्तेषामवग्रहः शय्यातरप्रदत्तं गृहादि। एता-नवग्रहान् ज्ञात्वा यथायथमवग्रहं याचेत। अस्वामियाचने हि परस्परविरोधेन अकाण्डधाटनादय ऐहिका दोषाः परलोके-ऽपि अदत्तपरिभोगजनितं पापकर्म्म। इति प्रथमा भावना। सकृद्दत्तेऽप्यवग्रहे स्वामिना अभीक्ष्णं भूयो भूयोऽवग्रहयाचनं कार्य्यं पूर्व्वलब्धेऽवग्रहे ग्लानाद्यवस्थासूत्रपुरीषोत्सर्गपात्रकरचरण-प्रक्षालनस्थानानि दातृचित्तपीडापरिहारार्थं याचनीयानि। इति द्वितीयभावना। एतावन्मात्रमेव एतावत्परिमाणमेवैतत् चेलादि ममोपयोगि नाधिकमिति अवग्रहस्य धारणं व्यवस्थापनम्। एवमवग्रहधारणे हि तदभ्यन्तरवर्त्तिनोमूर्द्ध्वस्थानादिक्रियामासे-वमानो न दातुरुपरोधकारी भवति। याञ्चाकाल एवावग्रहा-नवधारणे विपरिणतिरपि दातुश्चेतसि स्यादात्मनोऽपि चादत्तपरि-भोगजनितकर्म्मबन्धः स्यादिति तृतीयभावना। धर्मं चर-न्तीति धार्मिकाः समानास्तुल्याः प्रतिपन्नैकशासनाः साधवस्तेभ्यः पूर्वपरिगृहीतचैत्येभ्योऽवग्रहो याच्यस्तदनुज्ञानादि तत्रासितव्यं अन्यथा स्तेयं स्यादिति चतुर्थी भावना। अनुज्ञापिते अनुज्ञया स्वीकृते ये पानान्ने तयोरशनं सूत्रोक्तेन हि विधिना प्रासुकमेषणीयं कल्पनीयं च पानान्नं लब्धमानीयालोचनापूर्वं गुरवे निवेद्यानुज्ञातो गुरुणा मण्डल्यामेकको वा ऽश्नीयात्। उपलक्षणमेतत् यत्-किञ्चिदौघिकौपग्रहिकभेदमुपकरणं धर्मसाधनं तत्सर्वं गुरुणाऽनु-

ज्ञातं परिभोक्तव्यम्। एवं विदधानो नातिक्रामत्यस्तेयव्रतमिति पञ्चमी भावना।

चतुर्थव्रतभावना आह—

स्त्रीषण्ढपशुमद्वेश्मासनकुड्यान्तरोज्झनात्।
सरागस्त्रीकथात्यागात्प्राग्रतस्मृतिवर्जनात्॥ ३०॥
स्त्रीरम्याङ्गेक्षणस्वाङ्गसंस्कारपरिवर्जनात्।
प्रणीतात्यशनत्यागाद् ब्रह्मचर्यं तु भावयेत्॥ ३१॥

(युग्मम्)

स्त्रियो देवमानुषभेदाद्द्विविधाः एताश्च सचित्ताः। अचित्तास्तु पुस्तलेप्यचित्रकर्मादिनिर्मिताः। षण्ढास्तृतीयवेदोदयवर्त्तिनो महामोहकर्माणः स्त्रीपुंससेवनाभिरताः। पशवस्तिर्यग्योनिजाः। तत्र गोमहिषीवडवावालेयीअजाअविकादयः सम्भाव्यमानमैथुनाः। एभ्यः कृतद्वन्द्वेभ्यो मतुः स्त्रीषण्ढपशुमती च ते वेश्मासने च वेश्म वसतिः। आसनं संस्तारकादि। कुड्यान्तरं यत्रान्तरस्थोऽपि कुड्यादौ दम्पत्योर्मोहनादिशब्दः श्रूयते ब्रह्मचर्यभङ्गभयादेषामुज्झनं त्यागः। इति प्रथमा भावना। सरागस्य मोहोदयवतो या स्त्रीभिः कथा स्त्रीणां वा कथा सरागाय ताः स्त्रियश्च ताभिस्तासां वा कथा तस्यास्त्यागः। रागानुबन्धिनी हि देशजातिकुलनेपथ्यभाषागतिविभ्रमेङ्गितहास्यलीलाकटाक्षप्रणयकलहशृङ्गाररसानुविद्धा कथा

यात्येव चित्तोदधिरवश्यं विक्षोभमादधाति
प्राक् प्रव्रज्याब्रह्मचर्यात् पूर्वं गृहस्थावस्थ
निधुवनं तस्य स्मृतिस्तस्या वर्जनं प्राग्रत
सन्धुक्ष्यते । इति तृतीया भावना । स्त्री
यानि रम्याणि स्पृहणीयान्यङ्गानि
तेषामीक्षणमपूर्वविस्मयरसनिर्भरतया
कनम् । ईक्षणमात्रं तु रागद्वेषरहितस्या

यदाह—

अशक्यं रूपमद्रष्टुं चक्षुर्गोचरमागत
रागद्वेषौ तु यौ तत्र तौ बुधः परि

तथा स्वस्यात्मनोऽङ्गं शरीरं तस्य संस्कारः
दन्तकेशसम्मार्जनादि स्त्रीरम्याङ्गेक्षणं च
परिवर्जनात् । स्त्रीरम्याङ्गेक्षणतरलितविलो
शलभ इव विनाशमुपयाति । अशुचि
तत्तदुत्कलिकामयैर्विकल्पैर्वृथात्मानमायास
प्रणीतो ह्यद्यः स्निग्धमधुरादिरसः ।
रूक्षभैक्षस्याकण्ठमुदरपूरणं तयोस्त्यागो
रसप्रणीतो हि प्रधानधातुपरिपोषेण वेदो
अत्यशनस्य तु न केवलं ब्रह्मचर्यातिका

यदाह—

अजमसणस्स मव्वं जणस्स कुज्जा 'दगस्स दोभागी ।
वाउपवियारणट्ठा छब्भायं ऊणगं कुज्जा ॥ १ ॥

इति पञ्चमो भावना । एवं नवविधब्रह्मचर्यगुप्तिसंग्रहेण ब्रह्मचर्यव्रतस्य पञ्च भावनाः ॥ ३० ॥ ३१ ॥

पञ्चमव्रतस्य भावना आह—

स्पर्शे रसे च गन्धे च रूपे शब्दे च हारिणि ।
पञ्चस्वितीन्द्रियार्थेषु गाढं गार्द्ध्यस्य वर्ज्जनम् ॥३२॥
एतेष्वेवामनोज्ञेषु सर्व्वथा द्वेषवर्ज्जनम् ।
आकिञ्चन्यव्रतस्यैवं भावनाः पञ्च कीर्त्तिताः ॥३३॥
(युग्मम्)

[illegible]शादिषु मनोज्ञादिषु विषयेषु यद्गाढं गार्द्ध्यस्याभिष्वङ्ग[illegible] [illegible]नम् । स्पर्शादिष्वेवामनोज्ञेष्विन्द्रियप्रतिकूलेषु यो द्वेषोऽप्रीति[illegible] [illegible] वर्जनम् । गार्द्ध्यवान् हि मनोज्ञे विषयेऽभिष्वङ्गवान् [illegible] मध्यस्थस्य तु मूर्च्छारहितस्य न [illegible] [illegible] न द्वेषोपादानम् [illegible] [illegible] [illegible] न तद्व्रतं न [illegible] [illegible]

[illegible]

मूलगुणरूपचारित्रमभिधायोत्तरगुणरूपं तदाह—

अथवा पञ्चसमितिगुप्तित्रयपवित्रितम् ।
चरित्रं सम्यक्चारित्रमित्याहुर्मुनिपुङ्गवाः ॥ ३४ ॥

समितिरिति पञ्चानां चेष्टानां तान्त्रिकी संज्ञा । अथवा सं सम्यक् प्रशस्ता अर्हत्प्रवचनानुसारिणा इतिः चेष्टा समितिः पञ्चानां समितीनां समाहारः पञ्चसमिति । गुप्तिरात्मनः संरक्षणं मुमुक्षोर्योगनिग्रह इत्यर्थः । गुप्तीनां त्रयं गुप्तित्रयं पञ्चसमिति च गुप्तित्रयं च ताभ्यां च पवित्रितं यच्चरित्रं यतीनां चेष्टा सा सम्यक्चारित्रमुच्यते । सम्यक्प्रवृत्तिलक्षणा समितिः प्रवृत्तिनिवृत्तिलक्षणा गुप्ति रत्यनयोर्विशेषः ॥ ३४ ॥

अथ समितीर्गुप्तीश्च नामत आह—

ईर्याभाषैषणादाननिक्षेपोत्सर्गसंज्ञिकाः ।
पञ्चाहुः समितीस्तिस्रो गुप्तीस्त्रियोगनिग्रहात् ॥ ३५ ॥

ईर्यासमितिर्भाषासमितिरेषणासमितिरादाननिक्षेपसमितिरुत्सर्गसमितिरित्येताः पञ्चसमितीर्ब्रुवते तीर्थकराः । त्रिसंख्या योगास्त्रियोगा मनोवाक्कायव्यापारास्तेषां निग्रहो निरोधः । प्रवचनविधिना मार्गव्यवस्थापनमुन्मार्गनिवारणं च । निग्रहादिति हेतौ पञ्चमी तेन मनोगुप्तिर्वचनगुप्तिः कायगुप्तिरिति तिस्रो गुप्तीर्ब्रुवते ॥ ३५ ॥

ईर्यासमितिमाह—

लोकातिवाहिते मार्गे चुम्बिते भास्वदंशुभिः।
जन्तुरक्षार्थमालोक्य गतिरीर्या मता सताम्॥ ३६॥

त्रसस्थावरजन्तुजाताभयदानदीक्षितस्य मुनेरावश्यके प्रयोजने गच्छतो जन्तुरक्षानिमित्तं स्वशरीररक्षानिमित्तं च पादाग्रादारभ्य युगमात्रक्षेत्रं यावत् निरीक्ष्य ईरणमीर्या गतिस्तस्यां समितिरीर्यासमितिः।

यदाहुः—

[1]पुरओ जुगमायाए पेहमाणो महिं चरे।
वज्जंतो बीयहरियाइं पाणे य दगमट्टियं॥ १॥
[2]ओवायं विसमं खाणुं विजलं परिवज्जए।
सङ्कमेण न गच्छेज्जा विज्जमाणे परक्कमे॥ २॥

गतिश्च मार्गे भवति तस्य विशेषणं लोकातिवाहिते लोकैरतिवाहिते अत्यन्तक्षुण्णे। चुम्बिते स्पृष्टे आदित्यकिरणैः प्रथमविशेषणेन परैर्विराधिते मार्गे गच्छतो यतेः षड्जीवनिकायविराधना न भवति। उन्मार्गेण न गन्तव्यमिति चाह। तथाविधेऽपि मार्गे

---

(१) पुरतो युगमात्रया प्रेक्षमाणो महीं चरेत्।
वर्जयन् बीजहरितानि प्राणान् च दकमृत्तिकाम्॥
(२) अवपातं विषमं स्थाणुं विजलं परिवर्जयेत्।
संक्रमेण न गच्छेत् विद्यमाने पराक्रमे॥

रात्रौ गच्छतः सम्पातिमसत्त्वविराधना भवेदिति तत्परिहारार्थं द्वितीयविशेषणम् । एवंविधोपयोगवतश्च गच्छतो मुनेः कथंचित् प्राणिवधेऽपि प्राणिवधपापं न भवति ।

यदाह—

उच्चालियम्मि पाए इरियासमियस्स सङ्कमट्ठाए ।
वावज्जेज्ज कुलिङ्गी मरिज्ज तं जोगमासज्ज ॥ १ ॥
न य तस्स तन्निमित्तो बंधो सुहुमोवि देसिओ समए ।
अणवज्जो उपओगेण सव्वभावेण सो जम्हा ॥ २ ॥

तथा—

जिअदु व मरदु व जीवो अजदाचारस्स निच्छओ हिंसा ।
पयदस्स णत्थि बंधो हिंसामित्तेण समिदस्स ॥ ३ ॥ ३६ ॥

भाषासमितिमाह—

अवद्यत्यागतः सर्वजनीनं मितभाषणम् ।
प्रिया वाचंयमानां सा भाषासमितिरुच्यते ॥३७॥

अवद्यानि भाषादोषा वाक्यशुद्ध्यध्ययनप्रतिपादिताः धूर्त्तकामुक-क्रव्यादचौरचार्वाकादिभाषितानि च तेषां निर्दम्भतया त्यागस्ततः सर्वजनीनं सर्वजनेभ्यो हितं मितं स्वल्पमप्यतिबहुप्रयोजनसाधकं तच्च तद्भाषणं च ।

यदाह—

[1]महुरं निउणं थोवं कज्जावडियं अगव्वियमतुच्छं ।
पुव्विंमइसंकलियं भणंति जं धम्मसंजुत्तं ॥ १ ॥

एवंविधं यद्भाषणं सा भाषासमितिः । भाषायां सम्यगिति-भाषासमितिः । सा च प्रिया अभिमता वाचंयमानां मुनीनाम् ।

यदाहुः—

[2]जा य सच्चा न वत्तव्वा सच्चामोसा य जा मुसा ।
जा य बुद्धेहिं णाइण्णा ण तं भासेज्ज पण्णवं ॥ १ ॥ इति ॥३७॥

एषणासमितिमाह—

द्विचत्वारिंशता भिक्षादोषैर्नित्यमदूषितम् ।
मुनिर्यदन्नमादत्ते सैषणासमितिर्मता ॥ ३८ ॥

द्वाभ्यामधिका चत्वारिंशत् द्विचत्वारिंशद्भिक्षादोषाः उद्गमोत्पादनैषणालक्षणाः तत्रोद्गमदोषा गृहस्थप्रभवाः षोडश ।

यथा—

[3]आहाकम्मुद्देसियपूइकम्मे अ मीसजाए य ।
ठवणा पाहुडियाए पाउयरकीयपामिच्चे ॥ १ ॥

1. मधुरं निपुणं स्तोकं कार्यापतितमगर्वितमतुच्छम् ।
पूर्वमतिसंकलितं भणन्ति यद्धर्मसंयुक्तम् ॥
2. या च सत्या न वक्तव्या सत्यामृषा च या मृषा ।
या च बुद्धैरनाचीर्णा न तां भाषेत प्रज्ञावान् ॥
3. आधाकर्मौद्देशिकं पूतिकर्म च मिश्रजातं च ।
स्थापना प्राभृतिका प्रादुष्कारः क्रीतं प्रामित्यम् ॥

'परियट्टिए अभिहडे उब्भिन्ने मालोहडे इय ।
अच्छिज्जे अणिसिट्ठे अज्झोयरए य सोलसमे ॥ २ ॥

आधाय विकल्प्य यतिं मनसि कृत्वा सचित्तस्याचित्तीकरणमचित्तस्य वा पाको निरुक्तादाधाकर्म ॥ १ ॥

उद्देशः साध्वर्थं सङ्कल्पः स प्रयोजनमस्य औद्देशिकं यत्पूर्वकृतमोदनमोदकक्षोदादि तत्साधूद्देशेन दध्यादिना गुडपाकेन च संस्कुर्वतो भवति ॥ २ ॥

आधाकर्मिकावयवसम्मिश्रं शुद्धमपि यत्तत्पूतिकर्म शुचिद्रव्यमिवाशुचिद्रव्यसम्मिश्रम् ॥ ३ ॥

यदात्मार्थं साध्वर्थं चादित एव मिश्रं पच्यते तन्मिश्रम् ॥ ४ ॥

साधुयाचितस्य क्षीरादेः पृथक्कृत्य स्वभाजने स्थापनं स्थापना ॥ ५ ॥

कालान्तरभाविनो विवाहादेरिदानीं सन्निहिताः साधवः सन्ति तेषामप्युपयोगो भवत्विति बुद्ध्या इदानीमेव करणं समयपरिभाषया प्राभृतिका सन्निकृष्टस्य विवाहादेः कालान्तरे साधुसमागमनं सञ्चिन्त्योत्कर्षणं वा ॥ ६ ॥

यदन्धकारव्यवस्थितस्य द्रव्यस्य वह्निप्रदीपमण्यादिना भित्त्यपनयनेन वा बहिर्निष्कास्य द्रव्यधारणेन वा प्रकटकरणं तत्प्रादुष्करणम् ॥ ७ ॥

यत्साध्वर्थं मूल्येन क्रीयते तत्क्रीतम् ॥ ८ ॥

---

(१) परिवर्त्तितमभ्याहृतमुद्भिन्नं मालापहृतमिति ।
आच्छेद्यमनिसृष्टं चाध्यवपूरकश्च षोडशः ॥

यत्साध्वर्थमन्नादि उद्यतकं गृहीत्वा दीयते तत्प्रामित्यकम् ॥९॥

स्वद्रव्यमर्पयित्वा परद्रव्यं तत्सदृशं गृहीत्वा यद्दीयते तत्परिवर्त्तितम् ॥ १० ॥

गृहग्रामादेः साध्वर्थं यदानीतं तदभ्याहृतम् ॥ ११ ॥

कुतुपादिस्थस्य घृतादेर्दानार्थं यन्मृत्तिकाद्यपनयनं तदुद्भिन्नम् ॥ १२ ॥

यदुपरिभूमिकातः शिक्यादेर्भूमिगृहाद्वा आकृष्य साधुभ्यो दानं तन्मालापहृतम् ॥ १३ ॥

यदाच्छिद्य परकीयं हठात् गृहीत्वा स्वामी प्रभुश्चौरो वा ददाति तदाच्छेद्यम् ॥ १४ ॥

यद्गोष्ठीभक्तादिसर्वैरदत्तमननुमतं वा एकः कश्चित्साधुभ्यो ददाति तदनिसृष्टम् ॥ १५ ॥

स्वार्थमधिश्रयणे सति साधुसमागमश्रवणात्तदर्थं पुनर्यो धान्यादिवापः सोऽध्यवपूरकः ॥ १६ ॥

उत्पादनादोषा अपि षोडश ते च साधुप्रभवाः ।

तद्यथा—

'धाई दूई निमित्ते आजीववणीवगे तिगिच्छा य ।
कोहे माणे माया लोभे अ हवन्ति दस एए ॥ १ ॥

---

(१) धात्री दूती निमित्तं आजीववनीपके चिकित्सा च ।
क्रोधो मानो माया लोभश्च भवन्ति दश एते ॥

[1]पूर्वंपश्चात्संस्तवविद्यामन्त्रे च चूर्णयोगे च ।
उत्पादनाया दोषाः षोडशो मूलकर्म च ॥ २ ॥

बालस्य क्षीरमज्जनमण्डनक्रीडनाङ्कारोपणकर्मकारिण्यः पञ्च धात्र्यः तासां कर्म भिक्षार्थं कुर्वतो धात्रीपिण्डः ॥ १ ॥

मिथः सन्देशकथनं दूतीत्वं तत्कुर्वतो भिक्षार्थं दूतीपिण्डः ॥ २ ॥

अतीतानागतवर्तमानकालेषु लाभालाभादिकथनं निमित्तं तद्भिक्षार्थं कुर्वतो निमित्तपिण्डः ॥ ३ ॥

जातिकुलगणकर्मशिल्पादिप्रधानेभ्य आत्मनस्तत्तद्गुणत्वारोपणं भिक्षार्थमाजीवपिण्डः ॥ ४ ॥

श्रमणब्राह्मणकृपणातिथिश्वानादिभक्तानां पुरतः पिण्डार्थमात्मानं तत्तद्भक्तं दर्शयतो वनीपकपिण्डः ॥ ५ ॥

वमनविरेचनबस्तिकर्मादि कारयतो वैद्यभेषज्यादि सूचयतो वा पिण्डार्थं चिकित्सापिण्डः ॥ ६ ॥

विद्यातपःप्रभावख्यापनं राजपूजादिख्यापनं क्रोधफलदर्शनं वा भिक्षार्थं कुर्वतः क्रोधपिण्डः ॥ ७ ॥

लब्धिप्रशंसोत्तानस्य परैरुत्साहितस्यावमतस्य वा गृहस्थाभिमानमुत्पादयतो मानपिण्डः ॥ ८ ॥

नानावेषभाषापरिवर्त्तनं भिक्षार्थं कुर्वतो मायापिण्डः ॥ ९ ॥

---

(१) पूर्वंपश्चात्संस्तवविद्यामन्त्रे च चूर्णयोगे च ।
उत्पादनाया दोषाः षोडशो मूलकर्म च ॥

अतिलोभाद् भिक्षार्थं पर्यटतो लोभपिण्डः ॥ १० ॥

पूर्वसंस्तवं जननीजनकादिद्वारेण पश्चात्संस्तवं श्वश्रूश्वशुरादि-द्वारेणात्मपरिचयाऽनुरूपं सम्बन्धं भिक्षार्थं घटयतः पूर्वपश्चात्संस्तव-पिण्डः ॥ ११ ॥

विद्यां मन्त्रं चूर्णं योगं च भिक्षार्थं प्रयुञ्जानस्य चत्वारो विद्यादिपिण्डाः—

मन्त्रजपहोमादिसाध्या स्त्रीदेवताधिष्ठाना वा विद्या ॥ १२ ॥

पाठमात्रप्रसिद्धः पुरुषाधिष्ठानो वा मन्त्रः ॥ १३ ॥

चूर्णानि नयनाञ्जनादीनि अन्तर्द्धानादिफलानि ॥ १४ ॥

पादप्रलेपादयः सौभाग्यदौर्भाग्यकरा योगाः ॥ १५ ॥

गर्भस्तम्भगर्भाधानप्रसवस्नपनकमूलरक्षाबन्धनादिभिक्षार्थं कुर्वतो मूलकर्मपिण्डः ॥ १६ ॥

गृहिसाधूभयप्रभवा एषणादोषा दश ।

तद्यथा—

'सङ्कियमंक्खियनिक्खित्तपिहियसाहरिअदायगुम्मोसे ।
अपरिणयलित्तच्छड्डिय एसणदोसा दस हवन्ति ॥ १ ॥

आधाकर्मकादिशङ्काकलुषितो यदन्नाद्यादत्ते तच्छङ्कितं यं दोषं शङ्कते तमापद्यते ॥ १ ॥

---

(१) शङ्कितम्रक्षितनिक्षिप्तपिहितसंहृतदायकोन्मिश्रम् ।
अपरिणतलिप्तच्छर्दितं एषणादोषा दश भवन्ति ॥

कल्पिकयोग्यश्चतुर्दशविधो जिनकल्पिकयोग्यश्च द्वादशविध औधिक उपधिः। आर्यिकायोग्यश्च पञ्चविंशतिविधः। औपग्रहिकश्च शय्यापीठफलकचर्मदण्डादिरुपलक्षणादेव परिगृह्यते। नह्यौघिकरजोहरणाद्यन्तरेण औपग्रहिकपीठफलकाद्यन्तरेण च वर्षासु हेमन्तग्रीष्मयोरपि जलकणिकाकुलायामनूपभूमौ महाव्रतसंरक्षणं कर्तुं क्षमम्। एतद्दोषविशुद्धमन्नादि यन्मुनिना दत्ते सा एषणमेषणा यथागममन्नादेरन्वेषणम्। अत्र "इषोऽनिच्छायाम्" ॥ ५। ३। ११२॥ इति स्त्रियामनस्तस्यां च समितिरेषणासमितिः। इयं गवेषणारूपा एषणाग्रासैषणाप्यनयोरुपलक्ष्यते तस्यां च पञ्च दोषाः।

तद्यथा—

संयोजना १ प्रमाणातिरिक्तता २ अङ्गारो ३ धूमः ४ कारणाभावश्च ५ तत्र रसलोभाद्द्रव्यस्य मण्डकादेर्द्रव्यान्तरेण खण्डघृतादिना वसतेर्बहिरन्तर्वा योजनं संयोजना ॥१॥ धृतिबलसंयमयोगा यावता न सीदन्ति तदाहारप्रमाणम्। अधिकाहारस्तु वमनाय मृत्यवे व्याधये चेति तं परिहरेदिति प्रमाणातिरिक्ततादोषः ॥२॥ स्वाद्वन्नं तद्दातारं वा प्रशंसन् यद्भुङ्क्ते सरागाग्निना चरित्रेन्धनस्याङ्गारीकरणादङ्गारो दोषः ॥३॥ निन्दन् पुनश्चारित्रेन्धनं दहन् धूमकरणाद्धूमो दोषः ॥४॥ क्षुद्वेदनाया असहनं क्षामस्य च वैयावृत्त्याकरणमीर्यासमितेरविशुद्धिः प्रेक्षोत्प्रेक्षादिः संयमस्य चापालनं क्षुधातुरस्य प्रबलाग्न्युदयात्प्राणप्रहाणशङ्का (1)आर्त्तरौद्रपरिहारेण

(1) घ -आर्त्तरौद्रपरिहारेण।

धर्मध्यानस्थिरीकरणं चेति भोजनकारणानि तदभावे भुञ्जानस्य कारणाभावदोषः ॥ ५ ॥

यदाह—

उत्पादनोद्गमैषणाधूमांगारप्रमाणकारणतः ।
संयोजनाच्च पिण्डं शोधयतामेषणासमितिः ॥१॥ इति ॥ ३८ ॥

आदाननिक्षेपसमितिमाह—

आसनादीनि संवीक्ष्य प्रतिलिख्य च यत्नतः ।
गृह्णीयान्निक्षिपेद्वा यत्साऽऽदानसमितिः स्मृता ॥ ३९ ॥

आसनं विष्टरः आदिशब्दाद्वस्त्रपात्रफलकदण्डादेः परिग्रहः। तान्यासनादीनि संवीक्ष्य चक्षुषा प्रतिलिख्य रजोहरणादिना यत्नत इत्युपयोगपूर्व्वकम्। अन्यथा सम्यक्प्रतिलेखना न स्यात्।

यदाह—

[1]पडिलेहणं कुणंतो मिहो कहं कुणइ जणवयकहं वा ।
देइ व पच्चक्खाणं वाएइ सयं पडिच्छइ वा ॥ १ ॥
[2]पुढवीआउक्काएतेऊवाऊवणस्सइतसाणं ।
पडिलेहणापमत्तो छण्हंपि विराहगो भणिओ ॥ २ ॥

---

(१) प्रतिलेखनां कुर्वन् मिथः कथां करोति जनपदकथां वा ।
ददाति वा प्रत्याख्यानं वाचयति स्वयं प्रतीच्छति वा ॥
(२) पृथिव्यप्कायतेजोवायुवनस्पतित्रसानाम् ।
प्रतिलेखनाप्रमत्तः षण्णामपि विराधको भणितः ॥

यद्गृह्णीयाददीत निक्षिपेत् स्थापयेत्संवीक्षितप्रतिलिखि[illegible]
भूमौ । सा आदाननिक्षेपसमितिः । भीमो भीमसेन इ[illegible]
न्यायादादानसमितिः ॥ ३९ ॥

उत्सर्गसमितिमाह—

कफमूत्रमलप्रायं निर्जन्तुजगतीतले ।
यत्नाद्यदुत्सृजेत्साधुः सोत्सर्गसमितिर्भवेत् ॥ ४० ॥

कफः श्लेष्मा मुखनासिकासञ्चारी मूत्रं प्रस्रवणं मलो विष्ठा प्राय[illegible] ग्रहणादन्यदपि परिष्ठापनायोग्यं वस्त्रपात्रभक्तपानादि गृह्यते [illegible] निर्जन्तुः त्रसस्थावरजन्तुरहिता स्वयं च निर्जन्तुर्या जगती तस्य[illegible] स्थानं स्थण्डिलमित्यर्थः । तत्र यत्नादुपयोगपूर्वकं यदुत्सृजेत्सा[illegible] सा उत्सर्गसमितिः । अथ गुप्तीनामवसरः ॥ ४० ॥

तत्र मनोगुप्तिमाह—

विमुक्तकल्पनाजालं समत्वे सुप्रतिष्ठितम् ।
आत्मारामं मनस्तज्ज्ञैर्मनोगुप्तिरुदाहृता ॥ ४१ ॥

[illegible] मनोगुप्तिस्त्रिधा । आर्तरौद्रध्यानानुबन्धिकल्पनाजालवियोग[illegible] [illegible] शास्त्रानुसारिणी परलोकसाधिका धर्मध्यानानुबन्धि[illegible] [illegible] । कुशलाकुशलमनोवृत्तिनिरोधेन यो[illegible] [illegible] तृतीया । ता एतास्तिस्रो[illegible] [illegible] विमुक्तकल्पनाजालमिति समत्वे सुप्रति[illegible] [illegible] मनो मनोगुप्तिः ॥ ४१ ॥

[illegible]

वाग्गुप्तिमाह—

संज्ञादिपरिहारेण यन्मौनस्यावलम्बनम् ।
वाग्वृत्तेः संवृत्तिर्वा या सा वाग्गुप्तिरिहोच्यते ॥४२॥

संज्ञा मुखनयनभ्रूविकाराङ्गुल्याच्छोटनादिका अर्थसूचिकाश्चेष्टाः आदिशब्दाल्लोष्टक्षेपोर्द्ध्वभावकासितहुङ्कृतादीनि गृह्यन्ते। संज्ञादीनां यः परिहारस्तेन यन्मौनमभाषणं तस्यावलम्बनमभिग्रहः। संज्ञादिना हि प्रयोजनानि सूचयतो मौनं निष्फलमेवेत्येका वाग्गुप्तिः। वाचनप्रच्छनपृष्टव्याकरणादिषु लोकागमाविरोधेन मुखवस्त्रिकाच्छादितवक्त्रस्य भाषमाणस्यापि वाग्वृत्तेः संवृत्तिर्वाग्विनियन्त्रणं द्वितीया वाग्गुप्तिः। आभ्यां भेदाभ्यां वाग्गुप्तेः सर्वथा वाग्निरोधः सम्यग्भाषणं च स्वरूपं प्रतिपादितं भवति भाषासमितौ तु सम्यग्वाक्प्रवृत्तिरेवेति वाग्गुप्तिभाषासमित्योर्भेदः।

यदाहुः—

समिओ नियमागुत्तो गुत्तो समियत्तणम्मि भयणिज्जो ।
कुसलवयमुईरंतो जं वइगुत्तोवि समिओवि ॥ १ ॥

अथ कायगुप्तिः सा च द्विधा चेष्टानिवृत्तिलक्षणा यथासूत्रं चेष्टानियमलक्षणा च ॥ ४२ ॥

तत्राद्यामाह—

उपसर्गप्रसङ्गेऽपि कायोत्सर्गजुषो मुनेः ।
स्थिरीभावः शरीरस्य कायगुप्तिर्निगद्यते ॥ ४३ ॥

उपसर्गा देवमानुषतिर्यक्कृता उपद्रवाः। उपलक्षणत्वात् क्षुत्पिपा-

सादयः परोपद्रा अपि गृह्यन्ते तेषां प्रसङ्गः सन्निपातः । प्रति शब्दात्तदभावेऽपि मुनेः साधोः कायः शरीरं तस्योत्सर्गस्त्यागस्तं निरपेक्षतालक्षणस्तं जुषते तत्तस्य कायोत्सर्गजुषो यः स्थिरीभावो निश्चलता योगनिरोधं कुर्वतः सर्वथा शरीरचेष्टापरिहारो वा प्र सा कायगुप्तिः ॥ ४२ ॥

द्वितीयामाह—

शयनासननिक्षेपादानचंक्रमणेषु यः ।
स्थानेषु चेष्टानियमः कायगुप्तिस्तु सापरा ॥४४॥

[illegible] निद्राकालः स च रात्रावेव न दिवा । [illegible] । तथापि प्रथमयामेऽतिक्रान्ते गुरु [illegible] समतौ संशोध्य प्रमृज्य च भूमिं संस्तार [illegible] कायं समादं [illegible] पतितपञ्चनमस्कार [illegible]

च तृणपीठादिपूक्तयैव समाचार्योपविशेत् । निक्षेपादाने च दण्डाद्युपकरणविषये ते अपि प्रत्यवेक्ष्य प्रमृज्य च विधेये चंक्रमणं गमनं तदप्यावश्यकप्रयोजनवतः साधोः पुरस्ताद्युगमात्र-प्रदेशसन्निवेशितदृष्टेरप्रमत्तस्य त्रसस्थावरभूतानि संरक्षतोऽत्वरया पदन्यासमाचरतः प्रशस्तं स्थानमूर्द्ध्वस्थितिलक्षणमवष्टम्भादि च प्रत्यवेक्षितप्रमार्जितप्रदेशविषयम् । एतेषु चेष्टानियमः स्वच्छन्द-चेष्टापरिहारो यः सा अपरा द्वितीया कायगुप्तिरिति ॥ ४४ ॥

एतासामागमप्रसिद्धं मातृत्वमुपदर्शयति—

एताश्चारित्रगात्रस्य जननात्परिपालनात् ।
संशोधनाच्च साधूनां मातरोऽष्टौ प्रकीर्त्तिताः ॥४५॥

एताः समितिगुप्तयः शास्त्रेऽष्टौ मातर इति प्रसिद्धाः । मातृत्वे हेतुनाह । साधूनां सम्बन्धिचारित्रमेव गात्रमङ्गं तस्य जननाद-भूतस्य प्रादुर्भावनात् जनितस्य च चारित्रगात्रस्य परिपालनात्सर्वो-पद्रवनिवारणेन पोषणेन च वृद्धिनयनात् चारित्रगात्रस्यैवातिचार-मलिनस्य सतः संशोधनान्निर्मलीकरणादिति ॥ ४५ ॥

चारित्रं व्याख्यायोपसंहरति—

सर्वात्मना यतीन्द्राणामेतच्चारित्रमीरितम् ।
यतिधर्मानुरक्तानां देशतः स्यादगारिणाम् ॥४६ ॥

द्विधा चारित्रं सर्वदेशभेदात् । सर्वात्मना चारित्रं सर्वसावद्ययोग-विरतिलक्षणम् । यतीन्द्राणामनगारिश्रेष्ठानामेतन्मूलगुणोत्तरगुण-

स्वरूपमीरितम्। धातूनामनेकार्थत्वात्प्रतिपादितम्। देशचारि
तु केषामित्याह। अगारिणां गृहस्थानां देशत एकदेशविरति
लक्षणम्। किं विशिष्टानामगारिणां यतिधर्मानुरक्तानां यतिधर्मे
सर्वविरतिचारित्ररूपे अनुरक्तानां संहननादिदोषादकुर्वतामपि
प्रीतिमताम्।

यदाह—

सर्वविरतिलालसः खलु देशविरतिपरिणामः यतिधर्मानु
रागरहितानां तु गृहस्थानां देशविरतिरपि न सम्यगिति
देशतः स्यादगारिणामित्युक्तम्। तत्र यादृशो गृहस्थो धर्माधि
कारी तादृशमुपदर्शयितुं तथाहीत्यनेन प्रस्तावनामाह ॥ ४६ ॥

तथाहीत्युपदर्शने निपातसमुदायः—

न्यायसम्पन्नविभवः शिष्टाचारप्रशंसकः।
कुलशीलसमैः सार्धं कृतोद्वाहोऽन्यगोत्रजैः ॥ ४७ ॥
पापभीरुः प्रसिद्धं च देशाचारं समाचरन्।
अवर्णवादी न क्वापि राजादिषु विशेषतः ॥ ४८ ॥
अनतिव्यक्तगुप्ते च स्थाने सुप्रातिवेश्मिके।
अनेकनिर्गमद्वारविवर्जितनिकेतनः ॥ ४९ ॥
कृतसङ्गः सदाचारैर्मातापित्रोश्च पूजकः।
त्यजन्नुपप्लुतं स्थानमप्रवृत्तश्च गर्हिते ॥ ५० ॥

व्ययमायोचितं कुर्वन् वेषं वित्तानुसारतः ।
अष्टभिर्धीगुणैर्युक्तः शृण्वानो धर्ममन्वहम् ॥ ५१ ॥
अजीर्णे भोजनत्यागी काले भोक्ता च सात्म्यतः ।
अन्योऽन्याप्रतिबन्धेन त्रिवर्गमपि साधयन् ॥ ५२ ॥
यथावदतिथौ साधौ दीने च प्रतिपत्तिकृत् ।
सदानभिनिविष्टश्च पक्षपाती गुणेषु च ॥ ५३ ॥
अदेशाकालयोश्चर्यां त्यजन् जानन् बलाबलम् ।
वृत्तस्थज्ञानवृद्धानां पूजकः पोष्यपोषकः ॥ ५४ ॥
दीर्घदर्शी विशेषज्ञः कृतज्ञो लोकवल्लभः ।
सलज्जः सदयः सौम्यः परोपकृतिकर्मठः ॥ ५५ ॥
अन्तरङ्गारिषड्वर्गपरिहारपरायणः ।
वशीकृतेन्द्रियग्रामो गृहिधर्माय कल्पते ॥ ५६ ॥

(दशभिः कुलकम्)

स्वामिद्रोहमित्रद्रोहविश्वसितवञ्चनचौर्यादिगर्ह्यार्थोपार्जनपरिहारेणार्थोपार्जनोपायभूतः स्वस्ववर्णानुरूपः सदाचारो न्यायस्तेन सम्पन्न उत्पन्नो विभवः सम्पद्यस्य स तथा । न्यायसम्पन्नो हि विभव इहलोकहिताय । अशङ्कनीयतया स्वशरीरेण तत्फलभोगान्मित्रस्वजनादौ संविभागकरणाच्च ।

यदाह—

सर्व्वत्र शुचयो धीराः स्वकर्म्मबलगर्विताः ।
कुकर्म्मनिहतात्मानः पापाः सर्वत्र शङ्किताः ॥ १ ॥

परलोकहिताय च सत्पात्रेषु विनियोगाद्दीनादौ कृपया वितरणाच्च । अन्यायोपात्तस्तु लोकद्वयेऽप्यहितायैव । इहलोके हि लोकविरुद्धकारिणो वधबन्धादयो दोषाः परलोके नरकादिगमनादयः । यद्यपि कस्यचित्पापानुबन्धिपुण्यकर्म्मवशादैहिकलौकिकी विपन्न दृश्यते तथाप्यायत्यामवश्यम्भाविन्येव ।

यदाह—

पापेनैवार्थरागान्धः फलमाप्नोति यत् क्वचित् ।
बडिशामिषवत्तत्तमविनाश्य न जीर्यति ॥ १ ॥

न्याय एव परमार्थतोऽर्थोपार्जनोपायोपनिषत् ।

यदाह—

निपानमिव मण्डूकाः सरः पूर्णमिवाण्डजाः ।
शुभकर्माणमायान्ति विवशाः सर्वसम्पदः ॥ १ ॥

विभवश्च च गार्हस्थ्ये प्रधानं कारणमित्यादौ न्यायसम्पन्नविभव इत्युक्तम् ॥ १ ॥

तथा शिष्टाचारप्रशंसकः शिष्यन्ते स्म शिष्टा वृत्तस्थज्ञानवृद्धसेवोपलब्धविशुद्धशिक्षाः पुरुषविशेषास्तेषामाचारश्चरितम् ।

यथा—

लोकापवादभीरुत्वं दीनाभ्युद्धरणादरः ।
कृतज्ञता सुदाक्षिण्यं सदाचारः प्रकीर्त्तितः ॥ १ ॥ इत्यादि ।

[illegible] ।

यथा

विपद्यन्ते स्वर्गं पदमनुविशन्ति च सततं
प्रिया भार्या लोकेऽभिमतमसुमद्भ्यश्चरणम् ।
अमन्यो नान्योऽयं यदपि न याचत्यन्यजनः
मता कैर्नामीह त्रिपथमभिधारायतमिदम् ॥ १ ॥ २ ॥

तथा कुलं पितृपितामहादिपूर्वपुरुषवंशः शीलं मद्यमांसनिशाभोजनादिपरिहाररूपः समाचारस्ताभ्यां समानाः तुल्याः समकुलशीला इत्यर्थः । गोत्रं नाम तथाविधैकपुरुषप्रभवो वंशस्तत्र जाता गोत्रजाः तेभ्योऽन्येऽन्यगोत्रजास्तैः सार्द्धं कृतोद्वाहो विहितविवाहः । अग्निदेवादिसाक्षिकं पाणिग्रहणं विवाहः । स च लोकेऽष्टविधः । तत्रालङ्कृत्य कन्यादानं ब्राह्मो विवाहः १ विभवविनियोगेन कन्यादानं प्राजापत्यः २ गोमिथुनदानपूर्वकमार्षः ३ यत्र यज्ञार्थमृत्विजः कन्याप्रदानमेव दक्षिणा स दैवः ४ एते धर्म्या विवाहाश्चत्वारः । मातुः पितुर्बन्धूनां चाप्रामाण्यात्परस्परानुरागेण मिथः समवायाद्गान्धर्वः ५ पणबन्धेन कन्याप्रदानमासुरः ६ प्रसह्य कन्याग्रहणाद्राक्षसः ७ सुप्तप्रमत्तकन्याग्रहणात्पैशाचः ८ । एते चत्वारोऽप्यधर्म्याः । यदि वधूवरयोः परस्परं रुचिरस्ति तदा अधर्म्या अपि धर्म्याः । शुद्धकलत्रलाभफलो विवाहः । अशुद्धभार्यादियोगेन नरक एव । तत्फलं वधूरक्षणमाचरतः सुजातसुतसन्ततिरनुपहता चित्तनिर्वृत्तिर्गृहकृत्यसुविहितत्वमाभिजात्याचारविशुद्धत्वं देवातिथिबान्धवसत्कारानवद्यत्वं

चेति। वधूरक्षणोपायास्त्वेते। गृहकर्मविनियोगः १ परिमितोऽर्थ-संयोगो २ ऽस्वातन्त्र्यम् ३ सदा च मातृतुल्यस्त्रीलोकावरोधन- ४ मिति ॥ ३ ॥

पापानि दृष्टादृष्टापायकारणानि कर्माणि तेभ्यो भीरुः। तत्र दृष्टापायकारणानि चौर्यपारदारिकत्वद्यूतरमणादीनि इह-लोकेऽपि सकललोकप्रसिद्धविडम्बनास्थानानि। अदृष्टापायकार-णानि मद्यमांससेवनादीनि शास्त्रनिरूपितनरकादियातना-फलानि ॥ ४ ॥

प्रसिद्धः तथाविधापरशिष्टसम्मततया दूरं रूढिमागतः। देशाचारो भोजनाच्छादनादिविचित्रक्रियात्मकः सकलमण्डल-व्यवहारस्तं सम्यगाचरन् तदाचारातिलङ्घने हि तद्देशवासिजन-तया विरोधसम्भावनादकल्याणलाभः स्यात् ॥ ५ ॥

अवर्णोऽश्लाघा तं वदतीत्येवंशीलोऽवर्णवादी न क्वापि जघन्योत्तममध्यमभेदेषु जन्तुषु परावर्णवादी हि बहुदोषः।

यदाह—

परपरिभवपरिवादादात्मोत्कर्षाच्च बध्यते कर्म।
नीचैर्गोत्रं प्रतिभवमनेकभवकोटिदुर्मोचम् ॥ १ ॥

तदेवं सकलजनगोचरोऽप्यवर्णवादो न श्रेयान्। किं पुन राजामात्यपुरोहितादिषु बहुजनमान्येषु। राजाद्यवर्णवादा[1]त्तु वित्तप्राणनाशनादिरपि दोषः स्यात् ॥ ६ ॥

(1) क ग च वित्तप्राणनाशादिरपि।

तथा अनेकं बहु यन्निर्गमद्वारं उपलक्षणत्वात्प्रवेशद्वारं तेन विवर्जितं निकेतनं यस्य स तथा । बहुषु हि निर्गमप्रवेशद्वारेष्वनुपलक्ष्यमाणनिर्गमप्रवेशानां दुष्टलोकानामापाते स्त्रीद्रविणादिविप्लवः स्यात् । अत्र चानेकद्वारतायाः प्रतिषेधेन विधिराक्षिप्यते । ततः प्रतिनियतद्वारसुरक्षितगृहो गृहस्थः स्यादिति गम्यते । तथाविधमपि निकेतनं स्थान एव निवेशयितुं युक्तं नास्थाने । स्थानं तु शल्यादिदोषवर्जितं बहुलदूर्वाप्रवालकुशस्तम्बप्रशस्तवर्णगन्धमृत्तिकासुस्वादुजलोद्गमनिधानादिमच्च । स्थानगुणदोषपरिज्ञानं च शकुनस्वप्नोपश्रुतिप्रभृतिनिमित्तादिबलेन । अस्थानमेव विशिनष्टि । अतिव्यक्तमतिप्रकटमतिगुप्तमतिप्रच्छन्नं तद्विपरीतेऽनतिव्यक्तगुप्ते । तत्र अतिव्यक्ते असन्निहितगृहान्तरतया परिपार्श्वतो निरावरणतया चौरादयोऽभिभवेयुः । अतिगुप्ते च सर्वतो गृहान्तरैर्निरुद्धत्वात् स्वशोभां न लभते । प्रदीपनकाद्युपद्रवेषु च दुःखनिर्गमप्रवेशं गृहं भवति । पुनः कथंभूते स्थाने सुप्रातिवेश्मिके शोभनाः शीलादिसम्पन्नाः प्रातिवेश्मिका यत्र । कुशीलप्रातिवेश्मिकत्वे हि तदालापश्रवणतच्चेष्टादर्शनादिदोषात् स्वतः सगुणस्यापि गुणहानिः स्यात् । कुप्रातिवेश्मिकाश्चैते शास्त्रप्रतिषिद्धाः —

खरतिरियतिरिक्खजोणीतालायरसमणमाहणसुसाणा ।
वग्गुरिवाहगुम्मियहरिएसपुलिंदमच्छंधा ॥ १ ॥ २ ॥

तथा कृतः सङ्गो येन स कृतसङ्गः सन् शोभन आचार इहपरलोकहिता प्रवृत्तिर्येषां ते सदाचारास्तैर्न तु कितवधूर्तविटभटभण्डनटादिभिस्तत्सङ्गो हि सदपि शीलं विलोपयेत् ।

चेति। वधूरक्षणोपायास्त्वेते। गृहकर्मविनियोगः १ परिमितोऽर्थसंयोगो २ ऽस्वातन्त्र्यम् ३ सदा च मातृतुल्यस्त्रीलोकावरोधनं ४ मिति ॥ ३ ॥

पापानि दृष्टादृष्टापायकारणानि कर्माणि तेभ्यो भीरुः। तत्र दृष्टापायकारणानि चौर्यपारदारिकत्वद्यूतरमणादीनि इहलोकेऽपि सकललोकप्रसिद्धविडम्बनास्थानानि। अदृष्टापायकारणानि मद्यमांससेवनादीनि शास्त्रनिरूपितनरकादियातनाफलानि ॥ ४ ॥

प्रसिद्धः तथाविधापरशिष्टसम्मततया दूरं रूढिमागतः। देशाचारो भोजनाच्छादनादिचित्रक्रियात्मकः सकलमण्डलव्यवहारस्तं सम्यगाचरन् तदाचारातिलङ्घने हि तद्देशवासिजनतया विरोधसम्भावनादकल्याणलाभः स्यात् ॥ ५ ॥

अवर्णोऽश्लाघा तं वदतीत्येवंशीलोऽवर्णवादी न क्वापि। जघन्योत्तममध्यमभेदेषु जन्तुषु परावर्णवादो हि बहुदोषः।

यदाह—

परपरिभवपरिवादादात्मोत्कर्षाच्च बध्यते कर्म।
नीचैर्गोत्रं प्रतिभवमनेकभवकोटिदुर्मोचम् ॥ १ ॥

तदेवं सकलजनगोचरोऽप्यवर्णवादो न श्रेयान्। किं पुनः राजामात्यपुरोहितादिषु बहुजनमान्येषु। राजाद्यवर्णवादात् [1]वित्तप्राणनाशनादिरपि दोषः स्यात् ॥ ६ ॥

---

(१) क ग ङ वित्तप्राणनाशादिरपि।

तथा अनेकं बहु निर्गमद्वारं अपसरणमार्गो यत्र च प्रवेशद्वारं तेन विवर्जितं निकेतनं गृहं यस्य स तथा । बहुषु हि निर्गमप्रवेशद्वारेष्वनुपलक्ष्यमाणनिर्गमप्रवेशानां दुष्टलोकानामागमने स्त्रीद्रव्यादिविप्लवः स्यात् । अत्र चानेकद्वारतायाः प्रतिषेधेन विधिराक्षिप्यते । ततः प्रतिनियतद्वारसुसंरक्षितगृहो गृहस्थः स्यादिति लभ्यते । तथा स्थानेऽपि निवेशितं स्थान एव निवेशयितुं युक्तं नास्थाने । स्थानं तु शल्यादिदोषरहितं बहुलदूर्वाप्रवालकुशस्तम्बप्रशस्तवर्णगन्धमृत्तिकासुस्वादुजलोद्गमनिधानादिमत् । स्थानगुणदोषपरिज्ञानं च शकुनस्वप्नोपश्रुतिप्रभृतिनिमित्तादिबलेन । स्थानमेव विशिनष्टि । अतिव्यक्तेऽतिप्रकटेऽतिगुप्तेऽतिप्रच्छन्ने च तद्विपर्ययादनतिव्यक्तगुप्तम् । तत्र अतिव्यक्ते ह्यासन्नाभिगृहान्तराभावेन तथा परिपार्श्वतो निरावरणतया चौरादयोऽभिभवेयुः । अतिगुप्ते च सर्वतो गृहान्तरैर्निरुद्धत्वात् स्वशोभां न लभते । प्रदीपनकाद्युपद्रवेषु च दुःखनिर्गमप्रवेशं गृहं भवति । पुनः कीदृशे स्थाने सुप्रातिवेश्मिके शोभनाः शीलादिसम्पन्नाः प्रातिवेश्मिका यत्र । कुशीलप्रातिवेश्मिकत्वे हि तदालापश्रवणतच्चेष्टादर्शनादिवशात् स्वतः सगुणस्यापि गुणहानिः स्यात् । कुप्रातिवेश्मिकाश्चैते शास्त्रप्रतिषिद्धाः—

खरियातिरिक्खजोणीतालायरसमणमाहणसुसाणा ।
वग्गुरिवाहगुम्मियहरिएसपुलिंदमच्छंधा ॥ १ ॥ ७ ॥

तथा कृतः सङ्गो येन स कृतसङ्गः सन् शोभन आचार इहलोकहिता प्रवृत्तिर्येषां ते सदाचारास्तैर्न तु कितवधूर्तविटभण्डनटादिभिस्तत्सङ्गे हि सदपि शीलं विलीयेत ।

चेति। वधूरक्षणोपायास्त्वेते। गृहकर्मविनियोगः १ परिमितोऽर्थ-
संयोगो २ ऽस्वातन्त्र्यम् ३ सदा च मातृतुल्यस्त्रीलोकावरोध-
४ मिति ॥ ३ ॥

पापानि दृष्टादृष्टापायकारणानि कर्माणि तेभ्यो भीरुः।
तत्र दृष्टापायकारणानि चौर्यपारदारिकत्वद्यूतरमणादीनि इह-
लोकेऽपि सकललोकप्रसिद्धविडम्बनास्थानानि। अदृष्टापायकार-
णानि मद्यमांससेवनादीनि शास्त्रनिरूपितनरकादियातना-
फलानि ॥ ४ ॥

प्रसिद्धः तथाविधापरशिष्टसम्मततया दूरं रूढिमागतः।
देशाचारो भोजनाच्छादनादिचित्रक्रियात्मकः सकलमन-
व्यवहारस्तं सम्यगाचरन् तदाचारातिलङ्घने हि तद्देशवासिज-
तया विरोधसम्भावनादकल्याणलाभः स्यात् ॥ ५ ॥

अवर्णोऽश्लाघा तं वदतीत्येवंशीलोऽवर्णवादी न क्वापि।
जघन्योत्तममध्यमभेदेषु जन्तुषु परावर्णवादो हि बहुदोषः।

यदाह—

परपरिभवपरिवादादात्मोत्कर्षाच्च बध्यते कर्म।
नीचैर्गोत्रं प्रतिभवमनेकभवकोटिदुर्मोचम् ॥ १ ॥

तदेवं सकलजनगोचरोऽप्यवर्णवादो न श्रेयान्। किं पुनः
राजामात्यपुरोहितादिषु बहुजनमान्येषु। राजाद्यवर्णवादात्
[illegible]नाशनादिरपि दोषः स्यात् ॥ ६ ॥

[illegible]नादिरपि।

तथा अनेकं बहु यन्निर्गमद्वारं उपलक्षणत्वात्तदेव च प्रवेशद्वारं तेन विवर्जितं निकेतनं यस्य स तथा। बहुषु हि निर्गमप्रवेशद्वारेष्वनुपलक्ष्यमाणनिर्गमप्रवेशानां दुष्टलोकानामापाते स्त्रीद्रविणादिविप्लव: स्यात्। अत्र चानेकद्वारतायाः प्रतिषेधेन विधिराक्षिप्यते। तत. प्रतिनियतद्वारसुरक्षितगृहो गृहस्थ: स्यादिति लभ्यते। तथाविधमपि निकेतनं स्थान एव निवेशयितुं युक्तं नास्थाने। स्थानं तु शल्यादिदोषरहितं बहुलदूर्वाप्रवालकुशस्तम्बप्रशस्तवर्णगन्धमृत्तिकासुस्वादुजलोद्गमनिधानादिमच्च। स्थानगुणदोषपरिज्ञानं च शकुनस्वप्नोपश्रुतिप्रभृतिनिमित्तादिबलेन। स्थानमेव विशिनष्टि। अतिव्यक्तमतिप्रकटमतिगुप्तमतिप्रच्छन्नं तन्निषेधादनतिव्यक्तगुप्तम्। तत्र अतिव्यक्ते ह्यसन्निहितगृहान्तरतया परिपार्श्वतो निरावरणतया चौरादयोऽभिभवेयु:। अतिगुप्ते च सर्वतो गृहान्तरैर्निरुद्धत्वात्र स्वशोभां लभते। प्रदीपनकाद्युपद्रवेषु च दुःखनिर्गमप्रवेशं गृहं भवति। पुनः कथंभूते स्थाने सुप्रातिवेश्मिके शोभनाः शीलादिसम्पन्नाः प्रातिवेश्मिका यत्र। कुशीलप्रातिवेश्मिकत्वे हि तदालापश्रवणतच्चेष्टादर्शनादिवशात् स्वतः सगुणस्यापि गुणहानिः स्यात्। दुष्प्रातिवेश्मिकास्त्वेते शास्त्रप्रतिषिद्धाः—

खरियातिरिक्खजोणीतालायरसमणमाहणसुसाणा।
वग्गुरिअवाहगुम्मियहरिएसपुलिंदमच्छंधा॥ १ ॥ ७ ॥

तथा कृतः सङ्गो येन स कृतसङ्गः सन् शोभन आचार इहपरलोकहिता प्रवृत्तिर्येषां ते सदाचारास्तैर्न तु कितवधूर्त्तविटभण्डनटादिभिस्तत्सङ्गे हि सदपि शीलं विलीयेत।

यदाह—

यदि सत्सङ्गनिरतो भविष्यसि भविष्यसि ।
अथासज्जनगोष्ठीषु पतिष्यसि पतिष्यसि ॥ १ ॥
सङ्गः सर्वात्मना त्याज्यः स चेत्यक्तुं न शक्यते ।
स सद्भिः सह कर्त्तव्यः सन्तः सङ्गस्य भेषजम् ॥ २ ॥

॥ इति च ॥ ८ ॥

तथा माता जननी पिता जनकस्तयोः पूजकस्त्रिसन्ध्यं प्रणामकरणेन परलोकहितानुष्ठाननियोजनेन सकलव्यापारेषु तदाज्ञया प्रवृत्त्या वर्णगन्धादिप्रधानस्य पुष्पफलादिवस्तुन उपढौकनेन तद्भोगे भोगेन चान्नादीनामन्यत्र तदनुचितादिति माता च पिता च मातापितरौ "आद्वन्द्वे" ॥ ३ । २ । ३९ ॥ इत्यात्वं मातुश्चाभ्यर्हितत्वात्पूर्वनिपातः ।

यन्मनुः—

उपाध्यायाद्दशाचार्य आचार्याणां शतं पिता ।
सहस्रं तु पितुर्माता गौरवेणातिरिच्यते ॥ १ ॥ ९ ॥

तथा त्यजन् परिहरन् उपप्लुतं स्वचक्रपरचक्रविरोधाद्दुर्भिक्षमारीतिजनविरोधादेश्चास्वस्थीभूतं यत् स्थानं ग्रामनगरादि । अत्यज्यमाने हि तस्मिन् धर्मार्थकामानां पूर्वार्जितानां विनाशेन नवानां चानुपार्जनेनोभयलोकभ्रंश एव स्यात् ॥ १० ॥

तथा गर्हितं देशजातिकुलापेक्षया निन्दितं कर्म्म तत्राप्रवृत्तः ।

देशगर्हितं यथा—

सौवीरेषु कृषिकर्म्म । लाटेषु मद्यसन्धानम् ।

जात्यपेक्षया यथा—

ब्राह्मणस्य सुरापानं तिललवणादिविक्रयश्च ।

कुलापेक्षया यथा—

चौलुक्यानां मद्यपानम् । गर्हितकर्म्मकारिणो हि शेषमपि धर्म्यं कर्म्मोपहासाय भवति ॥ ११ ॥

तथा व्ययो भर्त्तव्यभरणस्वभोगदेवतातिथिपूजनादिप्रयोजने द्रव्यविनियोगः । आयः कृषिपाशुपाल्यवाणिज्यसेवादिजनितो द्रव्यलाभः तस्योचितमनुरूपं व्ययं कुर्वन् ।

यदाह—

[1]'लाभोचियदाणे लाभोचियभोगे लाभोचियनिहिकरे सिया ।

आयोचितश्च व्ययश्चतुर्भागादितया कैश्चिदुच्यते ।

यदाह—

पादमायान्निधिं कुर्यात्पादं वित्ताय खट्टयेत् ।

धर्मोपभोगयोः पादं पादं भर्त्तव्यपोषणे ॥ १ ॥

केचित्त्वाहुः—

आयादर्द्धं नियुञ्जीत धर्मे समधिकं ततः ।

शेषेण शेषं कुर्वीत यत्नतस्तुच्छमैहिकम् ॥ १ ॥

आयानुचितो हि व्ययो रोगमिव शरीरं क्षयीकृत्य विभवसारमखिलव्यवहारासमर्थं पुरुषं कुर्वीत ।

---

(१) लाभोचितदानं लाभोचितभोगो लाभोचितनिधिकरः स्यात् ।

उक्तञ्च

आयव्ययमनालोच्य यस्तु वैश्रवणायते ।
अचिरेणैव कालेन सोऽत्र वै श्रमणायते ॥ १ ॥ १२ ॥

तथा वेषो वस्त्रालङ्करणादिभोगः। वित्तं विभव उपलक्षणाद्वयोऽवस्थादेशकालजात्यादिग्रहः। तदनुसारेण तदानुरूप्येण कुर्व्वन्निति सम्बध्यते। विभवाद्यननुसारेण वेषं कुर्वतो जनोपहसनीयतातुच्छत्वान्यायसम्भावनादयो दोषाः। अथवा व्ययमायोचितं कुर्वन्नेव वेषं वित्तानुसारेण कुर्व्वन्नेवेत्यपरोऽर्थः। यो हि सत्यप्याये कार्पण्याद् व्ययं न करोति सत्यपि वित्ते कुचेलत्वादिधर्मा भवति। स लोकगर्हितो धर्मेऽप्यनधिकारीति ॥ १३ ॥

तथा अष्टभिर्धीगुणैर्युक्तः धियो बुद्धेर्गुणाः शुश्रूषादयः। ते त्वमी—

शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा ।
ऊहोऽपोहोऽर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः ॥ १ ॥

तत्र शुश्रूषा श्रोतुमिच्छा। श्रवणमाकर्णनम्। ग्रहणं शास्त्रार्थोपादानम्। धारणमविस्मरणम्। ऊहो विज्ञातमर्थमवलम्ब्यान्येषु तथाविधेषु व्याप्त्या वितर्कणम्। अपोह उक्तियुक्तिभ्यां विरुद्धादर्थाद्धिंसादिकात् प्रत्यपायसम्भावनया व्यावर्त्तनम्। अथवा ऊहः सामान्यज्ञानमपोहो विशेषज्ञानम्। अर्थविज्ञानमूहापोहयोगान्मोहसन्देहविपर्यासव्युदासेन ज्ञानम्। तत्त्वज्ञानमूहापोहविज्ञानविशुद्धमिदमित्थमेवेति निश्चयः। शुश्रूषादिभिर्हि उपासितप्रज्ञा-

प्रकर्षः पुमान्न कदाचिदकल्याणमाप्नोति। एते च बुद्धिगुणा यथासम्भवं द्रष्टव्याः ॥ १४ ॥

तथा शृण्वानस्ताच्छील्येन धर्ममभ्युदयनिःश्रेयसहेतुं शृण्वन् अन्वहं प्रतिदिनं धर्मश्रवणपरो हि [1]मनःखेदापनोदादिकमाप्नोति।

यदाह—

क्लान्तमपोज्झति खेदं तप्तं निर्वाति बुध्यते मूढम्।
स्थिरतामेति व्याकुलमुपयुक्तसुभाषितं चेतः ॥ १ ॥

प्रत्यहं धर्मश्रवणं चोत्तरोत्तरगुणप्रतिपत्तिसाधनत्वात्प्रधानमिति श्रवणमात्राद्बुद्धिगुणादस्य भेदः ॥ १५ ॥

तथा अजीर्णे अजरणे पूर्वभोजनस्य अथवा अजीर्णे परिपाकमनागते पूर्वभोजने नवं भोजनं त्यजतीत्येवंशीलः। अजीर्णभोजने हि सर्वरोगमूलस्याजीर्णस्य वृद्धिरेव कृता भवति।

यदाह—

अजीर्णप्रभवा रोगा इति।

अजीर्णं च लिङ्गतो ज्ञातव्यम्।

यदाह—

मलवातयोर्विगन्धो विड्भेदो गात्रगौरवमरुच्यम्।
अविशुद्धश्चोद्गारः षडजीर्णव्यक्तलिङ्गानि ॥ १ ॥ १६ ॥

तथा काले बुभुक्षासमये भोक्ता अन्नाद्युपजीवकः। भोक्तेति

(1) ग अ मनःखेदापनोदनादिकं करोति।

साधो ह्यन् तेन लौल्यपरिहारेण यथाग्निबलं मितं भुञ्जीत। अतिरिक्तभोजनं हि वमनविरेचनमरणादिना न साधु भवति यो हि मितं भुङ्क्ते स बहु भुङ्क्ते। अक्षुधितेन ह्यमृतमपि भुक्तं भवति विषम्। तथा क्षुत्कालातिक्रमादन्नद्वेषो देहसादश्च भवति। विध्यातेऽग्नौ किं नामेन्धनं कुर्यादिति।

पानाहारादयो यस्याविरुद्धाः प्रकृतेरपि।
सुखित्वायावकल्पन्ते तत्सात्म्यमिति गीयते ॥ १ ॥

एवं लक्षणात्सात्म्यात् आजन्म सात्म्येन भुक्तं विषमपि पथ्यं भवति। परमसात्म्यमपि पथ्यं सेवेत न पुनः सात्म्यप्राप्तमप्यपथ्यम्। सर्वं बलवतः पथ्यमिति मत्वा न कालकूटं खादेत्। सुशिक्षितोऽपि विषतन्त्रज्ञो म्रियत एव कदाचिद्विषात् ॥ १७ ॥

तथा त्रिवर्गो धर्मार्थकामास्तत्र यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः। यतः सर्वप्रयोजनसिद्धिः सोऽर्थः। यत आभिमानिकरसानुविद्धा सर्वेन्द्रियप्रीतिः स कामः। ततोऽन्योऽन्यस्य परस्परं योऽप्रतिबन्धोऽनुपघातस्तेन त्रिवर्गमपि नत्वेकैकं साधयेत्। यदाह—

यस्य त्रिवर्गशून्यानि दिनान्यायान्ति यान्ति च।
स लोहकारभस्त्रेव श्वसन्नपि न जीवति ॥ १ ॥

तत्र धर्मार्थयोरुपघातेन तादात्विकविषयसुखलुब्धो वनगज इव को नाम न भवत्यास्पदमापदाम्। न च तस्य धनं धर्मः शरीरं वा यस्य कामेऽत्यन्तासक्तिः। धर्मकामातिक्रमाद्धनमुपार्जितं परेऽनुभवन्ति स्वयं तु परं पापस्य भाजनं सिंह इव

उक्तञ्च

धर्मश्चेन्नावसीदेत कपालेनापि जीवतः।

आढ्योऽस्मीत्यवगन्तव्यं धर्मवित्ता हि साधवः ॥ १ ॥ १८।

तथा न विद्यते सततप्रवृत्तातिविशदैकाकारानुष्ठानतया तिथ्यादि-
दिनविभागो यस्य सोऽतिथिः।

यथोक्तम्—

तिथिपर्वोत्सवाः सर्वे त्यक्ता येन महात्मना।

अतिथिं तं विजानीयाच्छेषमभ्यागतं विदुः ॥ १ ॥

साधुः शिष्टाचाररतः सकललोकाऽवगीतः। दीनो दीङ् क्ष
इति वचनात् क्षीणसकलधर्मार्थकामाराधनशक्तिः तेषु प्रति-
पत्तिवत् प्रतिपत्तिरुपचारोऽन्नपानादिरूपः। कथं यथार्ह-
मौचित्यानतिक्रमेण।

यदाह—

औचित्यमेकमेकत्र गुणानां कोटिरेकतः।

विषायते गुणग्राम औचित्यपरिवर्जितः ॥ १ ॥ १८ ॥

तथा अनभिनिविष्टोऽभिनिवेशरहितः। अभिनिवेशश्च नीति-
पथमनागतस्यापि परपराभवपरिणामेन कार्यस्यारम्भः। स
च नीचानां भवति।

यदाह—

दर्पः श्रमयति नीचान् निष्फलनयविगुणदुष्करारम्भैः।

स्रोतोविलोमतरणव्यसनिभिरायास्यते मत्स्यैः ॥ १ ॥

अनभिनिविष्टत्वं च कादाचित्कं शाठ्यान्नीचानामपि सम्भवत्यत आह । सदेति ॥ २० ॥

तथा गुणेषु सौजन्यौदार्यदाक्षिण्यस्थैर्यप्रियपूर्वप्रथमाभिभाषणादिषु स्वपरयोरुपकारकारणेष्वात्मधर्मेषु पक्षपाती । पक्षपातस्तु बहुमानतत्प्रशंसासाहाय्यकरणादिना अनुकूला प्रवृत्तिः । गुणपक्षपातिनो हि जीवा अवन्ध्यपुण्यबीजनिषेकेणेहामुत्र च गुणग्रामसम्पदमारोहन्ति ॥ २१ ॥

तथा प्रतिषिद्धो देशोऽदेशः प्रतिषिद्धः कालोऽकालः तयोरदेशाकालयोश्चर्यां चरणं तां त्यजन् परिहरन् अदेशकालचारी हि चौरादिभ्योऽवश्यमुपद्रवमाप्नोति ॥ २२ ॥

तथा जानन् विदन् बलं शक्तिं स्वस्य परस्य वा द्रव्यक्षेत्रकालभावकृतं सामर्थ्यम् । अबलमपि तथैव बलाबलपरिज्ञाने हि सर्वः सफल आरम्भः अन्यथा तु विपर्ययः ।

यदाह—

स्थाने शमवतां शक्त्या व्यायामे वृद्धिरङ्गिनाम् ।
अयथाबलमारम्भो निदानं क्षयसम्पदः ॥ १ ॥ इति ॥ २३ ॥

तथा वृत्तमनाचारपरिहारः सम्यगाचारपरिपालनं च । तत्र तिष्ठन्तीति वृत्तस्थाः । ज्ञानं हेयोपादेयवस्तुविनिश्चयस्तेन वृद्धा महान्तः । वृत्तस्थाश्च ते ज्ञानवृद्धाश्च तेषां पूजकः । पूजा च सेवाञ्जल्यासनाभ्युत्थानादिलक्षणा । वृत्तस्थज्ञानवन्तो हि पूज्यमाना नियमात्कल्पतरव इव सदुपदेशादिफलैः फलन्ति ॥ २४ ॥

तथा पोष्या अवश्यभर्त्तव्या मातृपितृगृहिणपत्यादयस्तान् योगक्षेमकरणेन पोषयतीति पोषकः ॥ २५ ॥

तथा दीर्घकालभावित्वाद्दीर्घमर्थमनर्थं च पश्यति पर्यालोचयतीत्येवंशीलो दीर्घदर्शी ॥ २६ ॥

तथा वस्त्ववस्तुनोः कृत्याकृत्ययोः स्वपरयोर्विशेषमन्तरं जानाति निश्चिनोतीति विशेषज्ञः। अविशेषज्ञो हि पुरुषः पशोर्नातिरिच्यते। अथवा विशेषमात्मन एव गुणदोषाधिरोहलक्षणं जानातीति विशेषज्ञः।

यदाह—

प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः।

किं नु मे पशुभिस्तुल्यं किं नु सत्पुरुषैरिति ॥ १ ॥ २७ ॥

तथा कृतं परोपकृतं जानाति न निह्नुते कृतज्ञः एवं हि तस्य कुशललाभो यदुपकारकारिणो बहु मन्यते कृतघ्नस्य तु निष्कृतिरेव नास्ति।

यदाह—

कृतघ्ने नास्ति निष्कृतिरिति ॥ २८ ॥

तथा लोकानां विशिष्टजनानां विनयादिगुणैर्वल्लभः प्रियः। को हि गुणवतः प्रति प्रीतो न भवति। यस्तु न लोकवल्लभः स न केवलमात्मानं स्वस्य धर्मानुष्ठानमपि परैर्दूषयन् परेषां बोधिलाभभ्रंशहेतुर्भवति ॥ २९ ॥

तथा लज्जा वैयात्याभावः सह लज्जया सलज्जः। लज्जावान् हि प्राणप्रहाणेऽपि न प्रतिज्ञातमपजहाति।

यदाह

लज्जां गुणौघजननीं जननीमिवार्या-

मत्यन्तशुद्धहृदयामनुवर्तमानाः ।

तेजस्विनः सुखमसूनपि सन्त्यजन्ति

सत्यस्थितिव्यसनिनो न पुनः प्रतिज्ञाम् ॥ १ ॥ २० ॥

तथा सह दयया दुःखितजन्तुदुःखत्राणाभिलाषेण वर्तत इति सदयः । धर्मस्य दया मूलमिति ख्यापयन्ति । तदवश्यं दयां कुर्वीत ।

यदाह —

प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा ।

आत्मौपम्येन भूतानां दयां कुर्वीत मानवः ॥ १ ॥ २१ ॥

तथा सौम्योऽक्रूराकारः क्रूरो हि लोकस्योद्वेगकारणम् ॥२२॥

तथा परोपकृतौ परोपकारे कर्मठः कर्मशूरः कर्माणि घटते "तत्र घटते कर्मणष्ठः" ॥ ७ । १ । १३७ ॥ इति ठः परोपकारपरो हि पुमान् सर्वस्य नेत्रामृताञ्जनम् ॥ २३ ॥

तथा अन्तरङ्गश्चासावरिषड्वर्गश्चान्तरङ्गारिषड्वर्गस्तस्य परिहारोऽनासेवनं तत्र परायणस्तत्परः । तत्रायुक्तितः प्रयुक्ताः काम-क्रोधलोभमानमदहर्षाः शिष्टगृहस्थानामन्तरङ्गोऽरिषड्वर्गः । तत्र परपरिगृहीतास्वनूढासु वा स्त्रीषु दुरभिसन्धिः कामः । परस्यात्मनो वा अपायमविचार्य कोपकरणं क्रोधः । दानार्हेषु स्वधनाप्रदानं निष्कारणं परधनग्रहणं च लोभः । दुरभिनिवेशारोहो युक्तोक्ता-

ग्रहणं वा मानः। कुलबलैश्वर्यरूपविद्यादिभिरहङ्कारकरणं परप्रधर्षनिबन्धनं वा मदः। निर्निमित्तं परदुःखोत्पादनेन स्वस्य द्यूतपापर्द्ध्याद्यनर्थसंश्रयेण वा मनःप्रमोदो हर्षः। एतेषां च परिहार्यत्वमपायहेतुत्वात्।

यदाह—

दाण्डक्यो नाम भोजः कामाद्ब्राह्मणकन्यामभिमन्यमानः सबन्धुराष्ट्रो विननाश करालश्च वैदेहः १ क्रोधाज्जनमेजयो ब्राह्मणेषु विक्रान्तस्तालजङ्घश्च भृगुषु २ लोभादैलश्चातुर्वर्ण्यमभ्याहारयमाणः सौवीरश्चाजबिन्दुः ३ मानाद्रावणः परदारानप्रयच्छन् दुर्योधनो राज्यादंशं च ४ मदादम्भोद्भवो भूतावमानी हैहयश्चार्जुनः ५ हर्षाद्वातापिरगस्त्यमभ्यासादयन् वृष्णिसङ्घश्च द्वैपायन ६ मिति ॥ २४ ॥

तथा वशीकृतः स्वच्छन्दतां त्याजित इन्द्रियग्रामः स्पर्शनादिसमूहो येन स तथा। अत्यन्तासक्तिपरिहारेण स्पर्शनादीन्द्रियविकारनिरोधकः। इन्द्रियजयो हि पुरुषाणां परमसम्पत्तये।

यदाह—

आपदां कथितः पन्था इन्द्रियाणामसंयमः।
तज्जयः सम्पदां मार्गो येनेष्टं तेन गम्यताम् ॥ १ ॥
इन्द्रियाण्येव तत्सर्वं यत्स्वर्गनरकावुभौ।
निगृहीतविसृष्टानि स्वर्गाय नरकाय च ॥ २ ॥

सर्वथेन्द्रियनिरोधस्तु यतीनामेव धर्म्म इह तु श्रावकधर्मोचित-गृहस्थस्वरूपमेवाधिकृतमित्येवमुक्तम् ॥ ३५ ॥

एवंविधगुणसमग्रो मनुष्यो गृहिधर्म्माय कल्पते अधिकृतो भवतीति ॥ ५६ ॥

इति परमार्हतश्रीकुमारपालभूपालशुश्रूषिते आचार्यश्रीहेमचन्द्र-विरचितेऽध्यात्मोपनिषन्नाम्नि सञ्जातपट्टबन्धे श्रीयोगशास्त्रे स्वोपज्ञं प्रथमप्रकाशविवरणम् ।

मम्य
व्रता
गुण
गि
मा
भेद
ए

अर्हम्

द्वितीयः प्रकाशः ।

यतिधर्म्मायाशक्तस्य गृहिधर्म्मो योग्य इत्युक्तं गृहिधर्म्मश्च श्रावकधर्म्मः स च सम्यक्त्वमूलानि द्वादशव्रतानि तान्येवाह—

सम्यक्त्वमूलानि पञ्चाणुव्रतानि गुणास्त्रयः ।
शिक्षापदानि चत्वारि व्रतानि गृहमेधिनाम् ॥१॥

म्यक्त्वं मूलं कारणं येषां तानि सम्यक्त्वमूलानि । अणूनि महा-तापेक्षया लघूनि व्रतानि अहिंसादीनि पञ्च एतानि मूलगुणाः । णास्त्रय उत्तरगुणरूपाः ते च गुणव्रतानि दिग्व्रतादीनि त्रीणि । क्षणं शिक्षा अभ्यासः शिक्षायै पदानि स्थानानि चत्वारि ामायिकादीनि प्रतिदिवसाभ्यसनीयानि तत एव गुणव्रतेभ्यो दः । गुणव्रतानि हि प्रायो यावज्जीविकानि । एवं द्वादशव्रतानि हमेधिनां श्रावकाणाम् ॥ १ ॥

सम्यक्त्वमूलानीत्युक्तं तत्र सम्यक्त्वं विभजति—

या देवे देवताबुद्धिर्गुरौ च गुरुतामतिः ।
धर्म्मे च धर्म्मधीः शुद्धा सम्यक्त्वमिदमुच्यते ॥ २ ॥

ा देवे गुरौ धर्मे च वक्ष्यमाणलक्षणे देवत्वगुरुत्वधर्मत्वबुद्धिरयमेव वो गुरुर्धर्म्म इति निश्चयपूर्वा रुचिः श्रद्धानमिति यावत् शुद्धा ज्ञानसंशयविपर्यासनिराकरणेन निर्म्मला सा सम्यक्त्वम् । यद्यपि

अर्हम्

द्वितीयः प्रकाशः ।

यतिधर्म्मस्य कथ्यते इत्युक्तं गृहिधर्म्मस्य श्रावकधर्म्मः स च
सम्यक्त्वमूलानि द्वादशव्रतानि तान्येवाह—

सम्यक्त्वमूलानि पञ्चाणुव्रतानि गुणास्त्रयः ।
शिक्षापदानि चत्वारि व्रतानि गृहमेधिनाम् ॥१॥

म्यक्त्वं मूलं कारणं येषां तानि सम्यक्त्वमूलानि । अणूनि महा-तापेक्षया लघूनि व्रतानि अहिंसादीनि पञ्च एतानि मूलगुणाः । णास्त्रय उत्तरगुणरूपाः तं च गुणव्रतानि दिग्व्रतादीनि त्रीणि । क्षणं शिक्षा अभ्यासः शिक्षायै पदानि स्थानानि चत्वारि ामायिकादीनि प्रतिदिवसाभ्यसनीयानि तत एव गुणव्रतेभ्यो दः । गुणव्रतानि हि प्रायो यावज्जीविकानि । एवं द्वादशव्रतानि गृहमेधिनां श्रावकाणाम् ॥ १ ॥

सम्यक्त्वमूलानीत्युक्तं तत्र सम्यक्त्वं विभजति—

या देवे देवताबुद्धिर्गुरौ च गुरुतामतिः ।
धर्म्मे च धर्म्मधीः शुद्धा सम्यक्त्वमिदमुच्यते ॥ २ ॥

या देवे गुरौ धर्मे च वक्ष्यमाणलक्षणे देवत्वगुरुत्वधर्मत्वबुद्धिरयमेव देवो गुरुर्धर्म्म इति निश्चयपूर्वा रुचिः श्रद्धानमिति यावत् शुद्धा अज्ञानसंशयविपर्यासनिराकरणेन निर्म्मला सा सम्यक्त्वम् । यद्यपि

यदाह—

[1]वेएइ संतकम्मं खओवसमिएसु नाणुभावं सो
उवसंतकसाओ उण वेएइ न संतकम्मं पि ।

एतस्य च स्थितिः षट्षष्टिः सागरोपमाणि साधिकानि ।

यदाह—

[2]दो वारे विजयाइसु गयस्स तिन्नच्चुए अहव ताइं ।
अइरेगं नरभवियं नाणाजीवाण सव्वद्धं ॥ १ ॥

क्षयो मिथ्यात्वमोहनीयस्यानन्तानुबन्धिनां च निर्मूलनाशः ।

प्रयोजनमस्य क्षायिकं तच्च साद्यनन्तम् ।

अत्र चान्तरश्लोकाः—

मूलं बोधिद्रुमस्यैतत् द्वारं पुण्यपुरस्य च ।
पीठं निर्वाणहर्म्यस्य निधानं सर्वसम्पदाम् ॥ १ ॥

गुणानामेक आधारो रत्नानामिव सागरः ।
पात्रं चारित्रवित्तस्य सम्यक्त्वं श्लाघ्यते न कैः ॥ २ ॥

अवतिष्ठेत नाज्ञानं जन्तौ सम्यक्त्ववासिते ।
प्रचारस्तमसः कीदृक् भुवने भानुभासिते ॥ ३ ॥

तिर्यग्नरकयोर्द्वारे दृढा सम्यक्त्वमर्गला ।
देवमानवनिर्वाणसुखद्वारैककुञ्चिका ॥ ४ ॥

---

(१) वेदयति सत्कर्म क्षायोपशमिकेषु नानुभावं सः ।
उपशान्तकषायः पुनर्वेदयति न सत्कर्मापि ॥

(२) द्वौ वारान् विजयादिषु गतस्य त्रीणि अच्युतेऽथवा तानि ।
अतिरेकं नरभविकं नानाजीवानां सर्वाद्धम् ॥

भवेद्वैमानिकोऽवश्यं जन्तुः सम्यक्त्ववासितः ।
यदि नोद्वान्तसम्यक्त्वो बद्धायुर्वापि नो पुरा ॥ ५ ॥

अन्तर्मुहूर्त्तमपि यः समुपास्य जन्तुः
सम्यक्त्वरत्नममलं विजहाति सद्यः ।
बम्भ्रम्यते भवपथे सुचिरं न सोऽपि
तद्बिभ्रतश्चिरतरं किमुदीरयामः ॥ ६ ॥ इति ।

विपक्षज्ञाने सति विवक्षितं सुज्ञानं भवतीति सम्यक्त्वविपक्षं मिथ्यात्वमाह—

अदेवे देवबुद्धिर्या गुरुधीरगुरौ च या ।
अधर्मे धर्मबुद्धिश्च मिथ्यात्वं तद्विपर्ययात् ॥ ३ ॥

अदेवोऽगुरुरधर्मश्च वक्ष्यमाणलक्षणस्तत्र देवत्वगुरुत्वधर्मत्व प्रतिपत्तिलक्षणं मिथ्यात्वं तस्य लक्षणं तद्विपर्ययादिति तस्य सम्यक्त्वस्य विपर्ययः तस्माद्धेतोः सम्यक्त्वविपर्ययरूपत्वादित्यर्थः तथा च इदमपि संगृहीतं देवे अदेवत्वस्य गुरावगुरुत्वस्य धर्मे अधर्मत्वस्य प्रतिपत्तिरिति ।

मिथ्यात्वं च पञ्चधा आभिग्रहिकमनाभिग्रहिकमाभिनिवे- शिकं सांशयिकमनाभोगिकं च ।

तत्राभिग्रहिकं पाखण्डिनां स्वस्वशास्त्रनियन्त्रितविवेका- लोकानां परपक्षप्रतिक्षेपदक्षाणां भवति ॥ १ ॥

अनाभिग्रहिकं तु प्राकृतलोकानां सर्वे देवा वन्दनीया न
या एवं सर्वे गुरवः सर्वे धर्मा इति ॥ २ ॥

[illegible]

[illegible]

[illegible] ॥ १ ॥

[illegible]

[illegible] ॥ १ ॥

[illegible] ॥ २ ॥

[illegible]

[illegible] ॥ ३ ॥

[illegible]

देवादेवगुर्वगुरुधर्माधर्मेषु लक्षयितव्येषु देवलक्षणमाह—

सर्वज्ञो जितरागादिदोषस्त्रैलोक्यपूजितः ।
यथास्थितार्थवादी च देवोऽर्हन् परमेश्वरः ॥ ४ ॥

देवस्य देवत्वे चतुरोऽतिशयानाचक्षते विचक्षणाः ।

तद्यथा—

ज्ञानातिशयः१ अपायापगमातिशयः २ पूजातिशयः ३ वागतिशयश्च४ तत्र सर्वज्ञ इत्यनेन सकलजीवाजीवादितत्त्वज्ञतया ज्ञानातिशयमाह । नतु यथाहुर्विशृङ्खलवादिनः परे ।

सर्वं पश्यतु वा मा वा तत्त्वमिष्टं तु पश्यतु ।
कीटसंख्यापरिज्ञानं तस्य नः क्वोपयुज्यते ॥ १ ॥
दूरं पश्यतु वा मा वा तत्त्वमिष्टं तु पश्यतु ।
प्रमाणं दूरदर्शी चेदेतान् गृध्रानुपास्महे ॥ २ ॥ इति ॥

नहि विवक्षितस्यैकस्यापीष्टस्यार्थस्य ज्ञानमशेषार्थज्ञानमन्तरेण भवति । सर्वे हि भावा भावान्तरैः साधारणासाधारणरूपा 'इत्यशेषज्ञानमन्तरेण सा लक्षणवैलक्षण्याभ्यां नैकोऽपि ज्ञातो भवति ।

यदाहुः—

एको भावः सर्वथा येन दृष्टः
सर्वे भावास्तत्त्वतस्तेन दृष्टाः ।

(१) क ख इत्यशेषज्ञतामन्तरेण ।

[illegible]

[illegible] ॥ ४ ॥

[illegible]

[illegible] यथास्थितार्थवादित्वेन वा मतिमान्‌।
यथास्थित सङ्गमेव वदतीत्येवंशीलो यथास्थितार्थवादी ।

यदाभ्यधायि स्तुतौ

अपक्षपातेन परीक्ष्यमाणा द्वयं द्वयस्याप्रतिमं प्रतीमः ।

यथास्थितार्थप्रथनं तवैतदस्थाननिर्बन्धरसं परेषाम्‌ ॥ १ ॥

यथा वा

क्षिप्येत वान्यैः सदृशीक्रियेत वा तवाङ्घ्रिपीठे लुठनं सुरेशितुः ।

इदं यथावस्थितवस्तुदेशनं परैः कथङ्कारमपाकरिष्यते ॥ २ ॥

देव इति लक्ष्यपदं दीव्यते स्तूयते इति देवः स च सामर्थ्या-
दर्हन्‌ परमेश्वरो नान्यः ॥ ४ ॥

चतुरतिशयवतो देवस्य ध्यानोपासनशरणगमनशासनप्रतिपत्तीः साधिक्षेपमुपदिशति—

ध्यातव्योऽयमुपास्योऽयमयं शरणमिष्यताम् ।
अस्यैव प्रतिपत्तव्यं शासनं चेतनास्ति चेत् ॥ ५ ॥

अयं देवो ध्यातव्यः पिण्डस्थपदस्थरूपस्थरूपातीतरूपतया श्रेणिकेनेव । श्रेणिको हि वर्णप्रमाणसंस्थानसंहननचतुस्त्रिंशदतिशयादियोगिनं भगवन्तं श्रीमहावीरमनुध्यातवान् । तदनुभावाच्च तद्वर्णप्रमाणसंस्थानसंहननातिशययुक्तः पद्मनाभस्तीर्थंकरो भविष्यति ।

यदाचक्ष्महि—

[1]तह तम्मएण मणसा वीरजिणो झाइयो तए पुव्विं ।
जह तारिसो च्चिय तुमं अहेसि हो जोगमाहप्पं ॥ १ ॥

आगमश्च—

[2]जस्सीलसमायारो अरिहा तित्थंकरो महावीरो ।
तस्सीलसमायारो होहि हु अरिहा महापउमो ॥ २ ॥

उपास्यः सेवाञ्जलिसंबन्धादिना अयमेव देवः दुष्कृतगर्हासुकृतानुमोदनापूर्वकमयमेव देवो भवभयार्त्तिभेदी शरणमिष्यताम् । अस्यैवोक्तलक्षणस्य देवस्य शासनमाज्ञा प्रतिपत्तव्यं स्वीकरणीयम् ।

---

(१) तथा तन्मयेन मनसा वीरजिनो ध्यातस्त्वया पूर्वम् ।
यथा तादृश एव त्वमासीः हो योगमाहात्म्यम् ॥
(२) यच्छीलसमाचारो अर्हन् तीर्थंकरो महावीरः ।
तच्छीलसमाचारो भविष्यति खलु अर्हन् महापद्मः ॥

प्रमत्तगीतानि हि निरतिशयपुरुषप्रणीतशास्त्राणि न प्रतिपत्ति-योग्यानि । चेतनावद्भिः प्रेक्षावद्भिः चेतनावत एव प्रत्युपदेशस्य सफलत्वात् । अचेतनं तु प्रति विफल उपदेशप्रयासः ।

यदाह —

अरण्यरुदितं कृतं शवशरीरमुद्वर्तितं
श्वपुच्छमवनामितं बधिरकर्णजापः कृतः ।
स्थले कमलरोपणं सुचिरमूषरे वर्षणं
तदन्धमुखमण्डनं यदबुधे जने भाषितम् ॥ १ ॥ ५ ॥

अदेवलक्षणमाह —

ये स्त्रीशस्त्राक्षसूत्रादिरागाद्यङ्ककलङ्किताः ।
निग्रहानुग्रहपरास्ते देवाः स्युर्न मुक्तये ॥ ६ ॥

स्त्री कामिनी शस्त्रं शूलादि अक्षसूत्रं जपमाला तान्यादौ येषां नाट्याट्टहासादीनां ते स्त्रीशस्त्राक्षसूत्रादयः राग आदिर्येषां ते रागादयः आदिशब्दाद् द्वेषमोहपरिग्रहः रागादीनामङ्काश्चिह्नानि स्त्रीशस्त्राक्षसूत्रादयश्च ते रागाद्यङ्काश्च तैः कलङ्किता दूषितास्तत्र स्त्री रागचिह्नं शस्त्रं द्वेषचिह्नं अक्षसूत्रं मोहचिह्नम् । वीतरागो हि नाङ्गनासङ्गभाग्भवति । वीतद्वेषो वा कथं शस्त्रं बिभृयात् । गतमोहो वा कथं विस्मृतिचिह्नं जपमालां परिगृह्णीयात् । रागद्वेषमोहैः सर्वदोषाः संगृहीतास्तन्मूलत्वात्सर्वदोषाणाम् । निग्रहो वधबन्धादिः अनुग्रहो वरप्रदानादिः तौ परौ प्रकृष्टौ येषां ते तथा । निग्रहानु-ग्रहावपि रागद्वेषयोश्चिह्नं । य एवंविधास्ते देवा न भवन्ति मुक्तये

इति मुक्तिनिमित्तम्। देवत्वमात्रं तु क्रीडनाद्यिकारिणां प्रेतपिशाचादीनामपि न वार्यते ॥ ३ ॥

मुक्तिनिमित्तत्वाभावमेव भनक्ति—

नाट्याट्टहाससङ्गीताद्युपप्लवविसंस्थुलाः ।
लम्भयेयुः पदं शान्तं प्रपन्नान् प्राणिनः कथम् ॥७॥

इह सकलसांसारिकोपप्लवरहितं शान्तं पदं मुक्तिकैवल्यादिशब्दाभिधेयमस्तीत्यत्र नास्ति विप्रतिपत्तिः। तत्तादृशं शान्तं पदं नाट्याट्टहाससङ्गीतादिविसंस्थुलाः स्वयमुपहतवृत्तयः कथमाश्रितजनान् प्रापयेयुः। नह्येरण्डतरुः कल्पतरुलीलामुद्वहति। ततश्च रागद्वेषमोहदोषविवर्जितो जिन एको देवो मुक्तये नेतरे दोषदूषिताः।

अत्रान्तरश्लोकाः—

न सर्वज्ञा न नीरागाः शङ्करब्रह्मविष्णवः ।
प्राकृतेभ्यो मनुष्येभ्यो ऽप्यसमञ्जसवृत्तितः ॥ १ ॥
स्त्रीसङ्गः काममाचष्टे द्वेषं चायुधसंग्रहः ।
व्यामोहं चाक्षसूत्रादिरशौचं च कमण्डलुः ॥ २ ॥
गौरी रुद्रस्य सावित्री ब्रह्मणः श्रीर्मुरद्विषः ।
शचीन्द्रस्य रवे रत्नादेवी दक्षात्मजा विधोः ॥ ३ ॥
तारा बृहस्पतेः स्वाहा वह्नेश्चेतोभुवो रतिः ।
धूमोर्णा श्राद्धदेवस्य दारा एवं दिवौकसाम् ॥ ४ ॥

सर्वेषां शास्त्रसम्बन्धः सर्वेषां मोहजृम्भितम् ।
तदेवं देवसन्दोहो न देवपदवीं स्पृशेत् ॥ ५ ॥
बुद्धस्यापि न देवत्वं मोहाच्छून्याभिधायिनः ।
प्रमाणसिद्धे शून्यत्वे शून्यवादकथा वृथा ॥ ६ ॥
प्रमाणस्यैव सत्त्वेन न प्रमाणविवर्जिता ।
शून्यसिद्धिः परस्यापि न स्वपक्षस्थितिः कथम् ॥ ७ ॥
सर्वथा सर्वभावेषु क्षणिकत्वे प्रतिश्रुते ।
फलेन सह सम्बन्धः साधकस्य कथं भवेत् ॥ ८ ॥
वध्यस्य वधको हेतुः कथं क्षणिकवादिनः ।
स्मृतिश्च [1]प्रत्यभिज्ञा च व्यवहारकरी कथम् ॥ ९ ॥
निपत्य ददतो व्याघ्राः स्वकायं कृमिसङ्कुलम् ।
देयादेयविमूढस्य दया बुद्धस्य कीदृशी ॥ १० ॥
स्वजन्मकाल एवात्मजनन्युदरदारिणः ।
मांसोपदेशदातुश्च कथं शौद्धोदनेर्दया ॥ ११ ॥
यो ज्ञानं प्रकृतेर्धर्मं भाषते स निरर्थकम् ।
निर्गुणो निष्क्रियो मूढः स देवः कपिलः कथम् ॥ १२ ॥
आर्याविनायकस्कन्दसमीरणपुरस्सराः ।
निगद्यन्ते कथं देवाः सर्वदोषनिकेतनम् ॥ १३ ॥
या पशुर्गूथमश्नाति स्वपुतं च हपस्यति ।
शृङ्गादिभिर्घ्नती जन्तून् सा वन्द्यास्तु कथं नु गौः ॥ १४ ॥

---

(१) क प्रत्यभिज्ञातव्यवहारकरी कथम् ।

पयःप्रदानसामर्थ्याद्वन्द्या चेन्महिषी न किम्।
विशेषो दृश्यते नास्यां महिषीतो मनागपि ॥ १५ ॥
स्थानं तीर्थर्षिदेवानां सर्वेषामपि गौर्यदि।
विक्रीयते दुह्यते च हन्यते च कथं ततः ॥ १६ ॥
मुसलोदूखले चुल्ली देहली पिप्पली जलम्।
निम्बोऽर्कश्चापि यैः प्रोक्ता देवास्तैः कोऽव वर्जिताः ॥१७

वीतरागस्तोत्रेऽप्युक्तमस्माभिः।

कृतार्था जठरोपस्थदुःस्थितैरपि दैवतैः।
भवादृशान्निह्नुवते हहा देवास्तिकाः परे ॥ १८ ॥ ७ ॥

गुरुलक्षणमाह—

महाव्रतधरा धीरा भैक्षमात्रोपजीविनः।
सामायिकस्था धर्मोपदेशका गुरवो मताः ॥ ८ ॥

महाव्रतानि अहिंसादीनि तानि धरन्तीति महाव्रतधराः। महा-
व्रतधारित्व एवायं हेतुः धीरा इति धैर्यं ह्यापत्स्वप्यवैक्लव्यं तथोगा
अखण्डितमहाव्रतधरा भवन्ति। मूलगुणधारित्वमुक्त्वा उत्तरगु-
धारित्वमाह। भैक्षमात्रोपजीविन इति भिक्षाणां समूहो भै-
अन्नपानधर्मोपकरणरूपं तन्मात्रमेवोपजीवन्ति लोकात्र पुनः
धान्यहिरण्यग्रामनगरादि। मूलगुणोत्तरगुणधारणकारणभूतगु-
त्वमाह। सामायिकस्था इति समो रागद्वेषविकल आत्मा सम
विशिष्टज्ञानादिगुणलाभः। समायः स एव सामा-

...सामायिकमत्र तिष्ठन्तीति सामायिकस्थाः । सामायिकस्थो ...गुणास्तद्भेदभिन्नं चारित्रं पालयितुं क्षमः । एतद्यतिमात्र-...साधारणलक्षणम् । गुरोस्तु असाधारणलक्षणं धर्मोपदेशका इति ...संवरनिर्जराकृपं यतिश्रावकसम्बन्धिभेदभिन्नं वा उपदिशन्तीति ...पदेशकाः ।

...चिन्तामणौ—

गुरुर्धर्मोपदेशकः इति गृह्णन्ति सद्भूतं शास्त्रार्थमिति ...वः ॥ ८ ॥

अगुरुलक्षणमाह—

सर्वाभिलाषिणः सर्वभोजिनः सपरिग्रहाः ।
अब्रह्मचारिणो मिथ्योपदेशा गुरवो न तु ॥ ९ ॥

...वेनुपदेश्यसम्बन्धिस्त्रीधनधान्यहिरण्यक्षेत्रवास्तुचतुष्पदाद्यभिलष-...त्येवंशीलाः सर्वाभिलाषिणः । तथा सर्वं मद्यमधुमांसानन्त-...यादि भुञ्जत इत्येवंशीलाः सर्वभोजिनः । सह परिग्रहेण कलत्रादिना वर्त्तन्ते सपरिग्रहाः । अत एवाब्रह्मचारिणः ...प्रणो महादोषतां कथयितुमब्रह्मचारिण इति पृथगुपन्यासः । ...त्वे असाधारणं कारणमाह । मिथ्योपदेशा इति । मिथ्या ...थ आप्तोपज्ञोपदेशरहितत्वादुपदेशो धर्मदेशनं येषां ते तथा । ...तु नैव एवंविधा गुरव इति । ननु धर्मोपदेशदायित्वं ...स्त तदास्तु गुरुत्वं किं निष्परिग्रहत्वादिगुणगवेषणेन ॥ ९ ॥

...दिव्यादिरूपं तत्र तिष्ठन्तीति सामायिकस्थाः । सामायिकस्थो
...सस्थावरभेदभिन्नं चारित्रं पालयितुं यत्नः । एतद्यतिनाव-
...स्वलक्षणम् । गुरोस्तु असाधारणलक्षणं धर्मोपदेशका इति
सधर्मनिर्जरारूप प्रतिश्रावकसम्बन्धिभेदभिन्नं वा उपदिशन्तीति
...देशकाः ।

...स्माभिरभिधानचिन्तामणौ—

गुरुर्धर्मोपदेशक इति स्मरन्ति मद्भूतं शास्त्रार्थमिति
:॥ ८ ॥

अगुरुलक्षणमाह—

सर्वाभिलाषिणः सर्वभोजिनः सपरिग्रहाः ।
अब्रह्मचारिणो मिथ्योपदेशा गुरवो न तु ॥ ९ ॥

...गुपदेशसम्बन्धिस्त्रीधनधान्यहिरण्यचैत्यवास्तुचतुष्पदाद्यभिलष-
...शीलाः सर्वाभिलाषिणः । तथा सर्वं मद्यमधुमांसानन्त-
...दि भुञ्जत इत्येवंशीलाः सर्वभोजिनः । सह परिग्रहेण
...त्रादिना वर्त्तन्ते सपरिग्रहाः । अत एवाब्रह्मचारिणः
...र्य महादोषतां कथयितुमब्रह्मचारिण इति पृथगुपन्यासः ।
...त्वे असाधारणं कारणमाह । मिथ्योपदेशा इति । मिथ्या
... आप्तोपज्ञोपदेशरहितत्वादुपदेशो धर्मदेशनं येषां ते तथा ।
... नैव एवंविधा गुरव इति । ननु धर्मोपदेशदायित्वं
... तदास्तु गुरुत्वं किं निष्परिग्रहित्वादिगुणगवेषणेन ॥ ९ ॥

मतोऽप्यदर्शनमिति वक्तुं युक्तं प्रमाणाभावात्। अभिव्यञ्जकवर्गा-च्छब्दश्रवणमेव प्रमाणमिति चेत् न। तस्य जन्यत्वेऽप्युपपत्तेः। अभिव्यञ्जत्वे प्रत्युत दोषसम्भवः। एकशब्दाभिव्यक्त्यर्थं स्थानकरणा-भिघाते शब्दान्तराणामपि तद्देश्यानामभिव्यक्तिप्रसङ्गः। न च प्रतिनियतव्यञ्जकव्यङ्ग्यता शब्दानां भवति व्यङ्ग्यान्तरेषु तद्-दर्शनात्।

तथाच—

गृहे दधिघटीं द्रष्टुमाहितो गृहमेधिना।
अपूपानपि तद्देश्यान् प्रकाशयति दीपकः ॥ १ ॥

तदेवं वचनस्यापौरुषेयता न सम्भवति। अथाप्यप्रामाणिकहेवाक-बलादाकाशादिवच्छब्दस्यापौरुषेयता यदि भवेत् तथापि प्रामाण्यं न सम्भवति। हि यस्मादाप्तवक्तृकत्वेन वाचां प्रामाण्यं नान्यथा।

यतः—

शब्दे गुणोद्भवस्तावद्वक्त्रधीन इति स्थितम्।
तदभावः अचित्तावद्दीपवद्वक्तृकत्वतः ॥ १ ॥
तद्दोषैरपकृष्टानां शब्दे संक्रान्त्यसम्भवात्।
यद्वा वक्तुरभावेन गुणा न स्युर्निराश्रयाः ॥ २ ॥

किञ्च—

गुणाः सन्ति न सन्तीति पौरुषेयेषु युज्यते।
वेदे कर्तुरभावाच्च गुणाशङ्कैव नास्ति नः ॥ ३ ॥ १२ ॥

एवं तावदपौरुषेयवचनाभिहितस्यासम्भवादिना
अभावमभिधायासर्वज्ञपुरुषवक्तृकस्य
धर्मस्याप्रामाणिकत्वमाह—

मिथ्यादृष्टिभिराम्नातो हिंसाद्यैः कलुषीकृतः ।
स धर्म इति वित्तोऽपि भवभ्रमणकारणम् ॥१३॥

मिथ्यादृष्टिभिर्हरिहरहिरण्यगर्भकपिलबुद्धादिभिराम्नात आप्तो-
क्तः प्रतिपादितः । यत्तदोर्नित्याभिसम्बन्धाद्यो मिथ्यादृष्टि-
भिराम्नातः स धर्मत्वेन मुग्धबुद्धीनां प्रसिद्धोऽपि भवभ्रमण-
कारणं धर्म एवेत्यर्थः । कुत इत्याह । हिंसाद्यैः कलुषीकृत इति ।
मिथ्यादृष्टिप्रणीता ह्यागमा हिंसादिदोषदूषिताः ॥ १३ ॥

इदानीमदेवागुर्व्वधर्म्माणां साक्षेपं प्रतिक्षेपमाह—

सरागोऽपि हि देवश्चेद् गुरुरब्रह्मचार्य्यपि ।
कृपाहीनोऽपि धर्म्मः स्यात्कष्टं नष्टं हहा जगत् ॥१४॥

रागग्रहणमुपलक्षणं द्वेषमोहयोः । अब्रह्मचारित्वमुपलक्षणं प्राणा-
तिपातादीनाम् । कृपाहीनत्वमुपलक्षणं मूलोत्तरगुणहीनत्वस्य ।
चेच्छब्दः प्रत्येकमभिसम्बध्यते । आक्षेपं प्रकटयति । कष्टमिति
खेदे नष्टं जगत् देवगुरुधर्मशून्यत्वेन विनष्टं दुर्गतिगमनात् । हहा
निपातः खेदातिशयसूचकः ।

यदाह—

'पइईए कम्माणं नाऊणं वा विवागमसुहंति।

अवरद्धेवि न कुप्पइ उवसमओ सव्वकालंपि ॥ १ ॥

अन्ये तु क्रोधकण्डूविषयतृष्णोपशमः शम इत्याहुः अधिगत ...दर्शनो हि साधूपासनावान् कथं क्रोधकण्ड्वा विषयतृष्णया तरलीक्रियेत। ननु क्रोधकण्डूविषयतृष्णोपशमश्चेच्छमस्तर्हि ...थे...कादीनां सापराधे निरपराधेऽपि च परे क्रोधवतां प... ...त ... तम ...सां च कथं शमः। तदभावे च सम्यक्त्वं न ...। नैवम्। लिङ्गिनि सम्यक्त्वे सति लिङ्गैरवश्यंभाव्यमिति ...नियमः। दृश्यते हि धूमरहितोऽप्ययस्कारगृहेषु वह्निः ...च्छन्नस्य वा वह्नेर्न धूमलेशोपीति अयं तु नियमः सुपरीक्षिते ...सति लिङ्गी भवत्येव।

यदाह—

लिङ्गे लिङ्गी भवत्येव लिङ्गिन्येवेतरत्पुनः।

नियमस्य विपर्यासे सम्बन्धो लिङ्गलिङ्गिनोः ॥ १ ॥

सञ्ज्वलनकषायोदयाद्वा कृष्णादीनां क्रोधकण्डूविषयतृष्णे ...न अपि केचन कषायास्तीव्रतया अनन्तानुबन्धिसदृश... ...भवन्त इति सर्वमवदातम्। संवेगो मोक्षाभिलाषः। सम्यग्-

(१) प्रकृत्याः कर्मणां ज्ञात्वा वा विपाकमशुभमिति।

अपराधेऽपि न कुप्यति उपशमतः सर्वकालमपि ॥

(२) क ख प्रशमः।

दृष्टिर्हि नरेन्द्रसुरेन्द्राणां विषयसुखानि दुःखानुषङ्गाद्दुःखतया मन्यमानो मोक्षसुखमेव सुखत्वेन मन्यते अभिलषति च।

यदाह—

'नरविबुहेसरसोक्खं[2] दुक्खं चिय भावओ अ मन्नंतो।

संवेगओ न मोक्खं मोत्तूणं किंचि पच्छेइ ॥ १ ॥

निर्वेदो भववैराग्यम्। सम्यग्दर्शनी हि दुःखदौर्गत्यगहने भव-कारागारे कर्मदण्डपाशिकैस्तथातथाकदर्थ्यमानः प्रतिकर्तुमक्षमो ममत्वरहितश्च दुःखेन निर्विण्णो भवति।

यदाह—

[3]नारयतिरियनरामरभवेसु निव्वेयओ वसइ दुक्खं।

अकयपरलोयमग्गो ममत्तविसवे[4]गरहिओ य ॥ १ ॥

अन्ये तु संवेगनिर्वेदयोरर्थविपर्ययमाहुः संवेगो भववैराग्यं निर्वेदो मोक्षाभिलाष इति। अनुकम्पा दुःखितेषु अपक्षपातेन दुःखप्रहाणेच्छा। पक्षपातेन तु करुणा स्वपुत्रादौ व्याघ्रादीनामप्यस्त्येव। सा चानुकम्पा द्रव्यतो भावतश्च भवति। द्रव्यतः सत्यां शक्तौ दुःखप्रतीकारेण। भावत आर्द्रहृदयत्वेन।

(१) नरविबुधेश्वरसौख्यं दुःखमेव भावतश्च मन्यमानः।

संवेगतो न मोक्षं मुक्त्वा किञ्चित् प्रेक्षते ॥

(२) ख ड -दुक्खं।

(३) नारकतिर्यङ्नरामरभवेषु निर्वेदतः वसति दुःखम्।

अकृतपरलोकमार्गो ममत्वविषवेगरहितश्च ॥

(४) ख ग घ ङ -वेग-।

१८। —

'दट्ठूण पाणिनिवहं भीमे भवसायरम्मि दुक्खत्तं ।

अविसेसओऽणुकंपं 'दुविहावि सामच्छओ कुणइ ॥ १ ॥

अस्तीति मतिरस्येत्यास्तिकस्तस्य भावः कर्म वा आस्तिक्यम् ।

...अवणेऽपि जिनोक्ततत्त्वविषये निराकाङ्क्षा प्रतिपत्तिः ।

स्तिक्येन हि जीवधर्मतया अप्रत्यक्षं सम्यक्त्वं लक्ष्यते । तद्वान् हि

स्तिक इत्युच्यते ।

...—

'मन्नइ तमेव सच्चं नीसंकं जं जिणेहिं पन्नत्तं ।

सुहपरिणामो सम्मं कंखाइविसुत्तिआरहिओ ॥ १ ॥

अन्ये तु शमादीनि लिङ्गान्यन्यथा व्याचक्षते सुपरीक्षित-

... निवेशान्मिथ्याभिनिवेशोपशमः शमः ।

... लक्षणम् । यो ह्यतत्त्वं विहायात्मना तत्त्वं प्रतिपन्नः

लक्ष्यते सम्यग्दर्शनवानिति । संवेगो भयं जिनप्रवचनानुसारिणो

नरकेषु शरीरं मानसं च शीतोष्णादिजनितं च संक्लिष्टासुरो-

...तं च परस्परोदीरितं च तिर्यक्षु भारारोपणाद्यनेकविध मनुजेषु

... च दुःखमवलोकयतस्तद्भीरुतया तत्प्रशमोपाय-

धर्ममनुतिष्ठतो लक्ष्यते विद्यतेऽस्य सम्यग्दर्शनमिति । निर्वेदो

(१) दृष्ट्वा प्राणिनिवहं भीमे भवसागरे दुःखार्त्तम् ।
अविशेषतोऽनुकम्पां द्विविधामपि सामर्थ्यतः करोति ॥

(२) ख ग घ ठ दुहावि ।

(३) मन्यते तदेव सत्यं निःशङ्कं यज्जिनैः प्रज्ञापितम् ।
शुभपरिणामः सम्यक् काङ्क्षादिविस्रुतिकारहितः ॥

विषयेष्वनभिष्वङ्गः यथा इहलोक एव प्राणिनां दु
भोगाभिष्वङ्गोऽनेकोपद्रवफलः परलोकेऽप्यतिकटुकन
मनुष्यजन्मफलप्रदः। अतो न किञ्चिदनेन। उज्झितव
मिति। एवंविधनिर्वेदेनापि लक्ष्यतेऽस्त्यस्य सम्यग्दर्शनमि
कम्पा कृपा यथा सर्व्व एव सत्त्वाः सुखार्थिनो दुःखप्रहाण
ततो नैषामल्पापि पीडा मया कार्येत्यनयापि लक्ष्
सम्यक्त्वमिति। सन्ति खलु जिनेन्द्रप्रवचनोपदिष्टा अ
जीवपरलोकादयो भावा इति परिणाम आस्तिक्यम्।
लक्ष्यते सम्यग्दर्शनयुक्तोऽयमिति ॥ १५ ॥

सम्यक्त्वलिङ्गान्युक्त्वा भूषणान्याह—

स्थैर्यं प्रभावना भक्तिः कौशलं जिनशासने।
तीर्थसेवा च पञ्चास्य भूषणानि प्रचक्षते ॥ १

अस्य सम्यक्त्वस्य पञ्च भूषणानि भूष्यते अलङ्क्रियते यैस्तानि भू
जिनशासने जिनशासनविषये। एतच्च सर्वत्र सम्बध्यते। स्थैर्यं जि
प्रति चलितचित्तस्य परस्य स्थिरत्वापादनं स्वयं वा परतीर्थि
दर्शनेऽपि जिनशासनं प्रति निष्प्रकम्पता। प्रभवति जैनेन्द्र
तस्य प्रभवतः प्रयोजकत्वं प्रभावना। सा चाष्टधा प्रभावकभे
यदाह—

[1]पावयणी धम्मकही वाई नेमित्तिओ तवस्सी य।
विज्जा सिद्धो य कवी य अट्ठेव पभावगा भणिया ॥ १

१ प्रावचनी धर्मकथी वादी नैमित्तिकः तपस्वी च।
[illegible]

तत्र प्रवचनं द्वादशाङ्गं गणिपिटकं तदस्यास्त्यतिशयवदिति
.वचनी युगप्रधानागमः। धर्मकथा प्रशस्यास्यास्तीति धर्मकथी
.ग्रखादिलादिन्। वादिप्रतिवादिसभ्यसभापतिलक्षणायां चतु
र.पां सभायां प्रतिपक्षनिरासपूर्वकं स्वपक्षस्थापनार्थमवश्यं
.दतीति वादी। निमित्तं त्रैकालिकं लाभालाभादिप्रतिपादकं
..त्रं तद्वेत्यधीते वा नैमित्तिकः। तपो विकृष्टमष्टमाद्यस्यास्तीति
.पस्वी। विद्याः प्रज्ञप्त्यादयः शासनदेवतास्ताः साहायके यस्य
. विद्यावान्। अञ्जनपादलेपतिलकगुटिकासकलभूताकर्षण-
नष्कर्षणवैक्रियत्वप्रभृतयः सिद्धयस्ताभिः सिद्ध्यति स्म सिद्धः। कवते
..पद्यादिभिः प्रबन्धैर्वर्णनां करोतीति कविः। एते प्रवचन्या-
..ऽष्टौ प्रभवतो भगवच्छासनस्य यथायथं देशकालाद्यौचित्येन
। ..यकायाऽ५। प्रभावकास्तेषां कर्म प्रभावना द्वितीयं भूषणम्।
.।क्तिः प्रवचने विनयवैयावृत्त्यरूपा प्रतिपत्तिः सम्यग्दर्शनज्ञान-
.रित्रादिगुणाधिकेष्वभ्युत्थानमभियानं शिरस्यञ्जलिकरणं स्वयमा-
सन.ि.कनमासनाभिग्रहो वन्दना पर्युपासना अनुगमनं चेत्यष्टविध-
कर्मविनयनादष्टविध उपचारविनयः। व्यावृत्तस्य भावः कर्म वा
वैया..। तच्चाचार्योपाध्यायतपस्विशिक्षकग्लानकुलगणसङ्घसाधु-
समनोज्ञेषु दशस्वन्नपानवस्त्रपात्रप्रतिश्रयपीठकफलकसंस्तारादिभि-
र्धर्मसाधनैरुपग्रहः शुश्रूषाभैषजक्रियाकान्तारविषमदुर्गोपसर्गेष्व-
भ्युपपत्तिश्च। जिनशासनविषये च कौशलं नैपुण्यम्। ततो हि
व्यवहितादिरप्यर्थो विषयीक्रियते। यथानार्यदेशवर्त्ती आर्द्रककुमारः
श्रेणिकपुत्रेणाभयकुमारेण कौशलात्प्रतिबोधित इति। तीर्थं नद्यादे-

विषयेष्वनभिष्वङ्गः यथा इहलोक एव प्राणिनां दुरन्तकाम-भोगाभिष्वङ्गोऽनेकोपद्रवफलः परलोकेऽप्यतिकटुकनरकतिर्यग्-मनुष्यजन्मफलप्रदः। अतो न किञ्चिदनेन। उज्झितव्य एवाय-मिति। एवंविधनिर्वेदेनापि लक्ष्यतेऽस्त्यस्य सम्यग्दर्शनमिति। अनु-कम्पा कृपा यथा सर्व्वे एव सत्त्वाः सुखार्थिनो दुःखप्रहाणार्थिनश्च। ततो नैषामल्पापि पीडा मया कार्येत्यनयापि लक्ष्यतेऽस्त्यस्य सम्यक्त्वमिति। सन्ति खलु जिनेन्द्रप्रवचनोपदिष्टा अतीन्द्रिया जीवपरलोकादयो भावा इति परिणाम आस्तिक्यम्। अनेनापि लक्ष्यते सम्यग्दर्शनयुक्तोऽयमिति ॥ १५ ॥

सम्यक्त्वलिङ्गान्युक्त्वा भूषणान्याह—

स्थैर्यं प्रभावना भक्तिः कौशलं जिनशासने।
तीर्थसेवा च पञ्चास्य भूषणानि प्रचक्षते ॥ १६ ॥

अस्य सम्यक्त्वस्य पञ्च भूषणानि भूष्यते अलङ्क्रियते यैस्तानि भूषणानि जिनशासने जिनशासनविषये। एतच्च सर्वत्र सम्बध्यते। स्थैर्यं जिनं प्रति चलितचित्तस्य परस्य स्थिरत्वापादनं स्वयं वा परतीर्थिकर्द्धि-दर्शनेऽपि जिनशासनं प्रति निष्प्रकम्पता। प्रभवति जैनेन्द्रशासनं तस्य प्रभवतः प्रयोजकत्वं प्रभावना। सा चाष्टधा प्रभावकभेदात्। यदाह—

'पावयणी धम्मकही वाई नेमित्तिओ तवस्सी य।
विज्जा सिद्धो अ कई य अट्ठेव पभावगा भणिया ॥ १

१ प्रावचनी धर्मकथी वादी नैमित्तिक तपस्वी च।
विद्यावान् सिद्धश्च [illegible]

तत्र प्रवचनं द्वादशाङ्गं गणिपिटकं तदस्यास्त्यतिशयवदिति
[illegible] युगप्रधानागमः। धर्मकथा प्रशस्यास्यास्तीति धर्मकथी
[illegible]। वादिप्रतिवादिसभ्यसभापतिलक्षणायां चतु-
[illegible] सभायां प्रतिपक्षनिरासपूर्वकं स्वपक्षस्थापनार्थमवश्यं
वदतीति वादी। निमित्तं त्रैकालिकं लाभालाभादिप्रतिपादकं
[illegible]स्त्रं तद्वेत्त्यधीते वा नैमित्तिकः। तपो विकृष्टमष्टमाद्यस्यास्तीति
[illegible]स्वी। विद्याः प्रज्ञप्त्यादयः शासनदेवतास्ताः साहायके यस्य
विद्यावान्। अञ्जनपादलेपतिलकगुटिकासकलभूताकर्षण-
[illegible]नष्कर्षणवैक्रियत्वप्रभृतयः सिद्धयस्ताभिः सिद्ध्यति स्म सिद्धः। कवते
[illegible] पद्यादिभिः प्रबन्धैर्वर्णनां करोतीति कविः। एते प्रवचन्या-
[illegible]योऽष्टौ प्रभवतो भगवच्छासनस्य यथायथं देशकालाद्यौचित्येन
[illegible] कर्म प्रभावना द्वितीयं भूषणम्।
[illegible] प्रवचने विनयवैयावृत्त्यरूपा प्रतिपत्तिः सम्यग्दर्शनज्ञान-
[illegible]धिकेष्वभ्युत्थानमभियानं शिरस्यञ्जलिकरणं स्वयमा-
सनढौकनमासनाभिग्रहो वन्दना पर्युपासना अनुगमनं चेत्यष्टविध-
कर्मविनयनादष्टविध उपचारविनयः। व्यावृत्तस्य भावः कर्म वा
वैयावृत्त्यम्। तच्चाचार्योपाध्यायतपस्विशिक्षकग्लानकुलगणसङ्घसाधु-
समनोज्ञेषु दशस्वन्नपानवस्त्रपात्रप्रतिश्रयपीठकफलकसंस्तारादिभि-
र्धर्मसाधनैरुपग्रहः शुश्रूषाभेषजक्रियाकान्तारविषमदुर्गोपसर्गेष्व-
भ्युपपत्तिश्च। जिनशासनविषये च कौशलं नैपुण्यम्। ततो हि
व्यवहितादिरप्यर्थो विषयीक्रियते। यथानार्यदेशवर्त्ती आर्द्रककुमारः
श्रेणिकपुत्रेणाभयकुमारेण कौशलात्प्रतिबोधित इति। तीर्थं नद्यादे-

विषयेष्वनभिष्वङ्गः यथा इहलोक एव प्राणिनां दुरन्तकाम-भोगाभिष्वङ्गोऽनेकोपद्रवफलः परलोकेऽप्यतिकटुकनरकतिर्यग्मनुष्यजन्मफलप्रदः। अतो न किञ्चिदनेन। उज्झितव्य एवायमिति। एवंविधनिर्वेदेनापि लक्ष्यतेऽस्त्यस्य सम्यग्दर्शनमिति। अनुकम्पा कृपा यथा सर्व्वे एव सत्त्वाः सुखार्थिनो दुःखप्रहाणार्थिनश्च। ततो नैषामल्पापि पीडा मया कार्येत्यनयापि लक्ष्यतेऽस्त्यस्य सम्यक्त्वमिति। सन्ति खलु जिनेन्द्रप्रवचनोपदिष्टा अतीन्द्रिया जीवपरलोकादयो भावा इति परिणाम आस्तिक्यम्। अनेनापि लक्ष्यते सम्यग्दर्शनयुक्तोऽयमिति ॥ १५ ॥

सम्यक्त्वलिङ्गान्युक्त्वा भूषणान्याह—

स्थैर्यं प्रभावना भक्तिः कौशलं जिनशासने।
तीर्थसेवा च पञ्चास्य भूषणानि प्रचक्षते ॥ १६ ॥

अस्य सम्यक्त्वस्य पञ्च भूषणानि भूष्यते अलङ्क्रियते यैस्तानि भूषणानि जिनशासने जिनशासनविषये। एतच्च सर्वत्र सम्बध्यते। स्थैर्यं जिनं प्रति चलितचित्तस्य परस्य स्थिरत्वापादनं स्वयं वा परतीर्थिकर्द्धिदर्शनेऽपि जिनशासनं प्रति निष्प्रकम्पता। प्रभवति जैनेन्द्रशासनं तस्य प्रभवतः प्रयोजकत्वं प्रभावना। सा चाष्टधा प्रभावकभेदेन यदाह—

'पावयणी धम्मकही वाई नेमित्तिओ तवस्सी य।
विज्जा सिद्धो य कवी अट्ठेव पभावगा भणिया ॥ १ ॥

१ प्रावचनी धर्मकथी वादी नैमित्तिकः तपस्वी च।
विद्यावान् सिद्धश्च कविः अष्टौ प्रभावकाः भणिताः ॥

तत्र प्रवचनं द्वादशाङ्गं गणिपिटकं तदस्यास्त्यतिशयवदिति वचनी युगप्रधानागमः। धर्मकथा प्रशस्यास्यास्तीति धर्मकथी शब्दादिलादिन्। वादिप्रतिवादिसभ्यसभापतिलक्षणायां चतु-रङ्गायां सभायां प्रतिपक्षनिरासपूर्वकं स्वपक्षस्थापनार्थमवश्यं वदतीति वादी। निमित्तं त्रैकालिकं लाभालाभादिप्रतिपादकं शास्त्रं तद्वेत्त्यधीते वा नैमित्तिकः। तपो विकृष्टमष्टमाद्यस्यास्तीति तपस्वी। विद्याः प्रज्ञप्त्यादयः शासनदेवतास्ताः साहायके यस्य स विद्यावान्। अञ्जनपादलेपतिलकगुटिकासकलभूताकर्षण-निष्कर्षणवैक्रियत्वप्रभृतयः सिद्धयस्ताभिः सिद्ध्यति स्म सिद्धः। कवते गद्यपद्यादिभिः प्रबन्धैर्वर्णनां करोतीति कविः। एते प्रवचन्या-दयोऽष्टौ प्रभवतो भगवच्छासनस्य यथायथं देशकालाद्यौचित्येन साहायककरणात्प्रभावकास्तेषां कर्म प्रभावना द्वितीयं भूषणम्। भक्तिः प्रवचने विनयवैयावृत्त्यरूपा प्रतिपत्तिः सम्यग्दर्शनज्ञान-चारित्रादिगुणाधिकेष्वभ्युत्थानमभियानं शिरस्यञ्जलिकरणं स्वयमा-सनढौकनमासनाभिग्रहो वन्दना पर्युपासना अनुगमनं चेत्यष्टविध-कर्मविनयनादष्टविध उपचारविनयः। व्यावृत्तस्य भावः कर्म वा वैयावृत्त्यम्। तच्चाचार्योपाध्यायतपस्विशिक्षकग्लानकुलगणसङ्घसाधु-समनोज्ञेषु दशस्वन्नपानवस्त्रपात्रप्रतिश्रयपीठकफलकसंस्तारादिभि-र्धर्मसाधनैरुपग्रहः शुश्रूषाभैषजक्रियाकान्तारविषमदुर्गोपसर्गेष्व-भ्युपपत्तिश्च। जिनशासनविषये च कौशलं नैपुण्यम्। ततो हि व्यवहितादिरप्यर्थो विषयीक्रियते। यथानार्यदेशवर्त्ती आर्द्रककुमारः श्रेणिकपुत्रेणाभयकुमारेण कौशलात्प्रतिबोधित इति। तीर्थं नद्यादे-

या अस्ति जीवः केवलं सर्वगतोऽसर्वगतो वा सप्रदेशोऽप्रदेशो ति । इयं च द्विधाऽपि भगवदर्हत्प्रणीत[1]प्रवचनेषु अप्रत्ययरूपा ःस्यक्त्वं दूषयति । केवलागमगम्या अपि हि पदार्था अस्मदादि- [illegible] आप्तप्रणीतकत्वान्न सन्देग्धुं योग्याः । यत्रापि [illegible]त् क्वचन संशयो भवति तत्राप्यप्रतिहतेयमर्गला । यथा—

[2]कत्थ य मइदुव्वल्लेण तव्विहायरियविरहओ वावि ।
नेयगहणत्तणेण य नाणावरणोदएणं च ॥ १ ॥
[3]हेऊदाहरणासंभवे अ सइ सुट्ठु जं न बुज्झेज्जा ।
सव्वन्नुमयमवितहं तहावि तं चिंतए मइमं ॥ २ ॥
[4]अणुवकयपराणुग्गहपरायणा जं जिणा जगप्पवरा ।
जियरागदोसमोहा य नन्नहा वाइणो तेणं ॥ ३ ॥

[illegible] वा सूत्रोक्तस्यैकस्याप्यरोचनादक्षरस्य भवति नरः मिथ्यादृष्टिः । [illegible] हि नः प्रमाणं जिनाभिहितम् । काङ्क्षा अन्यान्यदर्शनग्रहः । [illegible] सर्वविषया देशविषया च । सर्वविषया सर्वपाखण्डिधर्म्मा- [illegible] । देशकाङ्क्षा त्वेकादिदर्शनविषया यथा सुगतेन

---

(१) ख ग ङ -प्रवचने ।

(२) क च मतिदुर्बलेन तद्विधाचार्यविरहतो वापि ।
ज्ञेयगहनत्वेन च ज्ञानावरणोदयेन च ॥

(३) हेतूदाहरणासंभवे च सति सुष्ठु यन्न बुध्येत ।
सर्वज्ञमतमवितथं तथापि तच्चिन्तयति मतिमान् ॥

(४) अनुपकृतपरानुग्रहपरायणा यज्जिना जगत्प्रवराः ।
जितरागद्वेषमोहाश्च नान्यथा वादिनस्तेन ॥

विचिकित्सापि भगवद्वचनानाश्वासरूपत्वात्सम्यक्त्वस्य दोषः । न शङ्कातो नेयं भिद्यते । शङ्का हि सकलासकलपदार्थभाक्त्वेन ... विषया इयं तु क्रियाविषयैव । यद्वा विचिकित्सा निन्दा च सदाचारमुनिविषया यथा अस्नानेन प्रस्वेदजलक्लिन्नमलत्वा-न्धिवपुष एत इति । को दोषः स्याद्यदि प्रासुकवारिणा अङ्ग-नं कुर्वीरन्निति । इयमपि तत्त्वतो भगवद्धर्मानाश्वासरूपत्वात् ...। मिथ्या जिनागमविपरीता दृष्टिर्दर्शनं येषां ते मिथ्या-...स्तेषां प्रशंसनं प्रशंसा तच्च सर्वविषयं देशविषयं च । सर्वविषयं ...पि कपिलादिदर्शनानि युक्तियुक्तानीति माध्यस्थ्यसारा तिः सम्यक्त्वस्य दूषणम् ।

... स्तुतौ—

सुनिश्चितं मत्सरिणो जनस्य
न नाथ मुद्रामतिशेरते ते ।
माध्यस्थ्यमास्थाय परीक्षका ये
मणौ च काचे च समानुबन्धाः ॥ १ ॥

... तु इदमेव बुद्धवचनं साङ्ख्यकणादादिवचनं वा तत्त्वमिति । दं तु व्यक्तमेव सम्यक्त्वदूषणम् । तैर्मिथ्यादृष्टिभिरेकत्र संवासात्पर-... परिचयः संस्तवः । एकत्रवासे हि तत्प्रक्रिया-... च दृढसम्यक्त्ववतोऽपि दृष्टिभेदः सम्भाव्यते । ... मन्दबुद्धेर्नवधर्मस्य इति संस्तवोऽपि सम्यक्त्वदूषणम् । एवंविधं च सम्यक्त्वं विशिष्टद्रव्यक्षेत्रकालभावसामग्र्यां सत्यां गुरोः ... विधिना प्रतिपद्य श्रावको यथावत्पालयति ।

यदाह—

[1]समणोवासओ तत्थ मिच्छत्ताओ पडिक्कमे ।
दव्वओ भावओ पुव्विं सम्मत्तं पडिवज्जए ॥ १ ॥
[2]न कप्पए से परतित्थियाणं तहेव तेसिं चिय देवयाणं
परिग्गहे ताण य चेइयाणं पभावणावंदणपूयणाई ॥ २ ॥
[3]लोयाण तित्थेसु सिणाणदाणं पिंडप्पयाणं हुणणं तवं च
संकंतिसोमग्गहणाइएसुं पभूयलोयाण पवाहकिच्चं ॥ ३ ॥

एवं तावत्सागरोपमकोटीकोट्यां शेषायां मिथ्यात्वमोहनीयस्थितौ जन्तुः सम्यक्त्वं प्रतिपद्यते । सागरोपमकोटीकोट्यामप्यवशिष्टायां पल्योपमपृथक्त्वं यदा व्यतीतं तदा देशविरतिं प्रतिपद्यते ।

यदाह—

[4]सम्मत्तम्मि उ लद्धे पलियपुहुत्तेण सावओ होज्जत्ति ॥ १७ ॥

---

(१) श्रमणोपासकस्तत्र मिथ्यात्वात्प्रतिक्रामेत् ।
द्रव्यतो भावतः पूर्वं सम्यक्त्वं प्रतिपद्यते ॥
(२) न कल्पते तस्य परतीर्थिकानां तथैव तेषामेव देवतानाम् ।
परिग्रहे तेषां च चैत्यानां प्रभावनावन्दनपूजनादि ॥
(३) लोकानां तीर्थेषु स्नानदानं पिण्डप्रदानं हवनं तपश्च ।
संक्रान्तिसोमग्रहणादिकेषु प्रभूतलोकानां प्रवाहकृत्यम् ॥
(४) सम्यक्त्वे तु लब्धे पल्योपमपृथक्त्वेन श्रावको भवेदिति ।

सम्यक्त्वमूलानि पञ्चाणुव्रतानीत्युक्तं तत्र सम्यक्त्व-
मभिहितमिदानीमणुव्रतान्याह—

विरतिं स्थूलहिंसादेर्द्विविधत्रिविधादिना ।
अहिंसादीनि पञ्चाणुव्रतानि जगदुर्जिनाः ॥१८॥

। मिथ्यादृष्टीनामपि हिंसात्वेन प्रसिद्धा या हिंसा सा स्थूल-
। स्थूलानां वा त्रसानां जीवानां हिंसा स्थूलहिंसा।
ग्रहणमुपलक्षणम्। तेन निरपराधसङ्कल्पपूर्वकहिंसानामपि
णं आदिग्रहणात् स्थूलानृतस्तेयाब्रह्मचर्यापरिग्रहाणां संग्रहः।
: स्थूलहिंसादिभ्यो या विरतिर्निवृत्तिस्तामहिंसादीनि
हिंसासूनृतास्तेयब्रह्मचर्यापरिग्रहान् पञ्चाणुव्रतानीति जिना-
जगदुः प्रतिपादितवन्तः। किमविशेषेण विरति-
ाह। द्विविधत्रिविधादिना भङ्गजालेन द्विविधः कृत-
रित . त्रिविधो मनोवाक्कायभेदेन यत्र स द्विविधत्रिविध
भङ्गः। इह यो हिंसादिभ्यो विरतिं प्रतिपद्यते। स द्विविधां
तकारितभेदां त्रिविधेन मनसा वचसा कायेन चेति। एवं
भावना स्थूलहिंसां न करोत्यात्मना न कारयत्यन्येन मनसा
वसा कायेन चेति। अस्य चानुमतिरप्रतिषिद्धा अपत्यादि-
रिग्रहसद्भावात् तैर्हिंसादिकरणे च तस्यानुमतिप्राप्तेः। अन्यथा
रिग्रहापरिग्रहयोरविशेषेण प्रव्रजिताप्रव्रजितयोरभेदापत्तेः।
ऽ भगवत्यादावागमे त्रिविधं त्रिविधेनेत्यपि प्रत्याख्यानमुक्त-

मगारिणः तच्च स्तोकत्वादनयत्वमिव तत्कस्मान्नोच्यते। उ तस्य विशेषविषयत्वात्। तथाहि यः किल प्रविव्रजि प्रतिमाः प्रतिपद्यते। पुत्रादिसन्ततिपालनाय यो वा स्वयंभूरमणादिगतं मत्स्यादिमांस स्थलहिंसादिकं वा वस्थाविशेषे प्रत्याख्याति स एव त्रिविधं त्रिविधेनेति इत्यल्पविषयत्वान्नोच्यते। बाहुल्येन तु द्विविधं त्रि द्विविधत्रिविध आदियेस्य द्विविधत्रिविधादिभेदजालस्य

द्विविधं द्विविधेनेति द्वितीयो भङ्गः द्विविधमिति न करोति न कारयति द्विविधेनेति मनसा वचसा य कायेन यद्वा वाचा कायेनेति। तत्र यदा मनसा वाचा न कारयति। तदा मनसा अभिसन्धिरहित एव हिंसकमब्रुवन्नेव कायेनेव दुश्चेष्टितादिना असंज्ञितकारी तु मनसा कायेन न करोति न कारयति तदा सन्धिरहित एव कायेन दुश्चेष्टितादि परिहरन्नेवानाभि हन्मि घातयामि वेति ब्रूते। यदा तु वाचा कायेन न कारयति। तदा मनसैवाभिसन्धिमधिकृत्य करोति च। अनुमतिस्तु त्रिभिरपि सर्वत्रास्ति। ए अपि भावनीयाः।

द्विविधमेकविधेनेति तृतीयः द्विविधं क एकविधेन मनसा यद्वा वचसा यद्वा कायेन।

एकविधं त्रिविधेनेति : एकविधं करणं यदा मनसा वाचा कायेन च

एकविधं द्विविधेनेति पञ्चमः एकविधं कारणं यद्वा कारणं द्विविधेन मनसा वाचा यद्वा मनसा कायेन यद्वा वाचा कायेन।

एकविधमेकविधेनेति षष्ठः एकविधं कारणं यद्वा कारणं .कविधेन मनसा यद्वा वाचा यद्वा कायेन।

यदाह—

'दुविहतिविहेण पढमो दुविहं दुविहेण बीयओ होइ दुविहं .गविहेणं एगविहं चेव तिविहेण एगविहं दुविहेणं एगेगविहेण ङ्ओ होइत्ति।

एते च भङ्गाः करणत्रिकेण योगत्रिकेण च विशेष्यमाणा ःकोनपञ्चाशद्भवन्ति।

तथाहि—

हिंसां न करोति मनसा १ वाचा २ कायेन ३ मनसा ाचा ४ मनसा कायेन ५ वाचा कायेन वा ६ मनसा वाचा ायेन च ७ एते करणेन सप्त भङ्गाः।

एवं कारणेन सप्त। अनुमत्या सप्त। तथा हिंसां न करोति कारयति च मनसा १ वाचा २ कायेन ३ मनसा वाचा ३ मनसा कायेन ५ वाचा कायेन वा ६ मनसा वाचा ायेन च ७। एते करणकारणाभ्यां सप्त भङ्गाः।

---

(१) द्विविधत्रिविधेन प्रथमो द्विविधं द्विविधेन द्वितीयो भवति द्विविधं एक-विधेन एकविधं चैव त्रिविधेन एकविधं द्विविधेन एकैकविधेन षष्ठो भवतीति।

., Vol. IV, Fasc. 1--8 @ /10/ each ... ... Rs.	5	0
ra, Fasc. 2-5 @ /10/ each	2	8
rapaddhatih, Fasc. 1--7 @ /10/ each	4	6
rapradīpah Fasc. 1--8 @ /10/ each	5	0
binduṭikā, Fasc. 1 @ /10/ each	0	10
Kusumāñjali Prakaraṇa Vol. I, Fasc. 2--6 ; Vol. II, Fasc.		
@ /10/ each	5	0
wati, Fasc. 1--5 @ 2/	10	0
Parvan, Fasc. 1--5 @ /10/ each	3	2
aingalam, Fasc. 1--7 @ /10/ each	4	6
āj Rāsa. Part II, Fasc. 1--5 @ /10/ each	3	2
to (English) Part II, Fasc. 1 @ 1/-	1	0
Lakṣaṇam Fasc. 1 @ 1/8, each	1	8
Smṛti, Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1--6 ; Vol. III,		
1--6 @ /10/ each	12	8
, Institutes of (English) @ 1/- each	1	0
lhacintāmaṇi (English) Fasc. 1--3 @ 1/4/ each	3	12
sana-Samuccaya, Fasc. 1, @ /10/ each	0	10
Vēda Saṁhitā, Vols. I, Fasc. II, 1--6 ; III, 1--7 ;		
1--6 ; V, 1--8, @ /10/ each	16	14
a Sūtra Vṛtti, Fasc. 1--4 @ /10/ each	2	8
tto (English) Fasc. 1--3 @ 1/- each	3	0
Vejaya, Fasc. 2-3 @ /10/ each	1	4
Kriyā Kaumudī, Fasc. 1-6 @ /10/ each	3	12
Sutra Latyayan, Fasc. 1-9 @ /10/ each	5	10
„ Asbalayana, Fasc. 1-11 @ /10/ each	6	14
Saṁhita, (Eng.) Fasc. 1 @ 1/- each	1	0
Kaumudī, Fasc. 1-4 @ /10/ each	2	8
ya Brahmana, Fasc. 3-25 @ /10/ each	14	6
Pratisakhya, Fasc. 1-3 @ /10/ each	1	14
rīya Saṁhitā, Fasc. 22--45 @ /10/ each	15	0
a Brāhmaṇa, Fasc. 1--19 @ /10/ each	11	14
Vārteka (English) Fasc. 1-6 @ 1/4/ each	7	8
Cintāmaṇi, Vol. I, Fasc. 1--9, Vol. II, Fasc. 2--10, Vol. III, Fasc. 1--2,		
IV, Fasc. 1, Vol. V, Fasc. 1--5, Part IV, Vol. II, Fasc. 1-12 @ /10/ each	23	12
rthadhigama Sutram, Fasc. 1-3 @ /10/ each	1	14
Maṇḍanam, Fasc. 1-3 @ /10/ each	1	14
Satsai, Fasc. 1--5 @ /10/ each	3	2
bhava-prapañca-kathā, Fasc. 1-11 @ /10/ each	6	14
sāo, (Text and English) Fasc. 1--6 @ 1/- each	6	0
Carita, Fasc 1 @ /10/	0	10
Kriyā Kaumudī, Fasc 1--6 @ /10/ each	3	12
Purāṇa, Vol. I, Fasc. 2--6 ; Vol. II, Fasc. 1--7, @ /10/ each ...	7	8
Pārijata, Fasc. 1--8 Vol. II. Fasc. 1 @ /10/ each	5	10
ratnākara, Fasc. 1--7 @ /10/ each	4	6
Svayambhū Purāṇa, Fasc. 1--6 @ /10/ each	3	12
Aphorisms of Patanjali, Fasc. 2--5 @ /10/ each	2	8
stra of Hemchandra Vol. I. Fasc. 1. (200 pages.)	1	4

Tibetan Series.

m Thi S'iñ, Fasc. 1--4 @ 1/ each	4	0
yin, Vol. I, Fasc 1-5 ; Vol. II, Fasc. 1-3 ; Vol. III, Fasc. 1-6, @ 1/ each	14	0
brjod dpag bkhri S'iñ (Tib. & Sans. Avadāna Kalpalatā) Vol. I,		
1--6 ; Vol. II. Fasc. 1--5 @ 1/ each	11	0

Arabic and Persian Series.

iranāmah, with Index, (Text) Fasc. 1--13 @ /10/ each	8	2
Ibasi (English) Vol. I, Fasc. 1--3 @ 1/- each	3	0
Akbari, Fasc. 1-22 @ 1/8/ each	33	0
Ditto (English) Vol. I, Fasc. 1--7, Vol. II, Fasc. 1--5, Vol. III,		
1--5, @ 2/- each	34	0
nāmah, with Index, Fasc 1--37 @ 1/8/ each	55	8
itto (English) Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1-4 @ 1/4/ each	15	0
Bibliography, by Dr. A. Sprenger, @ /10/	0	10
hāhnāmah, with Index, Fasc. 1--19 @ /10/ each	11	14
est of Syria, Fasc. 1-9 @ /10/ each	5	10
gue of Arabic Books and Manuscripts, 1-2 @ 1/- each	2	0
gue of the Persian Books and Manuscripts in the Library of the		
atic Society of Bengal. Fasc 1--3 @ 1/ each	3	0
ary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/8/ each	31	8
ngīr Fasc. 1--14 @ 1/8/ each	21	0

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 57, PARK STREET, CACUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MR. BERNARD QUARITCH,

11, GRAFTON STREET, NEW BOND STREET, LONDON, W., AND MR. [illegible]
HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be suppli[illegible] of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

Rs. [illegible]

*Advaita Brahma Siddhi, Fasc. 2, 4 @ /10/ each ... ...
Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each ... ...
*Agni Purāṇa, Fasc. 3-14 @ /10/ each .. ..
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-5; Vol III. Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10, each ... ...
Aitereya Lochana. ... ...
*Aṇu Bhāṣhya, Fasc. 2-5 @ /10/ each ... ...
Aphorisms of Sāṇḍilya, (English) Fasc. 1 @ 1/- ...
Aṣṭasahasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each ...
*Atharvana Upanishad, Fasc 3-5 @ /10/ each ... ...
Atmatattaviveka, Fasc. I. @ /10/ each ... ...
Açvavaidyaka, Fasc. 1-5 @ /10/ each ...
Avadana Kalpalatā, (Sans. and Tibetan) Vol I, Fasc. 1-6; Vol. II. Fasc. 1-5 @ 1/ each ...
A Lower Ladakhi version of Kesarsaga. Fasc 1-3 @ 1/- each ...
Bālam Bhaṭṭi, Vol. I. Fasc. 1-2, Vol 2. Fasc 1 @ /10/ each ...
B[illegible] S'rauta Sūtra, Fasc 1-3 Vol. II, Fasc 1 @ /10/ each
*Bhāmati, Fasc 4-8 @ /10/ each ... ...
Bhaṭṭa Dīpikā Vol. I, Fasc. 1-5 @ /10 each ...
Brahma Sūtra, Fasc. 1 @ /10/ each .. ..
Bṛhaddevatā Fasc. 1-4 @ /10/ each . ..
Bṛhaddharma Purāṇa Fasc 1-6 @ /10 each . ..
Bodhicaryāvatāra of Çāntideva, Fasc 1-5 @ /10/ each ...
[illegible], Fasc. 1-2 @ /10/ each .
Catalogue of Sanskrit Books and MSS., Fasc 1-4 @ 2 each ..
[illegible] Brāhmaṇa, Vol I, Fasc. 1-7, Vol II, Fasc. I-5, Vol. III, Fasc. 1-7 Vol. 5, Fasc. 1-4 @ /10 each ...
[illegible] Vol. 6 Fasc. 7 ...
[illegible] Prajñāpāramitā Part, I. Fasc 1-12 @ /10/ each ..
*[illegible] Vol. II, Fasc 1-25, Vol. III Part I, Fasc [illegible] Part II, Fasc 1-10 Vol. IV Fasc 1-6 @ /10 each
[illegible] Vol. 4, Fasc. 7 ...
[illegible] Fasc 1-6 @ 1/- each
*[illegible] Fasc 9-17 @ /10 each
[illegible] Vol. I, Fasc 1-7, Vol II, Fasc [illegible]
[illegible] Vol 1, Fasc 1 ..
[illegible]
[illegible] Vol. I, Fasc. 1-7 @ /10/ each
[illegible] Vol. II, Fasc 1-3 @ /10/ each
[illegible]

दीर्यमाणः कुशेनापि यः स्वाङ्गे हन्त दूयते ।
निर्मन्तून् स कथं जन्तूनन्तयेन्निशितायुधैः ॥ २४ ॥

...माणो विदार्यमाणः कुशेन दर्भेण अपि शब्दादास्तां शस्त्रेण . स्वाङ्गे शरीरे हन्तेति प्रतिबोध्यामन्त्रणे दूयते उपतप्यते । ...न्तूनिरपराधान् जन्तून् स कथं अन्तयेदन्तं प्रापयेत् । शितायुधैः कुन्तादिभिः आत्मानुसारेणापि परपीडामजानन्नेवं ... ।

तथाच मृगया व्यापृतान् क्षत्रियान् प्रति केनचिदुक्तम्—

रसातलं यातु यदत्र पौरुषं
[1]क्व नीतिरेषाऽशरण्यो ह्यदोषवान् ।
निहन्यते [2]यद्बलिनातिदुर्बलो
हहा महाकष्टमराजकं जगत् ॥ १ ॥ २४ ॥

निर्मातुं क्रूरकर्माणः क्षणिकामात्मनो धृतिम् ।
समापयन्ति सकलं जन्मान्यस्य शरीरिणः ॥ २५ ॥

... रौद्रं कर्म हिंसादि येषां ते क्रूरकर्माणो लुब्धकादयः । आत्मनः ...स्य धृतिं स्वास्थ्यलक्षणं निर्मातुमिति सम्बन्धः । धृतेर्विशेषणं ... ति माजन्मशाश्वतिकधृतिनिमित्तं कदाचित्किञ्चि-

(१) ख कुनीति- । (२) ग घ यद्बलिनापि दुर्बलो ।

द्विरुद्धमपि क्रियेत। क्षणिकतृप्तिनिर्माणार्थं तु समापयन्ति स
नयन्ति जन्म अन्यस्य वध्यस्य शरीरिणः। अयमर्थः परप्राणि
जन्यक्षणिकतृप्तिहेतोराकालिकं परस्यायुः समाप्यत इति म
वैशसम्।

यदाह—

योऽश्नाति यस्य तन्मांसमुभयोः पश्यतान्तरम्।
एकस्य क्षणिका तृप्तिः प्राणैरन्यो वियुज्यते॥ १॥ २

म्रियस्वेत्युच्यमानोऽपि देही भवति दुःखितः।
मार्यमाणः प्रहरणैर्दारुणैः स कथं भवेत्॥ २६

म्रियस्व त्वमित्युच्यमानोऽपि न तु मार्यमाणो देही जन्तु
मानमृत्युरिव दुःखितो भवतीति सर्वप्राणिप्रतीतम्। प्र
कुन्ततोमरादिभिर्मार्यमाणो विनाश्यमानः स वराको देही
भवेत्। परमदुःखित एव भवेदित्यर्थः। मरणवचने
दूयमानस्य निशितैः शस्त्रैर्मारणमिति मृतमारणं तत्कथं
कुर्यादिति निन्दा॥ २६॥

हिंसाफलं दृष्टान्तद्वारेणाह—

श्रूयते प्राणिघातेन रौद्रध्यानपरायणौ।
सुभूमो ब्रह्मदत्तश्च सप्तमं नरकं गतौ॥ २७

न. दत्त. चक्रवर्त्तिनौ सप्तमं नरकं गतौ। हिंसाया नरकगमन-
हेतु. न रौद्रध्यानमन्तरेण भवति। अन्यथा सिंहवधकतपस्विनो-
ऽपि नरकः स्यादित्युक्तं रौद्रध्यानपरायणौ हिंसानुबन्धिध्यानयुक्ता-
वित्यर्थ.। यथा तौ नरकं गतौ तथा कथानकद्वारेण दर्श्यते।

तथाहि—

वसन्तपुरनामायां पुर्यामुच्छन्नवंशकः।
आसीच्युत इवाकाशादग्निको नाम दारकः॥ १॥
सोऽन्यदा चलितस्तस्मात् स्थानाद्देशान्तरं प्रति।
सार्थाद्धीनः परिभ्राम्यन्नगमत्तापसाश्रमम्॥ २॥
तमग्निं तनयत्वेनाग्रहीत्कुलपतिर्जमः।
जमदग्निरिति ख्यातिं स लोकेषु ततोऽगमत्॥ ३॥
तप्यमानस्तपस्तीव्रं प्रत्यक्ष इव पावकः।
तेजसा दुःसहेनासौ पप्रथे पृथिवीतले॥ ४॥
अत्रान्तरे महाश्राद्धो नाम्ना वैश्वानरः सुरः।
धन्वन्तरिश्च तापसभक्तो व्यवदतामिति॥ ५॥
एक आहार्हतां धर्मः प्रमाणमितरः पुनः।
तापसानां विवादेऽस्मिन् व्यधातामिति निर्णयम्॥ ६॥
आर्हतेषु जघन्यो यः प्रकृष्टस्तापसेषु यः।
परीक्षणीयावावाभ्यां को गुणैरतिरिच्यते॥ ७॥
तदानीं मिथिलापुर्य्यां नवधर्मपरिष्कृतः।
श्रीमान् पद्मरथो नाम प्रथितः पृथिवीपतिः॥ ८॥

न्यग्रोधमिव विस्तारिजटासंस्पृष्टभूतलम् ।
वल्मीकाकीर्णपादान्तं दान्तं तौ तमपश्यताम् ॥ २० ॥
तस्य श्मश्रुलताजाले नीडं निर्माय मायया ।
तदैव देवौ चटकमिथुनीभूय तस्थतुः ॥ २१ ॥
चटकश्चटकामूचे यास्यामि हिमवद्गिरौ ।
अन्यासक्तो नैष्यसि त्वमिति तं नान्वमंस्त सा ॥ २२ ॥
गोघातपातकेनाहं स्पृश्ये नायामि चेत्प्रिये ।
इत्युक्तशपथं भूयश्चटकं चटकाऽब्रवीत् ॥ २३ ॥
ऋषेरस्यैनसा स्पृश्ये शपेथा इति चेत्प्रिय ।
विसृजामि तदैव त्वां पन्थानः सन्तु ते शिवाः ॥ २४ ॥
इत्याकर्ण्य वचः क्रुद्धो जमदग्निमुनिस्ततः ।
उभाभ्यामपि हस्ताभ्यामुभौ जग्राह पक्षिणौ ॥ २५ ॥
आचचक्षे ततो हन्त कुर्वाणे दुष्करं तपः ।
उष्णरश्माविव ध्वान्तमाः पापं मयि कीदृशम् ॥ २६ ॥
अथर्षिं चटकोवाच मा कुपस्ते मुधा तपः ।
अपुत्रस्य गतिर्नास्तीत्यश्रौषीस्त्वं न किं श्रुतिम् ॥ २७ ॥
तत्तथा मन्यमानोऽयं मुनिरेवमचिन्तयत् ।
ममाकलत्रपुत्रस्य प्रवाहे सूत्रितं तपः ॥ २८ ॥
क्षुभितं तं परिज्ञाय धिग् भ्रान्तस्तापसैरिति ।
जज्ञे धन्वन्तरिः श्राद्धः प्रत्येति प्रत्ययाद्व कः ॥ २९ ॥
बभूवतुरदृश्यौ च तावपि त्रिदशौ तदा ।
जमदग्निश्च सम्प्राप पुरं नेमिककोष्टकम् ॥ ३० ॥

[illegible]

अथाऽगात् [illegible] ।
एकामालोकयामास [illegible] ताम् ॥ ३७ ॥
स तस्या दुश्चरित्रात्कृता मातुर्निरमदर्शयत् ।
तया प्रसारितः पाणिः पाणिग्रहणसूचकः ॥ ३८ ॥
तां मुनिः परिजग्राह रोरो धनमिवोरगा ।
सार्धं गवादिभिस्तस्मै ददौ च विधिवन्नृपः ॥ ३९ ॥
स स्थालीस्नेहसम्बन्धादेकोनं कन्यकाशतम् ।
सज्जीचक्रे तपःशक्त्या धिग्मूढानां तपोव्ययः ॥ ४० ॥
नीत्वाश्रमपदं तां च स मुग्धमधुराकृतिम् ।
हरिणीमिव लोलाक्षीं प्रेम्णा मुनिरवर्धयत् ॥ ४१ ॥

अङ्गुलीभिर्गणयतो दिनान्यस्य तपस्विनः ।
यौवनं चारुकन्दर्पलीलावनमवाप सा ॥ ४२ ॥
साचीशतज्वलदग्निर्जमदग्निमुनिस्ततः ।
यथावदुपयेमे तां भूतेश इव पार्वतीम् ॥ ४३ ॥
ऋतुकाले स ऊचे तां चरुं ते साधयाम्यहम् ।
यथा ब्राह्मणमूर्द्धन्यो धन्य उत्पद्यते सुतः ॥ ४४ ॥
सोवाच हस्तिनपुरेऽनन्तवीर्यस्य भूपतेः ।
पत्न्यस्ति मत्स्वसा तस्यै चरुः चात्रोऽपि साध्यताम् ॥ ४५ ॥
ब्राह्मं सधर्मचारिण्यै चात्रं तज्जामयेऽपरम् ।
स चरुं साधयामास पुत्त्रीयमुपजीवितुम् ॥ ४६ ॥
साचिन्तयदहं तावदभूवमटवीमृगी ।
माभून्मादृक् सुतोऽपीति चात्रं चरुमभक्षयत् ॥ ४७ ॥
सादाद्ब्राह्मं चरुं स्वस्रे जातौ च तनयौ तयोः ।
तत्र रामो रेणुकायाः कृतवीर्यश्च तत्स्वसुः ॥ ४८ ॥
क्रमेण ववृधे राम ऋषित्वे पैतृकेऽपि सः ।
चात्रं प्रदर्शयंस्तेजो हुताशनमिवाम्भसि ॥ ४९ ॥
विद्याधरोऽन्यदा तत्र कोऽप्यागादतिसारकी ।
विद्या तस्यातिसारार्त्या विस्मृताकाशगामिनी ॥ ५० ॥
रामेण प्रतिचरितो भेषजाद्यैः स बन्धुवत् ।
रामाय सेवमानाय विद्यां पारशवीं ददौ ॥ ५१ ॥
सध्येशरवणं गत्वा तां च विद्यामसाधयत् ।
रामः परशुरामोऽभूत्ततः प्रभृति विश्रुतः ॥ ५२ ॥

राज्ये निवेशयाञ्चक्रे तस्य प्रकृतिपूरुषैः ।
कृतवीर्यो महावीर्यः स एव तु वयोलघुः ॥ ६४ ॥
स तु मातृमुखाच्छ्रुत्वा मृत्युव्यतिकरं पितुः ।
आदिष्टाहिरिवागत्य जमदग्निममारयत् ॥ ६५ ॥
रामः पितृवधक्रुद्धो द्रागगत्वा हस्तिनापुरे ।
अमारयत्कृतवीर्यं किं यमस्य दवीयसि ॥ ६६ ॥
जामदग्न्यस्ततस्तस्य राज्ये न्यविशत स्वयम् ।
राज्यं हि विक्रमाधीनं न प्रसाध्यं क्रमाक्रमौ ॥ ६७ ॥
रामाक्रान्तपुराद्राज्ञी कृतवीर्यस्य गुर्विणी ।
व्याघ्राघ्रातवनादेणीवागमत्तापसाश्रमम् ॥ ६८ ॥
कृपाधनैर्भूगृहान्तः सा निधाय निधानवत् ।
तपस्विभिर्गोप्यते स्म क्रूरात्परशुरामतः ॥ ६९ ॥
चतुर्दशमहास्वप्नसूचितोऽस्याः सुतोऽजनि ।
गृह्णन् भूमिं सुखेनाभूत्सुभूमो नामतस्ततः ॥ ७० ॥
क्षत्रियो यत्र यत्रासीत्तत्र तत्राप्यदीप्यत ।
परशुः परशुरामस्य कोपाग्निरिव मूर्त्तिमान् ॥ ७१ ॥
रामोऽगादन्यदा तत्राश्रमे परशुश्च सोऽज्वलत् ।
क्षत्रं चासूचयद्धूम इव धूमध्वजं तदा ॥ ७२ ॥
किमत्र क्षत्रियोऽस्तीति पृष्टास्तेन तपस्विनः ।
इत्यूचुस्तापसीभूताः क्षत्रिया वयमास्महे ॥ ७३ ॥
रामोऽप्यमर्षान्निःक्षत्रां सप्तकृत्वो वसुन्धराम् ।
निर्ममे निस्तृणां शैलतटीमिव दवानलः ॥ ७४ ॥

घृणाचत्रियदंष्ट्राभी रामः स्थालमपूरयत्।
यमस्य पूर्णकामस्य पूर्णपात्रश्रियं दधत्॥ ७५॥
रामः पप्रच्छ [1]नैमित्तानन्येद्युर्मे कुतो वधः।
[2]सदा वैरायमाणा हि शङ्कन्ते परतो मृतिम्॥ ७६॥
यो दंष्ट्राः पायसीभूताः सिंहासन इह स्थितः।
भोच्यतेऽमूस्ततस्त्वस्ते वधो भावीति तेऽब्रुवन्॥ ७७॥
रामोऽथ कारयामास सत्नागारमवारितम्।
धुरि सिंहासनं तत्रास्थापयत्स्थालमग्रतः॥ ७८॥
अथाश्रमे प्रतिदिनं लालयद्भिस्तपस्विभिः।
निन्येऽङ्गणद्रुम इव सुभूमो वृद्धिमद्भुताम्॥ ७९॥
विद्याधरो मेघनादोऽन्येद्युर्नैमित्तिकानिति।
परिपप्रच्छ पद्मश्रीः कन्या मे कस्य दीयताम्॥ ८०॥
तस्या वरं वरीयांसं सुभूमं तेऽप्युपादिशन्।
दत्त्वा कन्यां ततस्तस्मै तस्यैवाभूत्स सेवकः॥ ८१॥
कूपभेक इवानन्यगोऽथ पप्रच्छ मातरम्।
सुभूमः किमियानेव लोकोऽयमधिकोऽपि किम्॥ ८२
माताप्यचीकथदथो लोकोऽनन्तो हि वत्सक।
मक्षिकापदमात्रं हि लोकमध्येऽयमाश्रमः॥ ८३॥
अस्मिन् लोकेऽस्ति विख्यातं नगरं हस्तिनापुरम्।
पिता ते कृतवीर्योऽभूत्तत्र राजा महाभुजः॥ ८४॥

(१) च ङ नैमित्तानथान्येद्युः कुतो वध। (२) च ङ वधो।

हत्वा ते पितरं रामो राज्यं स्वयमशिश्रियत् ।
क्षितिं निःक्षत्रियां चक्रे तिष्ठामस्तद्भयादिह ॥ ८५ ॥
तत्कालं हास्तिनपुरे सुभूमो भौमवज्ज्वलन् ।
जगाम वैरिणे क्रुद्धः क्षात्रं तेजो हि दुर्धरम् ॥ ८६ ॥
तत्र सत्रे ययौ सिंह इव सिंहासनेऽविशत् ।
दंष्ट्रास्ताः पायसीभूताः सुभुजो बुभुजे च सः ॥ ८७ ॥
उत्तिष्ठमाना युद्धाय ब्राह्मणास्तत्र रक्षकाः ।
जघ्निरे मेघनादेन व्याघ्रेण हरिणा इव ॥ ८८ ॥
प्रस्फुरद्दंष्ट्रिकाकेशो दशनैरधरं दशन् ।
ततो रामः क्रुधा कालपाशाकृष्ट इवाययौ ॥ ८९ ॥
रामेण मुमुचे रोषात्सुभूमाय परश्वधः ।
विध्यातस्तत्क्षणं तस्मिन् स्फुलिङ्ग इव वारिणि ॥ ९० ॥
अस्त्राभावात्सुभूमोऽपि दंष्ट्रास्थालमुदक्षिपत् ।
चक्रीबभूव तत्सद्यः किं न स्यात्पुण्यसम्पदा ॥ ९१ ॥
चक्रवर्त्यष्टमः सोऽथ तेन चक्रेण भास्वता ।
शिरः परशुरामस्य पङ्कजच्छेदमच्छिदत् ॥ ९२ ॥
क्षमां निःक्षत्रियां रामः सप्तकृत्वो यथा व्यधात् ।
एकविंशतिकृत्वस्तां तथा निर्ब्राह्मणामसौ ॥ ९३ ॥
क्षुण्णक्षितिपहस्त्यश्वपदातिव्यूहलोहितैः ।
वाहयन् वाहिनीर्नव्याः स प्राक् प्राचीमसाधयत् ॥ ९४ ॥
स च्छिन्नानेकसुभटमुण्डमण्डितभूतलः ।
दक्षिणाशां दक्षिणाशापतिरन्य इवाजयत् ॥ ९५ ॥

स तत्र क्षुत्पिपासाभ्यामाक्रान्तो ग्लानिमागतः।
चतुर्भिः प्रतिचरितो वल्लवैर्बान्धवैरिव ॥ ५ ॥
स तेषामुपकाराय निर्ममे धर्मदेशनाम्।
अपकारिष्वपि कृपा सतां किं नोपकारिषु ॥ ६ ॥
प्रवव्रजुस्ते तत्पार्श्वे चत्वारः शमशालिनः।
चतुर्विधस्य धर्मस्य चतस्र इव मूर्त्तयः ॥ ७ ॥
व्रतं तेऽपालयन् सम्यक् किन्तु द्वौ तत्र चक्रतुः।
धर्मे जुगुप्सां चित्रा हि चित्तवृत्तिः शरीरिणाम् ॥ ८ ॥
जग्मतुस्तपसा तौ द्यां जुगुप्साकारिणावपि।
स्वर्गाय जायतेऽवश्यमप्येकाहःकृतं तपः ॥ ९ ॥
च्युत्वा ततो दशपुरे शाण्डिल्यब्राह्मणावुभौ।
युग्मरूपौ सुतौ दास्यां जयवत्यां बभूवतुः ॥ १० ॥
तौ क्रमाद्यौवनं प्राप्तौ पित्रादिष्टौ च जग्मतुः।
रक्षितुं चेत्रमीदृग् हि दासेराणां नियोजनम् ॥ ११ ॥
तयोः शयितयोर्नक्तं निःसृत्य वटकोटरात्।
एकः कृष्णाहिना दष्टः कृतान्तस्येव बन्धुना ॥ १२ ॥
ततः सर्पोपलम्भाय द्वितीयोऽपि परिभ्रमन्।
वैरादिवाशु तेनैव दष्टो दुष्टेन भोगिना ॥ १३ ॥
तावनाप्तप्रतीकारौ वराकौ मृत्युमापतुः।
यथाऽऽयातौ तथा यातौ निष्फलं जन्म धिक्तयोः ॥ १४ ॥
कालिञ्जरगिरिप्रस्थे मृग्या यमलरूपिणौ।
मृगावजनिषातां तौ वद्धधाते सहैव च ॥ १५ ॥

प्रीत्या सह चरन्तौ तौ मृगौ मृगयुणा हतौ ।
बाणेनैकेनैककालं कालधर्ममुपेयतुः ॥ १६ ॥
ततोऽपि मृतगङ्गायां राजहंस्या उभावपि ।
अजायेतां सुतौ युग्मरूपिणौ पूर्वजन्मवत् ॥ १७ ॥
क्रीडन्तावेकदेशस्थौ धृत्वा जालेन जालिकः ।
ग्रीवां भंक्त्वाऽवधीद्धर्महीनानां हीदृशी गतिः ॥ १८ ॥
वाराणस्यां ततोऽभूतां भूतदत्ताभिधस्य तौ ।
महाधनसमृद्धस्य मातङ्गाधिपतेः सुतौ ॥ १९ ॥
चित्रसम्भूतनामानौ तौ मिथः स्नेहशालिनौ ।
न कदापि व्ययुज्येतां सम्बद्धौ नखमांसवत् ॥ २० ॥
वाराणस्यां तदा चाभूच्छङ्ख इत्यवनीपतिः ।
आसीच्च सचिवस्तस्य नमुचिर्नाम विश्रुतः ॥ २१ ॥
अपरेद्युः सोऽपराधे महीयसि महीभुजा ।
अर्पितो भूतदत्तस्य प्रच्छन्नवधहेतवे ॥ २२ ॥
तेनोचे नमुचिश्छन्नं त्वां रक्षामि निजात्मवत् ।
पाठयस्यात्मजौ मे त्वं यदि भूमिगृहस्थितः ॥ २३ ॥
प्रतिपन्नं नमुचिना तन्मातङ्गपतेर्वचः ।
जनो हि जीवितव्यार्थी तन्नास्ति न करोति यत् ॥ २४ ॥
विचित्राश्चित्रसम्भूतौ स तथाऽध्यापयत् कलाः ।
रेमेऽनुरक्तया सार्द्धं मातङ्गपतिभार्यया ॥ २५ ॥
ज्ञात्वा तद्भूतदत्तेनारेभे मारयितुं स तु ।
सहते कः स्वदारेषु पारदारिकविप्लवम् ॥ २६ ॥

ज्ञात्वा मातङ्गपुत्राभ्यां स दूरेणापसारितः ।
तेनाथ दक्षिणा दत्ता प्राणरक्षणलक्षणा ॥ २७ ॥
ततो निःसृत्य नमुचिर्गतवान् हस्तिनापुरं ।
चक्रे सनत्कुमारेण सचिवश्चक्रिणा निजः ॥ २८ ॥
इतश्च चित्रसम्भूतौ प्रापतुर्नवयौवनौ ।
कुतोऽपि हेतोरायातौ पृथिव्यामश्विनाविव ॥ २९ ॥
तौ स्वादु जगतुर्गीतं ज्ञाताङ्कश्रुपदासिनौ ।
वादयामासतुर्वीणामतितुम्बुरुनारदौ ॥ ३० ॥
गीतप्रबन्धानुगतैः सुव्यक्तैः सप्तभिः स्वरैः ।
तयोर्वादयतोर्वीणां किं करन्ति स्म किन्नराः ॥ ३१ ॥
मुरजं घोरघोषं तौ वादयन्तौ च चक्रतुः ।
स्फूर्जितमुरवं कालाम्भोदकण्ठविडम्बनाम् ॥ ३२ ॥
स्त्रियः स्त्रियोर्यशोरम्भामुख्यकिन्नरीतिलोत्तमाः ।
यथार्थं न विदाञ्चक्रुस्तौ तदप्यभिनिन्यतुः ॥ ३३ ॥
सर्वगान्धर्वसर्वस्वमपूर्वं विश्वकार्म्मणम् ।
प्रकाशयद्भ्यामेताभ्यां न जह्रे कस्य मानसम् ॥ ३४ ॥
तस्यां पुरि प्रववृत्ते कदाचिन्मदनोत्सवः ।
निरीयुः पौरचर्च्चर्य्यस्तत्र संगीतपेशलाः ॥ ३५ ॥
चर्च्चरी निर्ययौ तत्र चित्रसम्भूतयोरपि ।
जग्मुस्तत्रैव तद्गीताकृष्टाः पौरा मृगा इव ॥ ३६ ॥
राज्ञो व्यज्ञपि केनापि मातङ्गाभ्यां पुरीजनः ।
गीतेनाकृष्य सर्वोऽयमात्मवन्मलिनः कृतः ॥ ३७ ॥

[illegible] पुरा[illegible] [illegible] ।
न [illegible] [illegible] ॥ ३८ ॥
ततःप्रभृति तौ [illegible] तस्थतुः ।
[illegible] ॥ ३९ ॥
[illegible] लोलेन्द्रियतया न तौ ।
प्रविष्टौ नगरीं [illegible] ॥ ४० ॥
उत्सवं प्रेक्षमाणौ तौ [illegible]गुण्ठनौ ।
दस्युवन्नगरीमध्ये छन्नं छन्नं विचेरतुः ॥ ४१ ॥
क्रोष्टुवत्क्रोष्टुशब्देन पौरगीतेन तौ ततः ।
अगायतां तारतारमलङ्घ्या भवितव्यता ॥ ४२ ॥
आकर्ण्य कर्णमधुरं तद्गीतं युवनागरैः ।
मधुवन्मक्षिकाभिस्तौ मातङ्गौ परिवारितौ ॥ ४३ ॥
कावेताविति विज्ञातुं लोकैः त्रुटावगुण्ठनौ ।
अरे तावेव मातङ्गावित्याक्षेपेण भाषितौ ॥ ४४ ॥
नागरैः कुट्यमानौ तौ यष्टिभिर्लोष्टुभिस्ततः ।
श्वानाविव गृहात्पुर्यां नतग्रीवौ निरीयतुः ॥ ४५ ॥
तौ सैन्यशशवल्लोकैर्हन्यमानौ पदे पदे ।
स्खलत्पादौ कथमपि गम्भीरोद्यानमीयतुः ॥ ४६ ॥
तावचिन्तयतामेवं धिग् नौ [1]दुर्ज्जातिदूषितम् ।
कलाकौशलरूपादि पयोघ्रातमिवाहिना ॥ ४७ ॥

---

(१) ख ग च ड. दुर्जाति- ।

धिगावयोः कुलं यस्मात्प्रकारोऽयमावयोः ।
तेनेदं क्रियमाणाश्च शान्तिं नाप्नुमः ॥ ४८ ॥
कलाभावल्यरूपाणि गुणानि वपुषा सह ।
तदेतानद्यैव तृणवत्त्यजतां क्षणात् ॥ ४९ ॥
इति निश्चित्य तौ प्राणपरित्यागपरायणौ ।
गन्तुं साक्षादिव द्रष्टुं पेततुर्दक्षिणाशाम् ॥ ५० ॥
ततो दूरं प्रयातौ तौ गिरिमेकमपश्यताम् ।
यस्योत्तुङ्गैः शृङ्गैः कालेन किरीटितम् ॥ ५१ ॥
भृगुपातेच्छया तावारोहन्तौ महामुनिः ।
दृश्यं पर्वते तस्मिन् जङ्गमो गुणपर्वतः ॥ ५२ ॥
प्रारब्धध्यानमिवाध्यारोहं मुनिं गिरिशिरःस्थितम् ।
दृष्ट्वा प्रनष्टसन्तापप्रसरौ तौ बभूवतुः ॥ ५३ ॥
तौ प्राक्दुःखमिवोत्सृष्टावानन्दाश्रुजलच्छलात् ।
तत्पादपद्मयोर्भृङ्गाविव सद्यो निपेततुः ॥ ५४ ॥
समाप्य मुनिना ध्यानं कौ युवां किमिहागतौ ।
इति पृष्टौ स्ववृत्तान्तं तावशेषमशंसताम् ॥ ५५ ॥
स जगौ भृगुपातेन वपुरेव हि शीर्यते ।
शीर्यते नाशुभं कर्म जन्मान्तरशतार्जितम् ॥ ५६ ॥
त्याज्यं वपुरिदं चेद् वा गृह्यतां वपुषः फलम् ।
तच्चापवर्गस्वर्गादिकारणं परमं तपः ॥ ५७ ॥
इत्यादि देशनावाक्सुधानिर्धौतमानसौ ।
तस्य पार्श्वे जगृहतुर्यतिधर्ममुभावपि ॥ ५८ ॥

२८

क्ष्मापेनापि पुराध्यक्षः साक्षेपमिदमाज्ञपि ।
न प्रवेशः प्रदातव्यो नगर्यामनयोः क्वचित् ॥ ३८ ॥
ततःप्रभृति तौ वाराणस्या दूरेण तस्थतुः ।
प्रवृत्तश्चैकदा तत्र कौमुदीपरमोत्सवः ॥ ३९ ॥
राजशासनमुल्लङ्घ्य लोलेन्द्रियतया च तौ ।
प्रविष्टौ नगरीं भृङ्गौ गजगण्डतटीमिव ॥ ४० ॥
उत्सवं प्रेक्षमाणौ तौ सर्वाङ्गीणावगुण्ठनौ ।
दस्युवन्नगरीमध्ये छन्नं छन्नं विचेरतुः ॥ ४१ ॥
क्रोष्टुवत्क्रोष्टुशब्देन पौरगीतेन तौ ततः ।
अगायतां तारतारमलङ्घ्या भवितव्यता ॥ ४२ ॥
आकर्ण्य कर्णमधुरं तद्गीतं युवनागरैः ।
मधुवन्मक्षिकाभिस्तौ मातङ्गौ परिवारितौ ॥ ४३ ॥
कावेताविति विज्ञातुं लोकैः क्रष्टावगुण्ठनौ ।
अरे ताविव मातङ्गावित्याक्षेपेण भाषितौ ॥ ४४ ॥
न नानायोनिषु जन्तवः समुत्पद्यन्त इति व्यलीकः
ित् सृष्टिवादः यज्ञोऽस्य भूत्यै सर्वस्येति त्वर्थवादः
तमात्रं वधोऽवधो इति तूपहासपात्रं[1] वचः यज्ञार्थं विनि-
र्णां चौषध्यादीनां पुनरुच्छ्रयप्राप्तिः अश्रद्धानभाषितं अज्ञत-
तान यज्ञवधमात्रेणोच्छ्रितगतिप्राप्त्ययोगात् । अपिच । यज्ञ-
त्रे यदि उच्छ्रितगतिप्राप्तिस्तर्हि मातापित्रादीनामपि
वधः किं न क्रियते ।

यदाहुः—

नाहं स्वर्गफलोपभोगतृषितो नाभ्यर्थितस्त्वं मया
सन्तुष्टस्तृणभक्षणेन सततं साधो न युक्तं तव ।

---

(१) च छ -मात्रम् ।

स्वर्गं यान्ति यदि त्वया विनिहता यज्ञे ध्रुवं प्राणिनो
यज्ञं किं न करोषि मातृपितृभिः पुत्रैस्तथा बान्धवैः ॥२

मधुपर्कादिषु च हिंसा श्रेयसे नान्यत्रेति स्वच्छन्दभाषितं, को
विशेषो हिंसाया येनैका श्रेयस्करी नान्येति। पुण्यात्मान
सर्वाऽपि हिंसा न कर्त्तव्येत्याहुः।

यथा—

'सव्वे जीवा वि इच्छंति जीविउं न मरिज्जिउं।
तम्हा पाणिवहं घोरं निग्गंथा वज्जयंति णम् ॥ १ ॥

यत्तूक्तं—

आत्मानं च पशूंश्चैव गमयत्युत्तमां गतिमिति।

तदतिमहासाहसिकादन्यः को वक्तुमर्हति। अपि नाम पश
रहिंस्रस्याकामनिर्जरयोत्तमगतिलाभः संभवेत् द्विजस्य
निघातजपाणिकाग्रहारपूर्वं सौनिकस्येव निर्दयस्य हिंस
कथमुत्तमगतिसंभावनाऽपि स्यात् ॥ ३८ ॥

एतदेव विशेषाभिधानपूर्वकमुपसंहरन्नाह—

देवोपहारव्याजेन यज्ञव्याजेन येऽथवा।
घ्नन्ति जन्तून् गतघृणा घोरां ते यान्ति दुर्गतिम् ॥३

देवा भैरवचण्डिकादयस्तेभ्यः उपहारो बलिः स एव व्याजं
तेन महानवमीमाघाष्टमीचैत्राष्टमीमनमित्तिकादिषु देवपूजाव्या

१ सर्वे जीवा अपि इच्छन्ति जीवितुं न मर्तुम्।
तस्मात् प्राणिवधं घोरं निर्ग्रन्था वर्जयन्ति तम्॥

। ये जन्तुघातं कुर्वन्ति ये च यज्ञव्याजेन गतघृणा निर्दयास्ते
्' रौद्रां दुर्गतिं नरकादिलक्षणां यान्ति अत्र देवोपहारव्याजे-
ति विशेषाभिधानं यज्ञव्याजेनेत्युपसंहारः अपि च निराबाधे
ॅ ।ावने स्वाधीने साबाधपराधीनधर्मसाधनपरिग्रहो न श्रेयान् ।

ः८।३।—

अक्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेदिति ॥ ३९ ॥

एतदेवाह—

शमशीलदयामूलं हित्वा धर्मं जगद्धितम् ।
अहो हिंसाऽपि धर्माय जगदे मन्दबुद्धिभिः ॥४०॥

. कषायेन्द्रियजयः शीलं सुस्वभावता दया भूतानुकम्पा एतानि
कारणं यस्य स तथा धर्मोऽभ्युदयनिःश्रेयसकारणं तं किं
ेभूतं जगद्धितं, हित्वा उपेक्ष्य शमशीलादीनि धर्मसाधनान्युपे-
..., अहो इति विस्मये हिंसा अपि धर्मसाधनबद्धिर्भूता धर्म-
ध ... मन्दबुद्धिभिरुक्ता सर्वजनप्रसिद्धानि शमशीलादीनि
... अधर्मसाधनमपि हिंसां धर्मसाधनत्वेन प्रति-
... तः परेषां व्यक्तैव मन्दबुद्धिता । एवं तावल्लोभमूला
...ः कुलक्रमायाता यज्ञनिमित्ता देवोपहारहेतुका च हिंसा
ति पिद्धा ॥ ४० ॥

पितृनिमित्ता अवशिष्यते तां प्रति निषेधितुं परशास्त्रीयां
...कोमनुवदति—

हविर्यच्चिररात्राय यच्चानन्त्याय कल्पते ।
पितृभ्यो विधिवद्दत्तं तत्प्रवक्ष्याम्यशेषतः ॥ ४१ ॥

चिररात्रशब्दो दीर्घकालवचनः यच्चानन्त्याय केनचिद्धविषा दीर्घकालतृप्तिर्जायते केनचिदनन्तैव तदुभयं प्रवक्ष्यामि ॥ ४१ ॥

तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा ।
दत्तेन मासं प्रीयन्ते विधिवत्पितरो नृणाम् ॥ ४२ ॥

तिलादिग्रहणं नैतत्परिसंख्यानार्थमपि तूपात्तानां फलाभिधानार्थम् । एतैर्विधिवद्दत्तैः पितरो मासं प्रीयन्ते ॥ ४२ ॥

द्वौ मासौ मत्स्यमांसेन त्रीन् मासान् हारिणेन तु ।
औरभ्रेणाथ चतुरः शाकुनेनेह पञ्च तु ॥ ४३ ॥

मत्स्याः पाठीनाद्याः, हरिणाः मृगाः, औरभ्रा मेषाः, शकुनाः [illegible]कुक्कुटाद्याः ॥ ४३ ॥

षण्मासांश्छागमांसेन पार्षतेनेह सप्त वै ।
अष्टावेणस्य मांसेन रौरवेण नवैव तु ॥ ४४ ॥

[illegible] ॥ ४४ ॥

दशमासांस्तु तृप्यन्ति वराहमहिषामिषैः ।
शशकूर्मयोस्तु मांसेन मासानेकादशैव तु ॥ ४५ ॥

[illegible] ॥ ४५ ॥

संवत्सरं तु गव्येन पयसा पायसेन तु ।
वार्ध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी ॥ ४६ ॥

ानुमितयोः श्रुतसंबन्धस्य बलीयस्त्वाद्गव्येन पयसा पायसेन च
ंबन्धो न मांसेन प्राकरणिकेन, अन्ये तु व्याख्यानयन्ति मांसेन
ाव्येन पयसा पायसेन वा पयसो विकारः पायसं दध्यादि पयः-
ंस्कृते त्वोदने प्रसिद्धिः वार्ध्रीणसो जरच्छागः यस्य पिबतो जलं
णि स्पृशन्ति जिह्वा कर्णौ च ॥

यदाह—

त्रिपिबं त्विन्द्रियक्षीणं श्वेतं वृद्धमजापतिम् ।
वार्ध्रीणसं तु तं प्राहुर्याज्ञिकाः पितृकर्मसु ॥ १ ॥ ४६ ॥

पेतृनिमित्तहिंसोपदेशकं शास्त्रमनूद्य तदुपदिष्टां हिंसां दूष-
यति—

इति स्मृत्यनुसारेण पितॄणां तर्पणाय या ।
मूढैर्विधीयते हिंसा साऽपि दुर्गतिहेतवे ॥ ४७ ॥

ति पूर्वोक्ता या स्मृतिर्धर्मसंहिता तस्या अनुसारेणालम्बनेन
पेतरः पितुर्वंश्याः ।

यच्छ्रुतिः—

पित्रे पितामहाय प्रपितामहाय पिण्डं निर्वपेदिति ।

ाणां तर्पणाय तृप्तये मूढैरविचारकैर्या हिंसा विधीयते सापि न
केवलं मांसलोभादिनिमित्ता दुर्गतिहेतवे नरकाय न हि स्वल्पाऽपि
ापिहिंसा न नरकादिनिबन्धनं यत्तु पितृतृप्तिप्रपञ्चवर्णनं

तन्मुग्धबुद्धिप्रतारणमात्रं न हि तिलव्रीह्यादिभिर्मत्स्
परासूनां पितॄणां तृप्तिरुत्पद्यते।

यदाह —

मृतानामपि जन्तूनां यदि तृप्तिर्भवेदिह।

निर्वाणस्य प्रदीपस्य स्नेहः संवर्द्धयेच्छिखाम्

न केवलं हिंसा दुर्गतिहेतुरेव किं तु हिंस्यमाने
निबन्धनत्वेन स्वस्यापि इहामुत्र च हिंसाहेतुतया

अहिंस्रस्य तु सर्वजीवाभयदानशौण्डस्य न

भयमस्तीत्याह—

यो भूतेष्वभयं दद्याद्भूतेभ्यस्तस्य नो भ
यादृग्वितीर्यते दानं तादृगासाद्यते फ

स्पष्टम् ॥ ४८ ॥

एवं तावद्धिंसापराणां मनुष्याणां नरकादि हिं
सुराणामपि हिंसकानां जुगुप्सनीयचरितानां
पूज्यत्वं परिदेवयते—

कोदण्डदण्डचक्रासिशूलशक्तिधराः
हिंसका अपि हा कष्टं पूज्यन्ते देवत

हा कष्टमित्यतिशयनिर्वेदे हिंसका अपि रुद्रप्रभृत
जनैः पूज्यन्ते विविधपुष्पोपहारादिभिरर्च्यन्ते ते

इति कोदण्डादिधरत्वाद्धिंसकाः हिंसकत्वमन्तरेण कोदण्डा-
धारयितुमयुक्तत्वात् कोदण्डधरः शङ्करः दण्डधरो यमः
धरो विष्णुः शूलधरो शिवो शक्तिधरः कुमारः उप-
षां शस्त्राणां शस्त्रधराणां च ॥ ४९ ॥

एवं प्रपञ्चतो हिंसां प्रतिषिध्य तद्विपक्षभूतमहिंसाव्रतं
श्लोकद्वयेन स्तौति—

मातेव सर्वभूतानामहिंसा हितकारिणी ।
अहिंसैव हि संसारमरावमृतसारणिः ॥ ५० ॥
अहिंसा दुःखदावाग्निप्रावृषेण्यघनावली ।
भवभ्रमिरुगार्त्तानामहिंसा परमौषधी ॥ ५१ ॥

ष्टम् ॥ ५० ॥ ५१ ॥

अहिंसाव्रतस्य फलमाह—

दीर्घमायुः परं रूपमारोग्यं श्लाघनीयता ।
अहिंसायाः फलं सर्वं किमन्यत्कामदेव सा ॥५२॥

हिंसापरो हि परेषामायुर्वेदयन्ननुरूपमेव जन्मान्तरे दीर्घायुष्ट्वं
भते तथैव पररूपमविनाशयन् प्रकृष्टं रूपमाप्नोति तथैव
स्वास्थ्यहेतुं हिंसां परिहरन् परमस्वास्थ्यरूपमारोग्यं लभते
र्वभूताभयप्रदश्च तेभ्य आत्मनः श्लाघनीयतामश्नुते एतत्सर्व-
हिंसायाः फलं कियद्वा शृङ्गग्राहिकया वक्तुं शक्यते । इत्याह
किमन्यत्कामदेव सा यद्यत्कामयते तत्तस्मै ददाति उपलक्षणमेतद-
मितस्यापि स्वर्गापवर्गादेः फलस्य दानात् ।

ग्रन्थान्तरे श्लोकः —

हेमाद्रिः पर्वतानां हरिरमृतभुजां चक्रवर्ती नराणां
शीतांशुर्ज्योतिषां स्वस्तरुरवनिरुहां चण्डरोचिर्ग्रहाणाम् ।
सिन्धुस्तोयाशयानां जिनपतिरसुरामर्त्यमर्त्याधिपानां
यद्वत्तद्व्रतानामधिपतिपदवीं यात्यहिंसा किमन्यत् ॥ १ ॥

उक्तमहिंसाव्रतम् ॥ ५२ ॥

अथ सूनृतव्रतस्यावसरस्तच्च नालीकविरतिव्रतमन्तरेणोप-पद्यते, न च तत्फलमनुपदर्श्यालीकाद्विरतिं कारयितुं शक्यः पा इत्यलीकफलमुपदर्श्य तद्विरतिमुपदर्शयति —

मन्मनत्वं काहलत्वं मूकत्वं मुखरोगिताम् ।
वीक्ष्यासत्यफलं कन्यालीकाद्यसत्यमुत्सृजेत् ॥ ५३ ॥

मन एव मन्तृ यत्र तन्मन्मनं परस्याप्रतिपादकं वचनं तद्योगात्पुरुषोऽपि मन्मनस्तस्य भावो मन्मनत्वं १ काहलमव्यक्तवर्णं वचनं तद्योगात्पुरुषोऽपि काहलस्तस्य भावः काहलत्वं २ मूकोऽ तस्य भावो मूकत्वं ३ मुखस्य रोगा उपजिह्वादयस्तेऽस्य मुखरोगी तस्य भावो मुखरोगिता ४ एतत्सर्वमसत्यफलं शास्त्रबलेनोपलभ्यासत्यं स्थूलासत्यमुत्सृजेच्छ्रावकः ।

यदाह—

मूका जडाश्च विकला वाग्घीना वाग्जुगुप्सिताः ।
पूतिगन्धमुखाश्चैव जायन्तेऽनृतभाषिणः ॥ १ ॥ ५३ ॥

असत्यं च तत्र कन्यालीकादि वक्ष्यमाणम् तदेवाह—

कन्यागोभूम्यलीकानि न्यासापहरणं तथा।
कूटसाक्ष्यं च पञ्चेति स्थूलासत्यान्यकीर्त्तयन्॥५४॥

.. लीकं१ गवालीकं२ भूम्यलीकं३ न्यासापहरणं४ कूटसाक्ष्यं ५ एतानि पञ्च स्थूलासत्यान्यकीर्त्तयन् जिनाः। तत्र कन्या- ... कन्यालीकं भिन्नकन्यामभिन्नां विपर्ययं वा वदतो ...त; इदं च सर्वस्य कुमारादिद्विपदविषयस्यालीकस्योप- ... १ गवालीकमल्पक्षीरां बहुक्षीरां विपर्ययं वा वदतः, ... सर्वचतुष्पदविषयस्यालीकस्योपलक्षणं २ भूम्यलीकं ... ...ल्पां विपर्ययं वा वदतः, इदं च शेषपाद- ... ३ अथ द्विपदचतुष्पदापद- ...मेव कस्मान्न कृतम्। उच्यते। कन्याद्यलीकानां लोके तिगर्हितत्वेन रूढत्वादिति। न्यस्यते रक्षणायान्यस्मै समर्प्यत ...त न्यासः सुवर्णादिः तस्यापहरणमपलापस्तद्वचनं स्थूलमृषा- ... इदं चानेनैव विशेषेण पूर्वालीकेभ्यो भेदेनोपात्तं; कूटसाक्ष्यं ...ज्ञातस्य लञ्चामत्सरादिना कूटं वदतः, यथाहमत्र साक्षी ...स्य च परकीयपापसमर्थकत्वलक्षणविशेषमाश्रित्य पूर्वेभ्यो भेदे- ..., एतानि क्लिष्टाशयसमुत्थत्वात् स्थूलासत्यानि॥५४॥

... स्थूलालीकत्वे विशेषणद्वारेण हेतुमुपन्यस्य प्रतिषेधमाह—

सर्वलोकविरुद्धं यद्यद्विश्वसितघातकम्।
यद्विपक्षश्च पुण्यस्य न वदेत्तदसूनृतम्॥५५॥

(१)अइअम्मि य कालम्मि* पच्चुप्पन्नमणागए ।

जत्थ संका भवे तं तु, एवमेअं ति णो वए ॥ २ ॥

(२)अइअम्मि य कालम्मि* पच्चुप्पन्नमणागए ।

निस्संकिअं भवे जं तु, एवमेअं तु निद्दिसे ॥ ३ ॥

एतच्चासत्यं चतुर्द्धा । भूतनिह्नवो, अभूतोद्भावनं, अर्थान्तरं, च । भूतनिह्नवो यथा । नास्त्यात्मा, नास्ति पुण्यं, नास्ति पं चेत्यादि । अभूतोद्भावनं यथा । सर्वगत आत्मा श्यामाक- ...लो वा । अर्थान्तरं यथा । गामश्वमभिदधतः । गर्हा तु ... । एका सावद्यव्यापारप्रवर्त्तनी ; यथा चेत्रं कृषेत्यादि । ... अप्रिया ; काणं काणमिति वदतः । तृतीया आक्रोश- ; यथा अरे बान्धकिनेय इत्यादि ॥ ५७ ॥

अतिपरिहरणीयत्वमसत्यवचनस्य दर्शयन् पुनरप्यैहिकान्

दोषानाह—

असत्यवचनाद्वैरविषादाप्रत्ययादयः ।

प्रादुःषन्ति न के दोषाः कुपथ्याद्व्याधयो यथा ॥५८॥

विरोधः, विषादः पश्चात्तापः, अप्रत्ययोऽविश्वासः । आदि- ...वध... ...यो गृह्यन्ते ॥ ५८ ॥

(१) अतीते च काले प्रत्युत्पन्नमनागते ।
यत्र शङ्का भवेत्तत् एवमेतत् इति नो वदेत् ॥ २ ॥

(२) अतीते च काले प्रत्युत्पन्नमनागते ।
निःशङ्कितं भवेत्तत्तु एवमेतत् तु निर्दिशेत् ॥ ३ ॥

* क ख ग ङ ड अद्वम्मि ।

प्रासङ्गिकं मृषावादस्य फलमाह—

निगोदेष्वथ तिर्यक्षु तथा नरकवासिषु ।
उत्पद्यन्ते मृषावादप्रसादेन शरीरिणः ॥ ५९ ॥

निगोदा अनन्तकायिका जीवाश्रयाः, तिर्यक्षु [illegible] [illegible], नरकवासिषु नैरयिकेषु ॥ ५९ ॥

इदानीं मृषावादपरिहारे [illegible]
कालिकाचार्यवसुराजौ दृष्टान्तावाह—

ब्रूयाद्भियोपरोधाद्वा नासत्यं कालिकार्यवत् ।
यस्तु ब्रूते स नरकं प्रयाति वसुराजवत् ॥ ६० ॥

[illegible]

[illegible]

विमृश्य प्रकृतीभी राजानं निरवासयत् ।
पापात्मानः कर्णजाप भाग्यैर्भिन्ददायिन ॥ ५ ॥
तस्य राज्ये दुरात्माऽसौ राज्यं स्वयमुपाविशत् ।
क्रूरः पापात्मदानेऽपि कामगृध्नुः धिकायपि ॥ ६ ॥
पशुहिंसोत्कटान् यज्ञानसौ धर्मधिया व्यधात् ।
धूमैर्मलिनयन् विश्वं मूर्त्तैरिव पातकैः ॥ ७ ॥
विहरन् कालिकाचार्योऽन्यदाचार्यस्तस्य मातुलः ।
तत्राजगाम भगवानङ्गवानिव संयमः ॥ ८ ॥
तत्समीपमगाद् दुर्दत्तो मिथ्यात्वमोहितः ।
अत्यर्थं प्रार्थितो मात्रा मातुलाभ्यर्णमाययौ ॥ ९ ॥
मत्तोन्मत्तप्रमत्तात्मा दत्तोऽपृच्छत्समुद्भटम् ।
धर्मार्थं यदि जानासि यज्ञानां ब्रूहि किं फलम् ॥ १० ॥
उवाच कालिकाचार्यो धर्मं पृच्छसि तच्छृणु ।
तत्परस्य न कर्तव्यं यद्यदप्रियमात्मनः ॥ ११ ॥
ननु यज्ञफलं पृच्छामीति दत्तोदिते पुनः ।
सूरिरूचे न हिंसादि श्रेयसे किन्तु पाप्मने ॥ १२ ॥
पुनस्तदेव साक्षेपं पृष्टो दत्तेन दुर्धिया ।
स्पष्टमेवमुवाचार्यो यज्ञानां नरकः फलम् ॥ १३ ॥
दत्तः क्रुद्धोऽभ्यधादेवमिह कः प्रत्ययो वद ।
आर्योऽप्यूचे श्वकुम्भ्यां त्वं पच्यसे सप्तमेऽहनि ॥ १४ ॥
दत्तः कोपादुदस्तभ्रूररुणीकृतलोचनः ।
भूताविष्ट इवोवाच प्रत्ययोऽत्रापि को ननु ॥ १५ ॥

विभेद्य प्रकृतीरेष राजानं निरवासयत् ।
पापात्मानः कपोताश्च स्वाश्रयोच्छेददायिनः ॥ ५ ॥
तस्य राज्ञो दुरात्माऽसौ राज्ये स्वयमुपाविशत् ।
क्षुद्रः पादान्तदानेऽपि क्रामत्युच्छीर्षकावधि ॥ ६ ॥
पशुहिंसोत्कटान् यज्ञानज्ञो धर्मधिया व्यधात् ।
धूमैर्मलिनयन् विश्वं समूर्त्तैरिव पातकैः ॥ ७ ॥
विहरन् कालिकार्याख्ययाचार्यस्तस्य मातुलः ।
तत्राजगाम भगवानङ्गवानिव संयमः ॥ ८ ॥
तत्समीपमनापित्सुर्दत्तो मिथ्यात्वमोहितः ।
अत्यर्थं प्रार्थितो मात्रा मातुलाभ्यर्णमाययौ ॥ ९ ॥
मत्तोन्मत्तप्रमत्ताभो दत्तोऽपृच्छत्तमुद्भटम् ।
आचार्य यदि जानासि यज्ञानां ब्रूहि किं फलम् ॥ १० ॥
उवाच कालिकाचार्यो धर्मं पृच्छसि तच्छृणु ।
तत्परस्य न कर्त्तव्यं यद्यदप्रियमात्मनः ॥ ११ ॥
ननु यज्ञफलं पृच्छामीति दत्तोदिते पुनः ।
सूरिरूचे न हिंसादि श्रेयसे किन्तु पाप्मने ॥ १२ ॥
पुनस्तदेव साक्षेपं पृष्टो दत्तेन दुर्धिया ।
ससौष्ठवमुवाचार्यो यज्ञानां नरकः फलम् ॥ १३ ॥
दत्तः क्रुद्धोऽभ्यधादेवमिह कः प्रत्ययो वद ।
आर्योऽप्यूचे श्वकुम्भ्यां त्वं पक्ष्यसे सप्तमेऽहनि ॥ १४ ॥
दत्तः कोपादुदस्तभ्रूररुणीकृतलोचनः ।
भूताविष्ट इवोवाच प्रत्ययोऽत्रापि को ननु ॥ १५ ॥

यदीत्थं ज्ञानिनाथोऽसि तत्कथं ज्ञानमात्मनः ।
तस्मिन्नेवाह्नि कस्मात्तो भुवि निजा गमिष्यति ॥ १६ ॥
रोषाद् दत्तो जगादैवं तव मृत्युः कुतः कदा ।
न कुतोऽपि समाधिना गां गमिष्यामीत्यवदन्मुनिः ॥ १७ ॥
अमुं निरुध्य क्रुद्धोऽयमिति दत्तेन रोषतः ।
आदिष्टैः सादिभिर्नागौ कर्णे कण्ठगतैः ॥ १८ ॥
अथ दत्तात् समुद्विग्नाः सामन्ताः पापकर्मणः ।
आह्वयाद्यं नृपं तस्मै दत्तमर्पयितुं किल ॥ १९ ॥
दत्तोऽपि शङ्कितस्तस्थौ निलीनो निजवेश्मनि ।
कण्ठीरवरवत्रस्तो निकुञ्ज इव कुञ्जरः ॥ २० ॥
स विस्मृतदिनो दैवादागते सप्तमे दिने ।
बहिर्निर्गन्तुमारेभे राजमार्गानरक्षयत् ॥ २१ ॥
तत्रैको मालिकः प्रातर्विशन् पुष्पकरण्डवान् ।
चक्रे वेगातुरो विष्ठां भीतः पुष्पैः प्यधत्त च ॥ २२ ॥
इहाद्य हनिष्यामि पशुवन्मुनिपांसनम् ।
चिन्तयन्निति दत्तोऽपि निर्ययौ सादिभिर्वृतः ॥ २३ ॥
एकेन वल्गताऽश्वेन विष्ठोत्क्षिप्ता खुरेण सा ।
दत्तस्य प्राविशद्वास्ये नासत्या ¹यमिनां गिरः ॥ २४ ॥
शिलास्फालितवत्सद्यः शयाङ्गो विमनास्ततः ।
स सामन्ताननापृच्छ्य ववले स्वगृहं प्रति ॥ २५ ॥

---

(१) क ख ग ङ यतिनाम् ।

एषामेकतमः स्वर्गं गमिष्यत्यपरौ पुनः ।
नरकं यास्यतस्तच्चाश्रौषीत्क्षीरकदम्बकः ॥ ६ ॥
तच्छ्रुत्वा चिन्तयामास खिन्नः क्षीरकदम्बकः ।
मय्यप्यध्यापके शिष्यौ यास्यतो नरकं हहा ॥ ७ ॥
एभ्यः को यास्यति स्वर्गं नरकं कौ च यास्यतः ।
जिज्ञासुरित्युपाध्यायस्तांस्त्रीन् युगपदाह्वत ॥ ८ ॥
यावपूर्णं समर्प्यैषामेकैकं पिष्टकुक्कुटम् ।
स ऊचेऽमी तत्र वध्या यत्र कोऽपि न पश्यति ॥ ९ ॥
वसुपर्वतकौ तत्र गत्वा शून्यप्रदेशयोः ।
आत्मनीनां गतिमिव जघ्नतुः पिष्टकुक्कुटौ ॥ १० ॥
महात्मा नारदस्तत्र व्रजित्वा नगराद्बहिः ।
स्थित्वा च विजने देशे दिशः प्रेक्ष्य व्यतर्कयत् ॥ ११ ॥
गुरुपादैरदस्तावदादिष्टं वत्स यत्त्वया ।
वध्योऽयं कुक्कुटस्तत्र यत्र कोऽपि न पश्यति ॥ १२ ॥
असौ पश्यत्यहं पश्याम्यमी पश्यन्ति खेचराः ।
लोकपालाश्च पश्यन्ति पश्यन्ति ज्ञानिनोऽपि च ॥ १३ ॥
नास्त्येव स्थानमपि तद्यत्र कोऽपि न पश्यति ।
तात्पर्यं तद्गुरुगिरां न वध्यः खलु कुक्कुटः ॥ १४ ॥
गुरुपादा दयावन्तः सदा हिंसापराङ्मुखाः ।
अस्मत्प्रज्ञां परिज्ञातुमेतन्नियतमादिशन् ॥ १५ ॥
विमृश्यैवमहत्वैव कुक्कुटं स समाययौ ।
कुक्कुटाहनने हेतुं गुरोर्व्यज्ञपयच्च तम् ॥ १६ ॥

तत्र गाढमगाढो गान्तीति निश्चित्य मन्त्रवित् ।
शुक्तिमान् नारदः श्रेष्ठान् यायुः सार्धमिति सार्पिता ॥ १७ ॥
वसुपर्वतकौ पश्चाद्गत्वाऽन्यत्र भ्रमन्तु: ।
निघ्नतो कुक्कुटौ तत्र यत्र कोऽपि न पश्यति ॥ १८ ॥
आगत्य गुरवेऽमाद्यचूचतन् बन्धुवादिनः ।
कथं हतौ कुक्कुटौ वै पापाविश्यमपक्रुकः ॥ १९ ॥
ततः क्षीरकदम्बाख्यो दध्यौ विश्वाभधारकः ।
श्रुत्वा संव्यापनवशो व्रताद्वैराग्यसन्नभूत् ॥ २० ॥
गुरूपदेशो हि यथापात्रं परिणमेदिह ।
स्वात्यम्बुः स्थानभेदेन मुक्तालवणतां व्रजेत् ॥ २१ ॥
प्रियः पर्वतकः पुत्रः पुत्रादभ्यधिको वसुः ।
नरकं यास्यतस्तस्माद्गृहवासेन किं मम ॥ २२ ॥
निर्वेदादित्युपाध्यायः प्रव्रज्यामग्रहीत्तदा ।
तत्पदे पर्वतोऽध्यास्त व्याख्याक्षणविचक्षणः ॥ २३ ॥
श्रुत्वा गुरोः प्रसादेन सर्वशास्त्रविशारदः ।
नारदः शारदाम्भोदशुभ्रधीः स्वां भुवं ययौ ॥ २४ ॥
नृपचन्द्रोऽभिचन्द्रोऽपि जग्राह समये व्रतम् ।
ततोऽभवद्वसू राजा वासुदेवसमः श्रिया ॥ २५ ॥
सत्यवादीति स प्राप प्रसिद्धिं पृथिवीतले ।
तां प्रसिद्धिमपि त्रातुं सत्यमेव जगाद सः ॥ २६ ॥
अन्यदा मृगयुणा मृगाय मृगयाजुषा ।
क्षिप्तेषुर्निपतितो विन्ध्यनितम्बे सोऽन्तरा स्खलत् ॥ २७ ॥

रषामेकतमः स्वर्गं गमिष्यत्यपरौ पुनः ।
नरकं यास्यतस्तच्चाश्रौषीत्क्षीरकदम्बकः ॥ ६ ॥
तच्छ्रुत्वा चिन्तयामास खिन्नः क्षीरकदम्बकः ।
मय्यप्यध्यापके शिष्यौ यास्यतो नरकं हहा ॥ ७ ॥
एभ्यः को यास्यति स्वर्गं नरकं कौ च यास्यतः ।
जिज्ञासुरित्युपाध्यायस्तांस्त्रीन् युगपदाह्वत ॥ ८ ॥
ावपूर्णं समर्प्यैषामेकैकं पिष्टकुक्कुटम् ।
ा ऊचेऽमी तत्र वध्या यत्र कोऽपि न पश्यति ॥ ९ ॥
ासुपर्वतकौ तत्र गत्वा शून्यप्रदेशयोः ।
ात्मनीनां गतिमिव जघ्नतुः पिष्टकुक्कुटौ ॥ १० ॥
महात्मा नारदस्तत्र व्रजित्वा नगराद्बहिः ।
स्थित्वा च विजने देशे दिशः प्रेक्ष्य व्यतर्कयत् ॥ ११ ॥
ुरुपादैरदस्तावदादिष्टं वत्स यत्त्वया ।
ाध्योऽयं कुक्कुटस्तत्र यत्र कोऽपि न पश्यति ॥ १२ ॥
असौ पश्यत्यहं पश्याम्यमी पश्यन्ति खेचराः ।
ोकपालाश्च पश्यन्ति पश्यन्ति ज्ञानिनोऽपि च ॥ १३ ॥
ास्त्यव स्थानमपि तद्यत्र कोऽपि न पश्यति ।
ात्पर्यं तद्गुरुगिरां न वध्यः खलु कुक्कुटः ॥ १४ ॥
ुरुपादा दयावन्तः सदा हिंसापराङ्मुखाः ।
स्मत्प्रज्ञां परिज्ञातुमेतन्नियतमादिशन् ॥ १५ ॥
िचन्त्यैवमहत्वैव कुक्कुटं स समाययौ ।
ुक्कुटाहननं हेतुं गुरोर्व्यज्ञपयच्च तम् ॥ १६ ॥

[illegible] ।
[illegible] ॥ [illegible] ॥
[illegible] ।
[illegible] ॥ [illegible] ॥
[illegible] ।
[illegible] ॥ [illegible] ॥
[illegible] ।
[illegible] ॥ [illegible] ॥
[illegible] ।
[illegible] ॥ [illegible] ॥
[illegible] ।
[illegible] ॥ [illegible] ॥
[illegible] ।
[illegible] ॥ [illegible] ॥
[illegible] ।
[illegible] ॥ [illegible] ॥
[illegible] ।
[illegible] ॥ [illegible] ॥
[illegible] ।
[illegible] ॥ २६ ॥
[illegible] ।
[illegible] ॥ २७ ॥

इषुस्खलनहेतुं स ज्ञातुं तत्र ययौ ततः ।
आकाशस्फटिकशिलामज्ञासीत्पाणिना स्पृशन् ॥ २८ ॥
स दध्याविति सत्येऽस्यां संक्रान्तः परतश्चरन् ।
भूमिच्छायेव शीतांशौ दृष्टो हरिणो मया ॥ २९ ॥
पाणिस्पर्शं विना नेयं मर्त्यैरप्युपलक्ष्यते ।
अवश्यं तदसौ योग्या वसोर्वसुमतीपतेः ॥ ३० ॥
रहो व्यजिज्ञपद्राज्ञे गत्वा तां मृगयुः शिलाम् ।
हृष्टो राजाऽपि जग्राह ददौ चास्मै महद्धनम् ॥ ३१ ॥
स तया घटयामास छन्नं स्वासनवेदिकाम् ।
तच्छिल्पिनोऽघातयच्च नात्मीयाः कस्यचिन्नृपाः ॥ ३२ ॥
तस्यां सिंहासनं वेद्यां चेदीशस्य निवेशितम् ।
सत्यप्रभावादाकाशस्थितमित्यबुधज्जनः ॥ ३३ ॥
सत्याद्धि तुष्टाः सान्निध्यमस्य कुर्वन्ति देवताः ।
एवमूर्जस्विनी तस्य प्रसिद्धिर्व्यानशे दिशः ॥ ३४ ॥
तया प्रसिद्धा राजानो भीतास्तस्य वशं [1]गताः ।
सत्या वा यदि वा मिथ्या प्रसिद्धिर्जयिनी नृणाम् ॥ ३५ ॥
आगाच्च नारदोऽन्येद्युस्तत्रैवेक्षिष्ट पर्वतम् ।
व्याख्यानयन्तमृग्वेदं शिष्याणां शेमुषीजुषाम् ॥ ३६ ॥
अजैर्यष्टव्यमित्यस्मिन् मेषैरित्युपदेशकम् ।
बभाषे नारदो भ्रातर्भ्रान्त्या किमिदमुच्यते ॥ ३७ ॥

---

(१) क ग ङ ययुः ।

साऽथ पर्वतकापायपीडया हृदि शल्यिता ।
वसुराजमुपेयाय पुत्रार्थे क्रियते न किम् ॥ ४८ ॥
दृष्टः क्षीरकदम्बोऽद्य यदम्ब त्वमसौ चिता ।
किं करोमि प्रयच्छामि किं चेत्यभिदधे वसुः ॥ ४९ ॥
साऽवादीद्दीयतां पुत्रभिक्षा मह्यं महीपते ।
धनधान्यैः किमन्यैर्मे विना पुत्रेण पुत्रक ॥ ५० ॥
वसुरूचे मम मातः पाल्यः पूज्यश्च पर्वतः ।
गुरुवद्गुरुपुत्रेऽपि वर्त्तितव्यमिति श्रुतेः[1] ॥ ५१ ॥
कस्याद्य पत्रमुत्क्षिप्तं कालेनाकालरोषिणा ।
को जिघांसुर्भ्रातरं मे ब्रूहि मातः किमातुरा ॥ ५२ ॥
अजव्याख्यानवृत्तान्तं स्वपुत्रस्य पणं च तम् ।
त्वं प्रमाणीकृतश्चासीत्याख्यायार्थयते स्म सा ॥ ५३ ॥
कुर्वाणो रक्षणं भ्रातुरजान्मेषानुदीरय ।
प्राणैरप्युपकुर्वन्ति महान्तः किं पुनर्गिरा ॥ ५४ ॥
अवोचत वसुर्मातर्मिथ्या वच्मि वचः कथम् ।
प्राणात्ययेऽपि शंसन्ति नासत्यं सत्यभाषिणः ॥ ५५ ॥
अन्यदप्यभिधातव्यं नासत्यं पापभीरुणा ।
गुरुवागन्यथाकारे कूटसाक्ष्ये च का कथा ॥ ५६ ॥
[2]वधं कुरु गुरोः सूनुं यद्वा सत्यव्रताग्रहम् ।
तया सरोषमित्युक्तस्तद्वचोऽमंस्त पार्थिवः ॥ ५७ ॥

(१) च ड श्रुति ।
(२) ख ग च छ ड मङ्गुरु ।

द्वितीयः प्रकाशः ।

ततः प्रमुदिता क्षीरकदम्बगृहिणी ययौ ।
आजग्मतुश्च विद्वांसौ तत्र नारदपर्वतौ ॥ ५८ ॥
सभायाममिलन् सभ्या माध्यस्थ्यगुणशालिनः ।
वादिनोः सदसद्वादक्षीरनीरसितच्छदाः ॥ ५९ ॥
आकाशस्फटिकशिलावेदिसिंहासनं वसुः ।
सभापतिरलञ्चक्रे नभस्तलमिवोडुपः ॥ ६० ॥
ततो निजनिजव्याख्यापक्षं नारदपर्वतौ ।
कथयामासतू राज्ञे सत्यं ब्रूहीति भाषिणौ ॥ ६१ ॥
विप्रवृद्धैरथोचे स विवादस्त्वयि तिष्ठते ।
प्रमाणमनयोः साक्षी त्वं रोदस्योरिवार्यमा ॥ ६२ ॥
घटप्रभृतिदिव्यानि वर्तन्ते हन्त सत्यतः ।
सत्याद्वर्षति पर्जन्यः सत्यात्सिध्यन्ति देवताः ॥ ६३ ॥
त्वयैव सत्ये लोकोऽयं स्थाप्यते पृथिवीपते ।
त्वामिहार्थे ब्रूमहे किं ब्रूहि सत्यव्रतोचितम् ॥ ६४ ॥
वचोऽश्रुत्वैव तत्सत्यप्रसिद्धिं स्वां निरस्य च ।
अजान्मेषान् गुरुर्व्याख्यदिति साक्ष्यं वसुर्व्यधात् ॥ ६५ ॥
असत्यवचसा तस्य क्रुद्धास्तत्रैव देवताः ।
दलयामासुराकाशस्फटिकासनवेदिकाम् ॥ ६६ ॥
वसुर्वसुमतीनाथस्ततो वसुमतीतले ।
पपात सद्यो नरकपातं प्रस्तावयन्निव ॥ ६७ ॥
कूटसाक्ष्यं प्रदातुस्ते श्वपचस्येव को मुखम् ।
पश्येदिति वसुं निन्दन्नारदः स्वास्पदं ययौ ॥ ६८ ॥

देवताभिरसत्योक्तिकुपिताभिर्निपातितः ।
जगाम घोरं नरकं नरनाथो वसुस्ततः ॥ ६९ ॥
यो यः सूनुरुपाविक्षद्राज्ये तस्यापराधिनः ।
प्रजघ्नुर्देवतास्तं तं यावदष्टौ निपातिताः ॥ ७० ॥

इति वसुनृपतेरसत्यवाचः
फलमाकर्ण्य जिनोक्तिविद्धकर्णः ।
कथमप्युपरोधतोऽपि जल्पे
दनृतं प्राणितसंशयेऽपि नैव ॥ ७१ ॥ ६० ॥

॥ इति नारदपर्वतकथानकम् ॥

नहि [illegible] सत्यमिति [illegible] परपीडाकरं
[illegible] इति सत्यमार्गोऽयं
न भाषितव्यम् —

न सत्यमपि भाषेत परपीडाकरं वचः ।
लोकेऽपि श्रूयते यस्मात् कौशिको नरकं गतः ॥ ६१ ॥

[illegible] परपीडाकरवचनात् [illegible]
[illegible] ।
[illegible]
[illegible]
[illegible]
[illegible]

आसीत्त्यक्तधनः कोऽपि कौशिको नाम तापसः ।
अपास्य ग्रामसंवासमनुगङ्गमुवास सः ॥ १ ॥
कन्दमूलफलाहारो निर्ममो निष्परिग्रहः ।
सत्यवादितया प्राप प्रसिद्धिं परमामसौ ॥ २ ॥
मुषित्वा ग्राममन्येद्युर्दस्यवस्तस्य पश्यतः ।
आश्रमं निकषा जग्मुर्वनं विलमिवोरगाः ॥ ३ ॥
तेषामनुपदिनस्तु ग्राम्याः पप्रच्छुरेत्य तम् ।
सत्यवाद्यसि तद्ब्रूहि तस्कराः कुत्र वव्रजुः ॥ ४ ॥
धर्मतत्त्वानभिज्ञोऽथ कथयामास कौशिकः ।
'घने तरुनिकुञ्जेऽस्मिन् दस्यवः प्राविशन्निति ॥ ५ ॥
तस्योपदेशात्सन्नह्य ग्रामीणाः शस्त्रपाणयः ।
वनं प्रविश्य निर्जघ्नुर्दस्यून् व्याधा मृगानिव ॥ ६ ॥
ऋतमप्यनृतं परव्ययाकरणेनेदमुदीरयन् वचः ।
परिपूर्य निजायुरुल्बणं नरकं कौशिकतापसो ययौ॥७॥६१॥

अल्पमप्यसत्यवचनं प्रतिषेधितुं महदसत्यं वदतः परिदेवयते—

अल्पादपि मृषावादाद्रौरवादिषु संभवः ।
अन्यथा वदतां जैनीं वाचं त्वहह का गतिः ॥६२॥

अल्पादप्यैहिकार्थविषयत्वेन स्तोकादपि मृषावादादसत्याद्रौरवादिषु रौरवमहारौरवप्रभृतिषु नरकवासेषु संभव उत्पत्तिः लोकप्रसिद्धत्वाद्रौरवग्रहणम् । अन्यथा सर्वनरकेष्वित्युच्येत । अन्यथा

(१) घ ङ घने ।

विपरीतार्थतया जैनीं वाचं वदतामतीवासत्यवादिनां कुतीर्थिकानां स्वयूथ्यानां च निह्नवादीनां का गतिर्नरकादप्यधिका तेषां गतिः प्राप्नोतीत्यर्थः। अहहेति खेदे अशक्यप्रतीकाराः परिदेवनीयाः खल्वेत इति।

यदाह—

[1]अहह सयलन्नपावाहिं वितहपन्नवणमणुमवि दुरंतं।
ज मिरिइभवतदज्जियदुक्कयअवसेसलेसवसा ॥ १ ॥
[2]सुरथुयगुणोवि तित्थंकरोवि तिहुयणअतुल्लमल्लोवि।
गोवाइहिं वि बहुसो कअत्थिओ तिजयपहुत्तंसि ॥ २ ॥
[3]थीगोबंभणभूणंतगा वि केवि इह दिढपहाराई।
बहुपावावि पसिद्धा सिद्धा किर तम्मि चेव भवे ॥३॥६२॥

असत्यवादिनो निन्दित्वा सत्यवादिनः स्तौति—

ज्ञानचारित्रयोर्मूलं सत्यमेव वदन्ति ये।
धात्री पवित्री क्रियते तेषां चरणरेणुभिः ॥ ६३ ॥

ज्ञानचारित्रयोर्ज्ञानक्रिययोर्मूल कारणं यत्सत्यं तदेव वदन्ति ये

---

(१) अहह सकलान्यपापेभ्यो वितथप्रज्ञापनमण्वपि दुरन्तम्।
यन्मरीचिभवतदर्जितदुष्कृतावशेषलेशवशात् ॥ १ ॥
(२) सुरस्तुतगुणोऽपि तीर्थंकरोऽपि त्रिभुवनातुल्यमल्लोऽपि।
गोपादिभिरपि बहुशः कदर्थितः त्रिजगत्प्रभुत्वमसि ॥ २ ॥
(३) स्त्रीगोब्राह्मणभ्रूणान्तका अपि केऽपि दृढप्रहार्यादयः।
बहुपापा अपि प्रसिद्धाः सिद्धाः किल तस्मिन्नेव भवे ॥ ३ ॥

[illegible] ।
[illegible] ॥ २ ॥
[illegible] ।
[illegible] ॥ ३ ॥
[illegible] ।
[illegible] ॥ ४ ॥
[illegible] ।
असत्येनैव [illegible] ॥ ५ ॥
अहो पुरजनस्रोतःसोदरं तन्मुखोदरम् ।
निःसरन्ति यतो वाचः पङ्काकुलजलोपमाः ॥ ६ ॥
दावानलेन ज्वलता परिप्लुष्टोऽपि पादपः ।
सान्द्रीभवति लोकोऽयं नतु दुर्वचनाग्निना ॥ ७ ॥
चन्दनं चन्द्रिकाचन्द्रमणयो मौक्तिकस्रजः ।
आह्लादयन्ति न तथा यथा वाक् सूनृता नृणाम् ॥ ८ ॥
शिखी मुण्डी जटी नग्नश्चीवरी यस्तपस्यति ।
सोऽपि मिथ्या यदि ब्रूते निन्द्यः स्यादन्त्यजादपि ॥ ९ ॥
एकत्रासत्यजं पापं पापं निःशेषमन्यतः ।
द्वयोस्तुलाविधृतयोराद्यमेवातिरिच्यते ॥ १० ॥
पारदारिकदस्यूनामस्ति काचित्प्रतिक्रिया ।
असत्यवादिनः पुंसः प्रतीकारो न विद्यते ॥ ११ ॥

कुर्वन्ति देवा अपि पक्षपातं
नरेश्वराः शासनमुद्वहन्ति ॥

शीतीभवन्ति ज्वलनादयो य-
त्तत् सत्यवाचां फलमामनन्ति ॥ १२ ॥

इति द्वितीयं व्रतम् ॥ ६४ ॥

इदानीं तृतीयमस्तेयव्रतमुच्यते। तत्रापि फलानुपदर्शनेन न स्तेयान्निवर्त्तत इति फलोपदर्शपूर्वं स्तेयनिवृत्तिमाह—

दौर्भाग्यं प्रेष्यतां दास्यमङ्गच्छेदं दरिद्रताम्।
अदत्तात्तफलं ज्ञात्वा स्थूलस्तेयं विवर्जयेत् ॥६५॥

दौर्भाग्यमुद्वेजनीयता, प्रेष्यता परकर्मकरत्वं, दास्यमङ्कपातादिना परायत्तशरीरता, अङ्गच्छेदः करचरणादिच्छेदः, दरिद्रता निर्धनत्वं, एतानीहामुत्र चादत्तादानफलानि शास्त्रतो गुरुमुखाद्वा ज्ञात्वा स्थूलं चौरादिव्यपदेशनिबन्धनं स्तेयं विवर्जयेच्छ्रावकः ॥ ६५ ॥

स्थूलस्तेयपरिहारमेव प्रपञ्चयति—

पतितं विस्मृतं नष्टं स्थितं स्थापितमाहितम्।
अदत्तं नाददीत स्वं परकीयं क्वचित्सुधीः ॥ ६६ ॥

पतितं गच्छतो वाहनादेर्भ्रष्टं, विस्मृतं क्वापि मुक्तमिति स्वामिना यन्न स्मर्यते, नष्टं क्वापि गतमिति स्वामिना यन्न ज्ञायते, स्थितं स्वामिपार्श्वे यदवस्थितं, स्थापितं न्यासीकृतं, आहितं निधीकृतं, तदेवंविधं परकीयं स्वं धनमदत्तं नाददीत क्वचिद्व्यचेनाद्यापद्यपि सुधीः प्राज्ञः ॥ ६६ ॥

इदानीं स्तेयकारिणो निन्दति—

अयं लोकः परलोको धर्मो धैर्यं धृतिर्मतिः ।
मुष्णता परकीयं स्वं मुषितं सर्वमप्यदः ॥ ६७ ॥

परकीयं स्वं धनं मुष्णता अपहरता सर्वमप्यद एतत् स्वं स्वकीयं मुषितं स्वगन्धस्येवाभयव संबन्धात् । किं तदित्याह, अयं लोक अयं प्रत्यक्षेणोपलभ्यमानो लोक इदं जन्मेत्यर्थः, परलोको जन्मान्तरं, धर्मः पुण्यं, धैर्यमापत्स्वप्यवैक्लव्यं, धृतिः स्वास्थ्यं, मतिः कृत्याकृत्यविवेकः ॥ ६७ ॥

अथ हिंसाकारिभ्योऽपि स्तेयकारिणो बहुदोषत्वमाह—

एकस्यैकं क्षणं दुःखं मार्यमाणस्य जायते ।
सपुत्रपौत्रस्य पुनर्यावज्जीवं हृते धने ॥ ६८ ॥

एकस्य नतु बहूनां, एकं क्षणं नतु बहुकालं, दुःखमसातं, मार्यमाणस्य हिंस्यमानस्य, स्तेयकारिणा त्वपहृते धने परस्य सपुत्रपौत्रस्य नत्वेकस्य, यावज्जीवं नत्वेकं क्षणं, दुःखं जायत इति संबन्धः ॥ ६८ ॥

उक्तमपि स्तेयफलं प्रपञ्चेनाह—

चौर्यपापद्रुमस्येह वधबन्धादिकं फलम् ।
जायते परलोके तु फलं नरकवेदना ॥ ६९ ॥

चौर्यात्पापं तदेव द्रुमस्तस्येह लोके फलं वधबन्धादिकं, परलोके तु फलं नरकभाविनी वेदना ॥ ६९ ॥

अथ कदाचित्प्रमादात् स्तेयकारी नृपतिभिर्न निगृह्येत तथाप्यस्वास्थ्यलक्षणमैहिकं फलमवस्थितमेव इत्याह—

दिवसे वा रजन्यां वा स्वप्ने वा जागरेऽपि वा ।
सशल्य इव चौर्येण नैति स्वास्थ्यं नरः क्वचित् ॥७०॥

स्वप्नः स्वापः, जागरो निद्राया अभावः, चौर्येण हेतुना क्वचिदपि स्थाने ॥ ७० ॥

न केवलं स्तेयकर्तुः स्वास्थ्याभाव एव किन्तु बन्धुभिः परित्यागोऽपीत्याह—

मित्रपुत्रकलत्राणि भ्रातरः पितरोऽपि हि ।
संसजन्ति क्षणमपि न म्लेच्छैरिव तस्करैः ॥७१॥

पिता जनकः पितृतुल्याः पितरः पिता च पितरश्च पितरः न संसजन्ति न मिलन्ति पापभयात् ।

यदाहुः—

ब्रह्महत्या सुरापाणं स्तेयं गुर्वङ्गनागमः ।
महान्ति पातकान्याहुस्तत्संसर्गं च पञ्चमम् ॥ १ ॥

राजदण्डभयाद्वा ।

यदाहुः—

चौरश्चौरापको मन्त्री भेदज्ञः काणकक्रयी ।
स्थानदो भक्तदश्चैव चौरः सप्तविधः स्मृतः ॥ १ ॥

तस्करैरिति । तदेव चौर्यं कुर्वन्तीत्येवंशीलास्तस्करास्तैः ॥ ७१ ॥

स्तेयप्रवृत्तानां तन्निवृत्तानां च दोषान् गुणांश्च प्रत्येकं दृष्टान्तद्वारेणाह—

संबन्ध्यपि निगृह्णीत चौर्यान्मण्डिकवन्नृपः ।
चौरोऽपि त्यक्तचौर्य्यः स्यात्स्वर्गभाग्रौहिणेयवत् ॥ ७२ ॥

दृष्टान्तद्वयमपि संप्रदायगम्यं सचायम्—

अलब्धमध्यमम्भोधिरिवाम्भो बहुरत्नभूः ।
अस्तीह पाटलीपुत्रं नाम गौडेषु पत्तनम् ॥ १ ॥
कलाकलापनिलयः साहसस्यैकमन्दिरम् ।
राजपुत्रो मूलदेवस्तत्र मूलं धियामभूत् ॥ २ ॥
स धूर्त्तविद्यैकधवः कृपणानाथबान्धवः ।
कूटचेष्टासु धुरिषु रूपलावण्यमन्मथः ॥ ३ ॥
चोरे चोरः साधौ साधुर्वक्रे वक्र ऋजावृजुः ।
ग्राम्ये ग्राम्यश्छेके छेको विटे विटो भटे भटः ॥ ४ ॥
द्यूतकारे द्यूतकारो वार्त्तिके वार्त्तिकश्च सः ।
तत्काल स्फटिकाश्मेव जग्राह पररूपताम् ॥ ५ ॥
चित्रैः कौतूहलैर्नित्यं लोकं विस्मापयन्नसौ ।
विद्याधर इव स्वैरं चचार चतुराग्रणीः ॥ ६ ॥
धूर्तकल्प[illegible]दीपालि[illegible]मानिलः ।
[illegible] जगाम सः ॥ ७ ॥
[illegible] स भूत्वा कुब्जवामनः ।
[illegible] ॥ ८ ॥

तत्रासीद्रूपलावण्यकलाविज्ञानकौशलैः ।
दत्तत्वया रतेर्देवदत्तेति गणिकोत्तमा ॥ ९ ॥
गुणः कलावतां यो यः प्रकृष्टो तत्र तत्र सा ।
छेकाया रञ्जने तस्याः प्रतिच्छेको न कोऽप्यभूत् ॥ १० ॥
मूलदेवस्ततस्तस्याः चोभार्थं तद्गृहान्तिके ।
प्रभाते गातुमारेभे प्रत्यच इव तुम्बुरुः ॥ ११ ॥
आकर्ण्य देवदत्ताऽपि कोऽप्येष मधुरो ध्वनिः ।
कस्येति विस्मयाद्दास्याऽन्वेषयामास तं बहिः ॥ १२ ॥
शशंसागत्य सा देवि गन्धर्वः कोऽपि गायति ।
मूर्त्यैव वामनः पूर्णैर्गुणैः पुनरवामनः ॥ १३ ॥
देवदत्ता ततः कुब्जां माधवीं नाम चेटिकाम् ।
प्रजिघाय तमाह्वातुं प्रायो वेश्याः कलाप्रियाः ॥ १४ ॥
सा गत्वा तं जगादेदं महाभाग कलानिधे ।
देवदत्ता स्वामिनी मे त्वामाह्वयति गौरवात् ॥ १५ ॥
मूलदेवोऽवदद्गच्छ नागमिष्यामि कुब्जिके ।
कुट्टिनीवश्यवेश्यानां स्ववशो वेश्म को विशेत् ॥ १६ ॥
व्याघुटन्तीं विनोदेच्छुः कलाकौशलयोगतः ।
स आस्फाल्य ऋजूचक्रे तां कुब्जीमब्जनालवत् ॥ १७ ॥
वपुर्नवमिवासाद्य सानन्दा साऽपि चेटिका ।
उपेत्य देवदत्तायै तच्चेष्टितमचीकथत् ॥ १८ ॥
देवदत्तवरेणेव देवदत्ताऽपि तेन ताम् ।
कुब्जामृजूकृतां वीक्ष्य परमं प्राप विस्मयम् ॥ १९ ॥

देवदत्ता ततोऽवादीदीदृक्षमुपकारिणम् ।
निजाङ्गुलिमपि च्छित्त्वा तमेकच्छेकमानय ॥ २० ॥
ततो गत्वा समभ्यर्थ्य चाटुभिश्चतुरोचितैः ।
अचालि वेश्माभिमुखं धूर्त्तराजो भुजिष्यया ॥ २१ ॥
तया निर्दिश्यमानाध्वा प्रविवेश निवेशनम् ।
ततोऽसौ देवदत्ताया राधाया इव माधवः ॥ २२ ॥
तं वामनमपि प्रेक्ष्य कान्तिलावण्यशालिनम् ।
सा मन्वाना सुरं छन्नमुपावेशयदासने ॥ २३ ॥
मिथो हृदयसंवादिसंलापसुभगा ततः ।
तयोः प्रववृते गोष्ठी तुल्यवैदग्ध्यशालिनोः ॥ २४ ॥
अथाऽऽगात्तत्र कोऽप्येको वीणाकारः प्रवीणधीः ।
वीणामवीवदत्तेन देवदत्ताऽतिकौतुकात् ॥ २५ ॥
वल्लकीं वादयन्तं च व्यक्तग्रामश्रुतिस्वराम् ।
धूनयन्ती शिरो देवदत्ताऽपि प्रशशंस तम् ॥ २६ ॥
स्मित्वाऽवदन्मूलदेवोऽप्यहो उज्जयिनीजनः ।
[illegible]निपुणो गुणागुणविवेचनम् ॥ २७ ॥
[illegible] ।
[illegible] ॥ २८ ॥
[illegible] ।
[illegible] ॥ २९ ॥
[illegible] ।
[illegible] ॥ ३० ॥

समारचय्य तां वीणां ततः स्वयमवादयत् ।
श्रोतृकर्णेषु पीयूषच्छटामिव परिक्षिपन् ॥ ३१ ॥
देवदत्ताऽब्रवीन्नैव सामान्यस्त्वं कलानिधे ।
नररूपं प्रपेदाना साक्षादसि सरस्वती ॥ ३२ ॥
वीणाकारश्चरणयोः प्रणिपत्येत्यवोचत ।
स्वामिन् शिक्षे भवत्पार्श्वे वीणावाद्यं प्रसीद मे ॥ ३३ ॥
मूलदेवो जगादैवं सम्यग् जानामि नह्यहम् ।
किन्तु जानामि तान् ये हि सम्यग् जानन्ति वल्लकीम् ॥३४॥
के नाम ते क्व सन्तीति पृष्टोऽसौ देवदत्तया ।
अवोचदस्ति पूर्वस्यां पाटलीपुत्रपत्तनम् ॥ ३५ ॥
तस्मिन् विक्रमसेनोऽस्ति कलाचार्यो महागुणः ।
मूलदेवोऽहं च तस्य सदाप्यासन्नसेवकः ॥ ३६ ॥
अत्रान्तरे विश्वभूतिर्नाट्याचार्यः समागतः ।
साक्षाद्भरत इत्यस्मै कथितो देवदत्तया ॥ ३७ ॥
मूलदेवोऽप्येवमूचे सत्यमेवायमीदृशः ।
आश्रिताभिः कलां युष्मादृशीभिरपि लभ्यते ॥ ३८ ॥
विश्वभूतिरुपक्रान्ते विचारे भारते ततः ।
तं खर्वं इत्यवाज्ञासीद्वाह्यार्थज्ञा हि तादृशाः ॥ ३९ ॥
मेने च धूर्त्तराजेन विद्वन्मान्ययमस्य तत् ।
ताम्रस्वर्णालङ्करणस्येवान्तर्दर्शयाम्यहम् ॥ ४० ॥
स्वच्छन्दं भरते तस्य गल्भमानस्य धूर्त्तराट् ।
पूर्वापरविरोधाख्यं व्याख्याने दोषमग्रहीत् ॥ ४१ ॥

विश्वभूतिस्ततः कोपादसंबद्धमभाषत ।
प्राज्ञैः पृष्टा ह्युपाध्यायाश्छादयन्त्यज्ञतां रुषा ॥ ४२ ॥
त्वमेवं ¹नाटयेर्नाट्याचार्य नारीषु नान्यतः ।
हसितो मूलदेवेन तूष्णीकः सोऽप्यजायत ॥ ४३ ॥
स्मेराक्षी देवदत्ताऽपि पश्यन्ती वामनं मुदा ।
उपाध्यायस्य वैलक्ष्यमपनेतुमवोचत ॥ ४४ ॥
इदानीमुत्सुका यूयमुपाध्यायाः क्षणान्तरे ।
परिभाव्याभिधातव्यं प्रश्ने विज्ञानशालिनाम् ॥ ४५ ॥
देवदत्ते वयं यामो नाद्यास्यावसरोऽधुना ।
सज्जस्त्वं त्वमपीत्युक्त्वा विश्वभूतिस्ततो ययौ ॥ ४६ ॥
देवदत्ताऽप्यथादिक्षदावयोः स्नानहेतवे ।
अङ्गमर्दो ²निर्विमर्दं कश्चिदाहूयतामिति ॥ ४७ ॥
अजल्पद्धूर्तराजोऽपि व्याहार्यभिज्ञोऽङ्गमर्दकम् ।
सुभ्रू यद्यनुजानासि तवाभ्यङ्गं करोमि तत् ॥ ४८ ॥
किमेतदपि वेत्सीति तयोक्तः प्रत्युवाच सः ।
न जानामि स्थितः किन्तु तज्ज्ञानामहमन्तिके ॥ ४९ ॥
आदेशाद्देवदत्तायाः पक्वतैलान्यथाययुः ।
अभ्यङ्गं कर्तुमारेभे स मायावामनस्ततः ॥ ५० ॥
मृदुमध्यदृढं स्थानौचित्यात् पाणिं प्रसारयन् ।
अङ्गे तस्या मूलदेवः सुखमर्दनमादधे ॥ ५१ ॥

(१) प च ड आदये- ।
(२) च निर्विमर्दं ।

सर्वार्थेषु कलादाक्ष्यमीदृग्नान्यस्य कस्यचित् ।
न सामान्योऽयमित्यङ्घ्रोः पतित्वा साऽब्रवीदि
गुणैरपि त्वमाख्यातः कोऽप्युत्कृष्टः पुमानिति ।
मयूरध्वंसकात्मानं किं गोपयसि मायया ॥ ५३
प्रसीद दर्शयात्मानं किं मोहयसि मां मुहुः ।
भक्तानामुपरोधेन साक्षात्स्युर्देवता अपि ॥ ५४ ।
आकृष्य गुलिकामास्याद् रूपं तत्परिवर्त्य सः ।
प्रतिपेदे निजं रूपं शैलूष इव तत्क्षणात् ॥ ५५
अनङ्गमिव जाताङ्गं तं लावण्यैकसागरम् ।
उद्वीक्ष्य विस्मिता सोचे प्रसादः साधु मे कृतः ॥
तस्यार्पयित्वा स्नानीयं 'पोतं प्रीता स्वपाणिना
अङ्गाभ्यङ्गं व्यरचयद्देवदत्ताऽनुरागिणी ॥ ५७ ॥
खलिप्रक्षालनापूर्वं पिष्टातकसुगन्धिभिः ।
कवोष्णवारिधाराभिस्ततो द्वावपि सस्नतुः ॥ ५
देवदूष्ये देवदत्तोपनीते पर्यधत्त सः ।
सुगन्ध्याढ्यानि भोज्यानि बुभुजाते समं च तौ ।
रहःकलारहस्यानि वयस्यीभूतयोस्तयोः ।
मिथः कथयतोरेकः क्षणः सुखमयो ययौ ॥ ६
ततः सा व्याजहारेवं हृतं मे हृदयं त्वया ।
गुणैर्लोकोत्तरैर्नाथ प्रार्थयेऽहं तथाऽप्यदः ॥ ६१

[illegible] मम सुन्दर ।
[illegible] निजमभिजनं [illegible] ॥ ६२ ॥
मूलदेवोऽप्युवाचेति [illegible] विदग्धिणि ।
यस्माद्‌गुण[illegible] न युज्यते ॥ ६३ ॥
गुणानां पक्षपातेनानुरागो निर्धनेऽपि चेत् ।
वेश्यानामधनेना[illegible] मोदितं तदाऽखिलम् ॥ ६४ ॥
बभाषे देवदत्ताऽपि को विदेशो महात्मनाम् ।
सर्वः स्वदेशो गुणिनां नृणां [illegible] ॥ ६५ ॥
आत्मानमर्थयन्त्यर्थैर्मूर्खा हि धनिनश्च नः ।
प्रवेशं न लभन्तेऽन्तर्विना त्वां गुणमन्दिर ॥ ६६ ॥
सर्वथा प्रतिपत्तव्यं त्वया सुभग मद्वचः ।
इत्युक्ते मूलदेवेनाप्यामिति जगदे वचः ॥ ६७ ॥
ततश्च क्रीडतोः स्नेहाद्विनोदैर्विविधैस्तयोः ।
राजद्वाःस्थोऽब्रवीदेत्यागच्छ प्रेक्षाक्षणोऽधुना ॥ ६८ ॥
छन्नवेषं मूलदेवं सा नीत्वा राजवेश्मनि ।
राज्ञोऽग्रे नृत्यमारेभे रम्भेव करणोज्ज्वलम् ॥ ६९ ॥
शक्रपाटहिकसमः पाटप्रकटने पटुः ।
मूलदेवोऽपि निपुणोऽवादयत्पटहं ततः ॥ ७० ॥
राजाऽरज्यत नृत्तेन तस्याः करणशालिना ।
प्रसादं मार्गयेत्यूचे तं च न्यासीचकार सा ॥ ७१ ॥
सा मूलदेवसहिता जगौ चानु ननर्त्त च ।
ददौ चास्यै नृपस्तुष्टः स्वाङ्गलग्नं विभूषणम् ॥ ७२ ॥

पाटलीपुत्रराजस्य राजदौवारिकस्ततः।
हृष्टो विमलसिंहाख्य इत्युवाच महीपतिम्॥ ७३॥
अयं हि पाटलीपुत्रे मूलदेवस्य धीमतः।
कलाप्रकर्षोऽमुष्या वा न तृतीयस्य कस्यचित्॥ ७४॥
ततः प्रदीयतां देव मूलदेवादनन्तरम्।
विज्ञानिषु च पट्टोऽस्मै पताका नर्त्तकीषु च॥ ७५॥
ततो राज्ञा तथा दत्ते साऽब्रवीदेष मे गुरुः।
ततः प्रसादमादास्ये स्वामिन्नस्याभ्यनुज्ञया॥ ७६॥
राजाऽप्यवोचत्तदियं महाभागानुमन्यताम्।
धूर्त्तोऽप्यवादीद्यद्देव आज्ञापयति तत्कुरु॥ ७७॥
अत्रान्तरे धूर्त्तराजो वीणां स्वयमवादयत्।
हरन्मनांसि विश्वेषां विश्वावसुरिवापरः॥ ७८॥
ततो विमलसिंहेन बभाषे देव खल्वयम्।
मूलदेवश्छन्नरूपो नापरस्येदृशी कला॥ ७९॥
विज्ञानातिशयस्यास्य प्रयोक्ता नापरः क्वचित्।
मूलदेवं विना देव सर्वथाऽसौ स एव तत्॥ ८०॥
राजा जगाद यद्येवं तदात्मा स्वं प्रदर्शय।
दर्शने मूलदेवस्य रत्नस्येवास्मि कौतुकी॥ ८१॥
गुलिकां मूलदेवोऽपि मुखादाकृष्य तत्क्षणात्।
व्यक्तोऽभूत्कान्तिमान्मेघनिर्मुक्त इव चन्द्रमाः॥ ८२॥
साधु ज्ञातोऽसि विज्ञानिन्निति सप्रेमभाषिणा।
ततो विमलसिंहेन धूर्त्तसिंहः स सस्वजे॥ ८३॥

'अपतन्मूलदेवोऽपि नृदेवस्य पदाब्जयोः ।
राजाऽपि तं प्रसादेन सगौरवमपूजयत् ॥ ८४ ॥
एवं च देवदत्ताऽपि तस्मिन्नत्यनुरागिणी ।
पुरूरवस्युर्वशीवान्वभूद्विषयजं सुखम् ॥ ८५ ॥
अतिष्ठन्मूलदेवोऽपि न विना द्यूतदेवनम् ।
भवितव्यं हि केनापि दोषेण गुणिनामपि ॥ ८६ ॥
ययाचे देवदत्ताऽपि धिग् द्यूतं त्यज्यतामिति ।
नात्यजन्मूलदेवस्तत्प्रकृतिः खलु दुस्त्यजा ॥ ८७ ॥
तस्यां नगर्यामासीच्च धनेन धनदोपमः ।
सार्थवाहोऽचलो नाम मूर्त्याऽपर इव स्मरः ॥ ८८ ॥
आसक्तो देवदत्तायां मूलदेवाग्रतोऽपि सः ।
कृतस्वीकरणो भार्या बुभुजे तां निरन्तरम् ॥ ८९ ॥
ईर्ष्यां स मूलदेवाय महतीं वहति स्म च ।
अन्विष्यति स्म तच्छिद्राण्युपद्रवचिकीर्षया ॥ ९० ॥
तच्छङ्कया मूलदेवोऽप्यगात्तद्वेश्मनि च्छलात् ।
पारवश्येऽप्यविच्छिन्नो रागः प्रायेण रागिणाम् ॥ ९१ ॥
देवदत्तां जनन्यूचे धूर्ततामृगधूर्त्तकम् ।
निर्धनं द्यूतकारं च मूलदेवं सुते त्यज ॥ ९२ ॥
प्रत्यहं विविधं द्रव्यं यच्छत्यस्मिन् रमस्व तत् ।
अचले निश्चलरतौ रक्तेव धनदात्मजे ॥ ९३ ॥

(१) ख व्यपतन् ।

देवदत्ता प्रत्युवाच मातरेकान्ततो ह्यहम् ।
धनानुरागिणी नास्मि किं त्वस्मि गुणरागिणी ॥ ९४ ॥
अमुष्य द्यूतकारस्य गुणास्तिष्ठन्ति कीदृशाः ।
इति कोपाज्जनन्योक्ता देवदत्तेत्यभाषत ॥ ९५ ॥
धीरो वदान्यो विद्याविद्गुणरागी स्वयं गुणी ।
विशेषज्ञः शरण्योऽयं नामुं त्यक्ष्यामि तत् खलु ॥ ९६ ॥
ततश्च कुट्टिनी रुष्टा कूटजुष्टा प्रचक्रमे ।
उच्चाटयितुं तनयां स्वैरिणी वैरिणीमिव ॥ ९७ ॥
साऽदात्तयाऽर्थिते माल्ये निर्माल्यं शरके पयः ।
इक्षुखण्डे वंशखण्डं श्रीखण्डे नीपखण्डलम् ॥ ९८ ॥
सकोपं देवदत्तोक्ता कुट्टिनी कुटिलाऽब्रवीत् ।
मा कुपः पुत्रि यादृक्षो यचस्तादृश्यवलिः किल ॥ ९९ ॥
लतेव कण्टकितरुं किमालम्ब्य स्थितास्यमुम् ।
सर्वथा मूलदेवं तत्त्यजापात्रमिमं पतिम् ॥ १०० ॥
अवादीद्देवदत्तैवं मातः किमिति मुह्यसि ।
पुमान् पात्रमपात्रं वा किमुच्येतापरीक्षितः ॥ १ ॥
परीक्षा क्रियतां तर्हीत्युक्ता साक्षेपमम्बया ।
मुदिता देवदत्तैवमादिदेश स्वचेटिकाम् ॥ २ ॥
यदिक्षौ देवदत्ताया अभिलाषोऽद्य विद्यते ।
प्रेष्यन्तामिक्षवः सार्थवाहाचल ततस्त्वया ॥ ३ ॥
तयोक्तः सार्थवाहोऽपि धन्यमानी प्रमोदतः ।
शकटानीक्षुपूर्णानि प्रेषयामास तत्क्षणात् ॥ ४ ॥

दृष्ट्वा कुट्टिन्युवाचैवमचलस्वामिनो हले ।
अचिन्तनीयमौदार्यं पश्य चिन्तामणेरिव ॥ ५ ॥
विषण्णा देवदत्तोचे किमम्बाऽस्मि करेणुका ।
भक्षणायेक्षवः क्षिप्ता यत्समूलदलाग्रकाः ॥ ६ ॥
आदिश्यतां मूलदेवोऽप्यस्मिन्नर्थे भुजिष्यया ।
विवेके ज्ञायते मातर्द्वयोरपि यथाऽन्तरम् ॥ ७ ॥
मूलदेवोऽपि चेट्योक्त इक्षूनादाय पञ्चषान् ।
मूलाग्राणि त्यजन्मङ्क्षु निस्तक्ष विचक्षणः ॥ ८ ॥
कठोरत्वेन दुश्चर्वपर्वग्रन्थीन् परित्यजन् ।
द्व्यङ्गुला गण्डिकाश्चक्रे पीयूषस्येव कुण्डिकाः ॥ ९ ॥
चतुर्जातेन संस्कृत्य कर्पूरेणाधिवास्य च ।
शूलप्रोता वर्द्धमानसंपुटे प्राहिणोत्स ताः ॥ १० ॥
देवदत्ताऽपि ताः प्रेक्ष्य बभाषे शम्भलीमिति ।
धूर्त्तेशाचलयोः पश्य स्वर्णरीर्योरिवान्तरम् ॥ ११ ॥
कुट्टिन्यचिन्तयदहो महामोहान्धमानसा ।
मृगीव मृगतृष्णाम्भो धूर्त्तमेषाऽनुधावति ॥ १२ ॥
स कोऽप्युपायः क्रियते येन निष्कास्यते पुरात् ।
अत्युष्णजलसेकेन बिलादिव महोरगः ॥ १३ ॥
कुट्टिनी मूलदेवस्योच्चाटनायाचलं जगौ ।
कर्त्तव्यः कृत्रिमो ग्रामगमनोपक्रमस्त्वया ॥ १४ ॥
ग्रामं यास्यामीत्यलीकं सार्थवाह त्वमञ्जसा ।
कथयेर्देवदत्ताया विश्रब्धा सा यथा भवेत् ॥ १५ ॥

ततो ग्रामान्तरगतं श्रुत्वा त्वां धूर्त्तपांसनः ।
निःशङ्कं देवदत्तायाः स समीपमुपैष्यति ॥ १६ ॥
देवदत्तान्तिके मूलदेवे दीव्यति निर्भरम् ।
आगच्छेः सर्वसामग्रा मलक्वेतेन सुन्दर ॥ १७ ॥
ततस्तथा कथमपि त्वमेतमवमानयेः ।
यथैतां न भजेद्भूयस्तित्तिरीमिव तित्तिरः ॥ १८ ॥
तत्तथा प्रतिपद्याथ यास्यामि ग्राममित्यसौ ।
आख्याय देवदत्ताया द्रव्यं दत्त्वा च निर्ययौ ॥ १९ ॥
ततस्तया निरातङ्कं मूलदेवे प्रवेशिते ।
आह्वास्त कुट्टिन्यचलं कुट्टाकभटवेष्टितम् ॥ २० ॥
देवदत्ता च सहसा प्रविशन्तं ददर्श तम् ।
मूलदेवं च खट्वाऽधो न्यधात्पतत्करण्डवत् ॥ २१ ॥
तथास्थितं मूलदेवं कुट्टिन्या ज्ञापितोऽचलः ।
पर्यङ्के कृतपर्यङ्को निषसाद स्मिताननः ॥ २२ ॥
अवोचदचलस्तत्र कुर्वन् कैतवनाटितम् ।
देवदत्ते वयं श्रान्ताः स्नास्यामः प्रगुणीभव ॥ २३ ॥
देवदत्ताऽब्रवीदेवं विलक्षवितथस्मिता ।
स्नानयोग्यासने तर्हि स्नातुं पादोऽवधार्यताम् ॥ २४ ॥
एवमुत्थाप्यमानोऽपि सादरं देवदत्तया ।
विशेषतोऽभूत् खट्वायामचलो निश्चलासनः ॥ २५ ॥
शशाक धूर्त्तराजोऽपि स्यातुं गन्तुं च नो तदा ।
प्रायेण विगलन्त्येवास्वस्थे मनसि शक्तयः ॥ २६ ॥

अवोचदचलो देवदत्ते स्वप्नो मयेक्षितः ।
पर्यङ्केऽस्मिन् कृताभ्यङ्गः सचेलस्नातवानहम् ॥ २७ ॥
स्वप्नं सत्यापयिष्यामि तदर्थमहमागमम् ।
सत्यीकृतो ह्ययं स्वप्नः शुभोदर्काय जायते ॥ २८ ॥
कुट्टिन्यवोचदादेशः प्रमाणं जीवितेशितुः ।
पुत्रि किं न श्रुतं स्वामी यदिच्छति करोति तत् ॥ २९ ॥
देवदत्ताऽब्रवीदार्ये किमेतदुचितं तव ।
अदूष्यदेवदूष्येयं तूलिका यद्विनश्यति ॥ ३० ॥
अचलोऽप्यवदद्भद्रे कार्पण्यं किमिदं तव ।
शरीरमपि यच्छन्ति पत्यर्थे त्वादृशः स्त्रियः ॥ ३१ ॥
किं तेऽन्यास्तूलिका न स्युः पतिर्यस्याः किलाचलः ।
लवणेन स किं सीदेद्यस्य रत्नाकरः सखा ॥ ३२ ॥
ततो भाटीविवशया कारितो देवदत्तया ।
अभ्यङ्गोद्वर्त्तनादीनि पर्यङ्कस्थित एव सः ॥ ३३ ॥
स्नप्यमाने ततस्तस्मिन्नीशे खलिजलादिना ।
मूलदेवश्शश इव श्रियते स्म समन्ततः ॥ ३४ ॥
आजुहावाचलभटान् कुट्टिनी दृष्टिसंज्ञया ।
निदिदेशाचलं चाशु धूर्त्ताकर्षणकर्मणे ॥ ३५ ॥
कोपाटोपसमाविष्टो मूलदेवं ततोऽचलः ।
कर्षं धृत्वा केशेषु द्रौपदीमिव कौरवः ॥ ३६ ॥
चोवाच नयज्ञोऽसि विद्वानसि सुधीरसि ।
गोऽस्यानुरूपोऽद्य ब्रूहि कस्तेऽस्तु निग्रहः ॥ ३७ ॥

धनाधीनशरीरेयं वेश्या तां चेद्रिरंससि ।
ग्रामपट्टकवद्भूरिधनेन न किमग्रहीः ॥ ३८ ॥
मूलदेवोऽपि निष्पन्दस्तदा मुकुलितेक्षणः ।
विफलीभूतफालस्योदुवाह द्वीपिनस्तुलाम् ॥ ३९ ॥
एवं च चिन्तयामास सार्थवाहपतिस्ततः ।
न निग्राह्यो महात्माऽसौ दैवादेवं दशां गतः ॥ ४० ॥
इति चोवाच मुक्तोऽद्य त्वमस्मादागसो मया ।
कृतघ्नोऽस्युपकर्त्तव्यं त्वयाऽपि समये मम ॥ ४१ ॥
मुक्तोऽथ तेन धूर्त्तेशो वेश्मतो निर्ययौ ततः ।
तूर्णं तूर्णं परिक्रामन् रणाद्भग्न इव द्विपः ॥ ४२ ॥
गत्वा पुरीपरिसरे सस्नौ सरसि विस्तृते ।
शरत्काल इव भेजे तत्क्षणात् क्षालिताम्बरः ॥ ४३ ॥
अचलस्यापकर्तुं चोपकर्त्तुं च स धूर्त्तराट् ।
मनोरथरथारूढोऽचलद्वेणातटं प्रति ॥ ४४ ॥
द्वादशयोजनायामां सः श्वापदकुलाकुलाम् ।
दुर्दशायाः प्रियसखीमिव प्राप महाटवीम् ॥ ४५ ॥
पारावारमिवापारां तितीर्षुस्तां महाटवीम् ।
सहायं चिन्तयामास तरण्डमिव धूर्त्तराट् ॥ ४६ ॥
कस्मादप्यागतोऽकस्मादभ्रादिव परिच्युतः ।
शम्बलस्थगिकां बिभ्रत्कोऽपि टक्को द्विजस्तदा ॥ ४७ ॥
असहायः सहायोयं तं विप्रं क्षिप्रमागतम् ।
वृद्धो यष्टिमिव प्राप्य मूलदेवो मुदं ययौ ॥ ४८ ॥

अवोचदचलो देवदत्ते स्वप्नो मयेक्षितः ।
पर्यङ्केऽस्मिन् कृताभ्यङ्गः सचेलस्नातवानहम् ॥ २७ ॥
स्वप्नं सत्यापयिष्यामि तदर्थमहमागमम् ।
सत्यीकृतो ह्ययं स्वप्नः शुभोदर्काय जायते ॥ २८ ॥
कुट्टिन्यवोचदादेशः प्रमाणं जीवितेशितुः ।
पुत्रि किं न श्रुतं स्वामी यदिच्छति करोति तत् ॥ २९ ॥
देवदत्ताऽब्रवीदार्ये किमेतदुचितं तव ।
अदूष्यदेवदूष्येयं तूलिका यद्विनश्यति ॥ ३० ॥
अचलोऽप्यवदद्भद्रे कार्पण्यं किमिदं तव ।
शरीरमपि यच्छन्ति पत्यर्थं त्वादृशः स्त्रियः ॥ ३१ ॥
किं तेऽन्यास्तूलिका न स्युः पतिर्यस्याः किलाचलः ।
लवणेन स किं सीदेद्यस्य रत्नाकरः सखा ॥ ३२ ॥
ततो भाटीविवशया कारितो देवदत्तया ।
अभ्यङ्गोद्वर्त्तनादीनि पर्यङ्कस्थित एव सः ॥ ३३ ॥
स्नप्यमाने ततस्तस्मिन्नीरैः खलिजलादिना ।
मूलदेवस्त्वगड इव भ्रियते स्म समन्ततः ॥ ३४ ॥
आजुहावाचलभटान् कुट्टिनी दृष्टिसंज्ञया ।
निर्दिदेशाचलं चाशु धूर्त्ताकर्षणकर्मणि ॥ ३५ ॥
कोपाटोपसमाविष्टो मूलदेवं ततोऽचलः ।
चकर्ष धृत्वा केशेषु द्रौपदीमिव कौरवः ॥ ३६ ॥
तं चोवाच [illegible] विद्वानसि सुधीरसि ।
[illegible] निग्रहः ॥ ३७ ॥

धनाधीनशरीरेयं वेश्या तां वेद्भि ...
ग्रामपट्टकवद्भूरिधनेन न किमधुना ...
मूलदेवोऽपि निष्पन्दस्तदा ...
विफलीभूतफालस्योद्‌वाह ...
एवं च चिन्तयामास सार्थवाह ...
न निग्राह्यो महात्माऽसौ देवादेव ...
इति चोवाच मुक्तोऽद्य त्वमस्मादा ...
कृतघ्नोऽस्युपकर्त्तव्यं त्वयाऽपि ...
मुक्तोऽथ तेन धूर्त्तेशो वेशतो ...
तूर्णं तूर्णं परिक्रामन् ...
गत्वा पुरीपरिसरे मग्नो ...
शरत्काल इव भेजे तत् ...
अचलस्यापकर्त्तुं चोपकर्त्तुं ...
मनोरथरथारूढोऽचल ...
द्वादशयोजनायामां स: ...
दुर्दशायाः प्रियसर्वान्...
पारावारमिवापारां ...
सहायं चिन्तयामास ...
कस्मादप्यागतोऽक ...
शम्बलस्थगिकां ... ॥
असहायः सहा ...
वृद्धो यष्टिमिव ...

जगाद मूलदेवस्तं ममारण्ये प्रवेतुषः ।
आत्मच्छायाद्वितीयस्य दिष्ट्या मिलितवानसि ॥ ४९ ॥
स्वच्छन्दं वार्त्तयिष्यावस्तदावां द्विजसत्तम ।
मार्गखेदापहरणी विद्या वार्त्ता हि या पथि ॥ ५० ॥
दूरे कियति गन्तव्यं स्थाने जिगमिषा क्व ते ।
कथ्यतां भो महाभाग मार्गमैत्रीं वशे कुरु ॥ ५१ ॥
विप्रोऽप्याख्यद्गमिष्यामि पारेऽरण्यमिव स्थितम् ।
स्थानं वीरनिधानाख्यं ब्रूहि त्वं कुत्र यास्यसि ॥ ५२ ॥
मूलदेवोऽब्रवीद्यास्याम्यहं वेणातटे पुरे ।
विप्रोऽप्यूचे तदेहि त्वमेकोऽध्वा दूरमावयोः ॥ ५३ ॥
ललाटन्तपतपने मध्याह्नेऽथ समागते ।
मिलिताभ्यां च गच्छद्भ्यां ताभ्यां प्रापि महासरः ॥ ५४ ॥
पाणिपादमुखं मूलदेवः प्रक्षाल्य वारिणा ।
निरन्तरतरुच्छाये भूतले समुपाविशत् ॥ ५५ ॥
स्थगिकायाः समाकृष्य सक्तूनालोड्य वारिणा ।
एकोऽपि भोक्तुमारेभे टक्को रङ्क इव द्रुतम् ॥ ५६ ॥
धूर्त्तोऽप्यचिन्तयदसौ नाऽऽदौ मे भोजनं ददौ ।
अतिक्षुधाऽऽतुरो भुङ्क्ते भुक्तः सन् खलु दास्यति ॥ ५७ ॥
भुक्त्वा तत्रोत्थिते विप्रे बध्नाति स्थगिकामुखम् ।
दध्यौ धूर्त्तोऽपि यद्यद्य नादात्तच्छ्वः प्रदास्यति ॥ ५८ ॥
तस्मिन्नदत्त्वा भुञ्जाने मूलदेवस्तदाशया ।
वीन्चासरानगमयत्तृणामाशा हि जीवितम् ॥ ५९ ॥

अटवीं तां परित्यज्य धूर्त्तराजं द्विजोऽवदत्।
स्वस्ति तुभ्यं महाभाग यास्याम्यहमितोऽधुना॥ ६०॥
तमूचे मूलदेवोऽपि त्वत्माहाय्यादियं मया।
द्वादशयोजनायामा क्लेशवल्लङ्घिताऽटवी॥ ६१॥
वेणातटे गमिष्यामि मूलदेवाभिधोऽस्म्यहम्।
तत्र मे कथये: कार्यं कथ्यतां किं च नाम ते॥ ६२॥
लोकैर्निर्घृणशर्मेति विहितापरनामकः।
विप्रोऽहं सद्दडो नामेत्युक्त्वा टकस्ततो ययौ॥ ६३॥
गच्छता मूलदेवेन ततो वेणातटं प्रति।
दृष्टः संवसथः कश्चिद्वसदावसथः पथि॥ ६४॥
प्रविष्टस्तत्र भिक्षार्थं क्षामकुक्षिर्बुभुक्षया।
भ्रमन्नासादयामास कुल्माषान् कुत्रचिद्गृहे॥ ६५॥
ग्रामान्निष्क्रामतस्तस्याभिमुखः कोऽप्यभून्मुनिः।
मासक्षपणपुण्यात्मा पुण्यपुञ्ज इवाङ्गवान्॥ ६६॥
तं दृष्ट्वा मुदितः सोऽभूदहो मे सुकृतोदयः।
यन्मयासमिदं पात्रं यानपात्रं भवोदधौ॥ ६७॥
साधोः कुल्माषदानेन रत्नत्रितयशालिनः।
उन्मीलतु चिराद्य मद्विवेकतरोः फलम्॥ ६८॥
कुल्माषान् साधवे दत्त्वा मूलदेवः पपाठ च।
धन्यास्ते खलु येषां स्युः कुल्माषाः साधुपारणे॥ ६९॥
तस्य भावनया हृष्टा बभाषे व्योम्नि देवता।
अर्द्धश्लोकेन याचस्व भद्र किं ते प्रदीयताम्॥ ७०॥

प्रार्थयामास सच्चस्तां मूलदेवोऽपि देवताम् ।
गणिकादेवदत्तेभमहस्रं राज्यमस्तु मे ॥ ७१ ॥
एवमस्त्विति देव्यूचे मूलदेवोऽपि तं मुनिम् ।
वन्दित्वाऽथ ग्राममध्ये भित्त्वा बुभुजे स्वयम् ॥ ७२ ॥
मार्गं क्रामन् क्रमेणासौ प्राप वेणातटं पुरम् ।
सुष्वाप पान्थशालायां निद्रासुखमवाप च ॥ ७३ ॥
यामिन्याः पश्चिमे यामे स सुप्तः स्वप्नमैचत ।
यत्पूर्णमण्डलश्चन्द्रः प्रविवेश मुखे मम ॥ ७४ ॥
तमेव स्वप्नमद्राचीत्कोऽपि कार्पटिकस्तदा ।
अन्यकार्पटिकानां च प्रबुद्धस्तमचीकथत् ॥ ७५ ॥
तेषु कार्पटिकेष्वेकः स्वप्नमेवं व्यचारयत् ।
अचिरेण लप्स्यसे त्वं सखण्डघृतमण्डकम् ॥ ७६ ॥
हृष्टः कार्पटिकः सोऽभूदेवं भूयादिति ब्रुवन् ।
जायेत बदरेणापि शृगालस्य महोत्सवः ॥ ७७ ॥
स्वप्नं नाचीकथत्तेषामज्ञानां धूर्त्तराट् निजम् ।
मूर्खा हि दर्शिते रत्ने दृषत्खण्डं प्रचक्षते ॥ ७८ ॥
मण्डकं कर्पटिः प्राप गृहाच्छादनपर्वणि ।
प्रायेण फलति स्वप्नो विचारस्यानुसारतः ॥ ७९ ॥
धूर्त्तोऽपि प्रातरारामे गत्वा पुष्पोच्चयादिना ।
अप्रीणान्मालिकं लोकंपृणं कर्मापि तादृशम् ॥ ८० ॥
गृहीत्वा मालिकात्तस्मात्स पुष्पाणि फलानि च ।
शुचिर्भूत्वा ययौ वेश्म स्वप्नशास्त्रविपश्चितः ॥ ८१ ॥

मूलदेवस्ततो नत्वा दत्त्वा पुष्पफलानि च ।
उपाध्यायाय तज्ज्ञाय शशंस स्वप्नमात्मनः ॥ ८२ ॥
मुदितः सोऽवदद्विद्वान्वत्स स्वप्नफलं तव ।
सुमुहूर्त्ते कथयिष्याम्यद्यास्माकं भवातिथिः ॥ ८३ ॥
मूलदेवं स्नपयित्वा भोजयित्वा च गौरवात् ।
परिणाययितुं कन्यामुपाध्याय उपानयत् ॥ ८४ ॥
बभाषे मूलदेवोऽपि ताताऽज्ञातकुलस्य मे ।
कन्यां प्रदास्यसि कथं विचारयसि किं नहि ॥ ८५
उपाध्यायोऽप्युवाचैवं त्वन्मूर्त्याऽपि कुलं गुणाः ।
ज्ञातास्तत्सर्वथा कन्या ममेयं परिणीयताम् ॥ ८६ ॥
तद्वाचा मूलदेवोऽपि कन्यकां तामुपायत ।
कार्यसिद्धेर्भविष्यन्त्याः प्रादुर्भूतमिवाननम् ॥ ८७ ॥
मध्ये दिनानां सप्तानां त्वं राजेह भविष्यसि ।
इति तस्य स्वप्नफलमुपाध्यायो न्यवेदयत् ॥ ८८ ॥
हृष्टस्तत्र वसन् धूर्त्तराजो गत्वा बहिः पुरात् ।
सुष्वाप चम्पकतले संप्राप्ते पञ्चमेऽहनि ॥ ८९ ॥
तदा च नगरे तस्मिन्नयेतनमहीपतिः ।
अपुत्रो निधनं प्राप निष्पाद इव पादपः ॥ ९० ॥
मन्त्रोच्चिताः पुरीभाश्वच्छत्रभृङ्गारचामराः ।
भ्रेमुः प्रापुर्न राज्यार्हं दुष्प्रापस्तादृशो जनः ॥ ९१ ॥
ततो बहिः पर्यटन्तो निकषा चम्पकद्रुमम् ।
अपश्यन्मूलदेवं ते नरदेवपदोचितम् ॥ ९२ ॥
हयेन हेषितं चक्रे गजेनोर्जितगर्जितम् ।

भृङ्गारेण च तस्याऽर्घश्चामराभ्यां च वीजनम् ॥ ९३ ॥
पुण्डरीकं स्वर्णदण्डमण्डितं तस्य चोपरि ।
शरदभ्रमिवादभ्रतडिद्दण्डमजृम्भत ॥ ९४ ॥
तं चाधिरोहयामास स्वस्कन्धे जयकुञ्जरः ।
स्वाम्याप्तिमुदितैर्लोकैश्चक्रे जयजयारवः ॥ ९५ ॥
पुरं महातूर्यरवैः पूर्यमाणदिगन्तरम् ।
तत्राविशन्मूलदेवो राजराज इवालकाम् ॥ ९६ ॥
उत्तीर्णो राजहर्म्येऽसौ सिंहासनमधिष्ठितः ।
समन्ततः समायातैः सामन्तैरभ्यषिच्यत ॥ ९७ ॥
अथोचे देवता व्योम्नि देवतानां प्रसादतः ।
अयं विक्रमराजाख्यो राजा जज्ञे कलानिधिः ॥ ९८ ॥
वर्त्तिष्यन्ते न येऽमुष्य शासने क्षितिशासितुः ।
तानहं निग्रहीष्यामि महीभृत इवाशनिः ॥ ९९ ॥
तद्‌गिरा विस्मितं भीतं सर्वं प्रकृतिमण्डलम् ।
यतेरिवेन्द्रियग्रामः सदा तस्य वशेऽभवत् ॥ २०० ॥
ततः स राजा विषयसुखान्यनुभवन् व्यधात् ॥
प्रीतिमुज्जयिनीशेन मिथः संव्यवहारतः ॥ १ ॥
तदानीं देवदत्ताऽपि मूलदेवविडम्बनाम् ।
तादृशीं प्रेक्ष्य साक्षेपा व्यब्रवीदचलं प्रति ॥ २ ॥
किं ज्ञाता द्रव्यदर्पान्ध त्वया कुलगृहिण्यहम् ।
मुमूर्षो (१)मूर्ख मद्गेहे व्यवाहार्षीर्यदीदृशम् ॥ ३ ॥

---

(१) क ख मूर्धगेहे ।

त्वयाऽस्मदीयसदने नागन्तव्यमतः परम् ।
इति निष्कास्य तं गेहात्समीपे नृपतेरगात् ॥ ४ ॥
तया च याचितो राजा स वरो दीयतामिति ।
यथेच्छं ब्रूहि यच्छामि तं येनेत्यवदन्नृपः ॥ ५ ॥
सोचे मां प्रति नाज्ञाप्यो मूलदेवं विना पुमान् ।
वारणीयोऽचलश्चायमागच्छन्मम वेश्मनि ॥ ६ ॥
एवमस्त्विति राज्ञोक्ता हेतुः कोऽत्रेति पृष्टवान् ।
शशंस माधवी देवदत्ताभूसंज्ञया ततः ॥ ७ ॥
जितशत्रुनृपः कोपाज्ज्वलितभ्रूलतस्ततः ।
सार्थवाहं तमाहूय साक्षेपमिदमब्रवीत् ॥ ८ ॥
मत्पुरीमण्डनावेतौ रत्नभूतावरे त्वया
मूर्खेण धनमत्तेन ग्रावणीव निघर्षितौ ॥ ९ ॥
ततोऽमुष्यापराधस्य प्राणापहरणं तव ।
दण्डोऽस्त्विति नरेन्द्रोक्ते देवदत्ता न्यवारयत् ॥ १० ॥
त्वं यद्यप्यनया त्रातोऽधुना त्राणं तथापि ते ।
मूलदेवे समानीते भवेदित्यभ्यधान्नृपः ॥ ११ ॥
नृपं नत्वा ततो गत्वा सार्थवाहः प्रचक्रमे ।
नष्टरत्नमिवान्वेष्टुं मूलदेवं समन्ततः ॥ १२ ॥
मूलदेवमपश्यन् स भीतो न्यूनतया तया ।
भाण्डं भृत्वा ययौ शीघ्रं पारसकूलमण्डलम् ॥ १३ ॥
दध्यौ च मूलदेवोऽपि विना मे देवदत्तया ।
भोज्येनालवणेनेव प्राज्यराज्यश्रियाऽपि किम् ॥ १४ ॥

भृङ्गारेण

पुण्डरीव

शरदभ्रा

तं चाधि

स्वाम्यात्

पुरं महा

तत्राविश

उत्तीर्णो

समन्तात्

अथो वि

अयं वि

वर्णित

नानक्षे

तदृश

यनिरिवे

ततः स

प्रतिमुन्न

तदानीं दे

तादृशं प्रेक्ष

नि प्राप्ता स्वः

अचलोऽयमिति क्षिप्रमुपलक्षितवान् नृपः ।
दृष्टा प्राग्जन्मसम्बन्धमपि प्राज्ञाः स्मरन्ति हि ॥ २६ ॥
राजानं मूलदेवोऽयमित्यज्ञासीत्तु नाचलः ।
आत्तवेषं नटमपि स्थूलप्रज्ञा न जानते ॥ २७ ॥
कुतस्त्वमिति राज्ञोक्तः पारसादित्युवाच सः ।
ययाचे पञ्चकुलं च भाण्डालोकनकर्मणि ॥ २८ ॥
कौतुकात्स्वयमेष्याम इत्युक्तो भूभुजा स तु ।
महाप्रसाद इत्यूचे कोपं को वेत्ति तादृशाम् ॥ २९ ॥
ततः पञ्चकुलोपेतो ययौ राजा तदाश्रये ।
मञ्जिष्ठापट्टसूत्रादि सोऽपि भाण्डमदर्शयत् ॥ ३० ॥
भाण्डं किमियदेवेदं सत्यं ब्रूहीति भूभुजा ।
उक्त इत्युक्तवान् श्रेष्ठी सत्यमेतावदेव मे ॥ ३१ ॥
नृपेण पुनरप्यूचे सम्यग् ज्ञात्वा निवेदय ।
अस्मद्राज्ये शुल्कचौर्य्यां यच्छरीरेण निग्रहः ॥ ३२ ॥
अवोचदचलोऽप्येवमस्माभिः कथ्यतेऽन्यथा ।
पुरतो नापरस्यापि स्वयं देवस्य किं पुनः ॥ ३३ ॥
राजेत्युवाच तर्ह्यस्य श्रेष्ठिनः सत्यभाषिणः ।
क्रियतामर्द्धदानं च सम्यग्भाण्डं च वीक्ष्यताम् ॥ ३४ ॥
ततः पञ्चकुलेनांघ्रिप्रहाराद्दंशवेधतः ।
असारभाण्डमध्यस्थं सारभाण्डमशङ्क्यत ॥ ३५ ॥
जाताशङ्कैस्ततो राजपुंभिर्बिभिदिरे क्षणात् ।
शुल्कदस्युमनांसीव भाण्डस्थानानि सर्वतः ॥ ३६ ॥

ततः स देवदत्ताया जितशत्रोश्च भूपतिः ।
चतुरं प्रेषयामास दूतं प्राभृतसंयुतम् ॥ १५ ॥
गत्वोज्जयिन्यां दूतोऽपि जितशत्रुं व्यजिज्ञपत् ।
देवतादत्तराज्यश्रीर्मूलदेवो वदत्यदः ॥ १६ ॥
यथा मे देवदत्तायां प्रेम जानीथ तत्तथा ।
यद्यस्यै रोचते वोऽपि तदियं प्रेष्यतामिति ॥ १७ ॥
ततोऽवददवन्तीशस्तेनेदं कियदर्थितम् ।
राज्ञा विक्रमराजेन भेदो राज्येऽपि नास्ति नः ॥ १८ ॥
आकार्य देवदत्तां च जगादोज्जयिनीपतिः ।
दिष्ट्या जाताऽसि भद्रे त्वं चिरात् पूर्णमनोरथा ॥ १९ ॥
राजा जज्ञे मूलदेवो देवतायाः प्रसादतः ।
त्वामानेतुं च स प्रैषीत्प्रधानपुरुषं निजम् ॥ २० ॥
ततस्त्वं तत्र गच्छेति प्रसादाज्जितशत्रुणा ।
आदिष्टा देवदत्ताऽगाद्वेणातटपुरं क्रमात् ॥ २१ ॥
राजा विक्रमराजोऽपि महोत्सवपुरःसरम् ।
स्वचेतसीव विपुले स्ववेश्मनि निनाय ताम् ॥ २२ ॥
जिनार्चामर्चतस्तस्य सम्यक् पालयतः प्रजाः ।
दीव्यतो देवदत्तां च त्रिवर्गोऽभूदबाधितः ॥ २३ ॥
इतश्च पारसकूलाद्वह्वात्तक्रेयवस्तुकः ।
आययावचलस्तत्र जलपूर्ण इवाम्बुदः ॥ २४ ॥
लक्ष्मीमहत्त्वपिशुनैर्मणिमौक्तिकविद्रुमैः ।
भृत्वा विशालं स स्थालं महीनाथमुपास्थितः ॥ २५ ॥

अचलोऽयमिति क्षिप्रमुपलक्षितवान् नृ
दृष्ट्वा प्राग्जन्मसम्बन्धमपि प्राज्ञाः स्मर
राजानं मूलदेवोऽयमित्यज्ञासीत्तु ना
आत्तवेषं नटमपि स्थूलप्रज्ञा न जानति
कुतस्त्वमिति राज्ञोक्तः पारसादित्युवा
ययाचे पञ्चकुलं च भाण्डालोकनकर्म
कौतुकात्स्वयमेष्याम इत्युक्तो भूभुजा
महाप्रसाद इत्यूचे कोपं को वेत्ति ता
ततः पञ्चकुलोपेतो ययौ राजा तदाश्र
मञ्जिष्ठापट्टसूत्रादि सोऽपि भाण्डमद
भाण्डं किमियदेवेदं सत्यं ब्रूहीति भू
उक्त इत्युक्तवान् श्रेष्ठी सत्यमेतावदेव
नृपेण पुनरप्यूचे सम्यग् ज्ञात्वा निवेद
अस्मद्राज्ये शुल्कचौर्यां यच्छरीरेण नि
अशोचदचलोऽप्येवमस्माभिः कथ्यतेऽन
पुरतो नापरस्यापि स्वयं देवस्य किं पु
राजेत्युवाच तद्वस्य श्रेष्ठिनः सत्यभाषि
क्रियतामर्द्धदानं च सम्यग्भाण्डं च वी
ततः पञ्चकुलेनाङ्घ्रिप्रहाराद्वंशवेधतः ।
असारभाण्डमध्यस्थं सारभाण्डमशङ्कत

तैर्यथा शङ्कितं भाण्डं वित्तशाठ्यं तथाऽभवत् ।
परपुरान्तःप्रवेशकारिणो ह्यधिकारिणः ॥ ३७ ॥
तज् ज्ञात्वा कुपितो राजा बन्धयामास तं क्षणात् ।
सामन्ता अपि बध्यन्ते राजादेशाद्वणिक् कियान् ॥ ३८ ॥
ततस्तं सदने नीत्वा छोटयित्वा च बन्धनम् ।
किं मां प्रत्यभिजानासि पप्रच्छेति महीपतिः ॥ ३९ ॥
अचलोऽपि जगादैवं जगदुद्द्योतकारिणम् ।
भानुमन्तं भवन्तं च बालिशोऽपि न वेत्ति कः ॥ ४० ॥
पर्याप्तं चाटुवचनैः सम्यक् त्वं वेत्सि तद्वद ।
राज्ञेत्युक्तोऽचलोऽवोचत्तर्हि जानामि नह्यहम् ॥ ४१ ॥
देवदत्तामथाहूय भूपतिस्तमदर्शयत् ।
दृष्टैर्दृष्टा कृतार्थी स्यात्मनःसिद्धिर्हि मानिनाम् ॥ ४२ ॥
देवदत्ताममौ दृष्ट्वा क्रीतः कष्टां दशां ययौ ।
अग्रे श्लाघ्यभाजना हि मृत्योरप्यधिका नृणाम् ॥ ४३ ॥
साऽप्यूचे मूलदेवोऽयमित्युक्तो यस्तदा त्वया ।
एवं कुर्या ममापि त्वं दैवाद्दामनर्मायुधः ॥ ४४ ॥
तदस्मि व्यसनं प्राप्तः प्राणसन्देहकारणम् ।
मुक्तोऽस्मि चार्यपुत्रेण नेदृशाः क्षुद्रघातिनः ॥ ४५ ॥
ततो विलक्षः स वणिक् पतित्वा पादयोस्तयोः ।
ऊचे सर्वापराधान्मे तितिक्षध्वं तदा कृतान् ॥ ४६ ॥
रुष्टस्तेनापराधेन जितशत्रुर्महीपतिः ।
[illegible] मे युष्मदाना प्रदास्यति ॥ ४७ ॥

अथोचे मूलदेवोऽपि मया चान्तं तदेव ते ।
यदा प्रसादो विदधे देव्या श्रीदेवदत्तया ॥
ततः प्रसादं दत्त्वोच्चैर्दूतमेकं समर्प्य च ।
पुरीमुज्जयिनीं गन्तुं विससर्जाचलं नृपः ॥
प्रवेशोऽवन्तिनाथेन तस्यावन्त्यामदीयत ।
मूलदेवस्य वचसा कोपस्तन्मूल एव यत् ॥
अन्येद्युर्दुःखविधुराः प्रजाकार्यधुरन्धरम् ।
मिलित्वा वणिजो मूलदेवमेवं व्यजिज्ञपन्
जाग्रत्यपि प्रजास्त्रातुं त्वयि देव दिवानिश
अमुष्यतेदं नगरं परितः परिमोषिभिः ॥ प्र
कोला इव 'चिरं चौराः पुरेऽस्मिन्मन्दिराणि
प्रतिक्षेपं खनन्त्युच्चैर्नारक्षा रक्षितुं क्षमाः ॥
अदृश्यमानाः केनापि कृतसिद्धाञ्जना इव ।
भ्राम्यन्ति चौराः स्वैरं नो गृहेषु स्वगृहेष्वि
अचिरान्निग्रहीष्यामि तस्करानयशस्करान् ।
मूलदेवोऽभिधायैवं वणिजो विससर्ज तान्
आदिक्षन्नगराध्यक्षं साक्षेपं क्ष्मापतिस्ततः ।
अन्विष्य तस्करान् सर्वान् गृहाण निगृहाण
अथोवाच पुराध्यक्षः स्वामिन्नेकोऽस्ति तस्क
असौ न शक्यते धर्तुं दृष्टनष्टः पिशाचवत् ।

तैर्यथा शङ्कितं भाण्डं वित्तशाठ्यं तथाऽभवत् ।
परपुरान्तःप्रवेशकारिणो ह्यधिकारिणः ॥ ३७ ॥
तज् ज्ञात्वा कुपितो राजा बन्धयामास तं चणात् ।
सामन्ता अपि बध्यन्ते राजादेशाद्वणिक् कियान् ॥ ३
ततस्तं सदने नीत्वा छोटयित्वा च बन्धनम् ।
किं मां प्रत्यभिजानासि पप्रच्छेति महीपतिः ॥ ३९
अचलोऽपि जगादेवं जगदुद्द्योतकारिणम् ।
भानुमन्तं भवन्तं च बालिशोऽपि न वेत्ति कः ॥ ४०
पर्याप्तं चाटुवचनैः सम्यक् त्वं वेत्सि तद्वद ।
राज्ञेत्युक्तोऽचलोऽवोचत्तर्हि जानामि नह्यहम् ॥ ४१
देवदत्तामथाहूय भूपतिस्तमदर्शयत् ।
दृष्टैर्दृष्टा कृतार्था स्यान्मनःसिद्धिर्हि मानिनाम् ॥ ४२
देवदत्तामसौ दृष्ट्वा भीतः कष्टां दशां ययौ ।
अग्रे स्वापभ्राजना हि मृत्योरप्यधिका नृणाम् ॥ ४३
साऽप्यूचे मूलदेवोऽयमित्युक्तो यस्तदा त्वया ।
एवं कुर्या ममापि त्वं दैवाद्व्यसनमीयुषः ॥ ४४ ॥
तदसि व्यसनं प्राप्तः प्राणसन्देहकारणम् ।
मुक्तोऽसि चार्यपुत्रेण नेदृक्षाः क्षुद्रघातिनः ॥ ४५ ॥
ततो विलक्षः स वणिक् पतित्वा पादयोस्तयोः ।
ऊचे सर्वापराधान्मे तितिक्षध्वं तदा कृतान् ॥ ४६ ॥
तुष्टस्तेनापराधेन जितशत्रुर्महीपतिः ।
प्रवेशमुज्जयिन्यां मे युष्मद्वाचा प्रदास्यति ॥ ४७ ॥

समुन्मूलयितुं मूलान्मूलदेव उवाच तत् ।
धूर्ता हि कारणोपात्तमार्दवाः कार्यसाहसाः ॥ ९९ ॥
जीर्णोद्यानं ततो गत्वा गुहामुद्घाट्य सोऽविशत् ।
निनाय तत्र भूपं च स्वगणारोपितादिवत् ॥ १०० ॥
आसीन्नागकुमारीव कुमारी तत्र तत्स्वसा ।
नवयौवनलावण्यपुण्यावयवशालिनी ॥ १०१ ॥
क्षालयास्यातिथेः पादावित्यादिष्टा स्वबन्धुना ।
सोपकूपं ततो भूपमुपावेशयदासने ॥ १०२ ॥
प्रक्षालयन्ती तत्पादकमले कमलेक्षणा ।
अनुभूय मृदुस्पर्शं तं सर्वाङ्गमुदैक्षत ॥ १०३ ॥
अहो कोऽप्येष कन्दर्पः साक्षादिति सविस्मया ।
सानुरागा सानुकम्पा साऽब्रवीदिति भूपतिम् ॥ १०४ ॥
पादप्रक्षालनव्याजात्कूपेऽस्मिन्नपरे (१)नराः ।
अपात्यन्त महाभाग तस्कराणां कुतः कृपा ॥ १०५ ॥
क्षेप्स्यामि नैव कूपे त्वां त्वत्प्रभाववशीकृता ।
महतामनुभावो हि वशीकरणमद्भुतम् ॥ १०६ ॥
ततो मदुपरोधेन सुन्दरापसर द्रुतम् ।
इतोऽन्यथा नाथ कुशलं न भविष्यति ॥ १०७ ॥
विसृष्टोऽथ महीनाथो निर्जगाम द्रुतं ततः ।
धीमन्तो हि धिया घ्नन्ति द्विषः सत्यपि विक्रमे ॥ १०८ ॥
गते नृपे तु व्याक्रोशि तया गच्छत्यसाविति ।

---

(१) ख ह नराः ।

जातामर्षस्ततो राजा महौजा निर्ययौ निशि ।
नीलाम्बरप्रावरणो नीलाम्बर इवापरः ॥ ५८ ॥
स्थानेषु शङ्कास्थानेषु बभ्राम स्थामधाम सः ।
दस्युं कमपि नापश्यदहेः पदमिवाम्भसि ॥ ५९ ॥
स सर्वं नगरं भ्रान्तः श्रान्तः सुष्वाप कुत्रचित् ।
[illegible]देवकुले शैलगुहायामिव केसरी ॥ ६० ॥
निशाचर इवाकस्मान्निशाचरणदारुणः ।
तस्कराग्रेसरस्तत्रोपासरन्मण्डिकाभिधः ॥ ६१ ॥
कोऽस्तीति व्याहरन्नुच्चैर्मलिम्लुचपतिस्ततः ।
रुष्टः सुप्तमिव व्यालं पदा नृपमघट्टयत् ॥ ६२ ॥
चेष्टां ज्ञातुं च चित्तं च जिज्ञासुस्तस्य भूपतिः ।
ऊचे कार्पटिकोऽस्मीति क्व क्व निशा न तादृशाः ॥ ६३
एहि कार्पटिकाद्य त्वामदरिद्रीकरोम्यहम् ।
इत्युक्त्वा तस्करो भूपं सहान्यानां धियागताम् ॥ ६४ ॥
ततश्चचाल सोऽर्थेच्छुः पश्चात्पृथिवीपतिः ।
[illegible] पार्श्वे [illegible] जनार्दनः ॥ ६५ ॥
[illegible] ॥ ६६ ॥
[illegible]
[illegible] ॥ ६७ ॥
[illegible]
[illegible] ॥ ६८ ॥

तमुन्मूलयितुं मूलान्मूलदेव उवाह तत् ।
धूर्त्ता हि कारणोपात्तमार्दवाः कार्यराक्षसाः ॥ ६९ ॥
जीर्णोद्यानं ततो गत्वा गुहामुद्घाट्य सोऽविशत् ।
निनाय तत्र भूपं च क्षणारोपितालिवत् ॥ ७० ॥
आसीन्नागकुमारीव कुमारी तत्र तत्स्वसा ।
नवयौवनलावण्यपुण्यावयवशालिनी ॥ ७१ ॥
क्षालयास्यातिथेः पादावित्यादिष्टा स्वबन्धुना ।
सोपकूपं ततो भूपमुपावेशयदासने ॥ ७२ ॥
प्रक्षालयन्ती तत्पादकमले कमलेक्षणा ।
अनुभूय मृदुस्पर्शं तं सर्वाङ्गमुदैक्षत ॥ ७३ ॥
अहो कोऽप्येष कन्दर्पः साक्षादिति सविस्मया ।
सानुरागा सानुकम्पा साऽब्रवीदिति भूपतिम् ॥ ७४ ॥
पादप्रक्षालनव्याजात्कूपेऽस्मिन्नपरे (१)नराः ।
अपात्यन्त महाभाग तस्कराणां कुतः कृपा ॥ ७५ ॥
क्षिपामि नेह कूपे त्वां त्वत्प्रभाववशीकृता ।
महतामनुभावो हि वशीकरणमद्भुतम् ॥ ७६ ॥
ततो मदुपरोधेन सुन्दरापसर द्रुतम् ।
द्वयोरप्यन्यथा नाथ कुशलं न भविष्यति ॥ ७७ ॥
विसृष्टोऽथ महीनाथो निर्जगाम द्रुतं ततः ।
धीमन्तो हि धिया घ्नन्ति द्विषः सत्यपि विक्रमे ॥ ७८ ॥
गते नृपे तु व्याहारि तया गच्छत्यसाविति ।

(१) अपरे जनाः ।

स्वचूणरक्षणार्थं हि प्रपञ्चो धीमतामयम् ॥ ७९ ॥
कष्टकङ्कासिजिह्वालो वेताल इव दारुणः ।
अनुभूपालमुत्तालो दधावे मण्डिकस्ततः ॥ ८० ॥
तं समासन्नमालोक्य भूपतिर्धीबृहस्पतिः ।
चत्वरोत्तम्भितग्रावस्तम्भेनान्तरितोऽभवत् ॥ ८१ ॥
कोपान्धनयनश्चासौ स एवैष पुमानिति ।
कङ्कासिना दृषत्स्तम्भं च्छित्वाऽगाद्धाम मण्डिकः ॥ ८२ ॥
ययौ स्वं धाम राजाऽपि दृष्टचौरोपलम्भतः ।
प्राप्तः सौख्याय जायेत दोषकारी न कस्य वा ॥ ८३ ॥
राजा प्रातस्ततो राजपाटिकाव्याजतो बहिः ।
दस्युं विस्मनोदस्युस्तं निरूपयितुं ययौ ॥ ८४ ॥
अथ वस्त्रापणद्वारे कुर्वाणं तुन्नकारताम् ।
पट्टैर्वेष्टितजङ्घोरुं किञ्चिदुद्घाटिताननम् ॥ ८५ ॥
तस्करं मस्करलतोपेतं छद्मश्लथाकृतिम् ।
दृष्ट्वोपालक्षयत् क्ष्मापः क्षपादृष्टानुमानतः ॥ ८६ ॥ (युग्मम्)
गत्वा हर्म्यं महीनाथोऽभिज्ञानानि निवेदयन् ।
पुरुषान् प्रेषयामास तस्याकारणहेतवे ॥ ८७ ॥
न हतः स पुमान्नूनं तद्विजृम्भितमित्यसौ ।
आहूतोऽमंस्त चौरा हि महाराजिकवेदिनः ॥ ८८ ॥
सोऽगात्ततो राजकुले राज्ञाऽऽस्यत महासने ।
महाप्रमादं कुर्वन्ति नीतिज्ञा हि जिघांसवः ॥ ८९ ॥
तं भूपतिरभाषिष्ट प्रमादमुग्धया गिरा ।

स्वस्वसा दीयतां मह्यं दातव्या एव कन्यका ॥ ८० ॥
दृष्टपूर्वी स्वसारं मे नापरो निरगात्ततः।
अयं स एव राजेति निश्चिक्ये मण्डिको हृदि ॥ ८१ ॥
गृह्यतां मत्स्वसा देव देवकीयैव सा किल।
मदीयमन्यदप्येवमवोचत स पार्थिवम् ॥ ८२ ॥
तदानीमप्युपायंस्त रूपातिशयशालिनीम्।
तस्य स्वसारं नृपतिः कंसारिरिव रुक्मिणीम् ॥ ८३ ॥
महामात्यपदे चक्रे तस्करं तं नरेश्वरः।
को वेत्ति भूभुजां भावं मध्यं पत्युरिवाम्भसाम् ॥ ८४ ॥
तस्माद्भूषणवस्त्रादि तद्भगिन्यैव भूपतिः।
नित्यमानाययदहो धूर्तो धूर्तैरधृष्यत ॥ ८५ ॥
बहु यावत्समाकृष्टं द्रव्यं तावन्नृपेण सा।
अभापि वित्तं त्वद्बन्धोः कियदद्यापि तिष्ठति ॥ ८६ ॥
वित्तमेतावदेवासीदस्य दस्योः स्वसाऽपि हि।
एवं न्यवेदयद्राज्ञो गोप्यं प्रियतमे न हि ॥ ८७ ॥
विडम्बनाभिर्बह्वीभिर्मण्डिकं चण्डशासनः।
निजघान ततो राजा पापानां कुशलं कियत् ॥ ८८ ॥

चौर्यात् श्वशुर्यमपि विक्रमराजराजः,
आनीय मण्डिकमखण्डनयो जघान।
स्तैन्यं न तेन विदधीत सुधीः कथञ्चि-
दत्रापि जन्मनि विरुद्धफलानुबन्धि ॥ २८८ ॥

॥ इति मूलदेवमण्डिकयोः कथानकम् ॥

अन्यस्मिन् दिवसे यत्र कुर्यास्त्वमनियन्त्रितः।
उपादिक्षेति पञ्चत्वं प्राप लोहखुरस्ततः॥ १२॥
मृतकार्यं पितुः कृत्वा रौहिणेयस्ततोऽनिशम्।
चकार चौरिकां लोहखुरोऽपर इवोद्धतः॥ १३॥
पालयन् पितुरादेशं जीवितव्यमिवात्मनः।
स्वदारैरमिवामुष्णात् स राजगृहपत्तनम्॥ १४॥
तदा च नगरग्रामाकरेषु विहरन् क्रमात्।
चतुर्दशमहासाधुसहस्रपरिवारितः॥ १५॥
सुरैः संचार्यमाणेषु स्वर्णाम्भोजेषु चारुषु।
न्यस्यन् पदानि तत्रागाद्वीरचरमतीर्थकृत्॥ १६॥
[1]व्यन्तरैरसुरैर्ज्योतिषिकैर्वैमानिकैरपि।
सुरैः समवसरणं चक्रे जिनपतेस्ततः॥ १७॥
आयोजनविसर्पिण्या सर्वभाषानुयातया।
भारत्या भगवान् वीरः प्रारेभे धर्मदेशनाम्॥ १८॥
तदानीं रौहिणेयोऽपि गच्छन् राजगृहं प्रति।
मार्गान्तराले समवसरणाभ्यर्णमाययौ॥ १९॥
एवं स चिन्तयामास यद्यनेन व्रजामि चेत्।
शृणोमि वीरवचनं तदाज्ञा भज्यते पितुः॥ २०॥
न चान्यो विद्यते पन्था भवत्वेवं विमृश्य सः।
कर्णौ पिधाय पाणिभ्यां द्रुतं राजगृहं ययौ॥ २१॥

---

(१) अ ग च ड वैमानिकैर्ज्योतिषिकैर्व्यन्तरैरसुरैरपि।

मार्गेण याभस्तन्मार्गं यावत्तावन्न नेष्यति।
त्यक्तो ह्यक्रमेणापि यतेन त्यज्यते क्रमैः ॥ ३३ ॥
न तं हन्तुं नवा धर्त्तुमहं शक्नोमि तस्करम्।
गृह्णातु तदिमां देवो दाण्डपाशिकतां निजाम् ॥ ३४ ॥
नृपेणाभासितैकभ्रूसंज्ञया भाषितस्ततः।
कुमारोऽभयकुमारस्तमूचे दाण्डपाशिकम् ॥ ३५ ॥
चतुरङ्गचमूं सज्जीकृत्य मुञ्च वहिष्पुरात्।
यदान्तःप्रविशेच्चौरः पत्तनं वेष्टयेस्तदा ॥ ३६ ॥
अन्तश्च त्रासितो विद्युदुत्क्षिप्तकरणेन सः।
पतिष्यति बहिः सैन्ये वागुरायां कुरङ्गवत् ॥ ३७ ॥
प्रतिभूमिरिवानीतो निजपादैस्ततश्च सः।
ग्रहीतव्यो महान् दस्युरप्रमत्तैः पदातिभिः ॥ ३८ ॥
तथेत्यादेशमादाय निर्ययौ दाण्डपाशिकः।
तथैव च चमूं सज्जां प्रच्छन्नं निर्ममे सुधीः ॥ ३९ ॥
तद्दिने रौहिणेयोऽपि ग्रामान्तरसमागमात्।
अजानानः पुरीं रुद्धां वारीं गज इवाविशत् ॥ ४० ॥
तैरुपायैस्ततो धृत्वा बद्ध्वा च स मलिम्लुचः।
आनीय नृपतेर्दाण्डपाशिकेन समर्पितः ॥ ४१ ॥
यथा न्याय्यं सतां त्राणमसतां निग्रहस्तथा।
निगृह्यतामसौ तस्मादित्यादिशन्महीपतिः ॥ ४२ ॥
अलोप्त्रः प्राप्त इत्येष न हि निग्रहमर्हति।
विचार्य निग्रहीतव्य इत्युवाचाभयस्ततः ॥ ४३ ॥

श्रियाऽप्सरायमाणाभीरमणीभिरलङ्कृतम् ।
दिवोऽमरावतीखण्डमिव भ्रष्टमतर्कि सः ॥ ५५ ॥
गन्धर्ववर्गप्रारब्धसङ्गीतकमहोत्सवः ।
सोऽधादकस्मादुद्भूतगन्धर्वनगरश्रियम् ॥ ५६ ॥
ततोऽभयो मद्यपानमूढं निर्माय तस्करम् ।
परिधाप्य देवदूष्ये [1]ऽभितल्पमशाययत् ॥ ५७ ॥
मदे परिणते यावदुदस्थात्तावदैचत ।
सोऽकस्माद्विस्मयकरीमपूर्वां दिव्यसंपदम् ॥ ५८ ॥
अत्रान्तरेऽभयादिष्टैर्नरनारीगणैस्ततः ।
उदचारि जय जय नन्देत्यादिकमङ्गलम् ॥ ५९ ॥
अस्मिन्महाविमाने त्वमुत्पन्नस्त्रिदशोऽधुना ।
अस्माकं स्वामिभूतोऽसि त्वदीयाः किङ्करा वयम् ॥ ६० ॥
अप्सरोभिः सहैताभी रमस्व स्वैरमिन्द्रवत् ।
इत्यादि चतुरं चाटुगर्भमूचे च तैरसौ ॥ ६१ ॥
जातः सुरः किमस्मीति दध्यौ यावत्स तस्करः ।
संगीतकार्यं तावत्तैः प्रदत्तः समहस्तकः ॥ ६२ ॥
उपेत्य पुंसा केनापि स्वर्णदण्डभृता ततः ।
सहसा भोः किमारब्धमेतदेवमभाष्यत ॥ ६३ ॥
ततः प्रतिवभाषे तैः प्रतीहार निजप्रभोः ।
प्रदर्शयितुमारब्धं स्वकं विज्ञानकौशलम् ॥ ६४ ॥
सोऽप्युवाच स्वनाथस्य दर्श्यतां निजकौशलम् ।

(१) ख ग घ ऽधितल्प- ।

विज्ञितास्तीर्थयात्रायां गुरवः पर्युपासिताः ॥ ७६ ॥
इत्यादि भदनुष्ठानं मया कृतमिति ब्रुवन्।
अथ दण्डभृता शंस दुश्चरितमपि स्वकम् ॥ ७७ ॥
रौहिणेयोऽप्युवाचेदं साधुसंसर्गशालिना।
कदाचिदप्याचरितं किञ्चिन्नाशोभनं मया ॥ ७८ ॥
व्याजहार प्रतीहारो जन्म नैकस्वभावतः।
याति तत्कल्पतां चौर्यपारदारिकतादिकम् ॥ ७९ ॥
रौहिणेयोऽभ्यधत्तैवं किमेवंविधचेष्टितः।
स्वर्लोकं प्राप्नुयादन्यः किमारोहति पर्वतम् ॥ ८० ॥
गत्वा ततस्तैस्तत्सर्वमभयाय निवेदितम्।
अभयेन च विज्ञप्तः श्रेणिकस्य महीपतेः ॥ ८१ ॥
एवंविधैरुपायैर्यश्चौरो ज्ञातुं न शक्यते।
स चौरोऽपि विमोक्तव्यः शक्या नीतिर्न लङ्घितुम् ॥ ८२ ॥
अभयः पार्थिवादेशाद्रौहिणेयममूमुचत्।
वञ्चन्ते वञ्चनादक्षैर्दक्षा अपि कदाचन ॥ ८३ ॥
ततः सोऽचिन्तयच्चौरो धिगादेशं पितुर्मम।
वञ्चितोऽस्मि चिरं येन भगवद्वचनामृतात् ॥ ८४ ॥
नागमिष्यत् प्रभुवचो यदि मे कर्णकोटरम्।
तदा विविधमारेणागमिष्यं यमगोचरम् ॥ ८५ ॥
अनिच्छयाऽपि हि तदा गृहीतं भगवद्वचः।
मम जीवातवे जज्ञे भैषज्यमिव रोगिणः ॥ ८६ ॥
त्यक्त्वार्हद्वचनं हा धिक् चौरवाचि रतिर्मया।

देवलोकसमाचारं कार्यतां किं त्वसाविति ॥ ६५ ॥
तैरुक्तं कीदृगाचार इति श्रुत्वा स पूरुषः ।
साक्षेपमित्यभाषिष्ट किमेतदपि विस्मृतम् ॥ ६६ ॥
य इहोत्पद्यते देवः स स्वे सुकृतदुष्कृते ।
आख्याति प्राक्तने स्वर्गभोगाननुभवेत्ततः ॥ ६७ ॥
विस्मृतं स्वामिलाभेन सर्वमेतत्प्रसीदतः ।
देवलोकस्थितिं देवः कार्यतामिति तेऽवदन् ॥ ६८ ॥
स रौहिणेयमित्यूचे निजे हन्त शुभाशुभे ।
प्राक्तने शंस नः स्वर्गभोगान् भुङ्क्ष्व ततः परम् ॥ ६९ ॥
ततः सोऽचिन्तयद्दस्युः किमेतत् सत्यमीदृशम् ।
मां ज्ञातुमभयेनैष प्रपञ्चो रचितोऽथवा ॥ ७० ॥
ज्ञेयं कथमेतदिति ध्यायता तेन संस्मृतम् ।
कण्टकोद्धरणकालाकर्णितं भगवद्वचः ॥ ७१ ॥
देवस्वरूपं श्रीवीराच्छ्रुतं चेत् संवदिष्यति ।
तत्सत्यं कथयिष्यामि करिष्याम्यन्यथोत्तरम् ॥ ७२ ॥
इति बुद्ध्वा स तानीक्षाञ्चक्रे क्षितितलस्पृशः ।
प्रस्वेदमलिनान् म्लानमाल्यान्निमिषदीक्षणान् ॥ ७३ ॥
तत्सर्वं कपटं ज्ञात्वाऽचिन्तयत् दस्युरुत्तरम् ।
तेनोचे कथ्यतां देवलोकः सर्वोऽयमुत्सुकः ॥ ७४ ॥
रौहिणेयस्ततोऽवादीन्मया पूर्वत्र जन्मनि ।
अदीयत सुपात्रेभ्यो दानं चैत्यानि चक्रिरे ॥ ७५ ॥
प्रत्यष्ठाप्यन्त बिम्बानि पूजितान्यष्टधाऽर्चया ।

आम्राण्यपास्य निम्बेषु काकेनेव चिरं कृता ॥ ८७ ॥
उपदेशैकदेशोऽपि यदीयः फलतीदृशम् ।
तस्योपदेशः सामस्त्यात् सेवितः किं करिष्यति ॥ ८८ ॥
एवं विमृश्य मनसा ययौ भगवतोऽन्तिके ।
पादाम्बुजे च नत्वैवं रौहिणेयो व्यजिज्ञपत् ॥ ८९ ॥
भवाब्धौ प्राणिनां घोरविपन्नक्रकुलाकुले ।
महापोतायते ते गीरायोजनविसर्पिणी ॥ ९० ॥
निषिद्धस्त्वद्वचः श्रोतुमनाप्तेनाप्तमानिना ।
इयत्कालमहं पिता वञ्चितस्तज्जगद्गुरो ॥ ९१ ॥
त्रैलोक्यनाथ ते धन्याः श्रद्दधानाः पिबन्ति ये ।
भवद्वचनपीयूषं कर्णाञ्जलिपुटैः सदा ॥ ९२ ॥
अहं तु पापोऽशृण्वन् भगवन् भवतो वचः ।
पिधाय कर्णौ हा कष्टमिदं स्थानमलङ्घयम् ॥ ९३ ॥
एकदाऽनिच्छताऽप्येकं श्रुतं युष्मद्वचो मया ।
तेन मन्त्राक्षरेणेव रक्षितो राजराक्षसात् ॥ ९४ ॥
यथाऽहं मरणात्त्रातस्तथा त्रायस्व नाथ माम् ।
संसारसागरावर्त्ते निमज्जन्तं जगत्पते ॥ ९५ ॥
ततस्तत्कृपया स्वामी निर्वाणपददायिनीम् ।
विशुद्धां विदधे साधु साधुधर्मस्य देशनाम् ॥ ९६ ॥
ततः प्रहृष्टः प्रणमन् रौहिणेयोऽब्रवीदिदम् ।
यतिधर्मस्य योग्योऽस्मि नवे'त्यादिश मां प्रभो ॥ ९७ ॥

(१) [illegible] त्यादिश्यतां ।

योग्योऽसीति स्वामिनोक्ते, ग्रहीष्यामि विभो व्रतम् ।
परं किञ्चिद्वदिष्यामि, श्रेणिकेनेत्युवाच सः ॥ ९८ ॥
निर्विकल्पं निर्विशङ्कं स्वयज्ञाप्यमदोऽवद ।
इत्युक्तः श्रेणिकनृपेणाथ लोहखुरात्मजः ॥ ९९ ॥
इह देव भवद्भिर्यः श्रुतोऽहं लोकवार्त्तया ।
स एष रौहिणेयोऽस्मि भवत्पत्तनतापकः ॥ १०० ॥
भगवद्वचनांशेन दुर्लङ्घ्या लङ्घिता मया ।
प्रज्ञाऽभयकुमारस्य तरण्डेनेव निम्नगा ॥ १ ॥
सर्वमेतन्मुषितं पत्तनं भवतो मया ।
नान्वेषणीयः कोऽप्यन्यस्तस्करो राजभास्कर ॥ २ ॥
कमपि प्रेषय यथा तल्लोप्त्रं दर्शयाम्यहम् ।
करिष्ये सफलं जन्म ततः प्रव्रज्यया निजम् ॥ ३ ॥
अभयोऽथ समुत्थाय श्रेणिकादेशतः स्वयम् ।
कौतुकार्थीरलोकाय सहागात्तेन दस्युना ॥ ४ ॥
ततो गिरिनदीकुञ्जश्मशानादिषु तद्धनम् ।
स्थगितं दर्शयामास सोऽथ श्रेणिकसूनवे ॥ ५ ॥
अभयोऽपि हि यद्यस्य तत्तस्य धनमार्पयत् ।
नीतिज्ञानामलोभानां मन्त्रिणां नापरा स्थितिः ॥ ६ ॥
परमार्थं कथयित्वा प्रबोध्य निजमानुषान् ।
श्रद्धालुर्भगवत्पार्श्वे रौहिणेयः समाययौ ॥ ७ ॥
ततः श्रेणिकराजेन कृतनिष्क्रमणोत्सवः ।
[1]स जग्राह परिव्रज्यां पार्श्वे श्रीवीरपादयोः ॥ ८ ॥

(१) ख ड जग्राह स-।

निर्मलचित्तानां न तु वक्रवृत्तीनां कश्मलमनसां तेषामभ्यायान्ति अभिमुखमायान्ति श्रियः सम्पदः, स्वयमेव न तु परप्रेरणया व्यवसायेन वा। स्वयंवरा इत्युपमानगर्भम्। स्वयम्वरा इव कन्याः॥ ७४॥

तथा—

अनर्था दूरतो यान्ति साधुवादः प्रवर्त्तते।
स्वर्गसौख्यानि ढौकन्ते स्फुटमस्तेयचारिणाम्॥७५॥

अनर्था विपदः, दूरतो यान्त्यासन्ना अपि न भवन्ति; साधुरयमिति प्रवादः साधुवादः श्लाघा, प्रवर्त्तते प्रसरति, एतावदैहिक[1] फलम्; स्वर्गसौख्यानीति तु पारलौकिकम्, अस्तेयव्रतेनावश्यं चरन्तीत्यस्तेयचारिणस्तेषाम्।

अत्रान्तरे श्लोकाः—

वरं वह्निशिखा पीता सर्पास्यं चुम्बितं वरम्।
वरं हालाहलं लीढं परस्वहरणं न तु॥ १॥

प्रायः परस्वलुब्धस्य निःशूका बुद्धिरेधते।
हन्तुं भ्रातॄन् पितॄन् दारान् सुहृदस्तनयान् गुरून्॥ २॥

परस्वं तस्करो गृह्णन् वधबन्धादि नेक्षते।
पयःपायीव लगुडं बिडाल उपरि स्थितम्॥ ३॥

व्याधधीवरमार्जारादिभ्यश्चौरोऽतिरिच्यते।
निगृह्यते नृपतिभिर्यदसौ नेतरे पुनः॥ ४॥

(१) ग ड एतावदैहिकं।

स्वर्णादिकेऽप्यन्यधने पुरःस्थे
सदा मनीषा दृषदीव येषाम्।
सन्तोषपीयूषरसेन तृप्ता-
स्ते यां लभन्ते गृहमेधिनोऽपि ॥ ५ ॥ ७५ ॥

इदानीमामुष्मिकमैहिकं चाब्रह्मफलमुपदर्श्य गृहस्थोचितं ब्रह्मचर्यव्रतमाह—

षण्ढत्वमिन्द्रियच्छेदं वीक्ष्याब्रह्मफलं सुधीः।
भवेत् स्वदारसन्तुष्टोऽन्यदारान् वा विवर्जयेत् ॥ ७६ ॥

षण्ढत्वमामुष्मिकं परदाररतानां फलं, इन्द्रियच्छेदश्च राजादिकृत [1]ऐहिकं, अब्रह्मणः प्रतिषिद्धस्य मैथुनस्य, वीक्ष्य शास्त्रात्प्रत्यक्षेण वा ज्ञात्वा, स्वदारेषु धर्मपत्न्यां सन्तुष्टो भवेदित्येकं गृहस्थब्रह्मचर्य्यम्, अन्यदारान् वा परसम्बन्धिनीः स्त्रियो विवर्जयेत्। स्वस्त्रीसाधारणस्त्रीसेवीत्यर्थः इति द्वितीयम् ॥ ७६ ॥

यद्यपि गृहस्थस्य प्रतिपन्नं व्रतमनुपालयतो न तादृशः पापसम्बन्धोऽस्ति तथापि यतिधर्मानुरक्तो यतिधर्मप्राप्तेः पूर्वं गार्हस्थ्येऽपि कामभोगविरक्तः सन् श्रावकधर्मं परिपालयति इति तं वैराग्यकाष्ठामुपनेतुं सामान्येनाब्रह्मदोषानाह—

रम्यमापातमात्रे यत् परिणामेऽतिदारुणम्।
किंपाकफलसंकाशं तत्कः सेवेत मैथुनम् ॥ ७७ ॥

आपातमात्रे प्रथमारम्भमात्रे, रम्यं मनोहरं, परिणामे

---

(१) ख -कृतमैहिकं।

अहिंसापरिवारत्वाच्छेषव्रतानां मैथुने
अहिंसाया एवाभावमाह—

योनियन्त्रसमुत्पन्नाः सुसूक्ष्मा जन्तुराशयः ।
पीड्यमाना विपद्यन्ते यत्र तन्मैथुनं त्यजेत् ॥ ७९ ॥

योनिः प्रसवमार्गः, सैव यन्त्राकारत्वाद्यन्त्रं, तत्र समुत्पन्नाः संमूर्च्छनेनोत्पन्नाः, ते च न चक्षुर्ग्राह्या इत्याह—सुसूक्ष्माः, जन्तुराशयो जन्तुसमूहाः, पीड्यमाना मृद्यमानाः पुंध्वजेनेति शेषः, रूतनालिकायां तप्तायःकणकप्रवेशे रूतानीव, विपद्यन्ते विनश्यन्ति, यत्र मैथुने तन्मैथुनं त्यजेत् ॥ ७९ ॥

योनौ जन्तुसद्भावं संवादेन द्रढयति—

जन्तुसद्भावं वात्स्यायनोऽप्याह ।

वात्स्यायनः कामशास्त्रकारः । अनेन च वात्स्यायनसंवादाधीनमस्य प्रामाण्यमिति नोच्यते, न हि जैनं शासनमन्यसंवादाधीनप्रामाण्यं किन्तु येऽपि कामप्रधानास्तैरपि जन्तुसद्भावो नापह्नुत इत्युच्यते ।

वात्स्यायनश्लोको यथा—

रक्तजाः कृमयः सूक्ष्मा मृदुमध्याधिशक्तयः ।
जन्मवर्त्मसु कण्डूतिं जनयन्ति तथाविधाम् ॥ ८० ॥

रक्तजा रक्तोद्भवाः, कृमयो जन्तुविशेषाः, सूक्ष्मा अप्रत्यक्षाः,

मृदुमध्याधिशक्तयः मृदुशक्तयो मध्यशक्तयोऽधि[1]शक्तयश्च, तथा-विधां मृदुमध्याधिमात्रशक्त्यनुरूपां ; मृदुशक्तयो मृद्वीं, मध्यशक्तयो मध्यां, [2]अधिकशक्तयोऽधिकां कण्डूतिं कण्डूं जन्मवर्त्मसु योनिषु जनयन्ति ॥ ८० ॥

कामज्वरचिकित्सार्थमौषधमिव मैथुनसेवनमिति यो मन्येत तं प्रत्याह—

स्त्रीसम्भोगेन यः कामज्वरं प्रतिचिकीर्षति ।
स हुताशं घृताहुत्या विध्यापयितुमिच्छति ॥८१॥

प्रतिचिकीर्षति प्रतिकर्तुमिच्छति, विध्यापयितुं शमयितुम् ; अयमर्थो नायं कामज्वरस्य प्रतीकारोऽनुगुणः, अपि तु वृद्धिहेतुः नहि हुताशे घृताहुतिप्रक्षेपस्तच्छान्त्यै भवति किन्तु तद्वृद्ध्यै ।

बाह्या अप्याहुः—

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥ १ ॥

[3]किन्तु कामज्वरप्रतीकारा ईपत्करा वैराग्यभावनाप्रतिपक्ष-सेवाधर्मशास्त्रश्रवणादयः ; तदेतेषु कामज्वरप्रशान्त्युपायेषु सत्सु किं भवभ्रमणहेतुना मैथुनसेवनेन ॥ ८१ ॥

---

(१) क ख ग ज -ऽधिक- ।
(२) ष अधिमात्र- ।
(३) ग ज किंच ।

[illegible]

वञ्चकत्वं नृशंसत्वं चञ्चलत्वं कुशीलता ।
इति नैसर्गिका दोषा यासां तासु रमेत कः ॥८४॥

वञ्चकत्वं मायाशीलता, नृशंसत्वं क्रूरकर्मकारिता, चञ्चलत्वं क्वाप्यवस्थितचित्तत्वाभावः, कुशीलता दुःस्वभावता, उपस्थसंयमाभावो वा, इत्येते नैसर्गिकाः स्वाभाविका दोषा नत्वौपाधिकाः, तासु को रमेत ॥ ८४ ॥

न चेयन्त एव दोषा किन्त्वपरिसंख्याता इत्याह—

प्राप्तुं पारमपारस्य पारावारस्य पार्यते ।
स्त्रीणां प्रकृतिवक्राणां दुश्चरित्रस्य नो पुनः ॥८५॥

पारावारस्य समुद्रस्य, अपारस्यादृष्टपारस्य, पारं परतीरं, प्राप्तुं पार्यते शक्यते, न पुनः स्त्रीणां प्रकृतिवक्राणां स्वभावकुटिलचरित्राणां, दुश्चरित्रस्य दुष्टचेष्टितस्य, पारं पर्यन्तः ; प्राप्तुं पार्यत इति ॥ ८५ ॥

दुश्चरित्रमेवाह—

नितम्बिन्यः पतिं पुत्रं पितरं भ्रातरं क्षणात् ।
आरोपयन्त्यकार्येऽपि दुर्वृत्ताः प्राणसंशये ॥ ८६ ॥

नितम्बिन्य इति यौवनोन्मादप्रदर्शनार्थम् । अतएव स्त्रीति नोक्तम् । दुर्वृत्ता दुष्टशीलाः, अकार्येऽपि प्रयोजनमन्तरेणापि, अथवाऽकार्येऽल्पे प्रयोजने नञोऽल्पार्थत्वात्, प्राणसंशये प्राणसन्देहे ; उपलक्षणं चैतत् । प्राणनाशेऽपि आरोपयन्ति चारोहयन्ति । कामित्याह । पतिं भर्त्तारम् । सूर्यकान्तेव प्रदेशिराजम् ।

यदाह—

'भज्जा वि इन्दियविगारदोसनडिया करेइ पइपावम्।

जह सो पएसिराया सूरियकंताइ तह वहिओ॥ १॥

पुत्रं तनयम्। चुलनीव ब्रह्मदत्तम्।

यदाह—

'माया नियगमइविगप्पियम्मि अत्थे अपूरमाणम्मि।

पुत्तस्स कुणइ वसणं चुलणी जह बंभदत्तस्स॥ २॥

पितरं जनकं, भ्रातरं सोदरम्। जीवयशा इव जरासन्धं,

कान्तादीव भ्रातुन्॥ ८६॥

यतएव

भवस्य बीजं नरकद्वारमार्गस्य दीपिका।

शुचां कन्दः कलेर्मूलं दुःखानां खानिरङ्गना॥८७

भवस्य संसारस्याङ्कुरस्येव बीजं तत्कारणत्वात्, नरकद्वा-

रमरकस्य, तत्र यो मार्गः पन्थास्तत्र दीपिकेव दीपिका तत्प्रका-

शकत्वात्, शुचां शोकानां [illegible] कन्दस्थानीयत्वात्, कलेः

[illegible] मूलं [illegible], दुःखानां [illegible]

[illegible]

[illegible]

कान्ऽसावङ्गना । एवं तावज्जातिधर्मानुरक्तं गृहस्थं प्रति सामान्येन सम्भवद्दोषाः स्त्रीदोषा दर्शिताः ॥ ८७ ॥

सम्प्रति स्वदारसन्तुष्टान् गृहस्थानधिकृत्य साधारणस्त्रीदोषाः श्लोकपञ्चकेनोच्यन्ते

मनस्यन्यद्वचस्यन्यत्क्रियायामन्यदेव हि ।

यासां साधारणस्त्रीणां ताः कथं सुखहेतवः ॥८८॥

मनसि चित्तेऽन्यत् वचःक्रिययोर्विलक्षणं, वचसि वचनेऽन्यत् मनःक्रिययोर्विलक्षणं, क्रियायां चेष्टितेऽन्यत् वाङ्मनसोर्विसंवादि, यासां साधारणस्त्रीणां वेश्यानां, ता विसंवादिप्रेमाणः कथं सुखस्य विश्रम्भनिबन्धनस्य हेतवः ।

यदाह —

अन्यस्मै दत्तसङ्केता याचतेऽन्यं सुते परम् ।

अन्यश्चित्ते परः पार्श्वे गणिकानामहो नरः ॥ १ ॥ ८८ ॥

तथा—

मांसमिश्रं सुरामिश्रमनेकविटचुम्बितम् ।

को वेश्यावदनं चुम्बेदुच्छिष्टमिव भोजनम् ॥८९॥

मांसेन जलस्थल[1]खचारिजीवजाङ्गलेन, मिश्रमामगन्धि, मांसादित्वाद्वेश्यानां, सुरया काष्ठपिष्टादिमय्या मदिरया, मिश्रं व्याप्तं, सुरापानप्रसक्तत्वात् । अनेकविटैर्बहुभिर्विटैरित्यर्थः, चुम्बितमास्वादितम्, प्रायो विटासक्तत्वात्; एवंविधं वेश्यानां वदनं

(1) ख ग खचरादि- ।

तथा—

कुष्ठिनोऽपि स्मरसमान् पश्यन्तीं धनकाङ्क्षया।
तन्वन्तीं कृत्रिमस्नेहं निःस्नेहां गणिकां त्यजेत् ॥९२॥

कुष्ठिनः कुष्ठरोगिणोऽप्यत्यन्तमनुपादेयान्, स्मरसमान् कन्दर्पतुल्यान्, धनकाङ्क्षया हेतुभूतया पश्यन्तीं, मद्दत्या प्रतिपत्त्या प्रतिपादयन्तीं, न च स्नेहमन्तरेण कुष्ठिनोऽपि सकाशाद्धनावाप्तिरिति। तन्वन्तीं विस्तारयन्तीं, कृत्रिममुपचरितं, स्नेहं प्रेम; परमार्थतस्तु निःस्नेहां गणिकां वेश्यां, त्यजेत्। एवं तावत्स्वदारसन्तुष्टस्य पण्याङ्गनागमने दोषाः प्रतिपादिताः ॥ ९२ ॥

इदानीं परदारगमनदोषानाह—

नासक्त्या सेवनीया हि स्वदारा अप्युपासकैः ॥
आकरः सर्वपापानां किं पुनः परयोषितः ॥९३॥

सर्वविरतिलालसः खलु देशविरतिपरिणाम इति गार्हस्थ्येऽपि वैराग्यातिशयादुपासकैरप्रतिपिद्धाः स्वदारा अप्यासक्त्या गर्द्धेन न सेवनीयाः किं पुनः परयोषितस्ता अत्यन्तमसेवनीया इत्यर्थः; यत आकरः खानिः सर्वपापानां मायामृषावादादीनाम्, हि शब्दो यस्मादर्थे, यस्मात् स्वदारानपि नासक्त्या सेवन्ते उपासकाः ततः कथं परदारेषु प्रसज्जेयुरित्यर्थः ॥ ९३ ॥

परस्त्रीणां पापकारित्वमेव दर्शयति—

तथा—

कुष्ठिनोऽपि स्मरसमान् पश्यन्तीं धनकाङ्क्षया ।
तन्वन्तीं कृत्रिमस्नेहं निःस्नेहां गणिकां त्यजेत् ॥९२॥

कुष्ठिनः कुष्ठरोगिणोऽप्यत्यन्तमनुपादेयान्, स्मरसमान् कन्दर्पतुल्यान्, धनकाङ्क्षया हेतुभूतया पश्यन्तीं, महत्या प्रतिपत्त्या प्रतिपादयन्तीं, न च स्नेहमन्तरेण कुष्ठिनोऽपि सकाशाद्धनावाप्तिरिति । तन्वन्तीं विस्तारयन्तीं, कृत्रिममुपचरितं, स्नेहं प्रेम ; परमार्थतस्तु निःस्नेहां गणिकां वेश्यां, त्यजेत् । एवं तावत्स्वदारसन्तुष्टस्य पण्याङ्गनागमने दोषाः प्रतिपादिताः ॥ ९२ ॥

इदानीं परदारगमनदोषानाह—

नासक्त्या सेवनीया हि स्वदारा अप्युपासकैः ॥
आकरः सर्वपापानां किं पुनः परयोषितः ॥९३॥

सर्वविरतिलालसः खलु देशविरतिपरिणाम इति गार्हस्थ्येऽपि वैराग्यातिशयादुपासकैरप्रतिपिन्नाः स्वदारा अप्यासक्त्या गर्द्धेन न सेवनीयाः किं पुनः परयोषितस्ता अत्यन्तमसेवनीया इत्यर्थः ; यत आकरः खानिः सर्वपापानां मायामृषावादादीनाम्, हि शब्दो यस्मादर्थे, यस्मात् स्वदारानपि नासक्त्या सेवन्ते उपासकाः ततः कथं परदारेषु प्रसज्जेयुरित्यर्थः ॥ ९३ ॥

परस्त्रीणां पापकारित्वमेव दर्शयति—

स्वपतिं या परित्यज्य निस्त्रपोपपतिं भजेत् ।
तस्यां क्षणिकचित्तायां विश्रम्भः कोऽन्ययोषिति ॥ ९४ ॥

तस्यां क्षणिकचित्तायां चलितचित्तायामन्ययोषिति, को विश्रम्भः को विश्वासः, न कश्चिदित्यर्थः । विश्रम्भाधीनं च सुखं तदपि नास्तीत्यर्थः । या किं, या स्वपतिं देवतारूपं 'भर्तृदेवता हि स्त्रियः' इति श्रुतेः ; परित्यज्य पाणिगृहीतोऽत्यपि त्यक्त्वा, निस्त्रपा लज्जारहिता ; त्रपा हि भूषणं स्त्रीणाम् ; उपपतिं पत्यन्तरं, भजेत् ॥ ९४ ॥

इदानीं परस्त्रीप्रसक्तोऽनुशिष्यते --

भीरोराकुलचित्तस्य दुःस्थितस्य परस्त्रियाम् ।
रतिर्न युज्यते कर्तुमुपशूनं पशोरिव ॥ ९५ ॥

परस्त्रियां रतिः प्रीतिः, कर्तुं न युज्यते, भीरोः पतिराजादिभीतस्य, अतएवाकुलचित्तस्य अनेन दृष्टोऽनेन ज्ञातोऽहमिति उपसर्पतीति व्याकुलचित्तस्य, दुःस्थितस्य खण्डदेवकुलादौ शय्यासनादिरहितस्य, कस्येव, पशोरिव वध्यस्य, उपशूनं शूनासमीपे ॥ ९५ ॥

तस्मात्—

प्राणसन्देहजननं परमं वैरकारणम् ।
लोकद्वयविरुद्धं च परस्त्रीगमनं त्यजेत् ॥ ९६ ॥

परस्त्रियां गमनं सम्भोगस्तत्त्यजेत्, प्राणानां जीवितव्यस्य,

सन्देहो नाशशङ्का, तं जनयतीति प्राणसन्देहजननं; 'परस्त्रीपु प्रसक्तस्य हि प्रायेण परैः प्राणा प्रणाश्यन्ते कदाचिन्नेति प्राण सन्देहः, परमं प्रकृष्टं, वैरस्य विरोधस्य, कारणम्।

यदाह—

बद्धमूलस्य मूलं हि महद्वैरतरोः स्त्रिय इति।

लोकद्वयमिहलोकपरलोकलक्षणं, तस्य विरुद्धं प्राणसन्देह-जननत्वाद्वैरकारणत्वाल्लोकद्वयविरुद्धत्वादिति परस्त्रीगमनत्यागे हेतुत्रयं विशेषणद्वारेण ॥ ८६ ॥

लोकद्वयविरुद्धं चेति विशेषणमस्फुटं स्फुटयति—

सर्वस्वहरणं बन्धं शरीरावयवच्छिदाम्।

मृतश्च नरकं घोरं लभते पारदारिकः ॥ ८७ ॥

सर्वधनापहारं, रज्ज्वादिना बन्धं, शरीरावयवः पुंध्वजादि-स्तस्य च्छिदां छेदं लभत इतीहलोकविरोधः। मृतश्च नरकं घोरं लभते इति परलोकविरोधः। परदारान् गच्छतीति पारदारिकः ॥ ८७ ॥

उपपत्तिपूर्वं परस्त्रीगमनप्रतिषेधमाह—

स्वदाररक्षणे यत्नं विदधानो निरन्तरम्।

जानन्नपि जनो दुःखं परदारान् कथं व्रजेत् ॥ ८८ ॥

जानन्नपि अनुभवन्नपि, दुःखं मनःपीडां, परदारप्रसङ्गे तस्य; परदाराः परेषां दाराः परदाराः अतः स्वदारप्रसक्तेषु परेषु

(१) क ग परस्त्रीप्रसक्तस्य।

दुःखमनुभवतो। एतदेवमाह। परदाररतो यावज्जीवं, यत्नमात्रं, भित्तितरलकपाटादिभिर्निरुध्यमानः कुर्वन्, निरन्तरं दिवानिशं, परदारसुरतादिभोगमलभमानो यतो जानाति तस्मिन् दुःखं स्वात्मानुभवेन परस्यापि दुःखं पश्यन् कथं परदारान् व्रजेत् ॥ ९८ ॥

आस्तां परस्त्रीषु रमणं रमणेच्छाऽपि महतेऽनर्थायेति आह—

विक्रमाक्रान्तविश्वोऽपि परस्त्रीषु रिरंसया ।
कृत्वा कुलक्षयं प्राप नरकं दशकन्धरः ॥ ९९ ॥

परस्त्रीविषये रमणाभावेऽपि रिरंसामात्रेण हेतुना, दशकन्धरो रावणो, नरकं प्राप इति पारलौकिकं फलम्। ऐहिकमाह। कृत्वा कुलक्षयं, यद्यपि कुलक्षयस्तस्य रामादिभिः कृतो न तेन, तथापि तदीयपरदाररिरंसापूर्वकत्वादिभिस्तत्त्वतस्तत्कृत उच्यते। ननु पारलौकिकं फलं नरकगमनरूपमास्तां, ऐहलौकिकं तु बलवतां कुतस्त्यं भवेदित्याह। विक्रमाक्रान्तविश्वोऽपि; न हि दशकन्धरादन्यो बलवान्, यो विक्रमेण विश्वमप्याक्रान्तवान् सोऽपि यद्यनर्थमश्नुते तदपरस्य का मात्रेति ॥ ९९ ॥

अयं चार्थः सम्प्रदायगम्यः, सचायम्।—

अस्ति त्रिकूटशिरसि शिरोमणिरिव क्षितेः ।
रक्षोद्वीपे हिरण्याङ्का लङ्केति प्रथिता पुरी ॥ १ ॥
विद्याधरनृपस्तस्यां पुलस्त्यकुलकौस्तुभः ।
अजायत महावीर्यो रावणो विश्वरावणः ॥ २ ॥

द्वितीयः प्रकाशः ।

अभूतां भ्रातरौ तस्य निःसीमस्थामशोभिनौ ।
अपराविव दोःस्तम्भौ कुम्भकर्णविभीषणौ ॥ ३ ॥
देवतामिव कुलस्य स्वपूर्वपुरुषार्जिताम् ।
गृहे नवमहारत्नस्रजं सोऽपश्यदन्यदा ॥ ४ ॥
श्रूयन्ते द्वादशादित्या नवादित्या इमे पुनः ।
दृश्यन्ते कथमित्येतद्वृद्धान् पप्रच्छ तत्र सः ॥ ५ ॥
अथाचचक्षिरे तस्मै त्वत्पूर्वपुरुषैः पुरा ।
वरलब्धा महासाराऽनर्घ्येयं रत्नमालिका ॥ ६ ॥
इमां क्षिपेत यः कण्ठे स्यात्सोऽर्द्धभरतेश्वरः ।
इत्याम्नायात्तवाम्नाये पूज्यते पूर्वजैरसौ ॥ ७ ॥
ततस्तां सोऽक्षिपत्कण्ठे तद्रत्नेषु नवस्वपि ।
सङ्क्रान्तास्यतया चासौ दशास्य इति पप्रथे ॥ ८ ॥
ततो जनैर्जयजयेत्यारावैरभिनन्दितः ।
सोऽभान्मूर्त्त इवोत्साहो जगद्विजयहेतवे ॥ ९ ॥
तस्यानवद्या विद्यास्ताः प्रज्ञप्तीप्रमुखाः सदा ।
असाध्यसाधनप्रौढाः पार्श्वे सेना इवावसन् ॥ १० ॥
ततो भरतवर्षार्द्धं स एकग्रामलीलया ।
दुःसाधं साधयामास दोःकण्डूर्नत्वपूर्यत ॥ ११ ॥
आसीदितश्च वैताढ्यगिरौ विद्याधरेश्वरः ।
इन्द्रनामा पूर्वजन्मानुभूतेन्द्रपदस्थितिः ॥ १२ ॥

---

(३) ख च शालिनौ ।

विश्वैश्वर्यबलोद्रेकादिन्द्रत्वाभ्यासतोऽपि च ।
इन्द्रमात्मानमेवायममंस्तेन्द्रं तु नापरम् ॥ १३ ॥
शचीति स स्वमहिषीं स्वमस्त्रं वज्रमित्यपि ।
पट्टेभमैरावण इत्यश्वमुच्चैःश्रवा इति ॥ १४ ॥
सारथिं मातलिरिति चतुरोऽन्यान्महाभटान् ।
सोमो यमः पाशधरः कुबेर इति चाभ्यधात् ॥ १५ ॥
मन्यमानस्तृणायान्यानिन्द्रंमन्यः स दोर्मदी ।
नाजीगणद्रावणमप्यत्यन्तरणदारुणम् ॥ १६ ॥
तस्मै ततः प्रकुपितः कृतान्त इव दारुणः ।
रावणोऽश्रावणाभोदगर्जद्गजबलोऽचलत् ॥ १७ ॥
विद्याबलात्ससैन्योऽपि लङ्घयामास सोऽर्णवम् ।
विद्याधरास्तुल्ययाना भुव्यम्भसि नभस्यपि ॥ १८ ॥
स दिशश्छादयन् सैन्यवात्योद्भूतै रजश्चयैः ।
वैताढ्यं प्राप कल्पान्तमहावात इव द्रुतम् ॥ १९ ॥
श्रुत्वा रावणमायान्तमिन्द्रोऽपि द्रुतमभ्यगात् ।
पुंसां मैत्र्यां च वैरे च संमुखोत्थानमादिमम् ॥ २० ॥
दूरादपि दशास्येन प्रहितो महितौजसा ।
अथ दूतोऽभ्युपेत्येन्द्रमित्युवाच ससौष्ठवम् ॥ २१ ॥
ये केचिदिह राजानो विद्यादोर्वीर्यदर्पिणः ।
तैरुपेत्योपायनाद्यैः पूजितो दशकन्धरः ॥ २२ ॥
दशकण्ठस्य विस्मृत्य भवतार्जवादयम् ।
स्यान् कालो यथा तस्मिन् भक्तिकालस्तवाधुना ॥ २३ ॥

भक्तिं दर्शय तत्तस्मिन् शक्तिं वा दर्शयाधुना।
भक्तिशक्तिविहीनश्चेदेवमेव विनङ्क्ष्यसि ॥ २४ ॥
इन्द्रोऽपि निजशार्दैवं वराकैः पूजितो नृपैः।
रावणस्तदयं मत्तः पूजां मत्तोऽपि वाञ्छति ॥ २५ ॥
यथा तथा गतः कालो रावणस्य सुखाय सः।
कालरूपस्त्वयं कालस्तस्येदानीमुपस्थितः ॥ २६ ॥
गत्वा स्वस्वामिनो भक्तिं शक्तिं वा मयि दर्शय।
स भक्तिशक्तिहीनश्चेदेवमेव विनङ्क्ष्यति ॥ २७ ॥
दूतेनागत्य विज्ञप्ते रावणः क्रोधदारुणः।
चचालानन्तसैन्योर्मिः क्षयोद्भ्रान्त इवार्णवः ॥ २८ ॥
तयोर्बलानामन्योऽन्यं संफेटः शस्त्रवर्षिणाम्।
संवर्त्तपुष्करावर्त्तवारिदानामिवाभवत् ॥ २९ ॥
रावणं रावणिर्नत्वा युद्धायेन्द्रमथाह्वत।
रणक्रीडासु वीरा हि नाग्रं ददति कस्यचित् ॥ ३० ॥
ततश्चैकाङ्गविजयाकाङ्क्षिणाविन्द्ररावणी।
सैन्यान्य(१)पास्यायुध्येतां द्वन्द्वयुद्धेन दुर्द्धरौ ॥ ३१ ॥
मिथः प्रतिहतास्त्रौ तौ रणपारयियासया।
युयुधाते नियुद्धेन मदान्धौ सिन्धुराविव ॥ ३२ ॥
रावणिः क्षिमधोऽथेन्द्र ऊर्द्धमिन्द्रोऽथ रावणिः।
नालक्ष्यत तयोर्व्यक्तिर्वेगाद्विपरिवर्त्तिनोः ॥ ३३ ॥

---

(१) म च -पास्य युद्धेरतां।

हत्वा चन्द्रोदरं तत्र 'तद्राज्यं स्वां च सोदरीम् ।
सोऽदात्खराय त्रिशिरोदूषणज्यायसे ततः ॥ ४४ ॥
चन्द्रोदरस्य निःशेषं खरः खरकरोऽग्रहीत् ।
पत्नी तु गुर्विणी राज्ञी प्रणश्य क्वचिदप्यगात् ॥ ४५ ॥
ततः पातालङ्कातो लङ्कां लङ्कापतिर्ययौ ।
तत्र निष्कण्टकं राज्यं चक्रे विष्टपकण्टकः ॥ ४६ ॥
सोऽन्यदा पुष्पकारूढोऽर्चयन्नर्हतो भ्रमन् ।
मरुत्तनृपप्रारब्धमैक्षाञ्चक्रे महामखम् ॥ ४७ ॥
ततो विमानादुत्तीर्णो दशास्यस्तद्दिदृक्षया ।
आनर्चे नृभुजा तेन पाद्यसिंहासनादिना ॥ ४८ ॥
ततो मरुत्तभूपालं जगादैवं दशाननः ।
अरे किमेष क्रियते नरकाभिमुखैर्मखः ॥ ४९ ॥
धर्मः प्रोक्तो ह्यहिंसातः सर्वज्ञैस्त्रिजगद्धितैः ।
पशुहिंसात्मकाद्यागात्कथं नाम जायते ॥ ५० ॥
लोकद्वयारिं तद्यज्ञं मा कार्षीर्यत्करिष्यसि ।
मद्गुमाविह ते वासः परत्र नरके पुनः ॥ ५१ ॥
विससर्ज मखं सद्यो मरुत्तनृपतिस्ततः ।
अलङ्घ्या रावणाज्ञा हि विश्वस्यापि भयङ्करा ॥ ५२ ॥
प्रभञ्जन इवौजस्वी मरुत्तमखभञ्जनः ।
ततोऽगाच्चैत्ययात्रार्थं सुमेर्वष्टापदादिषु ॥ ५३ ॥

---

(१) अ ब राज्यं स्वां च सहोदरीम् ।

त्रिभागं पालयं नेमेषु क्षितिमाजुविमेषु सः ।
स जगाम निजं धाम पुनरेव दशाननः ॥ ५४ ॥
इतश्चासीदयोध्यायां पुर्यामिक्ष्वाकुवंशजः ।
राजा दशरथो नाम धाम निःसीमसम्पदाम् ॥ ५५ ॥
पत्न्यः कौशल्याकैकेयीसुमित्रासुप्रभाभिधाः ।
प्रियास्तस्याभवन्मूर्ता इव दिशां श्रियः ॥ ५६ ॥
कौशल्या सुषुवे रामं कैकेयी भरतं सुतम् ।
सुमित्रा लक्ष्मणं नाम शत्रुघ्नं सुप्रभाऽभिधा ॥ ५७ ॥
रामलक्ष्मणभरतशत्रुघ्नास्तस्य रेजिरे ।
चत्वारः सूनवो दन्ता इव त्रिदशदन्तिनः ॥ ५८ ॥
जनकस्य सुतां सीतां भामण्डल[1]सहोदरीम् ।
कार्मुकारोपणपणां रामभद्र उपायत ॥ ५९ ॥
जिनेन्द्रबिम्बस्नपनजलं मङ्गलहेतवे ।
चतसृणां च राज्ञीनां नृपः प्रैषयदन्यदा ॥ ६० ॥
तत्तोयमागतं पश्चादिति रोषमुपेयुषीम् ।
अनुनेतुं स्वयं राज्ञीं सुमित्रामगमन्नृपः ॥ ६१ ॥
घण्टान्तर्लालिकालोलदशनं चलिताननम् ।
श्वेतसर्वाङ्गरोमाणं भ्रूरोमच्छन्नलोचनम् ॥ ६२ ॥
पदे पदे प्रस्खलन्तं याचमानं च पश्चताम् ।
गतस्तत्र ददर्शैकं जरत्काञ्चुकिनं नृपः ॥ ६३ ॥

---

(१) ख च ङ -सहोदराम् ।

तं दृष्ट्वाऽचिन्तयद्राजा स्मो यावन्नेदृशा वयम् ।
चतुर्थपुरुषार्थाय तावद्धि प्रयतामहे ॥ ६४ ॥
व्रतं जिघृक्षुः स ततो राज्ये स्थापयितुं निजे ।
अङ्कायाह्वाययामास तनयौ रामलक्ष्मणौ ॥ ६५ ॥
भरतस्य जनन्याऽथ कैकेय्या मन्थरागिरा ।
वरौ प्राक्प्रतिपन्नौ स याचितः सत्यसङ्गरः ॥ ६६ ॥
वरेणार्थित एकेन स तदा रघुपुङ्गवः ।
प्रतिपन्नस्थिरो राज्यं भरताय समार्पयत् ॥ ६७ ॥
चतुर्दशसमा यावद्वनवासाय चादिशत् ।
ससीतालक्ष्मणं रामं वरेणान्येन चार्थितः ॥ ६८ ॥
ससीतालक्ष्मणो रामः सद्योऽगा(१)द्दण्डकावनम् ।
पञ्चवट्याश्रमे चावतस्थेऽसौ सत्यसङ्गरः ॥ ६९ ॥
तत्रायातौ चारणर्षी राघवाभ्यां नमस्कृतौ ।
सीताऽऽनर्चातिथीभूतौ श्रद्धालुः शुद्धभिक्षया ॥ ७० ॥
ततो गन्धोदकैर्वृष्टिरमरैर्विदधे तदा ।
तद्गन्धादाययौ तत्र जटायुर्नाम गृध्रराट् ॥ ७१ ॥
तौ मुनी देशनां तत्र चक्रतुः स (२)व्यबोधि च ।
संजातजातिस्मरणोऽवतस्थे चानुजानकि ॥ ७२ ॥
तस्युषस्तत्र रामस्य फलाद्यर्थं बहिर्गतः ।
ददर्श लक्ष्मणः खड्गमग्रहीच्च कुतूहलात् ॥ ७३ ॥

(१) ख घ ङ -दण्डिका- ।

(२) ख घ व्यबुद्धत ।

तत्तीक्ष्णत्वपरीक्षार्थं तरसाऽगं तेन लक्ष्मणः ।
अभ्यर्णस्थां वंशजालीं ननर्ताव लुलाव च ॥ ७४ ॥
वंशजालान्तरस्थस्य क्वापि कस्यापि देहिनः ।
अथैकं मौलिकमलं सोऽपश्यत्पतितं पुरः ॥ ७५ ॥
अयुध्यमानोऽशस्त्रश्च पुमान् कोऽपि हतो मया ।
अमुना कर्मणा धिग्मामित्यात्मानं निनिन्द सः ॥ ७६ ॥
गत्वा च रामभद्राय तद्गेपमचीकथत् ।
असिं च दर्शयामास रामोऽप्येवमभाषत ॥ ७७ ॥
असावसिः सूर्यहासः साधकोऽस्य त्वया हतः ।
अस्य सम्भाव्यते नूनं कश्चिदुत्तरसाधकः ॥ ७८ ॥
अत्रान्तरे दशग्रीवस्वसा चन्द्रणखाऽभिधा ।
खरभार्या ययौ तत्र ददर्श च हतं सुतम् ॥ ७९ ॥
क्वासि हा वत्स शम्बूक शम्बूकेति रुदत्यसौ ।
अपश्यल्लक्ष्मणस्यांह्रिन्यासपङ्क्तिं मनोहराम् ॥ ८० ॥
मम सूनुर्हतोऽनेन यस्येयं पदपद्धतिः ।
पदपङ्क्तिपथेनैव ततश्चन्द्रणखाऽऽययौ ॥ ८१ ॥
यावत्किञ्चिदगात्तावत्ससीतालक्ष्मणं पुरः ।
नेत्राभिरामं रामं साऽपश्यत्तरुतले स्थितम् ॥ ८२ ॥
निरीक्ष्य रामं सा सद्यो रिरंसाविवशाऽभवत् ।
कामावेशः कामिनीनां शोकोद्रेकेऽपि कोऽप्यहो ॥ ८३ ॥
स्वं रूपं चारु कृत्वाऽथ रन्तुं रामस्तयाऽर्थितः ।
हसन्नूचे सभार्योऽहमभार्यं भज लक्ष्मणम् ॥ ८४ ॥

तयाऽर्थितस्तथैवेत्य लक्ष्मणोऽप्येवमब्रवीत् ।
आर्ये गता त्वमार्येव तदलं वार्तयाऽनया ॥ ८५ ॥
सा याञ्चाखण्डनात्पुत्रवधाच्च रुषिताऽधिकम् ।
आख्यन्नत्वा खरादीनां तत्कृतं तनयक्षयम् ॥ ८६ ॥
विद्याधरसहस्रैस्ते चतुर्दशभिरावृताः ।
ततोऽभ्येयुरुपद्रोतुं रामं शैलमिव द्विपाः ॥ ८७ ॥
किमार्यः सत्यपि मयि योत्स्यते स्वयमीदृशैः ।
इति राममयाचिष्ट तेषां युद्धाय लक्ष्मणः ॥ ८८ ॥
गच्छ वत्स ! जयाय त्वं यदि ते सङ्कटं भवेत् ।
सिंहनादं ममाहूत्यै कुर्या इत्यन्वशात् स तम् ॥ ८९ ॥
रामाज्ञां प्रतिपद्योच्चैर्लक्ष्मणोऽथ धनुःसखा ।
गत्वा प्रववृते हन्तुं स तांस्तार्क्ष्य इवोरगान् ॥ ९० ॥
प्रवर्द्धमाने तद्युद्धे स्वभर्तुः पार्ष्णिवृद्धये ।
गत्वा त्वरितमित्यूचे रावणं रावणस्वसा ॥ ९१ ॥
आयातौ दण्डकारण्ये मनुष्यौ रामलक्ष्मणौ ।
अनात्मज्ञौ निन्यतुस्ते यामियं यमगोचरम् ॥ ९२ ॥
श्रुत्वा स्वस्पतिस्ते तु सानुजः सबलो ययौ ।
तत्र सौमित्रिणा सार्द्धं युद्ध्यमानोऽस्ति संप्रति ॥ ९३ ॥
कनिष्ठभ्रातृवीर्येण स्ववीर्येण च गर्वितः ।
परतोऽस्ति स्थितो रामो विलसन् सीतया सह ॥ ९४ ॥
सीता च रूपलावण्यश्रिया सीमेव योषिताम् ।
न देवी नोरगी नापि मानुष्यन्येव काऽपि सा ॥ ९५ ॥

तस्या दासीकृताशेषसुरासुरवधूजनम् ।
त्रैलोक्येऽप्यप्रतिच्छन्दं रूपं लावण्यगोचरम् ॥ ९६ ॥
आसमुद्रमसमुद्रान्त ! यानि कान्यपि भूतले ।
तवैवार्हन्ति रत्नानि तानि सर्वाणि बान्धव ! ॥ ९७ ॥
दृशामनिमिषीकारकारणं रूपसम्पदा ।
स्त्रीरत्नमेतद्गृह्णीया नचेत्त्वन्नासि रावण: ॥ ९८ ॥
आरुह्य पुष्पकमथादिदेश दशकन्धर: ।
विमानराज ! त्वरितं याहि यत्रास्ति जानकी ॥ ९९ ॥
ययौ चात्यन्तवेगेन विमानमनुजानकि ।
स्पर्द्धयेव दशग्रीवमनसस्तत्र गच्छत: ॥ १०० ॥
दृष्ट्वाऽपि रामादत्युग्रतेजसो दशकन्धर: ।
बिभाय दूरे तस्थौ च व्याघ्रो हुतवहादिव ॥ १ ॥
इति चाचिन्तयदित: कष्टं रामो दुरासद: ।
इतश्च सीताहरणमितो व्याघ्र इतस्तटी ॥ २ ॥
विमृश्य च ततो विद्यामस्मार्षीदवलोकनीम् ।
उपतस्थे च सा मङ्क्षु किङ्करीव कृताञ्जलि: ॥ ३ ॥
ततश्चाज्ञापयामास तत्कालं तां दशानन: ।
कुरु साहाय्यमङ्गाय मम सीतां हरिष्यत: ॥ ४ ॥
साऽवोचद्वासुकेर्मौलिरत्नमादीयते सुखम् ।
न तु रामसमीपस्था सीता देवासुरैरपि ॥ ५ ॥
उपाय: किन्त्वसावस्ति यायाद्येनैष लक्ष्मणम् ।
तस्यैव सिंहनादेन सङ्केतो ह्यनयोरयम् ॥ ६ ॥

एवं करोमीति तेनोक्ता गत्वा प्रधनस्थले ।
सा साक्षादिव सौमित्रेः सिंहनादं विनिर्ममे ॥ ७ ॥
तं श्रुत्वा सीतयोक्तस्तत्र मुक्त्वा रामो ययौ द्रुतम् ।
अपशकुनानपि आघ्राय अनन्यथा हि भाविनाम् ॥ ८ ॥
अथागत्य दशग्रीवः सीतामारोप्य पुष्पके ।
त्वां हरन् रावणोऽस्मीति कथयन्नम्बरे ययौ ॥ ९ ॥
हा नाथ विदितन्याय राम हा वत्स लक्ष्मण ।
हा तातपाद हा भ्रातर्भामण्डल महाभुज ॥ १० ॥
सीता यो ह्रियतेऽनेन काकेनेव बलि[1]स्थलात् ।
एवं सीता रुरोदोच्चै रोदयन्तीव रोदसीम् ॥ ११ ॥
मा भैषीः पुत्रि मा भैषीः क्व रे यासि निशाचर ।
रोषादिति वदन् दूराज्जटायुस्समपापत ॥ १२ ॥
भामण्डलानुगश्चैकः योऽपि विद्याधराग्रणीः ।
दुष्टात्मन् दशकण्ठ रे तिष्ठ तिष्ठेति तर्जयन् ॥ १३ ॥
जटायुर्विकटाटोप[2]करजत्रोटिकोटिभिः ।
[3]प्रणिघ्नन्तं दशग्रीवोरसि प्रवहते ततः ॥ १४ ॥
रे जीवितस्य तृप्तोऽसि जरद्गृध्रेति विब्रुवन् ।
दशास्यश्चन्द्रहासासिमाकृष्य निजघान तम् ॥ १५ ॥

---

(१) क ख ग घ -च्छ- ।
(२) घ ङ -नखर- ।
(३) ख घ प्रतिघ्नन्तं ।

[illegible]

सीतामपश्यन् [illegible] मूर्च्छितोऽपतत् ॥ २२ ॥
तं लब्धसंज्ञं सौमित्रिरित्यूचे रुदितैरलम् ।
पौरुषं पुरुषाणां हि व्यसनेषु प्रतिक्रिया ॥ २३ ॥
अत्रान्तरे पुमानेकः कश्चिदेत्य ननाम तौ ।
ताभ्यां पृष्टः स्ववृत्तान्तमेवं व्यज्ञपयच्च सः ॥ २४ ॥
हत्वा पातालल‍ङ्केशं तातं चन्द्रोदरं मम ।
अखरस्येव पदे तस्य खरं खररयोऽकरोत् ॥ २५ ॥
गुर्वी च नष्टा मन्माता विराधं नाम मां सुतम् ।
अन्यत्रासूत तस्याश्च कश्चिदाख्यदिदं मुनिः ॥ २६ ॥

यदा दाशरथिर्हन्ता खरादींस्त्वत्सुतं तदा ।
पातालंलङ्काधिपतिं करिष्यति न संशयः ॥ २७ ॥
तदद्य समयं लब्ध्वा युष्मानस्मि समाश्रितः ।
पितृवैरिवधक्रीतं पत्तिं जानीथ मां निजम् ॥ २८ ॥
रामस्ततोऽदात्पातालंलङ्कां तस्मै महाभुजः ।
फलन्ति समयज्ञानां स्वामिनः स्वयमेव हि ॥ २९ ॥
तं च स्थापयितुं तत्र गच्छन् रामः सलक्ष्मणः ।
हृतविद्यं पुरोऽपश्यद्भूस्थं भामण्डलानुगम् ॥ ३० ॥
अथ दाशरथी नत्वा स्ववृत्तान्तं व्यजिज्ञपत् ।
आत्मनश्च जटायोश्च सीताया रावणस्य च ॥ ३१ ॥
अथ पातालंलङ्कायां ययौ रामः सलक्ष्मणः ।
सत्यसन्धो विराधं च पित्र्ये राज्ये न्यवेशयत् ॥ ३२ ॥
इतश्च साहसगतिर्नाम विद्याधराग्रणीः ।
खे भ्रमन्नधिकिष्किन्धाधित्यकं समुपाययौ ॥ ३३ ॥
ययौ तदा च किष्किन्धाधिपतिः क्रीडितुं बहिः ।
सुग्रीवः सपरीवारो राज्ञां हि स्थितिरीदृशी ॥ ३४ ॥
ददर्श साहसगतिस्तदा चान्तःपुरस्थिताम् ।
सुग्रीवस्य प्रियां नाम्ना तारां तारविलोचनाम् ॥ ३५ ॥
तस्यां लावण्यकूलिन्यां स चिक्रीडिषुरुच्चकैः ।
इयेष नान्यतो गन्तुं घर्मार्त्त इव कुञ्जरः ॥ ३६ ॥
सोऽस्थात्तथैव तत्रैव निषिद्धगमनः क्षणात् ।
तां मूर्त्तामिव कामाज्ञामुल्लङ्घयितुमक्षमः ॥ ३७ ॥

रमणी रमणीयेयं रमणीया मया कथम् ।
इतीच्छाव्याकुलः सोऽप्युपायं क्षणमचिन्तयत् ॥ ३८ ॥
सहसा साहसगतिस्ततः सुग्रीवरूपताम् ।
स कुशीलत्वकुशलः कुशीलव इवाददे ॥ ३९ ॥
अथासौ विटसुग्रीवः सुग्रीव इति मानिभिः ।
अङ्गरक्षैरस्खलितः सुग्रीवभवनेऽविशत् ॥ ४० ॥
अन्तःपुरगृहद्वारं स ययौ यावदुत्सुकः ।
तावदाघुष्य सुग्रीवः स्ववेश्मद्वारमाययौ ॥ ४१ ॥
सुग्रीवस्य प्रवेष्टुं न द्वारं प्राहरिका ददुः ।
अग्रे प्रविष्टो राजाऽस्ति त्वमन्योऽसीति वादिनः ॥ ४२ ॥
ततश्च सत्यसुग्रीवे स्खल्यमाने स्ववेत्रिभिः ।
अतुलमुत्कलो जज्ञे मथ्यमान इवार्णवे ॥ ४३ ॥
सुग्रीवद्वितयं दृष्ट्वा सन्देहाद्वालिनन्दनः ।
अन्तर्विघ्नं त्रातुं तद्द्वारं त्वरितो ययौ ॥ ४४ ॥
अन्तर्विशन् विटसुग्रीवः प्रविशन् वालिसूनुना ।
सागरोऽद्रिणा सरित्पूर इव प्रस्खलितस्ततः ॥ ४५ ॥
अथाभिन्नन् सैनिकानाम् अक्षौहिण्यश्चतुर्दश ।
[illegible] ॥ ४६ ॥
[illegible] ।
[illegible] ॥ ४७ ॥
[illegible] ।

[illegible]

कुन्तपातैर्दिवं कुर्वन्नुल्कापातमयीमिव ॥ ४८ ॥
युयुधे सादिना सादी निषादी च निषादिना ।
पदातिना पदातिश्च रथिको रथिकेन च ॥ ४९ ॥
चतुरङ्गचमूचक्रविमर्दादथ मेदिनी ।
चचाल कम्पं मुग्धेव प्रौढप्रियसमागमात् ॥ ५० ॥
एहीहि रे परस्त्रीप्रवेशप्रवचिति ब्रुवन् ।
विटसुग्रीवसुग्रीवः सुग्रीवो योद्धुमाह्वत ॥ ५१ ॥
ततश्च विटसुग्रीवो मत्तेभ इव तर्जितः ।
अर्जितं गर्जितं कुर्वन् संमुखीनो युधेऽभवत् ॥ ५२ ॥
युयुधाते महायोधौ तौ क्रोधारुणलोचनौ ।
विदधानौ जगत्त्रासं कीनाशस्येव सोदरौ ॥ ५३ ॥
तौ निशातैर्निशातानि शस्त्रैः शस्त्राण्यथो मिथः ।
चिच्छेदाते क्षणच्छेदं रणच्छेकावुभावपि ॥ ५४ ॥
शस्त्रखण्डैरुच्छलद्भिर्दुद्रुवे खेचरीगणः ।
महायुद्धे तयोर्वृक्षखण्डो महिषयोरिव ॥ ५५ ॥
तौ छिन्नास्त्रावथान्योन्यममर्पणशिरोमणी ।
मल्लयुद्धेनास्फालतां पर्वताविव जङ्गमौ ॥ ५६ ॥
उत्पतन्तौ क्षणाद्व्योम्नि निपतन्तौ क्षणाद्भुवि ।
ताम्रचूडाविवाभातां वीरचूडामणी उभौ ॥ ५७ ॥
तौ द्वावपि महाप्राणौ मिथो जेतुमनीश्वरौ ।
अपसृत्य च दूरेण वृषभाविव तस्थतुः ॥ ५८ ॥
पुनर्युद्धेन सुग्रीवः खिन्नः खिन्नतनुस्ततः ।

वह्निर्निर्गत्य किष्किन्धापुराद्रामसमागमेत् ॥ ५९ ॥
तदेव विद्युद्गोष्ठस्याग्रस्यमानसः ।
यतः पुरप्रवेशस्तु न मेमे वालिनन्दनात् ॥ ६० ॥
सुग्रीवो नाशितयोगमर्गेन पर्याप्तिन्यागत् ।
यतो योनम्टः कुटाद्‌ः कोऽपि वा नो द्विषन् ॥ ६१ ॥
भाक्तोगा प्रधानाक्तोगा द्विषन्नागानोक्तताः ।
यथा अभूद्भ्रातृद्भाता स्कन्दा निर्जरैः ॥ ६२ ॥
मायापराक्रमोत्कृष्टः कथं वध्यो द्विषन् मया ।
धिङ्मां पराक्रमभ्रष्टं वालिनामवधाकरम् ॥ ६३ ॥
धन्यो महाबलो वाली योऽवधकपुरुषव्रतः ।
राज्यं तृणमिव त्यक्त्वा यत्र भेजे परं पदम् ॥ ६४ ॥
चन्द्ररश्मिः कुमारो मे बलीयान् जगतोऽप्यसौ ।
किं तु द्वयोरभेदज्ञः कं रक्षतु निहन्तु कम् ॥ ६५ ॥
इदं तु विदधे साधु साध्वहा चन्द्ररश्मिना ।
तस्य पापीयसो रुद्र शुद्धान्ते यत्प्रवेशनम् ॥ ६६ ॥
वधाय बलिनोऽमुष्य बलीयांसं श्रयामि कम् ।
यद् घात्या एव रिपवः स्वतोऽपि परतोऽपि वा ॥ ६७ ॥
भूर्भुवःस्वस्त्रयीवीरं मरुत्तमखभञ्जनम् ।
भजामि विद्विषद्घातहेतवे किं दशाननम् ॥ ६८ ॥
असौ किं तु प्रकृत्या स्त्रीलोलस्त्रैलोक्यकण्टकः ।
तं च मां च निहत्याशु तारामादास्यते स्वयम् ॥ ६९ ॥
ईदृशे व्यसने प्राप्ते साहाय्यं कर्तुमीश्वरः ।

आसीत् खरः खरतरो राघवेण हत
तत्रैव रामसौमित्री गत्वा मित्रीकर
तत्कालोपनतस्यापि यो विराधस्य र
तौ तु पातालनङ्कायामलंकर्मीणदो
विराधस्योपरोधेन तथैवाद्यापि तिष्ठ
एवं विमृश्य सुग्रीवोऽनुशिष्य रहसि
विराधपुर्यां विश्वासभूतं दूतं न्ययोज
गत्वा पातालनङ्कायां विराधाय प्रण
स्वामिव्यसनवृत्तान्तं कथयित्वाऽब्रवी
सङ्कटे व्यसने स्वामी पतितो नस्तद
राघवौ शरणीकर्त्तुं तव द्वारेण वाञ्
द्रुतमायातु सुग्रीवः सतां सङ्गो हि
तेनेत्युक्तो दूत एत्य सुग्रीवाय शशंस
प्रचचालाथ सुग्रीवोऽश्वानां ग्रैवेयक
दिशो मुखरयन् सर्वा वेगाद्दूरमदूरय
पातालनङ्कां स प्राप क्षणेनाप्युपवेश
विराधं चोपतस्थेऽसावभ्युत्तस्थौ स च
विराधोऽपि पुरोभूय रामभद्राय ता
तं नमस्कारयामास तद्दुःखं च व्यजि
सुग्रीवोऽप्येवमूचेऽस्मिन् दुःखे त्वमपि
श्रुते हि सर्वथा मूढे शरणं तरणिः

स्वकार्यादधिको यत्नः परकार्ये महीयसाम् ॥ ८१ ॥
सीताहरणवृत्तान्तं विराधेनावबोधितः ।
रामं विज्ञपयामास सुग्रीवोऽथ कृताञ्जलिः ॥ ८२ ॥
त्रायमाणस्य ते विश्वं तथा द्योतयतो रवेः ।
न कापि कारणापेक्षा देव वच्मि तथाप्यदः ॥ ८३ ॥
त्वत्प्रसादात् क्षतारिः सन् ससैन्योऽपि तवानुगः ।
आनेष्यामि प्रवृत्तिं च सीताया न चिरादहम् ॥ ८४ ॥
ससुग्रीवः प्रतस्थे च किष्किन्धां प्रति राघवः ।
विराधमनुगच्छन्तं संबोध्य विससर्ज च ॥ ८५ ॥
रामभद्रेऽथ किष्किन्धास्कन्धावारमधिष्ठिते ।
सुग्रीवो विटसुग्रीवमाह्वास्त रणकर्मणे ॥ ८६ ॥
निनदन् विटसुग्रीवोऽप्यागादाह्वानमात्रतः ।
रणाय नालसाः शूरा भोजनाय द्विजा इव ॥ ८७ ॥
दुर्द्धरैश्चरणन्यासैः कम्पयन्तौ वसुन्धराम् ।
तावुभावप्ययुध्येतां मत्ताविव वनद्विपौ ॥ ८८ ॥
रामः सरूपौ तौ दृष्ट्वा कोऽस्मदीयः परश्च कः ।
इति संशयतस्तस्थावुदासीन इव क्षणम् ॥ ८९ ॥
भवत्वेवं तावदिति विमृशन् रघुपुङ्गवः ।
वज्रावर्ताभिधधनुष्टङ्कारमकरोत्ततः ॥ ९० ॥
धनुष्टङ्कारतस्तस्मात्साहसगतेः क्षणात् ।
रूपान्तरकरी विद्या हरिणीव [1]पलायत ॥ ९१ ॥

१) अ ब पलायिता ।

[illegible] विविधो ।
[illegible] ॥ ९२ ॥
[illegible] ।
न हि [illegible] ॥ ९३ ॥
किष्किन्धायां सुग्रीवं रामो राज्ये न्यवेशयत् ।
सुग्रीवादपि [illegible] ॥ ९४ ॥
[illegible] ।
[illegible] ॥ ९५ ॥
सामन्तादपि तत्रागाद् विद्याधरचमूवृतः ।
[illegible] ॥ ९६ ॥
[illegible] ।
सुग्रीवस्य [illegible] ॥ ९७ ॥
विद्याधरचमू[illegible] सचिवः ।
उपेत्य रामं सुग्रीवः प्रणम्यैवं व्यजिज्ञपत् ॥ ९८ ॥
(१)हनूमानाञ्जनेयोऽयं विजयी पावनञ्जयिः ।
सीताप्रवृत्त्यै लङ्कायां त्वदादेशाद् व्रजिष्यति ॥ ९९ ॥
रामेणाज्ञापितो दत्त्वा स्वमभिज्ञानमूर्मिकाम् ।
नभस्वानिव नभसा नभस्वत्तनयो ययौ ॥ २०० ॥
सोऽगात् क्षणेन लङ्कायामुद्याने शिंशपातले ।
सीतामपश्यद्ध्यायन्तीं नाम रामस्य सन्ततम् ॥ १ ॥

(१) क ग घ हनुमानिति सर्वत्र पाठः ।

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

य[illegible]ानन: ।

त्वमप्यप्रतिरूपेण रूपेणानेन सुन्दर ॥ ६ ॥

यद्यप्यनेन दैवेन युवयोरुभयोरपि ।

न व्यधाय्युचितो योगस्तथापि श्रय संप्रति ॥ ७ ॥

उपेत्य भजनीयं तं भजन्तं भज राघवम् ।

अहमन्याय तद्राज्ञस्त्वदाज्ञां सुभ्रु ! बिभ्रतु ॥ ८ ॥

सीताऽप्यवोचदाः पापे पतिद्रूत्यविधायिनि ।

त्वद्भर्तुरिव वीक्षेत मुखं दुर्मुखि कस्तव ॥ ९ ॥

रामस्य पार्श्वे मां विद्धि सौमित्रिमिह चागतम् ।

खरादीनिव हन्तुं द्राक् धवं तव सबान्धवम् ॥ १० ॥

उत्तिष्ठोत्तिष्ठ पापिष्ठे वच्मि नातः परं त्वया ।

सीतया तर्जितैवं सा सकोपा प्रययौ ततः ॥ ११ ॥

(१) ख घ ङ -मेवमूचे ।

अथावतीर्य हनुमान् सीतां नत्वा कृताञ्जलिः।
इत्यूचे देवि जयति दिष्ट्या रामः सलक्ष्मणः॥ १२॥
त्वत्प्रवृत्तिकृते रामेणादिष्टोऽहमिहागमम्।
मयि तत्र गते राम इहैष्यति रिपुच्छिदे॥ १३॥
पतिदूतं हनूमन्तमभिज्ञानसमर्पकम्।
प्रीता सीताऽप्यथाशीर्भिरमोघाभिरनन्दयत्॥ १४॥
हनूमदुपरोधेन रामोदन्तमुदा च सा।
एकोनविंशत्युपवासान्ते व्यधित भोजनम्॥ १५॥
प्राभञ्जनिः प्रभञ्जन इवोद्यानस्य भञ्जने।
प्रवृत्तो दशकण्ठस्य बलालोकनकौतुकात्॥ १६॥
भज्यमानं तदुद्यानं तेन मानमिवोच्चकैः।
उपेत्य दशकण्ठस्याशंसन्नुद्यानपालकाः॥ १७॥
आरक्षा रावणादिष्टास्तं निहन्तुं समागताः।
हता हनूमतैकेन विचित्रा हि रणे गतिः॥ १८॥
आदिष्टो दशकण्ठेन साटोपः शक्रजित्ततः।
तद्वन्धायासुचत्वागान् पाशैः स्वं सोऽप्यबन्धयत्॥ १९॥
नीतश्चाग्रे दशास्यस्य दलयन् मुकुटं पदा।
उत्पपातापास्तपाशस्तडिद्दण्ड इवानिलिः॥ २०॥
हन्यतां गृह्यतां चैष इति जल्पति रावणे।
अनाथामिव सोऽभाङ्क्षीत्तत्पुरीं पाददर्दरैः॥ २१॥
क्रीडां कृत्वैवमुत्पत्य सुपर्ण इव पावनिः।
एत्य रामं नमस्कृत्य तं वृत्तान्तं व्यजिज्ञपत्॥ २२॥

[illegible]

सुग्रीवाद्यास्ततो [illegible] ॥ ५० ॥
सचिवत्वाच्च सौमित्रिस्तद्भावि [illegible] ।
किं सुधा मे रणेनेति राघवो [illegible] ततः ॥ ५१ ॥
राघवं परितो जाते वप्रद्वारचतुष्टये ।
सुग्रीवप्रमुखास्तस्थुरारक्षीभूय ते निशि ॥ ५२ ॥
भामण्डलमथोपेत्य दक्षिणद्वाररक्षणम् ।
पूर्वसंस्तुत इत्यूचे कोऽपि विद्याधराग्रणीः ॥ ५३ ॥
अयोध्याया योजनेषु द्वादशस्वस्ति पत्तनम् ।
कौतुकमङ्गलमिति तत्र द्रोणघनो नृपः ॥ ५४ ॥

कैकेयीभ्रातुरस्यास्ति विशल्या नाम कन्यका ।
तस्याः स्नानाम्भसः स्पर्शे शल्यं निर्याति तत्क्षणात् ॥ ५५ ॥
श्रापत्त्युपास्तप्रमणैस्तत्स्नानपयसोऽप्यते ।
शतशल्यस्तदा जीवेदन्यथा तु न जीवति ॥ ५६ ॥
ततो मत्प्रत्ययाद्रामभद्रं विज्ञपय द्रुतम् ।
कस्यापि दापयादेशं तदानयनहेतवे ॥ ५७ ॥
त्वर्यतां स्वामिकार्याय प्रत्यूषे किं करिष्यथ ।
उदस्ते शकटे हन्त किं कुर्वीत गणाधिपः ॥ ५८ ॥
भामण्डलस्ततो गत्वा तद्रामाय व्यजिज्ञपत् ।
प्रादिशत्सत्कृतं रामस्तमेव हनुमद्युतम् ॥ ५९ ॥
ईयतुस्तौ विमानेनायोध्यां पवनरंहसा ।
प्रासादाग्रे ददृशतुः शयानं भरतं ततः ॥ ६० ॥
भरतस्य प्रबोधाय तौ गीतं चक्रतुः कलम् ।
राजकार्येऽपि राजान उत्थाप्यन्ते ह्युपायतः ॥ ६१ ॥
विबुध्य भरतेनापि दृष्टः पृष्टः पुरो नमन् ।
अवि भामण्डलः कार्यं नात्रस्थास्ति [1]प्ररोचना ॥ ६२ ॥
सेत्स्यत्येतन्मया तत्रेयुपेति भरतस्ततः ।
तद्विमानाधिरूढोऽगात्पुरं कौतुकमङ्गलम् ॥ ६३ ॥
भरतेन द्रोणघनो विशल्यामथ याचितः ।
सहोदाह्य स्त्रीसहस्रसहितां तामदत्त च ॥ ६४ ॥

---

(1) क ख घ -पु ।

भामण्डलोऽप्ययोध्यायां मुक्त्वा भरतमुत्सुकः ।
आययौ सपरीवारविशल्यासंयुतस्ततः ॥ ६५ ॥
ज्वलद्दीपविमानस्थो भीतैः सूर्योदयभ्रमात् ।
क्षणं दृष्टो निजैः सोऽधाद्विशल्यामुपलक्ष्मणम् ॥ ६६ ॥
तया च पाणिना स्पृष्टाल्लक्ष्मणात्तत्क्षणादपि ।
निःसृत्य क्वाप्यगाच्छक्तिर्यष्टिनेव महोरगी ॥ ६७ ॥
तस्याः स्नानाम्भसाऽन्येऽपि रामादेशाद्योधिताः ।
निःशल्या अचिरं सैन्याः पुनर्जाता इव क्षणात् ॥ ६८ ॥
अस्याः स्नानाम्भसा सिक्तुं कुम्भकर्णादयोऽपि ते ।
आनायतामित्युच्चैरादिदेश रघूद्वहः ॥ ६९ ॥
तदानीमेव तैर्दैव प्रव्रज्या जगृहे स्वयम् ।
इति विज्ञपयामासुरागत्या लक्ष्मणाग्रजम् ॥ ७० ॥
[illegible]

तदेवादाय सौमित्री रावणस्याच्छिदच्छिरः ।
निजास्त्रैरप्यवञ्चन्दः पतेत् स्वस्य कदापि हि ॥ ७६ ॥
सीता स्वर्णशलाकेव निर्मला शीलशालिनी ।
रामेण जगृहे लङ्काराज्ये न्यस्तो बिभीषणः ॥ ७७ ॥

शत्रुं निहत्य ससहोदरदारमित्रो
रामो ययावथ निजां नगरीमयोध्याम् ।
उत्पन्नया परकलत्ररिरंसयाऽपि[1]
हत्वा कुलत्रयमगान्नरकं दशास्यः ॥ २७८ ॥

॥ इति सीतारावणकथानकम् ॥ ८९ ॥

तस्मात् ।

लावण्यपुण्यावयवां पदं सौन्दर्यसम्पदः ।
कलाकलापकुशलामपि जह्यात्परस्त्रियम् ॥१००॥

दुस्त्यजामपि परस्त्रियं जह्यात्परिहरेत् । दुस्त्यजत्वे हेतूनाह । लावण्यपुण्यावयवां लावण्यं स्पृहणीयता रूपादिभ्योऽतिरिक्तं तेन पुण्याः पवित्रा अवयवा यस्यास्तां, पदं स्थानं सौन्दर्यसंपदो रूपसम्पदः, कला द्वासप्ततिर्लेखाद्याः स्त्रीजनोचिताः तासां कलापः समूहस्तत्र कुशलां प्रवीणाम् । लावण्यं, रूपं, वैदग्ध्यं च परदाराणां दुस्त्यजत्वे हेतुः । अपि शब्दस्त्रिष्वपि हेतुषु सम्बन्धनीयः ॥ १०० ॥

---

(1) भप श्हि ।

अस्यां हिमनिशि स्थाणुरिव यः स्थास्यति स्थिरम् ।
असौ धन्यो महात्मेति चिन्तयन् स गृहं ययौ ॥ ७ ॥
महामुनिमवज्ञातहिमानीपातवेदनम् ।
तमेव चिन्तयन्नार्द्रमना रात्रिं निनाय सः ॥ ८ ॥
अविभातविभावर्यां गृहीत्वा महिषीस्ततः ।
स ययौ तत्र यत्रासीत् स मुनिः प्रतिमास्थितः ॥ ९ ॥
कल्याणीभक्तिरानस्योपासाञ्चक्रे स तं तदा ।
अहो नैसर्गिकः कोऽपि विवेकस्तादृशामपि ॥ १० ॥
अत्रान्तरे चण्डरोचिरारोहदुदयाचलम् ।
अज्ञया तमिव द्रष्टुं कायोत्सर्गस्थितं मुनिम् ॥ ११ ॥
स नमो अरिहन्ताणमिति वाचमुदीरयन् ।
द्वितीय इव चण्डांशुरुत्पपात नभस्तले ॥ १२ ॥
आकाशगामिनी नूनमियं विद्येति बुद्धितः ।
नमस्कारपदं तं तु सुभगो निदधे हृदि ॥ १३ ॥
जाग्रत्स्वपन्नटंस्तिष्ठन्दिवा निशि गृहे बहिः ।
तदपाठीत् स उच्छिष्टोऽप्येकग्राह्या हि तादृशाः ॥
ततः पप्रच्छ तं श्रेष्ठी विश्वोत्कृष्टप्रभावभृत् ।
प्राप्तं पञ्चपरमेष्ठिनमस्कारपदं कुतः ॥ १५ ॥
अशेषं महिषीपालः कथयामास तत्ततः ।
साधु भोः साधु भद्रेति शंसन् श्रेष्ठी जगाद तम् ॥ १६ ।
आकाशगमने हेतुरसौ विद्या न केवलम् ।
किन्तु हेतुरसावेव गतौ स्वर्गापवर्गयोः ॥ १७ ॥

[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible] स [illegible] दोहदास्तस्याः किञ्चिदिच्छान्वितम् ।
[illegible] यस्य शरीरस्य प्रतिप्रयत्न ॥ १८ ॥
[illegible] जीवरक्षामिच्छाभिधा तत ।
[illegible] जिनार्चाया अभ्यर्हितः प्रयत्न च ॥ १९ ॥
[illegible] यत्र स्वर्ग स्वर्गसोकिका ।
[illegible] प्रयत्न प्रतिनत्ता च ॥ २० ॥
[illegible]नाथन् पद्मपत्रेऽभिनवाभिनुनाथ ।
तदा सर्वाणि तेन [illegible] स्थितानि च ॥ २१ ॥
[illegible] सर्वदिक्षु [illegible] जनापन्नानवम् ।
[illegible] हि [illegible] नियमेन ॥ २२ ॥
[illegible] सर्वाणि [illegible] नानाविधानि अभायुषि ।
[illegible] श्रेष्ठं [illegible] विधिवत्वाञ्चन ॥ २३ ॥
[illegible] पुण्यानि विश्रान्ते च विधिना ।
[illegible] सुधर्मेति [illegible] प्रतिपादिताः ॥ २४ ॥
[illegible] धर्मेषु [illegible] दानैः [illegible] प्रतिदिनं ॥ २५ ॥
इत्यादिदोहदोत्पत्याः पुत्रा मुदितमानसः ।
[illegible] निजप्रासादमुत्तमम् ॥ २६ ॥
[illegible] दिने शुभे तिथौ च ।
[illegible] सुलक्षणम् ॥ २७ ॥
तदा सर्वाणि जाता [illegible] शुभे दिने ।
[illegible] सुदर्शन इति यथार्थं नाम निर्ममे ॥ २८ ॥

वर्धमानः क्रमात्पित्रोर्मनोरथ इवोच्चकैः ।
सुदर्शनो यथौचित्यं जग्राह सकलाः कलाः ॥ ३९ ॥
कन्यां मनोरमां नाम मनोरमकुलाकृतिम् ।
साक्षादिव रमां श्रेष्ठी तेन तां पर्यणाययत् ॥ ४० ॥
सौम्यमूर्तिः स रूपेण पितेव न केवलम् ।
जज्ञे राज्ञोऽपि लोकस्य मनस्ये च गमान्वयात् ॥ ४१ ॥
तस्यां नगर्यां तत्राभून्नृपतेर्हृदयङ्गमः ।
पुरोहितः कपिलः प्रायशोधा विद्यामहोदधिः ॥ ४२ ॥
सह सुदर्शनेनास्य मन्मथेन मधोरिव ।
अजायत परा प्रीतिः सर्वदाऽप्यविनश्वरी ॥ ४३ ॥

[illegible] 7 10 each [illegible] 10 each
[illegible] Vol I, Fasc 1 [illegible] 10 each ... 1[illegible]
*Nyaya Kusumañjali Prakaraṇa Vol. I, Fasc 1 6; Vol II, Fasc 1 [illegible] /10 each ...
[illegible] 10 each ...
[illegible], Fasc 1 [illegible] ...
[illegible], Fasc [illegible] 10 each ...
[illegible] Fasc 1 7 @ /10 each ...
Ditto Part II, Fasc 1 [illegible] /10 each ...
[illegible] (English) Part II, Fasc 1 5 @ /10 each ...
[illegible] Vol I Fasc 1 @ 1 each ...
Fasc 1 [illegible] @ /10 each ... 1
Parāśara Institutes of (English) @ 1 each; Vol II, Fasc 1-6, Vol III, ... 4
[illegible] (English) Fasc 1 5 @ 1 each ... 1
[illegible] Veda Saṃhitā, Vols I, Fasc 1 4 @ /10 each ... 1
IV, 1 6; V, 1 8, @ /10 each ... 1
Sāṅkhya Sūtra Vṛtti, Fasc 1 [illegible] /10 each; Fasc 7 10; II, 1 6; III, 1 7; ... 12
Ditto (English) Fasc 1 4 @ /10 each ... 1
*Sankara Vijaya, Fasc 2 3 @ /10 each ... 7
Śrāddha Kriyā Kaumudī, Fasc 1 6 @ /10 each ... 1
Śraddhā [illegible] (Sanskrit and Tibetan) Fasc 1 5 @ 1 each
Śrauta Sūtra Lāṭyāyana, Fasc 1 9 @ /10 each ... 13
" " Āśvalāyana, Fasc 1 11 @ /10 each ... 2
Suśruta Saṃhitā, (Eng.) Fasc 1 @ 1 each ... 3 8
Suddhikaumudī, Fasc 1-4 @ /10 each ... 1 0
*Taittirīya Brāhmaṇa, Fasc [illegible] @ /10 each ... 3 4
*Taittirīya Prātiśākhya, Fasc 1 3 @ /10 each ... 2 12
*Taittirīya Saṃhitā, Fasc 27 45 @ /10 each ... 2 0
Tāṇḍya Brāhmaṇa, Fasc 7 19 @ /10 each ... 5 10
Tattva Vārtika (English) Fasc 1-6 @ /10 each ... 1 0
Tattva Cintāmaṇi, Vol I, Fasc 1 [illegible] @ 1 4 each ... 6
Vol. IV, Fasc 1, Vol V, Fasc 1 [illegible], Vol II, Fasc 2-10, Vol III, Fasc 1-2, ... 12 8
Tattvārthādhigama Sūtram, Fasc 1-5, Part IV, Vol II, Fasc. 1-12 @ /10 each ... 1 14
Trikāṇḍa-Maṇḍanam, Fasc. 1-3 @ /10 each ... 11 14
Tulsī Satsai, Fasc. 1-5 @ /10 each ... 0 14
Upamiti-bhava-prapañca-kathā, Fasc. 1-11 @ /10 each ... 7 8
[illegible] (Text and English) Fasc. 1-6 @ 1/ each ... 23 12
[illegible] Carita, Fasc 1 @ /10 ... 1 14
[illegible] Kriyā Kaumudī, Fasc 1-6 @ /10 each ... 1 14
[illegible] Purāṇa, Vol. I, Fasc 3-6; Vol. II, Fasc. 1-7, @ /10 each ... 3 2
[illegible] Pārijāta, Fasc. 1-8 Vol. II Fasc. 1 @ /10 each ... 6 14
[illegible]ratnākara, Fasc 1-7 @ /10 each ... 6 0
[illegible] Svayambhu Purāṇa, Fasc. 1-6 @ /10 each ... 0 10
[illegible] Aphorisms of Patanjali, Fasc. 1-5 @ /10 each ... 3 12
[illegible]śāstra of Hemchandra Vol. I. Fasc. 1. (200 pages.) ... 6 14
... 5 10

Tibetan Series.

[illegible] Thi S'in, Fasc. 1-4 @ 1/ each ... 4 6
[illegible]ayin, Vol. I, Fasc 1-5; Vol. II, Fasc 1-3; Vol III, Fasc. 1-6, @ 1/ each ... 3 12
[illegible] dpag bkhri S'iñ (Tib. & Sans. Avadāna Kalpalatā) Vol. I, ... 1 14
1-6; Vol. II Fasc. 1-5 @ 1/ each ... 1 4
... 11 0

Arabic and Persian Series.

[illegible], with Index, (Text) Fasc. 1-13 @ /10/ each ... 4 0
[illegible] (English) Vol I. Fasc. 1-3 @ 1/- each ... 11 0
[illegible], Fasc. 1-22 @ 1/8/ each ... 0
(English) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III,
[illegible]5, @ 2/- each ... 8 2
[illegible], with Index, Fasc 1-37 @ 1/8/ each ... 3 0
(English) Vol. I, Fasc. 1-8; Vol. II, Fasc. 1-4 @ 1/4/ each ... 31 0
[illegible]graphy, by Dr. A. Sprenger, @ /10/ ... 34 0
[illegible], with Index, Fasc. 1-19 @ /10/ each ... 55 8
[illegible] Syria, Fasc. 1-9 @ /10/ each ... 15 0
[illegible] Arabic Books and Manuscripts, 1-2 @ 1/- each ... 0 10
[illegible] the Persian Books and Manuscripts in the Library of the ... 11 14
[illegible] of Bengal. Fasc. 1-3 @ 1/ each ... 5 10
[illegible] Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/[illegible] ... 2 0
[illegible], Fasc. 1-14 @ 1/8/ each ... 3

Fihrist-i-Tūsi. or, Tūsy's list of Shy'ah Books, Fasc. 1–4 @ 1/- each ... Rs.
Futūh-ush-Shām of Wāqidi, Fasc. 1–9 @ /10/ each ...
Ditto of Āzādi, Fasc. 1–4 @ /10/ each ... ...
Haft Asmān, History of the Persian Masnawi, Fasc. 1 @ /12/ each ...
History of the Caliphs, (English) Fasc. 1–6 @ 1/4/ each ...
Iqbālnāmah-i-Jahāngiri, Fasc. 1–3 @ /10/ each 51
Iṣābah, with Supplement, 51 Fasc. @ 1/- each ... ...
Ma'āsir-i-'Ālamgiri, Fasc. 1–6 @ /10/ each ...
Ma'āsir-ul-Umarā, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. II, Fasc. 10-12; Index to Vol. III, Fasc. 11-12 @ 1/ each 35
Maghāzi of Wāqidi, Fasc. 1–5 @ /10/ each ... ...
Muntakhabu-t-Tawārikh, Fasc. 1–15 @ /10/ each ... ...
Ditto (English) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–5 and 3 Indexes; Vol. III, Fasc. 1 @ 1/ each ... ...
Muntakhabu-l-Lubāb, Fasc. 1–19 @ /10/ each ... ...
Nukhbatu-l-Fikr, Fasc. 1 @ /10/ ...
Niẓāmi's Khiradnāmah-i-Iskandari, Fasc. 1–2 @ /12/ each ...
Riyāẓu-s-Salāṭīn, Fasc. 1–5 @ /10/ each ... ...
Ditto (English) Fasc. 1–5 @ 1/ ... ...
Ṭabaqāt-i-Nāṣiri, Fasc. 1–5 @ /10/ each ... ...
Ditto (English) Fasc. 1–14 @ 1/ each ...
Ditto Index ... ...
Tārīkh-i-Firūz Shāhi of Ziyāu-d-dīn Barni Fasc. 1–7 @ /10/ each
Tārīkh-i-Firūzshāhi, of Shams-i-Sirāj Aif, Fasc. 1–6 @ /10/ each
Ten Ancient Arabic Poems, Fasc. 1–2 @ 1/8/ each ... ...
Tuzuk-i-Jahāngiri, (Eng.) Fasc. 1 @ 1/ ... ...
Wīs-o-Rāmīn, Fasc. 1–5 @ /10/ each ... ...
Zafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /10/ each ...

ASIATIC SOCIETY'S PUBLICATIONS.

1. Asiatic Researches. Vols. XIX and XX @ 10/ each ...
2. Proceedings of the Asiatic Society from 1870 to 1904 @ /8/ per No.
3. Journal of the Asiatic Society for 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (9), 1904 (16), @ 1/8 per No. to Members and 2/- per No. to Non-Members.

N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.

4. Journal and Proceedings, N. S., 1905, to date, @ 1/8 per No. to Members and Rs. 2 per No. to Non-Members.

[illegible]

BIBLIOTHECA INDICA:

A

OLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. [illegible]

योगशास्त्रम् ।

स्वोपज्ञविवरणसहितम् ।



THE YOGAŚASTRA,

With the commentary called
SVOPAJNAVIVARANA.

BY

SRI HEMACHANDRĀCHĀRYA.

EDITED BY

ÇĀSTRA VIÇARADA JAINĀCĀRYA

ÇRĪ VIJAYA DHARMA SŪRI.

FASCICULUS III.

Calcutta,

D BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS,
5, Nandakumar Choudhury's 2nd Lane.

AND TO BE HAD OF THE

ASIATIC SOCIETY OF BENGAL, 1, PARK STREET.

1910.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 1, PARK STREET, CACUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, Mr. BERNARD QUARITCH,

11, Grafton Street, New Bond Street, London, W., and Mr. Otto

HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

Complete copies of those works marked with an [illegible]

of the Fasciculi being out of stock.

BIBLIOTHECA INDICA.

Sanskrit Series

		Rs.	
*Advaita Brahma Siddhi, Fasc. 2, 4 @ /10/ each ...	...	1	4
Adraitachintā Kaustubha, Fasc. 1-3 @ /10/ each ...	...	1	[illegible]
*Agni Purāṇa, Fasc. 6–14 @ /10/ each ..	...	5	[illegible]
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–5; Vol. III, Fasc. 1–5, Vol. IV, Fasc. 1–8 @ /10/ each ...	...	11	[illegible]
Aitereya Lochana. ...	...	2	[illegible]
*Aṇu Bhāshya, Fasc. 2–5 @ /10/ each ...	...	2	[illegible]
*Aphorisms of Sāṇḍilya, (English) Fasc. 1 @ 1/ ...	...	1	[illegible]
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1–6 @ /10/ each	...	1	[illegible]
*Atharvana Upanishad, Fasc 1 5 @ /10/ each ...	...	3	[illegible]
Atmatattaviveka, Fasc. I, @ /10/ each ...	...	[illegible]	[illegible]
Açvavaidyaka, Fasc. 1–5 @ /10/ each ...	...	3	[illegible]
Avadana Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–6 @ 1/ each ...	...	13	[illegible]
Bālam Bhaṭṭī, Vol. I, Fasc. 1–2, Vol 2, Fasc. 1 @ /10/ eac[illegible]		1	[illegible]

तं ज्ञापयाधुनापीति तथोक्तः कपिलोऽवदत् ।
अस्माद्दपमहाभस्य श्रेष्ठिनस्तनयः सुधीः ॥ ४८ ॥
एष रूपेण कन्दर्पः कान्त्येन्दुस्तेजसा रविः ।
गाम्भीर्येण महाम्भोधिः क्षमया मुनिसत्तमः ॥ ४९ ॥
दानैकचिन्तामणिरयं गुणमाणिक्यरोहणः ।
प्रियालापसुधाकुण्डं वसुधामुखमण्डनम् ॥ ५० ॥
खन्नूक्ता खलु यथाऽस्य निखिलानपरान् गुणान् ।
गुणचूडामणिः शीलं यस्य न स्खलति क्वचित् ॥ ५१ ॥
कपिला कपिलाच्छ्रुत्वा तद्गुणान् कामविह्वला ।
चक्रेऽनुरागं, चपलाः प्रायेण द्विजयोषितः ॥ ५२ ॥
सुदर्शनाभिसरणोपायं प्रतिदिनं ततः ।
कपिला चिन्तयामास परं ब्रह्मेव योगिनो ॥ ५३ ॥
अपरेद्युर्नृपादेशाद्ग्रामान्तरमुपेयुषि ।
कपिले, कपिलैयाय सुदर्शननिकेतनम् ॥ ५४ ॥
सा मायाविन्यवोचत्तमद्य त्वत्सुहृदो महत् ।
शरीरापाटवं तेन हेतुना नायथाविह ॥ ५५ ॥
अपाटवं त्वद्विरहाद्वपुषो द्विगुणं यतः ।
अतस्त्वामहमाह्वातुं प्रेषिता सुहृदा तव ॥ ५६ ॥
नैतज्ज्ञातं मयेत्युक्त्वा तदैवागात्स तद्गृहम् ।
नान्यमायां हि शङ्कन्ते सन्तः स्वयममायिनः ॥ ५७ ॥
स तत्र प्रविशन्नूचे क्व नाम सुहृदस्ति मे ।
सोवाच गम्यतामग्रे शयानः सुहृदस्ति ते ॥ ५८ ॥

सुदर्शनो निजगदे पुनः [illegible] ॥ ६५ ॥
[illegible] त्वद्गुणं मम ।
ततः प्रभृति मामेष दुनोति मदनज्वरः ॥ ६६ ॥
दिष्ट्या मे चिरकालीया कल्पनाऽपि त्वदागमः ।
भुवो ग्रीष्माभितप्ताया इव मेघसमागमः ॥ ६७ ॥
अद्य नाथासि तन्नाथ ! मन्मथोन्माथविह्वलाम् ।
निजाश्लेषसुधावर्षैराश्वासय चिराय माम् ॥ ६८ ॥
प्रपञ्चः कोऽप्यसावस्या दुर्विचिन्त्यो विधेरपि ।
धिक् स्त्रीरिति विचिन्त्योचे स प्रत्युत्पन्नधीरिदम् ॥ ६९ ॥

पुनां शुक्रमिदं किन्तु [1]पण्डकोऽहमपण्डिते ! ।
मुधा पुरुषवेषेण महोयेनासि पञ्चिता ॥ ७० ॥
ततो विरक्ता सद्यः सा याहि याहीति भाषिणी ।
द्वारमुद्घाटयामास निर्ययौ च सुदर्शनः ॥ ७१ ॥
स्तोकेन मुक्तो नरकद्वारादस्मीति चिन्तयन् ।
श्रेष्ठिसूनुर्द्रुतपदं प्रपेदे निजमन्दिरम् ॥ ७२ ॥
अतिराश्मयः कूटादतिशाकिनयश्छलात् ।
अतिविद्युतश्चापलाद्दारुणाः किमपि स्त्रियः ॥ ७३ ॥
एताभ्यो भीरुरस्मीति प्रत्यश्रौषीद्विमृश्य सः ।
नातः परं परगृहे यास्यामि कचिदेककः ॥ ७४ ॥
निर्मिमाणः स धर्म्याणि कर्माणि शुभकर्मठः ।
सतां मूर्त्त इवाचारो नावद्यं किञ्चिदाचरत् ॥ ७५ ॥
एकदा तु यथाकालं पुरे तस्मिन्नवर्त्तत ।
समग्रजगदानन्दपदमिन्द्रमहोत्सवः ॥ ७६ ॥
सुदर्शनपुरोधाभ्यां सहोद्यानं ययौ नृपः ।
साक्षादिव शरत्कालचन्द्रागस्तिविराजितः ॥ ७७ ॥
इतः कपिलया युक्ताऽभया भूपतिमन्वगात् ।
समारूढा याप्ययाने विमान इव नाकिनी ॥ ७८ ॥
सुदर्शनस्य भार्याऽपि षड्भिः पुत्रैर्मनोरमा ।
तत्रागाद्यानमारुह्य सतीधर्म इवाङ्गवान् ॥ ७९ ॥

---

(1) क पण्डको- ।

तां दृष्ट्वा कपिलाऽपृच्छत्केयं स्वामिनि ! वर्णिनी ।
रूपलावण्यसर्वस्वभाण्डागार इवाग्रत: ॥ ८० ॥
ततस्तामभयाऽवादीन्न ज्ञातेयमपि त्वया ।
सुदर्शनस्य गृहिणी गृहलक्ष्मीरिव स्वयम् ॥ ८१ ॥
तच्छ्रुत्वा विस्मिता स्माह कपिला देवि ! यद्यसौ ।
सुदर्शनस्य गृहिणी तदस्या: कौशलं महत् ॥ ८२ ॥
किमस्या: कौशलमिति राज्ञ्योक्ता साऽब्रवीत्पुन: ।
इयन्ति पुत्रभाण्डानि यदसौ समजीजनत् ॥ ८३ ॥
स्वाधीनपतिका पुत्रानङ्गना जनयेद्यदि ।
तत्किं कौशलमित्युक्ताऽभयया कपिलाऽवदत् ॥ ८४ ॥
एवं देवि ! भवत्येव पतिर्यदि पुमान् भवेत् ।
सुदर्शन: पुनरयं [1]पण्ड: पुरुषवेषभृत् ॥ ८५ ॥
कथमेतत्त्वया ज्ञातं राज्ञ्येति गदिता तत: ।
सा सुदर्शनवृत्तान्तं स्वानुभूतमचीकथत् ॥ ८६ ॥
अभयाऽप्यब्रवीदेवं यद्येवं वञ्चिताऽसि तत् ।
मूढे ! [2]पण्ड: परस्त्रीषु न त्वयं निजयोषिति ॥ ८७ ॥
ततो विलक्षा कपिला प्रललापेत्यसूयिता ।
वञ्चिता यद्यहं मूढा माज्ञाया: किं तवाधिकम् ॥ ८८ ॥
अनयोचि मया मुग्धे ! रागत: पाणिना धृत: ।
द्रवेद्ग्रावाऽपि नि:संज्ञ: ससंज्ञ: किं पुन: पुमान् ॥ ८९ ॥

(१) क पण्ड: ।
(२) क पण्ढ: । ख च पण्ड: ।

मा पूर्व्वमूर्चे कपिलाऽप्येवं मा गर्वमुद्वह ।
गर्वं वहसि चेद्देवि ! रम्यतां तत्सुदर्शनः ॥ ८० ॥
व्याजहाराभया देवी साहङ्कारमिदं ततः ।
छला ' रमितमेवैनं मया विद्धि सुदर्शनम् ॥ ८१ ॥
रमणीभिर्विदग्धाभिः कठोरा वनवासिनः ।
तपस्विनोऽपि रमिताः कोऽसौ मृदुमना गृही ॥ ८२ ॥
रमयामि न यद्येनं प्रविशामि तदाऽनलम् ।
इत्यालपन्त्यावुद्यानं प्रपेदाते चणेन ते ॥ ८३ ॥
'तत्रारमयतां स्वैरं नन्दनेऽप्सरसाविव ।
अभयाकपिले याते स्वं स्वं धाम गते ततः ॥ ८४ ॥
अथ तत्राभया राज्ञी स्वप्रतिज्ञामजिज्ञपत् ।
धात्रिकां पण्डितां नाम सर्वविज्ञानपण्डिताम् ॥ ८५ ॥
पण्डिताऽवोचदाः ! पुत्रि ! न युक्तं मन्त्रितं त्वया ।
अद्योऽद्यापि न जानासि धैर्यशक्तिं महात्मनाम् ॥ ८६ ॥
जिनेन्द्रमुनिशुश्रूषानिष्कम्पीकृतमानसः ।
सुदर्शनः खल्वसौ तत्प्रतिज्ञां धिगिमां तव ॥ ८७ ॥
अन्योऽपि श्रावको नित्यं परनारीसहोदरः ।
किमुच्यते पुनरसौ महासत्त्वशिरोमणिः ॥ ८८ ॥
ब्रह्मचर्यधना नित्यं गुरवो यस्य साधवः ।
कथं कार्येत सोऽब्रह्म गुरुशीलाद्युपासकः ॥ ८९ ॥

(१) ग तत्राथारमतां- ।

सदा गुरुकुलासीना ध्यानमौनाश्रिता सदा ।
अनिवृत्तमभिमन्ये ता स तथं नाम गच्छति । १११ ।
वरं फणिफणारत्नग्रहणाय प्रतिश्रुता ।
कदापि न पुनस्तस्य शीलोल्लङ्घनकर्मणि ॥ १ ॥
अथाभयोचे कथमप्येकवारं समानय ।
तत ऊर्ध्वमहं सर्वं करिष्यामि न ते छलम् ॥ २ ॥
विचिन्त्य चेतसा किञ्चिदित्यथोचत पण्डिता ।
यद्ययं निश्चयस्ते तदस्त्युपायोऽयमेककः ॥ ३ ॥
पर्वाहे शून्यगेहादौ कायोत्सर्गं करोति सः ।
तथास्थितो यदि परमानेतव्योऽन्यथा तु न ॥ ४ ॥
उपायः साधुरेषोऽस्मिन् यतितव्यं त्वयाऽन्वहम् ।
इत्युक्तवत्यां तात्पर्यादेव्यामोमित्युवाच सा ॥ ५ ॥
ततः परं व्यतीतेषु दिवसेषु कियत्स्वपि ।
विश्वानन्दकृत्कौमुदीमहोत्सव उपाययौ ॥ ६ ॥
अथ राज्ञोत्सवोत्सेकविधित्सोत्सुकचेतसा ।
आरक्षकाः समादिष्टाः पटहेनेत्यघोषयन् ॥ ७ ॥
सर्वर्द्ध्या सर्वलोकेन कौमुद्युत्सवमीक्षितुम् ।
अद्योद्यानेऽभिगन्तव्यमिति वो राजशासनम् ॥ ८ ॥
प्रातरेष्यच्चतुर्मासधर्मकर्मक्रियोन्मनाः ।
श्रुत्वा सुदर्शनस्तत्तु विषादादित्यचिन्तयत् ॥ ९ ॥
मनःप्रह्वमिदं प्रातश्चैत्यवन्दनकर्मणि ।
उद्यानगतये चैतत्प्रचण्डं राजशासनम् ॥ १० ॥

क उपायो भवत्वेवं तावदित्यभिचिन्त्य सः ।
समर्थोपायनं भूमिपतिमेवं व्यजिज्ञपत् ॥ ११ ॥
प्रातः पर्वदिनं शुभश्रभावाद्विदधास्यहम् ।
देवार्चादीनि तेनाज्ञोऽनुमेने तन्महीपतिः ॥ १२ ॥
द्वितीयेऽह्नि जिनेन्द्राणां भक्त्या स्नात्रं विलेपनम् ।
पर्चां च रचयंश्चैत्यपरिपाट्यां चचार सः ॥ १३ ॥
ततः सुदर्शनो रात्रौ गृहीत्वा पौषधव्रतम् ।
कायोत्सर्गेण कस्मिंश्चित्तस्थौ नगरचत्वरे ॥ १४ ॥
पण्डिताऽप्यभयामूचे कदाचित्ते मनोरथाः ।
पूर्यन्ते परमुद्यानमद्य त्वमपि मा गमः ॥ १५ ॥
शिरो मे बाधत इति कृत्वोत्तरमिलापतेः ।
तस्थौ राज्ञी प्रपञ्चे हि सिद्धसारस्वताः स्त्रियः ॥ १६ ॥
ततो लेप्यमयीं काममूर्त्तिमाच्छाद्य वाससा ।
याने कृत्वा पण्डिताऽगात्प्रवेष्टुं राजवेश्मनि ॥ १७ ॥
किमेतदिति पृच्छद्भिर्वेत्रिभिः स्खलिता तु सा ।
इत्यूचे पण्डिता भाण्डागारिकी कूटसम्पदाम् ॥ १८ ॥
शरीरकारणाद्देवी नाद्योद्यानं ययौ ततः ।
पूजां स्मरादिदेवानां वेश्मन्येव करिष्यति ॥ १९ ॥
इयं प्रवेक्ष्यते तस्मात्प्रतिमा पुष्पधन्वनः ।
अप्यन्यासां देवतानां प्रवेश्या ह्यद्य मूर्त्तयः ॥ २० ॥
तदिमां दर्शयित्वैव यामीति द्वाःस्थभापिता ।
सा काममूर्त्तिमुद्घाट्यादर्शयच्च जगाम च ॥ २१ ॥

[illegible] ।
[1][illegible] ॥ २२ ॥
[illegible] सुदर्शनं [illegible] ।
[illegible] ॥ २३ ॥
[illegible] ।
अभया संक्षोभयितुमित्यभाषत तं ततः ॥ २४ ॥
कन्दर्पो मां दुनोत्येष निःशङ्कं निशितैः शरैः ।
कन्दर्पप्रतिरूप[2]स्त्वमधिश्रितोऽसि शरणं मया ॥ २५ ॥
शरण्यः शरणायातामार्तां त्रायस्व नाथ ! माम् ।
परकार्ये महीयांसो ह्यकार्यमपि कुर्वते ॥ २६ ॥
आनीतश्छद्मनाऽसीति कार्यः कोपस्त्वया न हि ।
कार्ये त्राणे यदार्त्तानां स्पृश्यते न खलु च्छलम् ॥ २७ ॥
ततः सुदर्शनोऽप्युच्चैः परमार्थविचक्षणः ।
देवताप्रतिमेवास्थात्कायोत्सर्गेण निश्चलः ॥ २८ ॥
पुनरप्यभयाऽवादीद्[3]भावहावमनोहरम् ।
नाथ ! सम्भाषमाणां मां तूष्णीकः किमुपेक्षसे ॥ २९ ॥
व्रतकष्टमिदं मुञ्च मा कृथास्त्वमतः परम् ।
मत्संप्राप्त्या व्रतफलं विद्धि संसिद्धमात्मनः ॥ ३० ॥

---

(१) ख ह्रिस्त्रियश्चतुर्विधेयाङ्गो ।
(२) क ख च -पस्त्वं श्रितोऽसि ।
(३) ख च -तु हावभाव- ।

ताम्यन्तीं याचमानां मां नम्रां मानय मानद ! ।
दैवात्पतितमुत्सङ्गे रत्नं त्यजसि किं नहि ॥ ३१ ॥
'कियदद्यापि सौभाग्यगर्वमुद्घाटयिष्यसि ।
इत्यालपन्त्या अस्पृष्ट तया पाणौ स पाणिना ॥ ३२ ॥
निबिडं मण्डलीभूतपीनोत्तुङ्गस्तनं तया ।
भुजाभ्यां पद्मिनीनालमृदुलाभ्यां स सस्वजे ॥ ३३ ॥
एवं तदुपसर्गेषु निसर्गेण स धीरधीः ।
धर्मध्याने निश्चलोऽभूत् किं चलत्यचलः क्वचित् ॥ ३४ ॥
स दध्यौ चेति चेन्मुच्ये कथञ्चिदप्यहमेतया ।
पारयामि तदोत्सर्गमन्यथाऽनशनं मम ॥ ३५ ॥
घमानिताऽथ घटितभ्रुकुटिः कुटिलाशया ।
प्रभया तं भापयितुमित्यभाषत निर्भया ॥ ३६ ॥
सुमूर्षो ! मूर्ख ! माकार्षीर्मान्याया मेऽव'माननाम् ।
न वेत्सि मानिनी नृणां निग्रहानुग्रहक्षमा ॥ ३७ ॥
मनोभववशाया मे वशमाविश रे जड ! ।
नो चेद्यमवशं यास्यस्यत्र नास्त्येव संशयः ॥ ३८ ॥
इति संरम्भकाष्ठायां साऽऽरुरोह यथा यथा ।
धर्मध्याने महात्माऽसा'वारुरोह तथा तथा ॥ ३९ ॥

---

(१) क किं यद्यद्यापि ।
(२) क -माननम् । ख ग घ -मेव मान्यताम् ।
(३) घ स चारुरोह ।

[illegible]

[illegible] ॥ ४१ ॥

[illegible]

[illegible] ॥ ४२ ॥

[illegible]

[illegible] ॥ ४३ ॥

[illegible]

[illegible] ॥ ४४ ॥

[illegible]

[illegible] ॥ ४५ ॥

उभे मयैव [illegible] अपि ।

शक्यन्ते हि [illegible] न चर्वितुम् ॥ ४६ ॥

ततः परं बलात्कारादेष एवं चकार मे ।

मया च पूत्कृतमन्यदबलानां बलं नहि ॥ ४७ ॥

अस्मिन्निदमसम्भाव्यमिति मत्वा महीपतिः ।

किमेतदिति पप्रच्छ बहुधैव सुदर्शनम् ॥ ४८ ॥

पृष्टोऽपि राज्ञा कृपया किञ्चिन्नोचे सुदर्शनः ।

परतापोपशान्त्यै हि निघृष्टमपि चन्दनम् ॥ ४९ ॥

ततः सम्भावयामास दोषं तस्यापि भूपतिः ।

पारदारिकदस्यूनां तूष्णीकत्वं हि लक्षणम् ॥ ५० ॥

एकस्मिन्दिवसे स कौशाम्बीनगरे प्रति प्रयाति ।
दोषप्रस्तावना जाता प्राय पद निरस्ततताम् ॥ ५१ ॥
श्रावस्तीपुरवासिदोषिणि स पुरोऽन्यायादितस्ततः ।
तत्रस्था विजया राज्ञी जनकस्य दिवौकसाम् ॥ ५२ ॥
स दर्शितवान् सुखं तस्या गर्भेऽपि रक्तचन्दनैः ।
अलंकारवस्त्रा सुगन्ध कर्णे [1]कौशिकमालया ॥ ५३ ॥
अवसाधाय [2]विप्रतस्पृष्टोऽलतः स तेजस्वतः ।
सा च मातेव भाग्यवतीम् अज्ञासिषं पुरे ॥ ५४ ॥
तत्रापराधः कृताना स्वर्भवेऽसौ सुदर्शनः ।
नाशदोषो दृष्यति प्रभुत्वाद्योषणं च ते ॥ ५५ ॥
न मुक्त सर्वथाऽभिलषेष सम्यकतोऽयम् ।
इति लोकप्रवादोऽभूद् ज्ञात्वा प्रभुतस्ततः ॥ ५६ ॥
एवं च वध्यमानोऽभवद् द्वारदेशे स्वयं श्मनः ।
चरन्नेव मनसा च मनोरथयाऽपि च ॥ ५७ ॥
चिन्तयामास सा चैवं सदाचारः पतिर्मम ।
नूपतिश्च प्रियाचारी दुराचारी विधिर्ध्रुवम् ॥ ५८ ॥
इदमप्यसदथवा प्रभवस्य महात्मनः ।
उपस्थितं फलमिदं प्राक्तनाशुभकर्मणः ॥ ५९ ॥

---

(१) क कौशिकमालया ।
(२) ङ विप्रतस्पृष्टोऽलत्यतैश्वतः । ख विप्रतः स्पृष्टोऽलत्यतैश्वतः ।
घ विप्रतः स्पृष्टोऽलत्यतैश्वतः ।

कोऽपि नाम पतीकारस्यापीह भविष्यति ।
निश्चित्येति धारिण्यालजिनानोः साध्वीव्रतः ॥ ६० ॥
कायोत्सर्गेण न स्थित्वा मौनि ग्रामनदीतटा ।
भगवन्तो मम पत्युर्दीक्षमध्यागमनाऽपि न ॥ ६१ ॥
परमस्यापकृत्याय मालिन्यं चिन्तयिष्यथ ।
तस्माऽहं पारयिष्यामि कार्योत्सर्गमिमं खलु ॥ ६२ ॥
अन्ययैवंस्थिताया मे भवत्वनशनं ध्रुवम् ।
धर्मध्वंसे पतिध्वंसे किं जीवन्ति कुलस्त्रियः ? ॥ ६३ ॥
इतश्च न्यधुरारक्षाः शूलिकायां सुदर्शनम् ।
अलङ्घनीया भृत्यानां राजाज्ञा हि भयङ्करा ॥ ६४ ॥
स्वर्णाजासनतां भेजे शूलाऽप्यस्य महात्मनः ।
देवतानां प्रभावेन यमदंष्ट्राऽपि कुण्ठति ॥ ६५ ॥
वधाय तस्य चारक्षैर्दृढं व्यापारितः शितः ।
करवालोऽपतत्कण्ठे पुष्पमाला च सोऽभवत् ॥ ६६ ॥
तद्दृष्ट्वा चकितैरेत्य विज्ञप्तस्तैर्महीपतिः ।
आरुह्य हस्तिनीं वेगाद्ययावथिसुदर्शनम् ॥ ६७ ॥
तमालिङ्ग्य महीपालोऽनुतापादित्यवोचत ।
श्रेष्ठिन्नहि विनष्टोऽसि दिष्ट्याऽऽत्मीयप्रभावतः ॥ ६८ ॥
मया हि तावत्पापेन किं राज्ञाऽसि विनाशितः ।
नाथः सतामनाथानां धर्मो जागर्त्ति सर्वथा ॥ ६९ ॥
स्त्रीणां मायाप्रधानानां प्रत्ययात्त्वां निहन्ति यः ।
अविमृश्यकरः पापो नापरो दधिवाहनात् ॥ ७० ॥

किं च किञ्चिदिदं पापं मत्तोऽभ्यधिककारिणः ।
अप्रकाशमया साधो । तदा पृष्टोऽपि नावदः ॥ ७१ ॥
ततस्तत्पुना राज्ञा कविष्याराधिरोप्य सः ।
नीतो वध्यं क्षपितचन्दनेन विलेपितः ॥ ७२ ॥
तस्यालङ्कारजातञ्च परिधाप्य सुदर्शनः ।
राज्ञा पृष्टो राजपत्न्या यथातथ्यमचीकथत् ॥ ७३ ॥
अथ राज्ञीं प्रति क्रुद्धो भूपतिर्निग्रहोद्यतः ।
सुदर्शनेन आरोप्य शिरः प्रक्षिप्य पादयोः ॥ ७४ ॥
[1]ततः श्रेष्ठी कुम्भिस्कन्धमारोप्य पुरस्सृतः ।
महाविभूत्या मंदिरं नायितो ध्यानशायिना ॥ ७५ ॥
अभयाऽपि तदाकर्ण्योद्बध्यात्मानं व्यपद्यत ।
परद्रोहकराः पापाः स्वयमेव पतन्ति हि ॥ ७६ ॥
पण्डिताऽपि प्रणश्यागात्पाटलीपुत्रपत्तनम् ।
अवसद्देवदत्ताया गणिकायाश्च सन्निधौ ॥ ७७ ॥
तथापि पण्डिता नित्यं तथाऽऽशंसत्सुदर्शनम् ।
दर्शितेऽस्य यथा देवदत्ताऽभूत्सङ्गमोत्सुका ॥ ७८ ॥
सुदर्शनोऽपि संसारविरक्तो व्रतमग्रहीत् ।
उपेत्य गुरोः पार्श्वे रत्नमम्भोनिधेरिव ॥ ७९ ॥
तपःकृशाङ्ग एकाङ्गविहारप्रतिमास्थितः ।
स ग्रामाद्विहरन् प्राप पाटलीपुत्रपत्तनम् ॥ ८० ॥

(१) अ ब अथ ।

भिक्षार्थं पर्यटंस्तत्र दृष्टः पण्डितया च सः ।
कथितो देवदत्तायाः सा तया तमजूहवत् ॥ ८१ ॥
भिक्षाव्याजात्तयाऽऽहूतस्तत्रापि स मुनिर्ययौ ।
विमर्शमविधायैव सापायनिरपाययोः ॥ ८२ ॥
देवदत्ता ततो द्वारं पिधाय तमनेकधा ।
दिनं कदर्थयामास चुक्षोभ स मुनिर्न तु ॥ ८३ ॥
अथ 'मुक्तोऽनया सायमुद्यानं गतवानसौ ।
तत्रापि दृष्टोऽभयया व्यन्तरीभूतया तया ॥ ८४ ॥
कदर्थयितुमारेभे प्राक्कर्मस्मरणादसौ ।
ऋणं वैरं च जन्तूनां नश्येज्जन्मान्तरेऽपि न ॥ ८५ ॥
क्लिश्यमानो बहु तया महासत्त्वः सुदर्शनः ।
आरोहत् क्षपकश्रेणिमपूर्वकरणक्रमात् ॥ ८६ ॥
ततः स भगवान् प्राप केवलज्ञानमुज्ज्वलम् ।
तस्य केवलमहिमा सद्यश्चक्रे सुरासुरैः ॥ ८७ ॥
उद्दिधीर्षुर्भवाज्जन्तून् स चक्रे धर्मदेशनाम् ।
लोकोदयायाभ्युदयस्तादृशानां हि जायते ॥ ८८ ॥
तस्य देशनया तत्राबुद्धान्तान्ये न केवलम् ।
देवदत्ता पण्डिता च व्यन्तरी च व्यबुध्यत ॥ ८९ ॥

स्त्रीसन्निधावपि तदेवमदूषितात्मा
जन्तून् प्रबोध्य शुभदेशनया क्रमेण ।

१. ख ङ मुक्तस्तया साय- । ग मुक्तस्तया गोदय- ।

ध्यानं सुदर्शनमुनिः परमं प्रपेदे
जैनेन्द्रशासनजुषां न हि तद्दुरापम् ॥ १८० ॥

॥ इति सुदर्शनश्रेष्ठिकथानकम् ॥ १०१ ॥

सर्वकर्माणि न पुरुषा एवाधिक्रियन्ते किन्तु स्त्रीणामप्यधिकारवत्त्वं सर्वे तासामप्यङ्गभूतत्वात् अतः पुरुषस्य परदारप्रतिषेधवत् स्त्रीणां परपुरुषगमनं प्रतिषेधयति—

ऐश्वर्यराजराजोऽपि रूपमीनध्वजोऽपि च ।
सीतया रावण इव त्याज्यो नार्या नरः परः ॥ १०२ ॥

ऐश्वर्येण विभवेन, राजराजो धनदः स इव राजराजः, आस्तामितरः । रूपेण सौन्दर्येण, मीनध्वजोऽपि स्मरोऽपि, आस्तामन्यः । त्याज्यः परिहरणीयः, नार्या स्त्रिया, परः स्वपतेरन्यो, नरः पुरुषः, क इव कया, सीतया रावण इव । सीताचरितमुक्तमेव ॥ १०२ ॥

स्त्रीपुंसयोर्द्वयोरपि परकान्तासक्तत्वस्य फलमाह—

नपुंसकत्वं तिर्यक्त्वं दौर्भाग्यं च भवे भवे ।
भवेन्नराणां स्त्रीणां चान्यकान्तासक्तचेतसाम् ॥१०३॥

नपुंसकत्वं षण्ढत्वं, तिर्यक्त्वं तिर्यग्भावः, दौर्भाग्यमनादेयता, भवे भवे जन्मनि जन्मनि, भवेत् जायेत, नराणां स्त्रीणां च । अन्यकान्तासक्तचेतसामिति । श्लिष्टं द्वयोर्विशेषणम् । यदा

पुरुषाणां तदा अन्यस्य कान्ता भार्या अन्यकान्ता तदासक्तचेतसाम्। यदा तु स्त्रीणां तदा अन्यः पत्युरपरः स चासौ कान्तः कामयिता तत्रासक्तचेतसाम् ॥ १०३ ॥

अब्रह्मनिन्दां कृत्वा ब्रह्मचर्यस्यैहिकं गुणमाह—

प्राणभूतं चरित्रस्य परब्रह्मैककारणम्।
समाचरन् ब्रह्मचर्यं पूजितैरपि पूज्यते ॥ १०४ ॥

प्राणभूतं जीवितभूतं, चरित्रस्य देशचारित्रस्य सर्वचारित्रस्य च, परब्रह्मणो मोक्षस्य, एकमद्वितीयं, कारणं समाचरन् पालयन्, ब्रह्मचर्यं जितेन्द्रियस्योपस्थनिरोधलक्षणं पूजितैरपि सुरासुरनरेन्द्रैः न केवलमन्यैः पूज्यते, मनोवाक्कायोपचारपूजाभिः ॥ १०४ ॥

ब्रह्मचर्यस्य पारलौकिकं गुणमाह—

चिरायुषः सुसंस्थाना दृढसंहनना नराः।
तेजस्विनो महावीर्या भवेयुर्ब्रह्मचर्यतः ॥ १०५ ॥

चिरायुषो दीर्घायुषोऽनुत्तरसुरादिवत्पादात्, शोभनं संस्था- [illegible]
नं समचतुरस्र येषां ते सुसंस्थानाः अनुत्तरसुरादिवत् [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

नरः स्मरपराधीनः स्त्रीकण्ठमवलम्बते ।
नात्मनो वेत्त्यसूनद्य स्त्री वा कण्ठावलम्बिनः ॥ ११ ॥
स्त्रीणां भुजलताबन्धं बन्धुरं बुध्यते कुधीः ।
न कर्मबन्धनैर्बद्धमात्मानमनुशोचति ॥ १२ ॥
धत्ते स्त्रीपाणिभिः स्पृष्टो [1]हृष्टो रोमाञ्चकण्टकान् ।
स्मारयन्ति न किं तेऽस्य कूटशाल्मलिकण्टकान् ॥ १३ ॥
कुचकुम्भौ समालिङ्ग्य स्त्रियाः शेते सुखं जडः ।
विस्मृता नूनमेतस्य कुम्भीपाकोद्भवा व्यथा ॥ १४ ॥
मध्यमध्यासते मुग्धा मुग्धाक्षीणां क्षणे क्षणे ।
एतन्मध्यं भवाम्भोधेरिति नैते[2] विविञ्चते ॥ १५ ॥
धिगङ्गनानां त्रिवलीतरङ्गैर्ह्रियते [3]जनः ।
त्रिवलीछद्मना ह्येतन्ननु वैतरणीत्रयम् ॥ १६ ॥
स्मरार्त्तं मज्जति मनः पुंसां स्त्रीनाभिवापिषु ।
प्रमादेनापि किं नेदं साम्याम्भसि मुदास्पदे ॥ १७ ॥
स्मरारोहणनिःश्रेणीं स्त्रीणां रोमलतां विदुः ।
नराः संसारकारायां न पुनर्लोहशृङ्खलाम् ॥ १८ ॥
जघन्या जघनं स्त्रीणां भजन्ति विपुलं मुदा ।
संसारसिन्धोः पुलिनमिति नूनं न जानते ॥ १९ ॥
भजते करभोरूणामूरूनल्पमतिर्नरः ।
अनूरूक्रियमाणं तैः सक्तौ स्वं न बुध्यते ॥ २० ॥

१ प नरो-। (२) प मन।
३ प ख, नेदं।

स्त्रीणां पादैर्हन्यमानमात्मानं बहु मन्यते ।
हताशो न तु जानाति क्षेप्यमाणमधोगतौ ॥ २१ ॥
दर्शनात् स्पर्शनाच्छ्लेषाद् या हन्ति शमजीवितम् ।
हेयोग्रविषनागीव वनिता सा विवेकिभिः ॥ २२ ॥
इन्दुलेखेव कुटिला सन्ध्येव क्षणरागिणी ।
निम्नगेव निम्नगतिर्वर्जनीया नितम्बिनी[1] ॥ २३ ॥
न प्रतिष्ठां न सौजन्यं न दानं नच गौरवम् ।
नच स्वान्यहितं [2]वामाः पश्यन्ति मदनान्धलाः ॥ २४ ॥
निरङ्कुशा नरे नारी तत्करोत्यसमञ्जसम् ।
यत्क्रुद्धाः सिंहशार्दूलव्याला अपि न कुर्वते ॥ २५ ॥
दूरतस्ताः परित्याज्याः प्रादुर्भावितदुर्मदाः ।
विश्वोपतापकारिण्यः करिण्य इव योषितः ॥ २६ ॥
स कोऽपि स्मर्यतां मन्त्रः स देवः कोऽप्युपास्यताम् ।
न येन स्त्रीपिशाचीयं ग्रसते शीलजीवितम् ॥ २७ ॥
शास्त्रेषु श्रूयते यच्च यच्च लोकेषु गीयते ।
संवादयन्ति दुःशीलं तन्नार्य्यः कामविह्वलाः ॥ २८ ॥
संपिण्ड्येवाहिदंष्ट्राग्नियमजिह्वाविषाङ्कुरान् ।
जगज्जिघांसुना नार्य्यः कृताः क्रूरेण वेधसा ॥ २९ ॥
यदि स्थिरा भवेद्विद्युत्तिष्ठन्ति यदि वायवः ।
दैवात्तथापि नारीणां न स्थेम्ना स्थीयते मनः ॥ ३० ॥

(१) ण निरन्तरम् ।
(२) क ख रामाः ।

नरः स्मरपराधीनः स्त्रीकण्ठमवलम्बते ।
नात्मनो वेत्त्यसूनस्य स्त्री वा कण्ठावलम्बिनः ॥ ११ ॥
स्त्रीणां भुजलताबन्धं बन्धुरं बुध्यते कुधीः ।
न कर्मबन्धनैर्बद्धमात्मानमनुशोचति ॥ १२ ॥
धत्ते स्त्रीपाणिभिः स्पृष्टो ¹हृष्टो रोमाञ्चकण्टकान् ।
स्मारयन्ति न किं तेऽस्य कूटशाल्मलिकण्टकान् ॥ १३ ॥
कुचकुम्भौ समालिङ्गय स्त्रियाः प्रेते सुखं जडः ।
विस्मृता नूनमेतस्य कुम्भीपाकोद्भवा व्यथा ॥ १४ ॥
मध्यमध्यासते मुग्धा मुग्धाक्षीणां क्षणे क्षणे ।
एतन्मध्यं भवाम्भोधेरिति नैते² विविञ्चते ॥ १५ ॥
धिगङ्गनानां त्रिवलीतरङ्गैर्ह्रियते ³जनः ।
त्रिवलीछद्मना ह्येतन्ननु वैतरणीत्रयम् ॥ १६ ॥
स्मरार्त्तं मज्जति मनः पुंसां स्त्रीनाभिवापिषु ।
प्रमादेनापि किं नेदं साम्याम्भसि मुदास्पदे ॥ १७ ॥
स्मरोत्तुङ्गनिःश्रेणीं स्त्रीणां रोमलतां विदुः ।
नराः संसारकारायां न पुनर्लोहशृङ्खलाम् ॥ १८ ॥
[illegible] जघनं स्त्रीणां भजन्ति विपुलं मुदा ।
संसारसिन्धोः पुलिनमिति नूनं न जानते ॥ १९ ॥
[illegible] ।
[illegible] ॥ २० ॥

स्त्रीणां पादैर्हन्यमानमात्मानं बहु मन्यते ।
हताशो न तु जानाति नेष्यमाणमधोगतौ ॥ २१ ॥
दर्शनात् स्पर्शनाच्छ्लेषाद् या हन्ति शमजीवितम् ।
हेयाशविषनागीव वनिता सा विवेकिभिः ॥ २२ ॥
इन्दुलेखेव कुटिला सन्ध्येव क्षणरागिणी ।
निम्नगेव निम्नगतिर्वर्जनीया नितम्बिनी[1] ॥ २३ ॥
न प्रतिष्ठां न सौजन्यं न दानं नच गौरवम् ।
नच स्वान्यहितं [2]वामाः पश्यन्ति मदनान्धलाः ॥ २४ ॥
निरङ्कुशा नरे नारी तत्करोत्यसमञ्जसम् ।
यत्क्रुद्धाः सिंहशार्दूलव्याला अपि न कुर्वते ॥ २५ ॥
दूरतस्ताः परित्याज्याः प्रादुर्भावितदुर्मदाः ।
विश्वोपतापकारिण्यः करिण्य इव योषितः ॥ २६ ॥
स कोऽपि स्मर्यतां मन्त्रः स देवः कोऽप्युपास्यताम् ।
न येन स्त्रीपिशाचीयं ग्रसते शीलजीवितम् ॥ २७ ॥
शास्त्रेषु श्रूयते यच्च यच्च लोकेषु गीयते ।
संवादयन्ति दुःशीलं तन्नार्यः कामविह्वलाः ॥ २८ ॥
संपिण्ड्यवाह्निदंष्ट्राग्नियमजिह्वाविषाङ्कुरान् ।
जगज्जिघांसुना नार्यः कृताः क्रूरेण वेधसा ॥ २९ ॥
यदि स्थिरा भवेद्विद्युत्तिष्ठन्ति यदि वायवः ।
दैवात्तथापि नारीणां न स्थेम्ना स्थीयते मनः ॥ ३० ॥

---

(१) ख निरन्तरम् ।
(२) क ख रामाः ।

महामोहध्वान्तोच्चयबहुलपञ्चान्तरजनीम्

विपत्खानिं नारीं परिहरत हे श्राडसुधियः ! ॥४०॥१०५॥

संप्रति मूर्च्छाफलमुपदर्शयंस्तन्नियन्त्रणारूपं पञ्चममणुव्रतमाह—

असन्तोषमविश्वासमारम्भं दुःखकारणम् ।

मत्वा मूर्च्छाफलं कुर्यात्परिग्रहनियन्त्रणम् ॥ १०६ ॥

दुःखकारणमित्यसन्तोषादिभिस्त्रिभिः प्रत्येकमभिसंबध्यते । असन्तोषादीनि दुःखकारणानि मूर्च्छाया गर्डस्य फलत्वेन विज्ञाय मूर्च्छाहेतोः परिग्रहस्य नियन्त्रणं नैयत्यमुपासकः कुर्यादिति योगः । तत्रासन्तोषस्तृष्णभावः, स दुःखकारणम् । मूर्च्छावान् हि बहुभिरपि धनैर्न संतुष्यति, उत्तरोत्तराशाकदर्थितो दुःखमेवानुभवति । परसंपदुत्कर्षश्च हीनसंपदमसन्तुष्टं दुःखाकरोति ।

यदाह—

असन्तोषवतां पुंसामपमानः पदे पदे ।

सन्तोषैश्वर्यसुखिनां दूरे दुर्जनभूमयः ॥ १ ॥

अविश्वासः खल्वपि दुःखकारणम्, अविश्वस्तो ह्यशङ्कनीयेभ्योऽपि शङ्कमानः स्वधनस्य रक्षां कुर्वंश्च क्वचिद्विश्वसिति ।

यदाह —

'उक्खणइ खणइ निहणइ रत्तिं न सुयइ दिश्रावि श्र ससंको ।

लिंपइ ठवेइ सययं लंछियपडिलंछियं कुणइ ॥ १ ॥

---

(१) उत्खनति खनति निहन्ति रात्रिं न स्वपिति दिवाऽपि च सशङ्कः ।

लिम्पति स्थापयति सततं लाञ्छितप्रतिलाञ्छितं करोति ॥ १ ॥

मूर्च्छापरिगतश्चारम्भं प्राणातिपातादिकं प्रतिपद्यते।

तथाहि—

तनयः पितरं पिता च तनयं भ्राता च भ्रातरं हिनस्ति, गृहीतलञ्चश्च कूटसाक्षित्वदायी बह्वनृतं भाषते, बलप्रकर्षात्पथिकजनं मुष्णाति, खनति खात्रं, गृह्णाति ग्रन्थिं, धनलोभात् परदारानभिगच्छति, तथा सेवाकृषिपाशुपाल्यवाणिज्यादि च करोति। मग्नमणवणिगिव नद्यादिषु प्रविश्य काष्ठान्याकर्षति। तत् दुःखकारणं मूर्च्छाफलं ज्ञात्वा परिग्रहनियन्त्रणं कुर्यादिति श्रेयार्थो युक्तिः। उक्तमत्र। मूर्च्छाकारणत्वात् परिग्रहोऽपि मूर्च्छैव; अथवा "मूर्च्छा परिग्रहः" इति सूत्रकारवचनात् मूर्च्छैव परिग्रह इति निश्चयनयमतेनोच्यते, मूर्च्छामन्तरेण धनधान्यादेरपरिग्रहत्वात्।

यदाह—

अपरिग्रह एव भवेद्वस्त्राभरणाद्यलङ्कृतोऽपि पुमान्।
ममकारविरहितः सति ममकारे सङ्गवान्नग्नः॥ १॥

तथा—

बाह्यं ग्रन्थं न विगत् कर्म च नोकर्म नाददानोऽपि।
मूर्च्छावानमूर्च्छोऽपरिग्रहो नान्यथा कश्चित्॥ २॥

[illegible]

यथा ।

(१) जं पि वत्थं व पायं वा कंबलं पायपुंछणं ।
तं पि संजमलज्जट्ठा धारंति परिहरंति य ॥ १ ॥
(२) न सो परिग्गहो वुत्तो नायपुत्तेण ताइणा ।
मुच्छा परिग्गहो वुत्तो इइ वुत्तं महेसिणा ॥ २ ॥

इति पंचमव्रतम् ॥ १०६ ॥

प्रकारान्तरेण परिग्रहनिन्दामाह

परिग्रहमहत्त्वाद्धि मज्जत्येव भवाम्बुधौ ।
महापोत इव प्राणी त्यजेत्तस्मात् परिग्रहम् ॥१०७॥

परिग्रहमहत्त्व इति परिग्रहो धनधान्यादिस्तस्य महत्त्वे निरवधित्वे तथाविधः मज्जत्येव, अवश्यमेव मज्जति, प्राणी शरीरी, भवे संसारे, क इव क, अम्बुधौ समुद्रे महापोत इव महायानपात्रमिव, यथा निरवधिधनधान्यादिभाराक्रान्तः पोतः समुद्रे मज्जति, तथाऽपरिमितपरिग्रहः प्राणी नरकादौ निमज्जति ।

यदाहुः

---

(१) यदपि वस्त्रं वा पात्रं वा कम्बलं वा पादप्रोञ्छनम् ।
तदपि संयमलज्जार्थं धारयन्ति परिहरन्ति च ॥ १ ॥
(२) न स परिग्रह उक्तः ज्ञातपुत्रेण तायिना ।
मूर्च्छा परिग्रह उक्तः इत्युक्तं महर्षिणा ॥ २ ॥

[illegible]

[illegible] ॥ [illegible] ॥

[illegible]

[illegible] पृ[illegible] [illegible] [illegible] [illegible]
[illegible] प्रादुर्भवति । [illegible] ॥

[illegible] इति [illegible] तत् प्रपञ्चयति—

[illegible]ऽपि [illegible] [illegible]: ।
[illegible] [illegible] [illegible]: ॥१०८॥

[illegible] प्रादुर्भवति [illegible]ऽपि [illegible]
[illegible] अपि [illegible]: [illegible]: । [illegible] हि [illegible]-
[illegible] प्रादुर्भवति । [illegible] न [illegible], एवं [illegible]
[illegible] [illegible] [illegible] [illegible] । तदिदं [illegible]-
[illegible] [illegible] । [illegible]ऽपि [illegible] [illegible], [illegible],

1 [illegible] [illegible] [illegible] ।
[illegible] [illegible]ऽपि [illegible] ॥ [illegible] ॥
[illegible] [illegible] [illegible] ।
[illegible]
[illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] ॥
एवं पाठो दृश्यते ।

यत् यस्मान्मुनेरपि आस्तामन्यस्य चलेत् प्रशमावस्थायाश्चवेत् चेतो मनः तेन सङ्गेन आन्दोलितात्मन अस्थिरीकृतात्मनः। मुनिरपि हि सङ्गानङ्गीकुर्वन्मुनित्वाद् भ्रश्यत्येव।

यदाह—

[1]छेओ भेओ वसणं आयासकिलेसभयविवागो अ।
मरणं धम्मव्भंसो अरई अत्थाओ सव्वाइं ॥ १ ॥
[2]दोससयमूलजालं पुव्वरिसिविवज्जियं जई वंतं।
अत्थं वहसि अणत्थं कीस निरत्थं तवं चरसि ॥ २ ॥
[3]वहबंधणमारणसेहणाओ काओ परिग्गहे णत्थि।
तं जइ परिग्गहो च्चिय जइधम्मो तो णणु पवंचो ॥३॥ १०८।

सामान्येन परिग्रहस्य दोषानभिधाय प्रकृतेन श्रावकधर्मेणाभिसंबध्नाति—

संसारमूलमारम्भास्तेषां हेतुः परिग्रहः।
तस्मादुपासकः कुर्यादल्पमल्पं परिग्रहम् ॥११०॥

आरम्भाः प्राण्युपमर्दादयस्ते संसारस्य मूलम्; एतदविवाद-

(१) छेदो भेदो व्यसनं आयासक्लेशभयविपाकाश्च।
मरणं धर्मभ्रंशः अरतिरर्थात् सर्वाणि ॥ १ ॥
(२) दोषशतमूलजालं पूर्वर्षिविवर्जितं यदि वान्तम्।
अर्थं वहसि अनर्थं कस्मान्निरर्थं तपश्चरसि ॥ २ ॥
(३) वधबन्धनमारणसेधनाः काः परिग्रहे न सन्ति।
तद् यदि परिग्रह एव यतिधर्मस्ततो ननु प्रपञ्चः ॥ ३ ॥

सिद्ध, ततः किं तेषामारम्भाणां हेतुः कारणं, परिग्रहः, यत एवं तस्मादुपासकः साधूपासकः परिग्रहं धनधान्यादिकमल्पमल्पं नियतपरिमाणं कुर्यात् ॥ ११० ॥

पुनरपि सिंहावलोकितेन परिग्रहदोषानाह—

मुष्णन्ति विषयास्तेना दहति स्मरपावकः ।
रुन्धन्ति वनिताव्याधाः सङ्गैरङ्गीकृतं नरम् ॥ १११ ॥

सङ्गैर्धनधान्यहिरण्यादिपरिग्रहैरङ्गीकृतं वशीकृतं यथा बहुपरिग्रहं कान्तारगतं पुरुषं चौरा मुष्णन्ति तथा संसारकान्तारगतं विषयाः शब्दादयः संयमसर्वस्वापहारेण मुष्णन्ति निर्धनीकुर्वन्ति । यथा वा बहुपरिग्रहं नंष्टुमशक्नुवन्तं दीप्तो दवाग्निर्दहति तथा संसारकान्तारगतं मन्मथाग्निश्चिन्तादिना दशप्रकारेण विकारेण दहत्युपतापयति । यथा वा बहुपरिग्रहं कान्तारगतं व्याधा लुब्धका धनशरीरलोभेन रुन्धन्ति पलायितुमपि न ददति, तथा भवकान्तारगतं वनिताः कामिन्यो धनार्थिन्यः शरीरभोगार्थिन्यश्च स्वातन्त्र्यवृत्तिनिषेधेन रुन्धन्ति । अपि च । बहुनापि परिग्रहेण काङ्क्षावतां न तृप्तिः सम्भवति अपि त्वसन्तोष एव वर्द्धते ।

यन्मुनयः—

'सुवण्णरुप्पस्स य पव्वया भवे
सिया हु केलाससमा असङ्खया ।

(१) सुवर्णरूप्यस्य च पर्वता भवेयुः खलु कैलाससमा असङ्ख्यकाः ।

[illegible] नाम [illegible] । न सा मन्त्रयुक्तिः [illegible]
[illegible] । [illegible] ।
[illegible] ।

[illegible]

आसीत्पुर्यामयोध्यायां जितशत्रुर्महीपतिः ।
युवराजः सुमित्रोऽभूद्[illegible] ॥ १ ॥
जितशत्रोरभूत्सूनुरजितस्वामितीर्थकृत् ।
सगरश्चक्रवर्ती च सुमित्रस्य महाभुजः ॥ २ ॥
जितशत्रुसुमित्रौ च व्रतं जगृहतुस्ततः ।
राजाऽभूदजितस्वामी सगरो युवराट् पुनः ॥ ३ ॥
प्रवव्राजाजितस्वामी गते काले कियत्यपि ।
राजाऽभूत्सगरश्चक्रवर्ती षट्खण्ड[illegible] ॥ ४ ॥
अथ षष्टिसहस्राणि जज्ञिरे तस्य सूनवः ।
वंशच्छिदः संश्रितानां शाखा इव महातरोः ॥ ५ ॥
ज्येष्ठो जह्नुः कुमारोऽभूत्तेषां सगरजन्मनाम् ।
तेनैकदा तोषितोऽदादैवतेव पिता वरम् ॥ ६ ॥
त्वत्प्रसादेन दण्डादिरत्नैः सह सबान्धवः ।
महीं विचरितुं वाञ्छामीति जह्नुरयाचत ॥ ७ ॥
तद्दत्वा सगरेणापि विज्ञप्तः प्राचलत्ततः ।
जह्नुर्भ्रातृसहस्रैश्च सहसैन्यैश्च मण्डलैः ॥ ८ ॥
वहता सज्जया भक्त्या चार्हच्चैत्यानि पदे पदे ।
सोऽर्चयन् विचरन्नुर्वीं ययावष्टापदं क्रमात् ॥ ९ ॥

समष्टयोजनोच्छ्रायं चतुर्योजनविस्तृतम् ।
आरोहत्सहमोदर्यैर्जह्नुर्मितपरिच्छदः ॥ १० ॥
तत्रैकयोजनायाममर्धयोजनविस्तृतम् ।
त्रिगव्यूत्युन्नतं चैत्यं चतुर्द्वारं विवेश सः ॥ ११ ॥
विम्बानि स्वस्वसंस्थानमानवर्णानि तत्र सः ।
अर्हतामृषभादीनां यथावत्पर्यपूजयत् ॥ १२ ॥
ववन्दे भरतभ्रातृणतस्तूपांश्च पावनान् ।
किञ्चिद्विचिन्त्य श्रद्धालुरुच्चैरेवमुवाच च ॥ १३ ॥
अष्टापदसमं स्थानं मन्ये क्वापि न विद्यते ।
कारयामो वयं यत्र चैत्यमेतदिवापरम् ॥ १४ ॥
मुक्तोऽपि भरतं भुङ्क्ते भरतश्चक्रवर्त्यहो ।
शैले भरतसारेऽस्मिंश्चैत्यव्याजादवस्थितः ॥ १५ ॥
एतदेव कृतं चैत्यमस्माभिश्चेद्विधीयते ।
भविष्यत्पार्थिवैरस्य लुप्यमानस्य रक्षणम् ॥ १६ ॥
ततः सुरसहस्राधिष्ठितमादाय पाणिना ।
स दण्डं भ्रामयामास परितोऽष्टापदाचलम् ॥ १७ ॥
चेले योजनसहस्रं दीर्णा कूष्माण्डवन्मही ।
भ्राम्यता तेन भिन्नानि नागानां भुवनानि च ॥ १८ ॥
तैर्भीतैः शरणं भेजे स्वस्वामी ज्वलनप्रभः ।
स ज्ञात्वाऽवधिनोपेत्य जह्नुमित्यब्रवीत् क्रुधा ॥ १९ ॥
अनन्तजन्तुनिर्घातकारणं किमकारणम् ।
भवद्भिर्विदधे मत्तैर्दारुणं भूमिदारणम् ॥ २० ॥

अजितस्वामिभ्रातृव्यैः पुत्रैः सगरचक्रिणः ।
किमेतत्क्रियते पापमरे रे ! कुलपांसनाः ! ॥ २१ ॥
जह्नुरूचे मयाऽवेत्य चैत्यं त्रातुमदः कृतम् ।
युष्मद्भवनभङ्गोऽभूद्यदज्ञानात्स सह्यताम् ॥ २२ ॥
अज्ञानकृतमागोऽदः सोढं ते मा कृथाः पुनः ।
इत्युदीर्य निजं धाम जगाम ज्वलनप्रभः ॥ २३ ॥
सानुजोऽचिन्तयज्जह्नुः कृतेयं परिखा परम् ।
परिपूरिष्यते पांशुपूरैः कालेन गच्छता ॥ २४ ॥
ततः स कृष्ट्वा दण्डेन गङ्गां तत्राक्षिपद्द्रुतम् ।
उपद्रुतानि तत्तोयैः पुनर्वेश्मानि भोगिनाम् ॥ २५ ॥
क्रुद्धोऽथैत्य समं नागकुमारैर्ज्वलनप्रभः ।
तान् दृष्ट्वा भस्मसाच्चक्रे दवानल इव द्रुमान् ॥ २६ ॥
धिग्धिग्नः स्वामिनः प्लुष्टाः क्लीबानामिव पश्यताम् ।
क्षिपेत्ययोध्यासविधे तस्थुरागत्य सैनिकाः ॥ २७ ॥
स्वं मुखं दर्शयिष्यामो वक्ष्यामोऽदः कथं प्रभोः ।
इति मन्त्रयतां तेषां कोऽप्येत्येत्यवदद् द्विजः ॥ २८ ॥
कथयिष्याम्यदो राज्ञो न च मोहो भविष्यति ।
उत्तरिष्यत्यवद्यं वो मा भूत व्याकुला ननु ॥ २९ ॥
इत्युक्त्वा मृतकं कञ्चिदादायानाथमभ्यगात् ।
राजद्वारे मृतापत्य इव स व्यलपत्ततः ॥ ३० ॥
राज्ञाऽपृच्छि ततोऽवादीदयमेकः सुतो मम ।
दष्टः सर्पेण निश्चेष्टस्तद्देवो जीवयत्वमुम् ॥ ३१ ॥

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible] ॥ ३७ ॥

जितशत्रुः शिवं प्राप सुमित्रश्चात्रिदिवं ततः ।

सर्वसाधारणं मृत्युं स्वसूनोः सहसे न किम् ॥ ३८ ॥

विप्रोऽप्यूचे सत्यमेतत्तथाऽप्येको हि मे सुतः ।

रक्षणीयस्त्वया दीनानाथत्राणं सतां व्रतम् ॥ ३९ ॥

अथोचे चक्रवर्त्त्येवं हंहो ब्राह्मण ! मा मुहः ।

शरणं मरणार्त्तौ हि भववैराग्यभावना ॥ ४० ॥

व्याजहार द्विजोऽप्येवं यद्येवं साधु बुद्ध्यसे ।

महीश ! मा मुहः षष्टिसहस्रसुतमृत्युना ॥ ४१ ॥

ततः स यावद्भूपो हा किमेतदित्यचिन्तयत् ।

तावत्संकेतिताः सैन्याः सर्वमाख्यन्नुपेत्य ते ॥ ४२ ॥

उदन्तेन ततस्तेन दारुणेनाथ मूर्च्छितः।
पपात भूपतिर्भूमौ पर्वतः पविनेव सः॥ ४३॥
लब्धसंज्ञस्ततो राजा रुदित्वा जनवत्क्षणम्।
भेजे संसारवैराग्यं चिन्तयामास चेत्यसौ॥ ४४॥
अन्वयं मण्डयिष्यन्ति प्रीणयिष्यन्ति मां सुताः।
इत्याशा धिग्ममासारं संसारं जानतोऽप्यभूत्॥ ४५॥
द्वित्रैस्त्रिचतुरैः पञ्चषैर्वाऽन्येषां भवेत्कथम्।
पुत्रैस्तृप्तिरियन्मात्रैरपि यन्मे बभूव न॥ ४६॥
तृप्तिं कथममी कुर्युस्तावन्तोऽपि ममात्मजाः।
ईदृग्गतिमकाण्डेऽयुरतृप्ताः प्राणितस्य ते॥ ४७॥

इत्थं विचिन्त्याथ सुतैरतृप्तिकः
स तत्क्षये जह्नुसुतं भगीरथम्।
राज्ये निवेश्याजितनाथसन्निधौ
प्रव्रज्य वव्राज तदक्षयं पदम्॥ ४८॥

॥ इति सगरचक्रिकथानकम्॥

ग्रामः सुघोषो नामाऽभून्मध्ये मगधनीवृतः।
कुचिकर्णाभिधानस्य ग्रामणीस्तत्र विश्रुतः॥ १॥
गवां शतसहस्राणि तस्य संजज्ञिरे क्रमात्।
बिन्दुना बिन्दुना हन्त भ्रियते हि सरोवरम्॥ २॥
गोपालानां पालनाय सोऽर्पयामास गास्ततः।
भव्या मम न ते भव्या इत्ययुध्यन्त ते बहिः॥ ३॥

कुचिकर्णो विभज्यैता आर्पयत् कस्यचित् सिताः।
कृष्णाः कस्यापि कस्यापि रक्ताः पीताश्च कस्यचित् ॥ ४ ॥
पृथक् पृथगरण्येषु गोकुलानि न्यवेशयत्।
भुञ्जानो दधिपयसी सोऽवसत्तेषु च क्रमात् ॥ ५ ॥
अन्वहं वर्द्धयामास गोष्ठे गोष्ठे स गोधनम्।
अतृप्तो दधिपयसोः सुराया इव दुर्मदः ॥ ६ ॥
तस्याभवदथाजीर्णमध ऊर्ध्वं सरद्रसम्।
प्रदीपनान्तःपतितस्येव दाहो महानभूत् ॥ ७ ॥

हा धेनवो हा नवतर्णकाश्च
हा गोवृषा वः क्व कदा च लप्स्ये।
स गोधनैरेवमतृप्त एव
मृत्वाऽथ तिर्यग्गतिमाससाद ॥ ८ ॥

॥ इति कुचिकर्णकथानकम् ॥

[illegible]
[illegible] ॥ १ ॥
[illegible]
[illegible] ॥ २ ॥
[illegible]
[illegible] ॥ ३ ॥
[illegible]
[illegible]

सोऽनुशातो नृपेणोचे श्रुत्वा मत्स्वामिवाचिकम् ।
कोपितव्यं न देवेन न हिताद्याद्भाषिणः ॥ १४ ॥
अवर्णवादो देवस्य यः परम्परया श्रुतः ।
स प्रत्यक्षीकृतो ह्यद्य न निर्मूला जनश्रुतिः ॥ १५ ॥
अन्यायतोऽर्थलेशोऽपि राज्ञः सर्वयशश्छिदे ।
अप्येकं तुम्बिकाबीजं गुडभारान् विनाशयेत् ॥ १६ ॥
आत्मभूताः प्रजा राज्ञो राजा न च्छेत्तुमर्हति ।
क्रव्यादा अपि न क्रव्यं निजमश्नन्ति जातुचित् ॥ १७ ॥
प्रजाः पुषाण पुष्णन्ति पोषिता एव ता नृपम् ।
वशाऽपि न ह्यनड्वाही दत्ते दुग्धमपोषिता ॥ १८ ॥
सर्वदोषप्रसूर्लोभो लोभः सर्वगुणापहः ।
लोभस्त्यज्यतामेतत्त्वद्धितो वक्ति मत्प्रभुः ॥ १९ ॥
नन्दोऽपि तद्गिरा दावदग्धभूरिव वारिणा ।
अत्युष्णबाष्पममुचद् दग्धुकाम इवाशु तम् ॥ २० ॥
राजदौवारिको जातु न वध्य इति नन्दराट् ।
उत्थाय गर्भवेश्मान्तः सशिरोऽर्त्तिरिवाविशत् ॥ २१ ॥
नासौ सदुपदेशानां जवासक इवाम्भसाम् ।
योग्य इत्यामृशन् दूतोऽप्यगात् स्वस्वामिनोऽन्तिकम् ॥२२॥
नन्दोऽप्यन्यायपापोत्थैर्वेदनादानदारुणैः ।
रोगैरिहापि संप्राप्तः परमाधार्मिकैरिव ॥ २३ ॥
वेदनाभिर्दारुणाभिः पीड्यमानो यथा यथा ।
नन्दश्चक्रन्द, लोकोऽभूज्जातानन्दस्तथा तथा ॥ २४ ॥

पच्यमानो भृज्यमानो दह्यमान इव व्यथाम् ।
अवाप नन्दः, स्तोकं हि सर्वं तादृक्षपाप्मनः ॥ २५ ॥

ये भूतले विनिहिता गिरिवच्च कूटो-
भूताश्च येऽद्य मम काञ्चनराशयस्ते ।
कस्य स्युरित्यभिरटणन्नवितृप्त एव
मृत्वा निरन्तभवदुःखमवाप नन्दः ॥ २६ ॥

॥ इति नन्दकथानकम् ॥ ११२ ॥

अपि च योगिनामपि परिग्रहमुपगृह्णतां लाभमिच्छतां मूलच्छतिरायातीत्याह—

तपःश्रुतपरीवारां शमसाम्राज्यसंपदम् ।
परिग्रहग्रहग्रस्तास्त्यजेयुर्योगिनोऽपि हि ॥ ११३ ॥

योगो रत्नत्रयप्राप्तिस्तद्वन्तो योगिनस्तेऽपि, आसतां पृथग्जनाः; परिग्रह एव ग्रहस्तद्ग्रस्ताः पिशाचकिन इव शमसाम्राज्यसंपदं स्वाधीनामपि त्यजेयुः, शमस्य वितृष्णतायाः, साम्राज्यं परमैश्वर्यं, तद्रूपा सम्पत् ताम् । साम्राज्यं च नैकाकिनो भवतीत्याह— तपःश्रुतपरीवारां तपश्चारित्रं, श्रुतं सम्यग्ज्ञानं, ते एव परीवारः परिच्छदो यस्यास्तां तथाविधाम् । शमसाम्राज्यसंपदं स्वाधीनां परित्यज्य मुग्धार्थिनः परिग्रहलवलुब्धा मूलमुच्छेद्य लाभमिच्छन्तीत्यर्थः ॥ ११३ ॥

इदानीमसन्तोषफलप्रदर्शनपूर्वकं सन्तोषफलमाह -

असन्तोषवतः सौख्यं न शक्रस्य न चक्रिणः ।
जन्तोः सन्तोषभाजो यदभयस्येव जायते ॥ ११५ ॥

असन्तोषवतोऽसन्तुष्टस्य तत्फलभूतं सौख्यं न शक्रस्य देवराजस्य, नापि चक्रिणो मनुजराजस्य, यतोऽस्य सन्तोषवतो जन्तोर्जायते । यथेत्याह अभयस्य अभयकुमारस्य श्रेणिकराजपुत्रस्य । स हि पित्रोपनीतमपि राज्यं परित्यज्य श्रमणसाम्राज्यसम्पदं परिगृहीतवानिति ।

कथानकं च सम्प्रदायगम्यम् । स चायम्

अस्तीह भरतक्षेत्रे केदारमिव सुन्दरम् ।
विशालशालिकमलं नाम्ना राजगृहं पुरम् ॥ १ ॥
तत्र प्रसेनजिन्नाम [1]नमिताशेषभूपतिः ।
पतिर्वाराशिवन्नद्योऽभूत्पृथिवीपतिः ॥ २ ॥
श्रीमत्पार्श्वजिनाधीशशासनाम्भोजषट्पदः ।
सम्यग्दर्शनपुण्यात्मा सोऽणुव्रतधरोऽभवत् ॥ ३ ॥
ओजसा तेजसा कान्त्या जितामरकुमारकाः ।
कुमारास्तस्य बहवो बभूवुः श्रेणिकादयः ॥ ४ ॥
को राज्ययोग्य इत्येषां परीक्षार्थं महीपतिः ।
एकत्र पायसस्थालान्यशनार्थं कदाऽर्पयत् ॥ ५ ॥

(१) घ प नामिता-।

ततो भोक्तुं प्रवृत्तानां कुमाराणाममोचयत् ।
व्याघ्रानिव व्यात्तवक्त्रान् सारमेयान् स सारधीः ॥ ६ ॥
कुमारा द्रुतमुत्तस्थुरापतत्सु ततः श्वसु ।
एकस्तु श्रेणिकस्त[illegible]ौ धियां धाम तथैव हि ॥ ७ ॥
सोऽन्यस्थालात्पायसान्नं स्तोकं स्तोकं शुनां ददौ ।
यावल्लिलिहिरे श्वानस्तावच्च बुभुजे स्वयम् ॥ ८ ॥
येन केनाप्युपायेन निषेधिष्यत्यरीनयम् ।
भोक्ष्यते च स्वयं पृथ्वीं राजा तेनेति रञ्जितः ॥ ९ ॥
राजा पुनः परीक्षार्थं सुतानामन्यदा ददौ ।
मोदकानां करण्डांश्च पयस्कुम्भांश्च मुद्रितान् ॥ १० ॥
तथा मुद्रामभञ्जन्तो भुञ्जीध्वं मोदकानमून् ।
पयः पिबत मा कार्ष्ट छिद्रमित्यादिशन्नृपः ॥ ११ ॥
विना श्रेणिकमेतेषां कोऽपि नाभुङ्क्त नापिबत् ।
बुद्धिसाध्येषु कार्येषु [illegible]ऽपि किम् ? ॥ १२ ॥
चालयित्वा चालयित्वा श्रेणिकोऽथ करण्डकम् ।
बुभुजे मोदकक्षोदं शलाकाविवरच्युतम् ॥ १३ ॥
[illegible] ।
[illegible] ॥ १४ ॥
[illegible] ।
[illegible] ॥ १५ ॥
[illegible]
[illegible] ॥ १६ ॥

किंतन्तुकर्णस्थितां नृपेण श्रेणिकोऽवदत् ।
कथयस्व मिष्टं भक्ष्यं प्रथमं पृथिवीभुजाम् ॥ १७ ॥
भक्ष्याः प्रान्ते नृपाणां हि मगधात्माङ्गजं मतेन् ।
रत्नधाम्ना सभापालैः स्वाभित्वादिवमाभवन ॥ १८ ॥
ततः प्रसन्नान्निर्वाह्यानन्त्रविसंसोपतिः ।
तस्य पीतो ददौ भण्डागार कृत्यपराभिधान् ॥ १९ ॥
राज्यार्थमानिनां मैनं राज्यार्थं भूनवाऽपर्य ।
ग्रामपुरं तथा ग्रामान्श्रेणिको ह्यतर्पयत् ॥ २० ॥
पृथक् पृथक् कुमाराणां ददौ देशान्चरक्षरः ।
न किंचिच्छ्रेणिकस्यादु राज्यमस्यायतामिति ॥ २१ ॥
ततोऽतिमानी स पुत्रानुजः काननादिव ।
निःसृत्य श्रेणिकोऽगच्छत्पूर्वं वेणातटं पुरम् ॥ २२ ॥
तत्र च प्रविशन् भद्राभिधस्य श्रेष्ठिनोऽथ सः ।
आपणं जातोदयं मूर्त्तिमिवोपाविशदापणे ॥ २३ ॥
तदा च नगरे तस्मिन् विपुलः कश्चिदुत्सवः ।
तस्मिन्दिव्यदुकूलाङ्गरागपौराऽऽकुलोऽभवत् ॥ २४ ॥
प्रभूतक्रायकैरासीत् स श्रेष्ठी व्याकुलस्तदा ।
कुमारोऽप्यार्पयद्दृष्ट्वाऽर्थं पुटापुटिकादिकम् ॥ २५ ॥
द्रव्यं कुमारमाहात्म्याच्छ्रेष्ठी भूयिष्ठमार्जयत् ।
पुण्यपुंसां विदेशेऽपि सहचर्यो ननु श्रियः ॥ २६ ॥
अव्याचितपुण्यस्त्वं कस्यातिथिरसीत्यथ ।
श्रेणिकः श्रेष्ठिना पृष्टो भवतामित्यभाषत ॥ २७ ॥



[1]वयं पाण्डुरकुड्या गोपाला राजगृहे पुरे ।
आह्वानमन्त्रप्रतिमान्यक्षराणीति चार्पयत् ॥ ३८ ॥
माऽन्या तातस्य रोगार्त्तेर्मदर्त्तिर्भूदिति द्रुतम् ।
उष्ट्रीं श्रेणिक आरुह्य ययौ राजगृहं पुरम् ॥ ३९ ॥
तं दृष्ट्वा मुदितो राजा हर्षनेत्राम्बुभिः समम् ।
राज्येऽभ्यषिञ्चद्विमलैः सुवर्णकलशाम्बुभिः ॥ ४० ॥
राजाऽपि संस्मरन् पार्श्वं जिनं पञ्चनमस्क्रियाम् ।
चतुःशरणमापन्नो विपद्य त्रिदिवं ययौ ॥ ४१ ॥
विश्वं विश्वम्भराभारं बभार श्रेणिकस्ततः ।
तेन सा गुर्विणी मुक्ता गर्भं नन्दाऽपि दुर्वहम् ॥ ४२ ॥
तस्या दोहद इत्यासीद्गजारूढा शरीरिणाम् ।
महाभूत्योपकुर्वाणा भवाम्यभयदा यदि ॥ ४३ ॥
विज्ञपय्याथ राजानं तत्पित्राऽपूरि दोहदः ।
पूर्णे काले च साऽसूत प्राची रविमिवार्भकम् ॥ ४४ ॥
दोहदार्थानुसारेण तस्याथ दिवसे शुभे ।
चकाराभयकुमार इति मातामहोऽभिधाम् ॥ ४५ ॥
स क्रमाद्ववृधे विद्या निरवद्याः पपाठ च ।
अष्टवर्षोऽभवद्दक्षो द्वासप्तत्यां कलासु च ॥ ४६ ॥

---

(१) श्रीचन्द्रतिलकोपाध्यायकृते, अभयकुमारचरिते:—
"यतोऽयमर्थः पाण्डुरकुड्याः धवलभित्तयः ।
गोपालाः पृथिवीपाला गोशब्दोऽवनिवाचकः" ॥ १ ॥ इति ।

सवया: कलहे कोऽपि तं कोपादित्यतर्जयत् ।
किं त्वं जल्पसि यस्याहो पिता विज्ञायते नहि ॥ ४७ ॥
ऊचेऽभयकुमारस्तं ननु भद्र: पिता मम ।
पिता भद्रो भवन्मातु: प्रत्युवाचेति सोऽभयम् ॥ ४८ ॥
नन्दां प्रत्यभयोऽप्यूचे मात: ! को मे पितेत्यथ ।
अयं तव पिता भद्र: श्रेष्ठी नन्देत्यचीकथत् ॥ ४९ ॥
भद्रस्तव पिता शंस मदीयं पितरं ननु ।
पुत्रेणेत्युदिता नन्दा निरानन्देदमब्रवीत् ॥ ५० ॥
देशान्तरादागतेन परिणीताऽस्मि केनचित् ।
मम च त्वयि गर्भस्थे तमीयु: केचिदौष्ट्रिका: ॥ ५१ ॥
रह: स किञ्चिदुक्त्वा तै: सहैव क्वचिदप्यगात् ।
अद्यापि तं न जानामि कुतस्त्य: कश्चिदित्यहम् ॥ ५२ ॥
स यान् किञ्चिज्जजल्प त्वामिति पृष्टाऽभयेन सा ।
अक्षराण्यर्पितान्येतानीति पत्रमदर्शयत् ॥ ५३ ॥
तद्विभाव्याभय: प्रीतोऽब्रवीन्नाम पिता नृप: ।
पुरे राजगृहे तत्र गच्छामो ननु संप्रति ॥ ५४ ॥
आपृच्छ्य श्रेष्ठिनं भद्रं सामग्रीसंयुतस्तत: ।
नन्दनो नन्दया सार्धं ययौ राजगृहं पुरम् ॥ ५५ ॥
मातरं बहिरुद्याने विमुच्य सपरिच्छदाम् ।
तत्र [illegible] प्रविवेशाभय: पुरे ॥ ५६ ॥
इतश्च [illegible] श्रेणिकभूभुजा ।
[illegible] ॥ ५७ ॥

मन्त्रिपञ्चशतीं पूर्णां कर्त्तुं नरपतिस्ततः ।
लोके गवेषयामास कञ्चिदुत्कृष्टपूरुषम् ॥ ५८ ॥
ततश्च तत्परीक्षार्थं शुष्ककूपे निजोर्मिकाम् ।
प्रचिक्षेप क्षितिपतिर्लोकानित्यादिदेश च ॥ ५९ ॥
आदास्यति करेणैतामूर्मिकां यस्तटस्थितः ।
तस्य धीकौशलक्रीता[1] मदीया मन्त्रिधुर्यता ॥ ६० ॥
तेऽप्यूचुर्यदशक्यानुष्ठानमस्माद्दृशामिदम् ।
ताराः करेण यः कर्षेत् स इमामूर्मिकामपि ॥ ६१ ॥
ततोऽभयकुमारोऽपि संप्राप्तस्तत्र सस्मितम् ।
ऊचे किं गृह्यते नैषा, किमेतदपि दुष्करम् ॥ ६२ ॥
तं दृष्ट्वा [2]च जना दध्युः कोऽप्यसावतिशायिधीः ।
समये मुखरागो हि नृणामाख्याति पौरुषम् ॥ ६३ ॥
ऊचुश्च ते महाभाग ! त्वं गृहाणेत्यमूर्मिकाम् ।
ऊर्मिकाकर्षणपणां धुर्यतां चैषु मन्त्रिषु ॥ ६४ ॥
ततोऽभयकुमारस्तामूर्मिकां कूपमध्यगाम् ।
आर्द्रगोमयपिण्डेन निजघानोपरि स्थितः ॥ ६५ ॥
प्रक्षिप्योपरि तत्कालं ज्वलन्तं तृणपूलकम् ।
सद्यः संशोषयामास गोमयं तन्महामतिः ॥ ६६ ॥
नन्दाया नन्दनः सद्यः कारयित्वाऽथ सारणिम् ।
वारिणाऽपूरयत् कूपं विस्मयेन च तं जनम् ॥ ६७ ॥

(१) क ख ग ड -क्रीती । (२) ख च ते ।

तन्नोमयं श्रेणिकस्तु: करेण तरसाऽऽददे।
धीमद्भि: सुप्रयुक्तस्य किमुपायस्य दुष्करम्? ॥ ६८ ॥
तस्मिन् स्वरूपे चारचैर्विज्ञप्ते जातविस्मयः।
नृपोऽभयकुमारं द्रागाजुहावात्मसन्निधौ ॥ ६९ ॥
अभयं श्रेणिकः पुत्रप्रतिपत्त्याऽथ सस्वजे।
बन्धुरज्ञायमानोऽपि दृष्टो मोदयते मनः ॥ ७० ॥
कुतस्त्वमागतोऽसीति पृष्टः श्रेणिकभूभुजा।
वेणातटादागतोऽहमिति चाभिदधेऽभयः ॥ ७१ ॥
राजाऽपृच्छद्भद्रमुख! किं भद्र इति विश्रुतः।
श्रेष्ठी तत्रास्ति तस्यापि नन्दानाम्नी च नन्दना ॥ ७२ ॥
अस्त्येवं सम्यगित्युक्ते तेन भूयोऽपि भूपतिः।
ऊचे नन्दोदरिण्यासीत्किमपत्यमजायत? ॥ ७३ ॥
अथाख्यत्कान्तदन्तांशुश्रेणिः श्रेणिकसूरिदम्।
देवाभयकुमाराख्यं सा नन्दनमजीजनत् ॥ ७४ ॥
किंरूपः किंगुणः सोऽस्तीत्युदिते सति भूभुजा।
ऊचेऽभयः स एवाहं स्वामिन्नस्मीति चिन्त्यताम् ॥ ७५ ॥
परिष्वज्याङ्कमारोप्य समाघ्राय च मूर्द्धनि।
स्नेहात् स्नपयितुमिव सिषेच नयनाम्बुभिः ॥ ७६ ॥
कुशलं वत्स! ते मातुरिति पृष्टे महीभुजा।
इति विज्ञपयामास बद्धाञ्जलिपुटोऽभयः ॥ ७७ ॥
अनुस्मरन्ती भृङ्गीव त्वत्पादाम्भोजसङ्गमम्।
स्वामिन्नायुष्मती मेऽम्बा बाह्योद्यानेऽस्ति संप्रति ॥ ७८ ॥

ततो नन्दां समानेतुममन्दानन्दकन्दलः ।
न्ययुङ्क्त सर्वसामग्रीमग्रेकृत्य नृपोऽभयम् ॥ ७९ ॥
ततः स्वयमपि प्राज्योत्कण्ठोल्लिखितमानसः ।
नन्दामभिययौ राजा राजहंस इवाब्जिनीम् ॥ ८० ॥
शिथिलीभूतवलयां कपोललुलितालकाम् ।
अनञ्जनाक्षीं कबरीधारिणीं मलिनांशुकाम् ॥ ८१ ॥
तनोस्तनिम्ना दधतीं द्वितीयेन्दुकलातुलाम् ।
ददर्श राजा सानन्दो नन्दामुद्यानवासिनीम् ॥८२॥(युग्मम्)
नन्दामानन्द्य नृपतिर्नीत्वा च स्वं निकेतनम् ।
पट्टराज्ञीपदेऽकार्षीत् सीतामिव रघूद्वहः ॥ ८३ ॥
भक्तितः पितरि स्वस्य पदातिपरमाणुताम् ।
मन्वानः साधयामास दुःसाधान् भूभुजोऽभयः ॥ ८४ ॥
अन्यदोज्जयिनीपुर्याश्चण्डप्रद्योतभूपतिः ।
चलितः सर्वसामग्र्या रोद्धुं राजगृहं पुरम् ॥ ८५ ॥
प्रद्योतो बद्धमुकुटाश्चतुर्दश परे नृपाः ।
तत्रायान्तो जनैर्दृष्टाः परमाधार्मिका इव ॥ ८६ ॥
पादूपटप्लुतैरश्वैः पाटयन्निव मेदिनीम् ।
आगच्छन् प्रणिधिभ्योऽथ शुश्रुवे श्रेणिकेन सः ॥ ८७ ॥
किञ्चिच्च चिन्तयामास प्रद्योतोऽद्य समापतन् ।
क्रूरग्रह इव क्रुद्धः कार्यो हतबलः कथम् ? ॥ ८८ ॥
ततोऽभयकुमारस्यौत्पत्तिक्यादिधियां निधेः ।
नृपतिर्मुखमैक्षिष्ट सुधामधुरया दृशा ॥ ८९ ॥

यथार्थनामा राजानमभयोऽथ व्यजिज्ञपत् ।
का चिन्तोज्जयिनीशोऽद्य भूयाद्युद्धातिथिर्मम ॥ ९० ॥
यदि वा 'बुद्धिसाध्येऽर्थे शस्त्राशस्त्रिकथा वृथा ।
बुद्धिमेव प्रयोक्ष्ये तद्बुद्धिर्हि जयकामधुक् ॥ ९१ ॥
अथ बाह्येऽरिसैन्यानामावासस्थानभूमिषु ।
लोहसंपुटमध्यस्थान् दीनारान् स न्यचीखनत् ॥ ९२ ॥
प्रद्योतनृपतेः सैन्यैस्ततो राजगृहं पुरम् ।
पर्यवेष्ट्यत भूगोलः पयोधिसलिलैरिव ॥ ९३ ॥
अथेत्थं प्रेषयामास लेखं प्रद्योतभूपतेः ।
अभयो गुप्तपुरुषैः परुषेतरभाषिभिः ॥ ९४ ॥
शिवादेवीचेल्लणयोर्भेदं नेक्षे मनागपि ।
तन्मान्योऽसि शिवादेवीसम्बन्धेनापि सर्वदा ॥ ९५ ॥
तदवन्तीश ! वच्मि त्वामेकान्तहित'काङ्क्षया ।
सर्वे श्रेणिकराजेन भेदितास्तव भूभुजः ॥ ९६ ॥
दीनाराः प्रेषिताः सन्ति तेभ्यस्तान् कर्तुमात्मसात् ।
ते तानादाय बद्ध्वा त्वामर्पयिष्यन्ति मत्पितुः ॥ ९७ ॥
तदावासेषु दीनारा निखाताः सन्ति तत्कृते ।
खानयित्वा पश्य को वा दीपे सत्यग्निमीक्षते ॥ ९८ ॥
विदित्वैवं स भूपस्यैकस्यावासमचीखनत् ।
लब्धास्तत्र च दीनारास्तान् दृष्ट्वाऽऽशु पलायत ॥ ९९ ॥

---

(१) क ग ङ बुद्ध- ।
(२) क ग ख -काङ्क्षया ।

नष्टः तत्र तु नगरे त्रिलोकाधिपतिस्थितम् ।
स्वच्छन्दाद्यादृष्टे सार्धं समुपेत्य: समागताः ॥ १०० ॥
नागरिकजन जीवन वायुवाजेन नाजिना ।
ततः प्रद्योतनृपतिः कश्चित स्वां पुरीं ययौ ॥ १ ॥
ये चतुर्दश नृपाला ये चान्येऽपि महारथाः ।
तेऽपि तेऽशु: कानकानां हर्त सैन्यं स्वनायकम् ॥ २ ॥
अवंतिपतिर्नर्मगन्धतलग्नेव मौलिभिः ।
राजाभ्यनुज्ञानादेऽपायपरभ्राजिनीं पुरीम् ॥ ३ ॥
चक्रवर्तेव सार्थं च नरम्यतारिणः ।
प्रत्यार्पितः समायश्च तेरथाज्ञायिनोपतिः ॥ ४ ॥
कदाचिदृषेऽवन्तीशो सभ्यसमसमर्पणः ।
योऽर्थवल्भयं वक्ता मम सम्यक्त्वं स किम् ॥ ५ ॥
पतायं चतुमलिप्ता काऽथेका गणिका ततः ।
व्यजिभपदवन्तीशमनसमोऽह कर्माणि ॥ ६ ॥
नामादिदेशावन्तीशो यथेनमनुतिष्ठ तत् ।
कार्याण्यर्थादिसाध्यं मूषि किं तव संप्रति ? ॥ ७ ॥
सा च दर्श्यो यदसयाँ नौपार्थैर्गृष्टतोऽपरैः ।
चर्मण्यभ्र तदादाय साधयामि समीक्षितम् ॥ ८ ॥
अयाचत ततः द्वे द्वितीयवयसो स्त्रियौ ।
तं तदैवार्पयद्राजा ददौ द्रव्यं च पुष्कलम् ॥ ९ ॥
धृतादराः प्रतिदिनमुपास्योपास्य संयताः ।
चम्पुरकपटप्राप्तास्तिस्रोऽपि व्रतप्रसुताः ॥ १० ॥

तास्तिस्रोऽपि ततो जग्मुः श्रेणिकालङ्कृतं पुरम् ।
जगत्त्रयीं वञ्चयितुं मायाया इव मूर्त्तयः ॥ ११ ॥
बाह्योद्याने कृतावासा सा पण्यस्त्रीमतल्लिका ।
पत्तनान्तर्ययौ चैत्यपरिपाटीचिकीर्षया ॥ १२ ॥
सा विभूत्याऽतिशायिन्या चैत्ये नृपतिकारिते ।
प्रविवेश समं ताभ्यां कृत्वा नैषेधिकीत्रयम् ॥ १३ ॥
मालवकैशिकीमुख्यभाषामधुरया गिरा ।
देवं वन्दितुमारेभे सपर्य्यां विरचय्य सा ॥ १४ ॥
तत्राभयकुमारोऽपि ययौ देवं विवन्दिषुः ।
आत्मतृतीयां तामग्रे वन्दमानां ददर्श च ॥ १५ ॥
देवदर्शनविघ्नोऽस्या मा भूत्प्रविशता मया ।
द्वार्य्येवेत्यभयस्तस्थौ मण्डपान्तर्विवेश न ॥ १६ ॥
प्रणिधानस्तुतिं कृत्वा सा मुक्ताशुक्तिमुद्रया ।
यावदुत्तस्थुषी तावदभयोऽभ्याजगाम ताम् ॥ १७ ॥
तादृशीं भावनां तस्यास्तं वेषं प्रशमं च तम् ।
अभयो वर्णयामास सानन्दं च जगाद ताम् ॥ १८ ॥
दिष्ट्या भद्रेऽधुना त्वादृक्साधर्मिकसमागमः ।
साधर्मिकात्परो बन्धुर्न संसारे विवेकिनाम् ॥ १९ ॥
का त्वं किमागमः का वा वासभूमिरिमे च के ।
यकाभ्यां स्वातिराधाभ्यामिन्दुलेखेव शोभसे ॥ २० ॥
व्याजश्राद्धाथ सा व्याजश्राविकाऽवन्तिवासिनः ।
महेभ्यवणिजः पाणिगृहीती विधवा त्वहम् ॥ २१ ॥

एवं च मम पुत्रस्य कल्पेऽस्त्वात्मधर्मतः ।
निश्चित्यान्यकृता निश्चयं मन्त्रज्ञो मन्त्र इव ॥ २२ ॥
तनोर्धमाद्यन्यतन जने अपि तदैव मम ।
निपत्य प्रनिकाना हि मनीना गमनं व्रतम् ॥ २३ ॥
मयाऽप्यत्र प्रवृत्यामि निर्वीराऽस्म्यपि व्रतम् ।
मार्गस्थस्य फलं किन्तु यद्वत्तं तीर्थयात्रया ॥ २४ ॥
यतं हि साधनः पूजा युज्यते द्रव्यतो न तु ।
एवं च तीर्थयात्रार्हमेताभ्यां मम निर्णयो ॥ २५ ॥
अथैत्यसमयेऽन्येद्युर्निर्ग्रन्थसत्तमा नः ।
आर्हन्त्यय सतीर्थानां तीर्थाद्ग्रतिपावनम् ॥ २६ ॥
प्रत्युवाचायसं साऽपि गुरुमाज्ञ मयान् परम् ।
अन्तर्गोपयामाऽहं सदान्यद्यानिधिः कथम् ? ॥ २७ ॥
अथ तन्निश्चया मुखोऽभयस्तामवदत्पुनः ।
अपथ्यं मम तन्मातरामन्त्र्यं निवर्तने ॥ २८ ॥
माऽप्युवे यज्जगनापि जन्मिनो जन्म पूर्यते ।
एवं प्रातरिदं कर्ताऽस्मीति जल्पेत्कथं सुधीः ? ॥ २९ ॥
अभिपदानीमियं भूयः श्वो निमन्त्रोति चिन्तयन् ।
तां विसृज्याभयश्चैत्यं वन्दित्वा स्वगृहं ययौ ॥ ३० ॥
तां निमन्त्र्याभयः प्रातर्गृहचैत्यान्यवन्दयत् ।
भोजयामास च प्राज्यवस्त्रदानादि च व्यधात् ॥ ३१ ॥
निमन्त्रितस्तयाऽन्येद्युर्मित्रीभूयाभयोऽप्यगात् ।
साधर्मिकोपरोधेन किं न कुर्वन्ति तादृशाः ? ॥ ३२ ॥

तया च विविधैर्भोज्यैरभयोऽकारि भोजनम् ।
चन्द्रहाससुरामिश्रपानकानि च पायितः ॥ ३३ ॥
भुक्तोत्थितश्च तत्कालं सुष्वाप श्रेणिकात्मजः ।
आदिमा मद्यपानस्य निद्रा सहचरी खलु ॥ ३४ ॥
तं रथेन स्थाने स्थाने स्थापितैश्चापरै रथैः ।
अवन्तीं प्रापयामास दुर्लक्ष्यच्छद्मसद्म सा ॥ ३५ ॥
ततोऽभयान्वेषणाय श्रेणिकेन नियोजिताः ।
स्थाने स्थानेऽन्वेषयन्तस्तत्रापीयुर्गवेषकाः ॥ ३६ ॥
किमिहाभय आयात इत्युक्ता तैरुवाच सा ।
इहाभयः समायातः परं यातस्तदैव हि ॥ ३७ ॥
वचनप्रत्ययात्तस्या अन्यत्रेयुर्गवेषकाः ।
स्थाने स्थाने स्थापिताश्वैः साऽप्यवन्तीं समाययौ ॥ ३८ ॥
सा प्रचण्डाऽभयं चण्डप्रद्योतस्यार्पयत्ततः ।
अभयाऽऽनयनोपायस्वरूपं च व्यजिज्ञपत् ॥ ३९ ॥
तां प्रद्योतोऽप्युवाचैवं न साधु विहितं त्वया ।
यदमुं धर्मविश्वस्तं त्वं धर्मच्छद्मनाऽऽनयः ॥ ४० ॥
अथामततिसंगमा मार्जार्येव शुकोऽनया ।
नास्तिकोऽपि [illegible] ॥ ४१ ॥
[illegible] ।
[illegible] ॥ ४२ ॥
[illegible] ।
[illegible] ॥ ४३ ॥

विना बन्धनमोचत्वं वरं याचस्व मामिति ।
नृपेणोक्तोऽभयोऽवादीन्न्यासीभूतोऽस्तु मे वरः ॥ ५४ ॥
अन्यदाऽऽलानमुन्मूल्य पातयित्वा निषादिनौ ।
स्वैरं नलगिरिर्भ्राम्यन् क्षोभयामास नागरान् ॥ ५५ ॥
असाववशगो हस्ती वशं नेयः कथं त्विति ।
राज्ञा पृष्टोऽभयोऽशंसद्गायत्वुदयनो नृपः ॥ ५६ ॥
पुत्र्या वासवदत्ताया गान्धर्वाधीतये[1] धृतः ।
जगावुदयनस्तत्र समं वासवदत्तया ॥ ५७ ॥
तद्गीताकर्णनाक्षिप्तो बद्धो नलगिरिः करी ।
पुनर्ददौ वरं राजा न्यासीचक्रेऽभयस्तथा ॥ ५८ ॥
अभूदवन्त्यामन्येद्युर्निर्विच्छेदं प्रदीपनम् ।
पृष्टश्च तत्प्रतीकारं प्रद्योतेनाभयोऽवदत् ॥ ५९ ॥
विषस्येव विषं वह्नेर्वह्निरेव यदौषधम् ।
तदन्यः क्रियतां वह्निर्यथा शाम्येत् प्रदीपनम् ॥ ६० ॥
तथा विहिते राज्ञाऽशाम्यत्तच्च प्रदीपनम् ।
तुर्यं च वरं सोऽदान्न्यासीचक्रेऽभयश्च तम् ॥ ६१ ॥
अशिवं [illegible]दन्येद्युरुज्जयिन्यां समुत्थितम् ।
तत्प्रशान्त्यै नरेन्द्रेण पृष्टः [illegible] ॥ ६२ ॥
आस्थान[illegible] देव्यः सर्वा विभूषिताः ।
[illegible] ॥ ६३ ॥

तथैव विदधे राज्ञा राज्ञोऽन्या विजिता द्रुशा।
देव्या तु शिवया राजा, कथितं चाभयाय तत्॥ ६४॥
अभाषताभयोऽप्येवं महाराज्ञी शिवा स्वयम्।
करोतु कूरबलिना भूतानामर्चनं निशि॥ ६५॥
यद्यद्भूतं शिवारूपेणोत्तिष्ठत्यथवासते।
तस्य तस्य मुखे देव्या चेप्यः कूरबलिः स्वयम्॥ ६६॥
विदधे शिवया तच्चाशिवशान्तिर्बभूव च।
तुर्यं चादाद्वरं राजा ययाचे चाभयोऽप्यदः॥ ६७॥
स्थिते नलगिरौ मेण्ठीभूते त्वयि शिवाङ्कगः।
अहं विशाम्यग्निभीरुरथदारुकृतां चिताम्॥ ६८॥
ततो विषसः प्रद्योतो वरान् दातुमशक्नुवन्।
विससर्जाञ्जलिं कृत्वा कुमारं मगधेशितुः॥ ६९॥
आशुश्रावाभयोऽप्येवं त्वयाऽऽनीतश्छलादहम्।
दिवा रटन्तं पूर्मध्ये त्वां तु नेष्याम्यसावहम्॥ ७०॥
ततोऽभयकुमारोऽगात् क्रमाद्राजगृहे पुरे।
कथमप्यवतस्थे च कञ्चित्कालं महामतिः॥ ७१॥
गृहीत्वा गणिकापुत्र्यौ रूपवत्यावथाभयः।
वणिग्वेषोऽगादवन्त्यां राजमार्गेऽग्रहीद्गृहम्॥ ७२॥
प्रद्योतेनेक्षिते ते च दारिके पथि गच्छता।
ताभ्यां च सविलासाभ्यां प्रद्योतोऽपि निरीक्षितः॥ ७३॥
प्रद्योतेन गृहे गत्वा रागिणा प्रेषिता ततः।
दूतिकाऽनुनयन्त्याभ्यां क्रुद्धाभ्यामपहस्तिता॥ ७४॥

द्वितीयस्मिन्नपि दिनेऽर्थ्यमाना नृपाय च ।
ताभ्यां शनैः सरोषाभ्यामवामन्यत दूतिका ॥ ७५ ॥
तृतीयेऽप्यह्नि निर्वेदादित्य ते याचितेऽनया[1] ।
अचतुश्च सदाचारो भ्राता [2]नाविव रक्षति ॥ ७६ ॥
ततो बहिर्गतेऽमुष्मिन् सप्तमेऽह्नि समागते ।
इहायातु नृपश्छन्नस्ततः सङ्गो भविष्यति ॥ ७७ ॥
ततोऽभयेन प्रद्योतसदृगेकः पुमान्निजः ।
उन्मत्तो विदधे तस्य प्रद्योत इति नाम च ॥ ७८ ॥
ईदृशोऽयं मम भ्राता भ्राम्यतीतस्ततस्ततः ।
रक्षितव्यो मया हा किं करोमीत्यवदज्जने ॥ ७९ ॥
तं वैद्यसद्मनयनच्छद्मना प्रत्यहं बहिः ।
रटन्तं मञ्चकारूढं निनायार्त इवाभयः ॥ ८० ॥
नीयमानश्च तेनोच्चैः स उन्मत्तश्चतुष्पथे ।
प्रद्योतोऽहं क्रियेऽनेनेत्युदश्रुवदनोऽरटत् ॥ ८१ ॥
सप्तमेऽह्नि नृपोऽप्येकस्तत्र प्रच्छन्न आययौ ।
कामान्धः सिन्धुर इव बद्धाभयपूरुषैः ॥ ८२ ॥
नीयतेऽसौ वैद्यवेश्मेत्यभयेनाभिभाषिणा ।
पर्यङ्केन समं जह्रे पुरान्तः स रटन् दिवा ॥ ८३ ॥
क्रोशे क्रोशे पुरा मुक्तै रथैरथ सुवाजिभिः ।
पुरं राजगृहेऽनैषीत्प्रद्योतमभयोऽभयः ॥ ८४ ॥

(१) क ख ङ तया ।
(२) क ख ङ नावेव ।

ततो निनाय प्रद्योतं श्रेणिकस्य पुरोऽभयः ।
दधावे खड्गमाकृष्य तं प्रति श्रेणिको नृपः ॥ ८५ ॥
ततोऽभयकुमारेण बोधितो मगधेश्वरः ।
संमान्य वस्त्राभरणैः प्रद्योतं व्यसृजन्मुदा ॥ ८६ ॥
अन्यदा गणभृद्देवसुधर्मस्वामिनोऽन्तिके ।
प्रव्रज्यामग्रहीत्कोऽपि विरक्तः काष्ठभारिकः ॥ ८७ ॥
विहरन् स पुरे पौरैः पूर्वावस्थाऽनुवादिभिः ।
अभर्त्स्यतोपाहस्यतागर्ह्यतापि पदे पदे ॥ ८८ ॥
नावज्ञां सोढुमीशोऽत्र विहरामि तदन्यतः ।
इति व्यज्ञपयत् स श्रीसुधर्मस्वामिनं ततः ॥ ८९ ॥
सुधर्मस्वामिनाऽन्यत्र विहारक्रमहेतवे ।
आपृच्छ्यताभयः पृच्छन् ज्ञापितस्तच्च कारणम् ॥ ९० ॥
दिनमेकं प्रतीचध्वमूर्द्धं यत्प्रतिभाति वः ।
तद्विधत्तेत्ययाचिष्ट प्रणम्य श्रेणिकात्मजः ॥ ९१ ॥
सोऽथ राजकुलात्कृष्ट्वा रत्नकोटित्रयीं बहिः ।
दास्याम्येतामेत लोकाः ! पटहेनेत्यघोषयत् ॥ ९२ ॥
ततश्चेयुर्जनाः सर्वेऽप्यवोचदभयोऽप्यदः ।
जलाग्निस्त्रीवर्जको यस्तस्य रत्नोच्चयोऽस्त्वयम् ॥ ९३ ॥
लोकोत्तरमिदं लोकः स्वामिन् ! किं कर्त्तुमीश्वरः ? ।
इति तेष्वाभाषमाणेष्वभयोऽपीत्यभाषत ॥ ९४ ॥
यदि वो नेदृशः कश्चिद्रत्नकोटीत्रयं ततः ।
जलाग्निस्त्रीमुचः काष्ठभारिणोऽस्तु महामुनेः ॥ ९५ ॥

सम्यगीदृगयं साधुः पात्रं दानस्य युज्यते।
मुधाऽसौ जहसेऽस्माभिरिति तैर्जगदेऽभयः ॥ ९६ ॥
अस्य भक्त्योपहासादि न कर्त्तव्यमतः परम्।
आदिष्टमभयेनैवं प्रतिपद्य ययुर्जनाः ॥ ९७ ॥
एवं बुद्धिमहाम्भोधिः पितृभक्तिपरोऽभयः।
निरीहो धर्मसंसक्तो राज्यमन्वशिषत्पितुः ॥ ९८ ॥
वर्त्तमानः स्वयं धर्मे स प्रजा अप्यवर्त्तयन्।
प्रजानां च पशूनां च गोपायत्ताः प्रवृत्तयः ॥ ९९ ॥
राजा चक्रे जजागार यथा द्वादशधा स्थिते।
तथा श्रावकधर्मेऽसावप्रमद्वरमानसः ॥ २०० ॥
बहिरङ्गान् यथाऽजैषीद्दुर्जयानपि विद्विषः।
अन्तरङ्गानपि तथा स लोकद्वयसाधकः ॥ १ ॥
तमूचे श्रेणिकोऽन्येद्युर्वत्स! राज्यं त्वमाश्रय।
अहं श्रयिष्ये श्रीवीरशुश्रूषासुखमन्वहम् ॥ २ ॥
पिताऽप्याभङ्गसंसारभीरुरित्यभयोऽब्रवीत्।
यदादिशत तत्साधु प्रतीच्छ्यं क्षणं परम् ॥ ३ ॥
इतश्च भगवान् वीरः प्रव्राज्योदायनं नृपम्।
मरुमण्डलतस्तत्राऽभ्यागत्य समवासरत् ॥ ४ ॥
ततो गत्वाऽभयो नत्वा पप्रच्छ चरमं जिनम्।
राजर्षिः कोऽन्तिमोऽथाख्यत्तत्रैवोदायनं प्रभुः ॥ ५ ॥
[illegible] राजा [illegible]
[illegible] ॥ ६ ॥

श्रीवीरं स्वामिनं प्राप्य प्राप्य त्वत्सूनुतामपि ।
नो छिन्द्यं भवदुःखं चेन्मत्तः कोऽन्योऽधमस्ततः ॥ ७ ॥
नाथाऽहमभयस्तात ! भयभीतोऽस्मि भवाद्भृशम् ।
भुवनाभयदं वीरं तच्छ्रयामि समादिश ॥ ८ ॥
तदलं मम राज्येनाभिमानसुखहेतुना ।
यतः सन्तोषसाराणि सौख्यान्याहुर्मनीषिणः ॥ ९ ॥
निर्बन्धाद्याच्यमानोऽपि न यदा राज्यमग्रहीत् ।
तदाऽभयो व्रतायानुजज्ञे राज्ञा प्रमोदतः ॥ १० ॥
राज्यं तृणमिव त्यक्त्वा सन्तोषसुखभाग्गतः ।
दीक्षां चरमतीर्थेशवीरपादान्तिकेऽग्रहीत् ॥ ११ ॥

सन्तोषमेवमभयः सुखदं दधानः
सर्वार्थसिद्धिसुरधाम जगाम सत्वा ।
सन्तोषमेवमपरोऽप्यनलंकमान-
स्तान्यूर्जितसुखानि नरो लभेत ॥ १२ ॥

॥ इति श्रीअभयराजर्षिकथानकम् ॥ ११ ॥

...तं सन्तोषमेव कीर्ति

...द्विषो निपयसत्त्व नासवकल्पनानुगामिनी ।
...सुराः किङ्करायन्ते सन्तोषो यस्य भूषणम् ॥ १४ ॥

...निषधा नवपद्मादयः, भावयाः [illegible]

धेनुः, सा अनुगच्छतीत्येवंशीला अनुगामिनी, अमराः सुराः किङ्करा इवाचरन्ति किङ्करायन्ते। तस्येति योगः। यस्य किम्? यस्य पुंसः सन्तोषो भूषणमलङ्करणम्।

तथाहि—

सन्तुष्टा मुनयः शमप्रभावात्तृणाग्रादपि रत्नसमूहान् पातकामितफलदायिनश्च सुरेन्द्रैरप्यहमहमिकयोपचर्यन्त इत्यत्र सन्देहः।

अत्रान्तरश्लोकाः—

'धनं धान्यं स्वर्णरूप्यकुप्यानि क्षेत्रवास्तुनी।
द्विपाच्चतुष्पाच्चेति स्युर्नव बाह्याः परिग्रहाः॥ १॥
रागद्वेषौ कषायाः शुग्हासौ रत्यरती भयम्।
जुगुप्सा वेदमिथ्यात्वे आन्तराः स्युश्चतुर्दश॥ २॥
बाह्यात् परिग्रहात्प्रायः प्रकुप्यन्त्यान्तरा अपि।
प्राश्यो मूषिकालर्कविषजोपद्रवा इव॥ ३॥
प्रशमप्रतिष्ठानपि च वैराग्यादिमहाद्रुमान्।
उन्मूलयति निर्मूलं परिग्रहमहानिलः॥ ४॥
परिग्रहनिपन्नोऽपि योऽपवर्गं विमार्गति।
लोहोडुपनिविष्टोऽसौ पारावारं तितीर्षति॥ ५॥
बाह्याः परिग्रहाः पुंसां धर्मस्य ध्वंसहेतवः।
तज्जन्मानोऽपि जायन्ते [illegible]॥ ६॥

[illegible]

बान्धवानपि हि नः शङ्काच नियन्त्रयितुं भ्रमः ।
अर्थेन ज्ञातिः कथं सोऽन्तःपरिपक्वचक्रमन्मुम् ॥ ७ ॥
कोऽहं त्वामसविद्यानां वारिधिर्व्यसनार्णसान् ।
अन्तर्नृणामसह्यातङ्क एव परिग्रहः ॥ ८ ॥
यदा धार्यमुन्मूलमर्थमङ्गान्मुनीनपि ।
धनार्थित्वेन शङ्कन्ते धनरक्षापरायणाः ॥ ९ ॥
राजतस्करदायादवह्नितोयादिभीरुभिः ।
धनैकतानैर्धनिभिर्निशास्वपि न सुप्यते ॥ १० ॥
दुर्भिक्षे वा सुभिक्षे वा वने जनपदेऽपि वा ।
शङ्काऽऽतङ्काकुलतया धनी सर्वत्र दुःखितः ॥ ११ ॥
निर्दोषा वा सदोषा वा सुखं जीवन्ति निर्धनाः ।
बाध्यन्ते धनिनो लोके दायैरुत्पादितैरपि ॥ १२ ॥
अर्जने रक्षणे नाशे व्यये सदैव दुःखदम् ।
धत्ते कर्णगृहीताच्छभल्ललीलां धनं नृणाम् ॥ १३ ॥
धिग्धनं धनवन्तो यदेकामिषजिघृक्षुभिः ।
स्वजनैरपि बाध्यन्ते शुनकाः शुनकैरिव ॥ १४ ॥
इत्यनर्थं लभेयाहं रक्षेयं वर्धयेय च ।
कृतान्तदन्तयन्त्रस्थोऽपीत्याशां न त्यजेद्धनी ॥ १५ ॥
पिशाचीव धनाशेयं यावदुच्छृङ्खला भवेत् ।
तावत् प्रदर्शयेन्नृणां नानारूपां विडम्बनाम् ॥ १६ ॥
यदीच्छसि सुखं धर्मं मुक्तिसाम्राज्यमेव च ।
तदा परपरीहारादेकामाशां वशीकुरु ॥ १७ ॥

धनवान् यद्यसि[1] संक्लेशैर्विक्लेश्याधिगतं नरः ।
अयत्नसिद्धा यद्येतत् क्षणे स्यात्तानिर्मोचनं ॥ २९ ॥
पुण्योदयोऽस्ति चेत् पुंसां व्यर्थैवाशापिशाचिका ।
अथ पुण्योदयो नास्ति व्यर्थैवाशापिशाचिका ॥ ३० ॥
श्रीमान्सौ पण्डितः प्राज्ञः पापभीरुस्तपोधनः ।
स एव येन हित्वाऽऽशां नैराश्यमुररीकृतम् ॥ ३१ ॥
सुखं सन्तोषपीयूषजुषां यत् प्रशमात्मनाम् ।
तत्पराधीनतृष्णानामसन्तोषवतां कुतः ॥ ३२ ॥
सन्तोषवर्मणि व्यर्था आशानाराचपङ्क्तयः ।
ताः कथं प्रतिरोद्धव्या इति मा व्याकुलो भव ॥ ३३ ॥
आर्यैरनेकैस्तदपि यदाप्यं वाच्यकोटिभिः ।
आशापिशाची शान्ता च प्राप्तं च परमं पदम् ॥ ३४ ॥
तदात्मज्ञाऽऽशावैवश्यं मितीकृतपरिग्रहः ।
भजस्व [2]द्रव्यसाधुत्वं यतिधर्मानुरक्तधीः ॥ ३५ ॥
मिथ्यादृग्भ्यो विशिष्यन्ते सम्यग्दर्शनिनो जनाः ।
तेभ्योऽपि देशविरता मितारम्भपरिग्रहाः ॥ ३६ ॥
यामन्यतीर्थिका यान्ति गतिं तीव्रतपोजुषः ।
उपासकाः सोमिलवत्तां विराद्धव्रता अपि ॥ ३७ ॥
मासि मासि हि ये बालाः कुशाग्रेणैव भुञ्जते ।
सन्तुष्टोपासकानां ते कलां नार्हन्ति षोडशीम् ॥ ३८ ॥

---

(१) घ च -भिः क्लेशैः ।
(२) ङ भज सं भाव- । थ भाव- ।

अप्यद्भुततपोनिष्ठस्तामलिः पूरणोऽपि वा ।
सुश्रावकोचितगतेरतिहीनां गतिं ययौ ॥ ३९ ॥

आशापिशाचविवशं कुरु मा स्म चेतः
सन्तोषमुद्वह परिग्रहनिग्रहेण ।
श्रद्धां विधेहि यतिधर्मधुरीणताया-
मन्तर्भवाष्टकमुपैषि यथाऽपवर्गम् ॥ ४० ॥ ११५ ॥

इति परमार्हतश्रीकुमारपालभूपालशुश्रूषिते आचार्य-
श्रीहेमचन्द्रविरचिते अध्यात्मोपनिषन्नाम्नि
सञ्जातपट्टबन्धे श्रीयोगशास्त्रे स्वोपज्ञं
द्वितीयप्रकाशविवरणम् ।



अथ

तृतीयः प्रकाशः ।

अथाणुव्रतव्याख्यानानन्तरं गुणव्रतानामवसरस्तत्रापि प्रथमं गुणव्रतमाह

दशस्वपि कृता दिक्षु यत्र सीमा न लङ्घ्यते ।
ख्यातं दिग्विरतिरिति प्रथमं तद्गुणव्रतम् ॥ १ ॥

ऐन्द्री, आग्नेयी, याम्या, नैर्ऋती, वारुणी, वायव्या, कौबेरी, ऐशानी, नागी, ब्राह्मीति दश दिशस्तासु; अपिशब्दादेकद्वित्र्यादिदिक्ष्वपि, सीमा मर्यादा, कृता प्रतिपन्ना, यत्र व्रते सति, न लङ्घ्यते नातिक्रम्यते, तत्प्रथमं गुणव्रतम्। उत्तरगुणरूपं व्रतं गुणव्रतम्, गुणाय चोपकाराय अणुव्रतानां व्रतं गुणव्रतम्; ख्यातं प्रसिद्धं, नाम्नाभिधानेन दिग्विरतिरिति ॥ १ ॥

ननु हिंसादिपापस्थानविरतिरूपाणि युक्तान्यणुव्रतानि, दिग्व्रतं तु कस्य पापस्थानस्य निवृत्तिर्येनास्य व्रतत्वमुच्यते। उच्यते। अत्रापि हिंसादीनामेव पापस्थानानां विरतिरित्याह—

चराचराणां जीवानां विमर्दननिवर्त्तनात् ।
तप्तायोगोलकल्पस्य सद्वृत्तं गृहिणोऽप्यदः ॥ २ ॥

चरास्त्रसा द्वीन्द्रियादयः, अचराः स्थावराः एकेन्द्रियाः; तेषां

नियमितसीमाबहिर्वर्त्तिनां जीवानां, यद्विमर्दनं यातायातादि
हिंसा, तस्य निवर्त्तनाद्धेतोरिदमपि हिंसाप्रतिषेधपरमेव
स्यापि सङ्गतम्। हिंसाप्रतिषेधपरत्वे च, असत्यादिप्रतिषेधपरत्व
सुवचैव। यद्येवं, साधूनामपि दिग्विरतिव्रतप्रसङ्ग इत्याह—तप्त
योगोलकल्पस्येति। गृहस्थो ह्यारम्भपरिग्रहपरत्वाद्यत्र यत्र
, शेते, व्यापारान्तरं वा कुरुते, तत्र तप्तायोगोलक
मर्दं करोति। गृहिणोऽपीत्यपिशब्दस्तप्तायोगोलकल्प
ते; तप्तायोगोलकल्पस्यापीत्यर्थः।
ह—

'तत्तायगोलकप्पो पमत्तजीवोऽणिवारियप्पसरो।
सव्वत्थ किं न कुज्जा पावं तक्कारणाणुगओ ॥ १ ॥
धूनां तु समितिगुप्तिप्रधानव्रतशालिनां नायं दोष
ग्विरतिव्रतम् ॥ २ ॥
नगपापस्थानविरतिपरमपि नैतद् व्रतमित्याह
गाद्याक्रमणाल्लोभः प्रसरल्लोभवारिधिः।
स्तम्भं निरुद्धे तेन येन दिग्विरतिः कृता ॥

लोभवशगो हि ऊर्द्ध्वलोकगतां सुरसम्पदं मध्यलोकगतां च चक्रवर्त्त्यादिसम्पदमधोलोकगतां च पातालप्रभुत्वादिसम्पदमभिलषंस्त्रिभुवनमपि मनोरथैराक्रामतीति लोभस्य जगदाक्रमणम्, तेन स्खलनं प्रसरनिरोधः, तद्विदधे, येन किं, येन पुरुषेण दिग्विरतिर्विहिता। दिग्विरतो हि प्रतिज्ञातसीमातः परतोऽगच्छंस्तत्स्थसुवर्णरूप्यधनधान्यादिषु प्रायेण लोभं न कुरुते इतिलोभलक्षणपापस्थानविरतिपरता अस्य व्रतस्य ।

अत्रान्तरश्लोकाः—

तदेतद्यावज्जीवं वा सद्‌व्रतं गृहमेधिनाम् ।
चतुर्मासादिनियमादथवा स्वल्पकालिकम् ॥ १ ॥
सदा सामायिकस्थानां यतीनां तु जितात्मनाम् ।
न दिशि क्वचन स्यातां विरत्यविरती इमे ॥ २ ॥
चारणानां हि गमनं यदूर्द्ध्वं मेरुमूर्द्धनि ।
तिर्यग्रुचकशैले च नैषां दिग्विरतिस्ततः ॥ ३ ॥
गन्तुं सर्वासु यो दिक्षु विदध्यादवधिं सुधीः ।
स्वर्गादौ निरवधयो जायन्ते तस्य सम्पदः ॥ ४ ॥ ३ ॥

द्वितीयं गुणव्रतमाह—

भोगोपभोगयोः संख्या शक्त्या यत्र विधीयते ।
भोगोपभोगमानं तद् द्वैतीयीकं गुणव्रतम् ॥ ४ ॥

भोगोपभोगयोर्वक्ष्यमाणलक्षणयोः, संख्या परिमाणं, यत्र व्रते, विधीयते, कया, शक्त्या शरीरमनसोरनाबाधया, तद्भोगोप-

भोगमानं नाम गुणव्रतं, द्वितीयमेव द्वैतीयीकम्; स्वार्थे टीकण् ॥ ४ ॥

भोगोपभोगयोर्लक्षणमाह—

सकृदेव भुज्यते यः स भोगोऽन्नस्रगादिकः ।
पुनःपुनः पुनर्भोग्य उपभोगोऽङ्गनादिकः ॥ ५ ॥

सकृदेव एकवारमेव, भुज्यते सेव्यते इति भोगः; अन्नमोदनादि, स्रग्माल्यं, आदिशब्दात्ताम्बूलविलेपनोद्वर्तनधूपनस्नानपानादिपरिग्रहः । पुनःपुनरनेकवारं, भोग्यः सेव्यः, अङ्गना वनिता, आदिशब्दाद्वस्त्रालङ्कारगृहशयनासनवाहनादिपरिग्रहः ॥ ५ ॥

इदं च भोगोपभोगव्रतं भोक्तुं योग्येषु परिमाणकरणेन भवति, इतरेषु तु वर्जनेनेति श्लोकद्वयेन तद्वर्जनीयानाह—

मद्यं मांसं नवनीतं मधूदुम्बरपञ्चकम् ।
अनन्तकायमज्ञातफलं रात्रौ च भोजनम् ॥ ६ ॥
आमगोरससंपृक्तं द्विदलं पुष्पितौदनम् ।
दध्यहर्द्वितयातीतं कुथितान्नं च वर्जयेत् ॥ ७ ॥

तत्र मद्यं द्विधा-काष्ठनिष्पन्नं, पिष्टनिष्पन्नं च, मांसं त्रिधा-जलस्थलखचरमांसभेदेन। मांसग्रहणेन चर्मरुधिरमेदोमज्जानः परिगृह्यन्ते। नवनीतं गोमहिष्यजाऽविसम्बन्धेन चतुर्धा। [illegible]

तथा सात्त्विकं, राजसं, तामसं च । मधूकपुष्पकादयो मद्यस्य भेदा ज्ञातव्याः ॥ ६ ॥ ७ ॥

तत्र मद्यस्य यशोनाशादीन् दोषान् श्लोकदशकेनाह —

मदिरापानमात्रेण बुद्धिर्नश्यति दूरतः ।
वैदग्ध्यबन्धुरस्यापि दौर्भाग्येणेव कामिनी ॥ ८ ॥

वैदग्ध्यबन्धुरस्यापि चतुरस्यापि पुंसो, मदिरापानमात्रेण बुद्धिर्नश्यति पलाय्य याति, दूरतो दूरं यावत् । सर्वथा विनश्यतीत्यर्थः । अत्रोपमानं दौर्भाग्येणेव कामिनीति । वैदग्ध्यबन्धुरस्यापि दूरत इति यावदिति सम्बध्यते । तेन यथा विदग्धस्यापि दौर्भाग्यदोषेण कामिनी नश्यति पलायते, दूरतो दूरादपि ॥ ८ ॥

तथा —

पापाः कादम्बरीपानविवशीकृतचेतसः ।
जननीं हा प्रियीयन्ति जननीयन्ति च प्रियाम् ॥ ९ ॥

कादम्बरी मदिरा, जननीं मातरं, हा इति खेदे, प्रियीयन्ति प्रियामिव जायामिवाचरन्ति, प्रियां च जननीयन्ति जननीमिवाचरन्ति । मदिरामदविह्वलत्वाज्जननीजाययोराचारव्यत्ययेन व्यवहरन्तीत्यर्थः ॥ ९ ॥

तथा —

न जानाति परं स्वं वा मद्यात्स्खलितचेतनः ।
स्वामीयति वराकः स्वं स्वामिनं किङ्करीयति ॥ १० ॥

मद्याद्धेतोः चलितचेतनो नष्टचैतन्यः सन्, स्वमात्मानं, परं वा आत्मव्यतिरिक्तं, न जानाति। अत्र हेतुमाह—यत आत्मानमजानन् स्वं स्वामिनमिवाचरति, वराकश्चैतन्यहीनत्वादनुकम्पनीयः। परमजानन् स्वामिनं नाथं किङ्करमिवाचरति ॥ १० ॥

तथा—

मद्यपस्य शवस्येव लुठितस्य चतुष्पथे।
मूत्रयन्ति मुखे श्वानो व्यात्ते विवरशङ्कया ॥ ११ ॥

स्पष्टः ॥ ११ ॥

तथा—

मद्यपानरसे मग्नो नग्नः स्वपिति चत्वरे।
गूढं च स्वमभिप्रायं प्रकाशयति लीलया ॥ १२ ॥

मद्यस्य पानं तत्र रस आसक्तिस्तत्र मग्नो निपन्नः; मद्यपानव्यसनीत्यर्थः। अत एव वस्त्रमपि स्वस्तमजानन् नग्नः स्वपिति चत्वरे, नतु गृह एव। दोषान्तरं च, गूढं केनाप्यविदितं, स्वमभिप्रायं राजद्रोहादिकं, प्रकाशयति प्रकटीकरोति, लीलया बन्धनताडनादिव्यतिरेकेणापि ॥ १२ ॥

तथा—

वारुणीपानतो यान्ति कान्तिकीर्त्तिमतिश्रियः।
विचित्राश्चित्ररचना विलुठत्कज्जलादिव ॥ १३ ॥

वारुणीपानतो मद्यपानात्, यान्त्यपगच्छन्ति, कान्तिः

तेजः, कीर्त्तिर्यशः, मतिस्तात्कालिकी प्रतिभा, श्रीः सम्पत् ।
भित्रिया इत्याद्युपमानं स्पष्टम् ॥ १३ ॥

तथा—

भूतार्त्तवन्नरीनर्त्ति रारटीति सशोकवत् ।
दाहज्वरार्त्तवद्भूमौ सुरापो लोलुठीति च ॥ १४ ॥

भूतार्त्तो व्यन्तरविशेषपरिगृहीतः, त्रीण्यपि क्रियापदानि भृशाभीक्ष्णयोर्यङ्लुबन्तानि ॥ १४ ॥

तथा—

विदधत्यङ्गशैथिल्यं ग्लपयन्तीन्द्रियाणि च ।
मूर्च्छामतुच्छां यच्छन्ती हाला हालाहलोपमा ॥१५॥

हाला सुरा, हालाहलोपमा हालाहलो विषविशेषस्तत्-सदृशी । साधारणधर्मानाह—विदधती कुर्वाणा अङ्गशैथिल्यं शरीरविश्रंखुलत्वम्, ग्लपयन्ती कार्याक्षमाणि कुर्व्वती, इन्द्रियाणि चक्षुरादीनि ; मूर्च्छा चैतन्याभावस्तामतुच्छां प्रचुरां यच्छन्ती । अङ्गशैथिल्यादयो हालाहालाहलयोः साधारणा धर्माः ॥ १५ ॥

तथा—

विवेकः संयमो ज्ञानं सत्यं शौचं दया क्षमा ।
मद्यात्प्रलीयते सर्वं तृण्या वह्निकणादिव ॥ १६ ॥

विवेको हेयोपादेयज्ञानं, संयम इन्द्रियवशीकारः, ज्ञानं

शास्त्रावबोधः, सत्यं तथ्या भाषा, शौचमाचारशुद्धिः, दया करुणा, क्षमा क्रोधस्यानुत्पाद उत्पन्नस्य वा विफलीकरणम् । मद्यास्वपानात्, प्रलीयते नाशमुपयाति, सर्वं विवेकादि । यथा वह्निकणात् तृण्या तृणसमूहः । तृणानां समूहस्तृण्या, पाशादित्वाद्यः ॥१६॥

दोषाणां कारणं मद्यं मद्यं कारणमापदाम् ।
रोगातुर इवापथ्यं तस्मान्मद्यं विवर्जयेत् ॥ १७ ॥

दोषाणां चौर्यपारदारिकत्वादीनां, कारणं हेतुः, मद्यपानरतो हि किं किमकार्यं न कुरुते; दोषकारणत्वादेव चापदां वधबन्धादीनां, कारणं तस्मान्मद्यं विवर्जयेदित्युपसंहारः । रोगातुर इवापथ्यमित्युपमानम् ।

अत्रान्तरश्लोकाः—

रसोद्भवाश्च भूयांसो भवन्ति किल जन्तवः ।
तस्मान्मद्यं न पातव्यं हिंसापातकभीरुणा ॥ १ ॥
दत्तं न दत्तमात्तं च नात्तं कृतं च नो कृतम् ।
मृषोद्यराज्यादिव हा स्वैरं वदति मद्यपः ॥ २ ॥
गृहे वनिवा मार्गे वा परद्रव्याणि मूढधीः ।
वधबन्धादिनिर्भीको गृह्णात्याच्छिद्य मद्यपः ॥ ३ ॥
बालिकां युवतीं वृद्धां ब्राह्मणीं श्वपचीमपि ।
भुङ्क्ते परस्त्रियं सद्यो मद्योन्मादकदर्थितः ॥ ४ ॥
रटन् गायन् लुठन् धावन् कुप्यंस्तुष्यन् रुदन् हसन् ।
[illegible] मुहुः [illegible] ॥ ५ ॥

शास्त्रावबोधः, सत्यं तथ्या भाषा, शौचमाचारशुद्धिः, दया करुणा, क्षमा क्रोधस्यानुत्पाद उत्पन्नस्य वा विफलीकरणम्। मद्यान्मद्यपानात्, प्रलीयते नाशमुपयाति, सर्वं विवेकादि। यथा वह्निकणात् तृण्या तृणसमूहः। तृणानां समूहस्तृण्या, पाशादित्वाद्यः ॥१६॥

दोषाणां कारणं मद्यं मद्यं कारणमापदाम्।
रोगातुर इवापथ्यं तस्मान्मद्यं विवर्जयेत् ॥ १७॥

दोषाणां चौर्यपारदारिकत्वादीनां, कारणं हेतुः, मद्यपानरतो हि किं किमकार्यं न कुरुते; दोषकारणत्वादेव चापदां वधबन्धादीनां, कारणं तस्मान्मद्यं विवर्जयेदित्युपसंहारः। रोगातुर इवापथ्यमित्युपमानम्।

अत्रान्तरश्लोकाः—

रसोद्भवाश्च भूयांसो भवन्ति किल जन्तवः।
तस्मान्मद्यं न पातव्यं हिंसापातकभीरुणा ॥ १ ॥
दत्तं न दत्तमात्तं च नात्तं कृतं च नो कृतम्।
मृषोद्यराज्यादिव हा स्वैरं वदति मद्यपः ॥ २ ॥
गृहे बहिर्वा मार्गे वा परद्रव्याणि मूढधीः।
वधबन्धादिनिर्भीको गृह्णात्याच्छिद्य मद्यपः ॥ ३ ॥
बालिकां युवतीं वृद्धां ब्राह्मणीं श्वपचीमपि।
भुङ्क्ते परस्त्रियं सद्यो मद्योन्मादकदर्थितः ॥ ४ ॥
रटन् गायन् लुठन् धावन् कुप्यंस्तुष्यन् रुदन् हसन्।
स्तम्भन्नमन् भ्रमंस्तिष्ठन् सुरापः पापराट् नटः ॥ ५ ॥

श्रूयते किल शाम्बेन मद्यादन्धम्भविष्णुना ।
हतं वृष्णिकुलं सर्वं प्लोषिता च [1]पुरी पितुः ॥ ६ ॥
पिबन्नपि मुहुर्मद्यं मद्यपो नैव तृप्यति ।
जन्तुजातं कवलयन् कृतान्त इव सर्वदा ॥ ७ ॥
लौकिका अपि मद्यस्य बहुदोषत्व[2]भाषिताः ।
यत्तस्य परिहार्यत्वमेवं पौराणिका जगुः ॥ ८ ॥
कश्चिदृषिस्तपस्तेपे भीत इन्द्रः सुरस्त्रियः ।
क्षोभाय प्रेषयामास तस्यागत्य च तास्तकम् ॥ ९ ॥
विनयेन समाराध्य वरदाभिमुखं स्थितम् ।
जगुर्मद्यं तथा मांसं सेवस्वाब्रह्म चेच्छया ॥ १० ॥
स एवं गदितस्ताभिर्द्वयोर्नरकहेतुताम् ।
आलोच्य मद्यरूपं च शुद्धकारणपूर्वकम् ॥ ११ ॥
मद्यं प्रपद्य तद्भोगान् नष्टधर्मस्थितिर्मदात् ।
विदंशार्थमजं हत्वा सर्वमेव चकार सः ॥ १२ ॥

अवद्यमूलं नरकस्य पद्धतिं
सर्वापदां स्थानमकीर्त्तिकारणम् ।
अभव्यसेव्यं गुणिभिर्विगर्हितं
विवर्जयेन्मद्यमुपासकः सदा ॥ १३ ॥ १७ ॥

---

(१) ख च पितुः पुरी ।
(२) ख च ज -माश्रिताः ।

अथ मांसदोषानाह—

चिखादिषति यो मांसं प्राणिप्राणापहारतः ।
उन्मूलयत्यसौ मूलं दयाऽऽख्यं धर्मशाखिनः ॥ १८ ॥

चिखादिषति, खादितुमिच्छति, यः कश्चित्, मांसं पिशितं, असौ पुमान्, उन्मूलयति उत्खनति, किं तन्मूलं दयासंज्ञकं, कस्य धर्मशाखिनः पुण्यवृक्षस्य, मांसखादने कथं धर्मतरोर्दयाख्यं मूलमुन्मूल्यते इत्याह—प्राणिप्राणापहारतः प्राणिप्राणापहाराद्धेतोः, न हि प्राणिप्राणापहारमन्तरेण मांसं संभवतीति ॥ १८ ॥

अथ मांसं चिखादिषन्नपि प्राणिदयां करिष्यतीत्याह—

अशनीयन् सदा मांसं दयां यो हि चिकीर्षति ।
ज्वलति ज्वलने वल्लीं स रोपयितुमिच्छति ॥ १९ ॥

सदा सर्वदा, मांसमशनीयन् मांसमशनमिवाचरन्, पुत्रीयति छात्रमितिवत् "आधाराच्चोपमानादाचारे" ॥ २ । ४ । २४ ॥ इति क्यनि रूपम्, दयां कृपां, यः कश्चित्, हि स्फुटं, चिकीर्षति कर्तुमिच्छति । ज्वलतीत्यादिना निदर्शनम्, यथा ज्वलत्यग्नौ वल्लीरोपणमशक्यम् तथा मांसमशनीयता दयाऽपि कर्तुमशक्येत्यर्थः ॥ १९ ॥

नन्वन्यः प्राणिनां घातकोऽन्यश्च मांसभक्षक इति नायं मांसभक्षकस्य प्राणिप्राणापहरणमिति । उच्यते । भक्षकोऽपि घातक एवेत्याह—

हन्ता पलस्य विक्रेता संस्कर्त्ता भक्षकस्तथा ।
क्रेताऽनुमन्ता दाता च घातका एव यन्मनुः ॥२०॥

हन्ता शस्त्रादिना प्राणिनां प्राणापहारकः, पलस्य विक्रेता यो मांसं विक्रीणीते। पलस्येत्युत्तरेष्वपि पदेषु सम्बन्धनीयम्। संस्कर्त्ता यो मांसं संस्करोति, भक्षकः खादकः, क्रेता यो मांसं क्रीणाति, अनुमन्ता यः प्राणिहिंसया मांसमुत्पाद्यमानमनुमोदते, दाता यो मांसमतिथ्यादिभ्यो ददाति; एते साक्षात्पारम्पर्य्येण वा घातका एव प्राणिप्राणापहारका एव, यन्मनुरिति संवादार्थम् ॥ २० ॥

मानवमेवोक्तं दर्शयति—

अनुमन्ता विशसिता निहन्ता क्रयविक्रयी ।
संस्कर्त्ता चोपहर्त्ता च खादकश्चेति घातकाः ॥ २१ ॥

अनुमन्ता अनुमोदकः, विशसिता हतस्याङ्गविभागकरः, निहन्ता व्यापादकः, क्रयविक्रयी क्रयविक्रयौ विद्येते यस्य स तथा, क्रेता विक्रेता चेत्यर्थः; संस्कर्त्ता मांसपाचकः, उपहर्त्ता परिवेष्टा, खादको भक्षकः; एते सर्वे घातकाः ॥ २१ ॥

द्वितीयमपि मानवं श्लोकमाह—

नाकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित् ।
न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं विवर्जयेत् ॥ २२ ॥

यावत्प्राणिनो न हतास्तावन्मांसं नोत्पद्यते, हिंसा चातिशयेन दुःखावहा, तस्मान्मांसं विवर्जयेत्, उत्पद्यत इति मांसस्य हिंसा-

अथ मांसदोषानाह—

चिखादिषति यो मांसं प्राणिप्राणापहारतः ।
उन्मूलयत्यसौ मूलं दयाऽऽख्यं धर्मशाखिनः ॥ १८ ॥

चिखादिषति, खादितुमिच्छति, यः कश्चित्, मांसं पिशितं, असौ पुमान्, उन्मूलयति उत्खनति, किं तन्मूलं दयासंज्ञकं, कस्य धर्मशाखिनः पुण्यवृक्षस्य, मांसखादने कथं धर्मतरोर्दयाख्यं मूलमुन्मूल्यते इत्याह—प्राणिप्राणापहारतः प्राणिप्राणापहाराद्धेतोः, न हि प्राणिप्राणापहारमन्तरेण मांसं संभवतीति ॥ १८ ॥

अथ मांसं चिखादिषन्नपि प्राणिदयां करिष्यतीत्याह—

अशनीयन् सदा मांसं दयां यो हि चिकीर्षति ।
ज्वलति ज्वलने वल्लीं स रोपयितुमिच्छति ॥ १९ ॥

सदा सर्वदा, मांसमशनीयन् मांसमशनमिवाचरन्, पुत्रीयति च्छात्रमितिवत् "आधाराच्चोपमानादाचारे" ॥ ३ । ४ । २४ ॥ इति क्यनि रूपम्, दयां कृपां, यः कश्चित्, हि स्फुटं, चिकीर्षति कर्तुमिच्छति। ज्वलतीत्यादिना निदर्शनम्, यथा ज्वलत्यग्नौ वल्लीरोपणमशक्यम्, तथा मांसमशनीयता दयाऽपि कर्तुमशक्येत्यर्थः ॥ १९ ॥

नन्वन्यः प्राणिनां घातकोऽन्यश्च मांसभक्षक इति कथं मांसभक्षकस्य प्राणिप्राणापहरणमिति। उच्यते। भक्षकोऽपि घातक एवेत्याह—

मांसं भक्षयितुमयुक्तं किं पुनर्देवादिभ्यः कल्पयितुम्। देवा हि सुकृतसमासादितसमासादितदिव्यशरीरा अकावलिकाहाराः कथं मांसं भक्षयेयुः, अभक्ष्यद्रव्यात्स्वकल्पनं मोह एव। पितरश्च स्वसुकृतदुष्कृतवशेन प्राप्तगतिविशेषाः स्वकर्मफलमनुभवन्तो न पुत्रादिकृतेनापि सुकृतेन तार्यन्ते किं पुनर्मांसढौकनदुष्कृतेन। न च पुत्रादिकृतं सुकृतं तेषामुपतिष्ठते। न ह्याम्रेषु सेकः कोविदारेषु फलं दत्ते। अतिथिभ्यश्च सत्काराहेभ्यो नरकपातहेतोर्मांसस्य ढौकनं नहते अधर्माय। एवं परेषां महामोहविचेष्टितम्। श्रुतिस्मृतिविहितत्वादनीयमेतदिति चेन्न। श्रुतिभाषितेष्वप्रामाणिकेषु प्रत्ययस्य कर्तुमशक्यत्वात्। श्रूयन्ते हि श्रुतिवचांसि—यथा पापघ्नो गोस्पर्शः, द्रुमाणां च पूजा; छागादीनां वधः स्वर्ग्यः। ब्राह्मणभोजनं पितृप्रीणनं, मायावीन्यपि दैवतानि; वह्नौ हुतं देवप्रीतिप्रदम्। तदेवंविधेषु श्रुतिभाषितेषु युक्तिकुशलाः कथं श्रद्दधीरन्?।

यदाह —

स्पर्शोऽमेध्यभुजां गवामघहरो वन्द्या विसंज्ञा द्रुमाः

स्वर्गश्छागवधाद्धिनोति च पितॄन् विप्रोपभुक्ताशनम्।

आप्ताश्छद्मपराः सुराः शिखिहुतं प्रीणाति देवान् हविः

स्फीतं फल्गु च वल्गु च श्रुतिगिरां को वेत्ति लीलायितम्? ॥२॥

तस्मान्महामोह एवायं मांसेन देवपूजाऽऽदिकमित्यलं विस्तरेण॥ ननु मन्त्रसंस्कृतो वह्निर्न दहति पचति वा, तन्मन्त्रसंस्कृतं मांसं न दोषाय स्यात्।

[illegible] ॥ [illegible] ।

यदाह

[illegible] द्रुमाः

[illegible] च पितॄन् [illegible] ।

[illegible] सुराः [illegible] प्रीणाति देवान् हविः

[illegible] श्रुतिगिरां को वेत्ति नानायितम् ? ॥१॥

[illegible] एवायं मांसेन देवपूजाऽऽदिकमित्यलं विस्तरेण ॥ ननु मन्त्रसंस्कृतो वह्निर्दहति पचति वा, तन्मन्त्रसंस्कृतं मांसं न दोषाय स्यात् ।

यदाह

'आमासु य पक्कासु य विपच्चमाणासु मंसपेसीसु ।
सययं चिय उववाओ भणिओ उ निगोअजीवाणं ॥ १ ॥

तत एव नरकाध्वनि पाथेयम्, पिशितभक्षणस्य पाथेयत्वं पिशितस्यापि पाथेयमुक्तं को ऽश्नीयात् पिशितं सुधीरविलुप्तसंज्ञः ।

अत्रान्तरश्लोकाः

[illegible] ।
[illegible] मांसभक्षणम् ॥ १ ॥
नान्यस्ततो गतघृणो नरकाग्नीन्धनम् ।
स्वमांसं परमांसेन यः पोषयितुमिच्छति ॥ २ ॥
[illegible] नरं हि [illegible] ।
प्राणिघातोद्भवैर्मांसैर्न पुनर्निर्घृणो नरः ॥ ३ ॥
निःशेषजन्तुमांसानि भक्ष्याणीति च ब्रुवन् ।
नृमांसं वर्जितं शङ्के स्ववधाशङ्कयैव तैः ॥ ४ ॥
विशेषं यो न मन्येत नृमांसपशुमांसयोः ।
धार्मिकान्नु ततो नान्यः पापीयानपि नापरः ॥ ५ ॥
शुक्रशोणितसम्भूतं विष्ठारसविवर्द्धितम् ।
लोहितं स्त्यानतामाप्तं कोऽश्नीयादकृमिः पलम् ? ॥ ६ ॥

---

(१) आमासु च पक्वासु च विपच्यमानासु मांसपेशीषु ।
सततमेव उपपातो भणितस्तु निगोदजीवानाम् ॥ १ ॥

(२) [illegible] योः वर्द्धयितु- ।

अहो द्विजातयो धर्मं शौचमूलं वदन्ति च ।
सप्तधातुकदेहोत्थं मांसमश्नन्ति चाधमाः ॥ ७ ॥
येषां तु तुल्ये मांसान्ने सत्त्वगाभ्यवहारिणाम् ।
विषामृते समे तेषां मृत्युजीवितदायिनी ॥ ८ ॥
भक्षणीयं सतां मांसं प्राण्यङ्गत्वेन हेतुना ।
ओदनादिवदित्येवं ये चानुमिमते जडाः ॥ ९ ॥
गोसम्भवत्वात्ते मूत्रं पयोवन्न पिबन्ति किम् ? ।
प्राण्यङ्गतानिमित्ता च नौदनादिषु भक्ष्यता ॥ १० ॥
शङ्खादि शुचि नास्थ्यादि प्राण्यङ्गत्वे समे यथा ।
ओदनादि तथा भक्ष्यमभक्ष्यं पिशितादिकम् ॥ ११ ॥
यस्तु प्राण्यङ्गमात्रत्वात् प्राह मांसौदने समे ।
स्त्रीत्वमात्रान्मातृपत्न्योः स किं साम्यं न कल्पयेत् ? ॥१
पञ्चेन्द्रियस्यैकस्यापि वधे तन्मांसभक्षणात् ।
यथा हि नरकप्राप्तिर्न तथा धान्यभोजनात् । १३ ॥
न हि धान्यं भवेन्मांसं रसरक्तविकारजम् ।
अमांसभोजिनस्तस्मान्न पापा धान्यभोजिनः ॥ १४ ॥
धान्यपाके प्राणिवधः परमेकोऽवशिष्यते ।
गृहिणां देशयमिनां स तु नात्यन्तबाधकः ॥ १५ ॥

मांसखादकगतिं विमृशन्तः
सस्यभोजनरता इह सन्तः ।
प्राप्नुवन्ति सुरसम्पदमुच्चै-
र्जैनशासनजुषो गृहिणोऽपि ॥ १६ ॥ ३३ ॥

सचेतन:, स्वादयति भक्षयति, मक्षिकाभिः कृतं माक्षिकं मधु। एतच्च भ्रामरादीनामुपलक्षणम् ॥ ३६ ॥

इदानीं मधुभक्षकाणां पापीयस्तां दर्शयति—

भक्षयन्माक्षिकं क्षुद्रजन्तुलक्षक्षयोद्भवम्।
स्तोकजन्तुनिहन्तृभ्यः शौनिकेभ्योऽतिरिच्यते ॥३७॥

क्षुद्रजन्तुरनस्थिः स्यादथवा क्षुद्र एव यः।
शतं वा प्रसृतिर्येषां केचिदा नकुलादपि ॥ १ ॥

तेषां क्षुद्रजन्तूनां लक्षाणि, लक्षग्रहणं बहुत्वोपलक्षणम्। तेषां क्षयो विनाशस्तस्मादुद्भवो यस्य तत्तथा, तद्भक्षयन् स्तोकपश्वादिजन्तुनिहन्तृभ्यः शौनिकेभ्यः खट्टिकेभ्योऽतिरिच्यते अधिकीभवति; भक्षकोऽपि घातक इत्युक्तप्रायम् ॥ ३७ ॥

लौकिकानामप्युच्छिष्टभोजनत्वाजिनामुच्छिष्टत्वान्मधु परिहर्त्तव्यमेवेत्याह—

एकैककुसुमक्रोडाद्रसमापीय मक्षिकाः।
यद्वमन्ति मधूच्छिष्टं तदश्नन्ति न धार्मिकाः ॥३८॥

एकैकस्य कुसुमस्य यः क्रोड उत्सङ्गस्तस्माद्रसं मकरन्दमापीय पीत्वा, मक्षिकाः यद्वमन्ति उद्गिरन्ति, तदुच्छिष्टं मधु; धर्मं चरन्ति धार्मिकास्ते नाश्नन्ति। अनुच्छिष्टभोजनं हि धर्मो लौकिकानाम् ॥ ३८ ॥

ननु 'त्रिदोषप्रशमनं मधु' नातःपरमौषधमस्तीति रोगोपशान्तये मधुभक्षणे को दोष इत्याह—

अप्यौषधकृते जग्धं मधु श्वभ्रनिबन्धनम्।
भक्षितः प्राणनाशाय कालकूटकणोऽपि हि ॥३९॥

आस्तां रसास्वादलाम्पट्येन यावदौषधकृतेऽपि औषधनिमित्तमपि मधु जग्धं यद्यपि रोगापहारकं, तथापि श्वभ्रस्य नरकस्य निबन्धनम्; हि यस्मात् प्रमादाज्जीवितार्थितया वा कालकूटस्य विषस्य कणोऽपि लवोऽपि भक्षितः सन् प्राणनाशाय भवति ॥३९॥

ननु खर्जूरद्राक्षादिरसवन्मधु मधुरमिति सर्वेन्द्रियाप्यायकत्वात् कथं परिहार्यं स्यादित्याह—

मधुनोऽपि हि माधुर्यमबोधैरहहोच्यते।
आसाद्यन्ते यदास्वादाच्चिरं नरकवेदनाः ॥ ४० ॥

सत्यमस्ति मधुनो माधुर्यं व्यवहारतः, परमार्थतस्तु नरकवेदनाहेतुत्वादत्यन्तकटुकत्वमेव। अबोधैरिति परमार्थपरिशीलनाविकलैः, नरकवेदनाहेतोरपि मधुनो माधुर्यवर्णनमसंबाधानामित्यहहेत्यनेन विषादो द्योत्यते। यस्य मधुन आस्वादान्नरकवेदनाश्चिरमासाद्यन्ते प्राप्यन्ते ॥ ४० ॥

पवित्रत्वात् मधु देवस्नानोपयोगीति ये मन्यन्ते तानुपहसति—

मक्षिकामुखनिष्ठ्यूतं जन्तुघातोद्भवं मधु।
अहो पवित्रं मन्वाना देवस्नाने प्रयुञ्जते ॥ ४१ ॥

मक्षिकाणां मुखानि तैर्निष्ठ्यूतं वान्तं जन्तुघातात्प्राण्युपघातादुद्भवो यस्य तस्मादत्यन्तमपवित्रं मधु, पवित्रं शुचि, मन्वाना अभि-

मन्यमानाः, देवानां शङ्करादीनां, स्नाने स्नाननिमित्तं, प्रयुञ्जते व्यापारयन्ति, अहो इत्युपहासे।

यथा—

करभाणां विवाहे तु रासभास्तत्र गायनाः।
परस्परं प्रशंसन्ति अहो रूपमहो ध्वनिः॥ १॥ ४१॥

क्रमप्राप्तान् पञ्चोदुम्बरदोषानाह—

उदुम्बरवटप्लक्षकाकोदुम्बरशाखिनाम्।
पिप्पलस्य च नाश्नीयात्फलं कृमिकुलाकुलम्॥ ४२॥

उदुम्बरवटप्लक्षकाकोदुम्बरिकापिप्पलानां पञ्चोदुम्बरसंज्ञितानां फलं नाश्नीयात्। अनशने कारणमाह—कृमिकुलाकुलं, एकस्मिन्नपि फले तावन्तः कृमयः सम्भवन्ति ये परिसंख्यातुमपि न शक्यन्ते।

यल्लौकिका अपि पेठुः—

कोऽपि क्वापि कुतोऽपि कस्यचिदहो चेतस्यकस्माज्जनः
केनापि प्रविशत्युदुम्बरफलप्राणिक्रमेण क्षणात्।
येनास्मिन्नपि पाटिते विघटिते विदारिते स्फोटिते
निष्पिष्टे परिगालिते विदलिते निर्यात्यसौ वा नवा॥१॥ इति॥४२॥

पञ्चोदुम्बरफलविरतानां स्तुतिमाह—

अप्राप्नुवन्नन्यभक्ष्यमपि क्षामो बुभुक्षया।
न भक्षयति पुण्यात्मा पञ्चोदुम्बरजं फलम्॥४३॥

यः पुण्यात्मा पवित्रात्मा पुरुषः, स पञ्चोदुम्बरजं फलं न भक्षयति,

भाम्तां सत्त्वभक्ष्यफलमभक्ष्यं देशे काले वा, यावद्देशदोषात् काल-दोषाद्वा ममाप्रावश्यन्यभक्ष्यं धान्यफलादिभक्ष्यं ; अपि शब्द उत्तर-त्रापि सम्बध्यते ; बुभुक्षया क्षामोऽपि कृशोऽपि ; अबुभुक्षितस्य स्वस्थस्य व्रतपालनं नातिदुष्करम् ; यस्तु अप्राप्तभोज्यः क्षुत्क्षामश्च व्रतं पालयति स पुण्यात्मेति प्रशस्यते ॥ ४३ ॥

क्रमप्राप्तमनन्तकायनियमं श्लोकत्रयेण दर्शयति—

आर्द्रः कन्दः समग्रोऽपि सर्वः किशलयोऽपि च ।
स्नुही लवणवृक्षत्वक् कुमारी गिरिकर्णिका ॥ ४४ ॥
शतावरी विरूढानि गुडूची कोमलाम्लिका ।
पल्यङ्कोऽमृतवल्ली च वल्लः शूकरसंज्ञितः ॥ ४५ ॥
अनन्तकायाः सूत्रोक्ता अपरेऽपि कृपापरैः ।
मिथ्यादृशामविज्ञाता वर्जनीयाः प्रयत्नतः ॥ ४६ ॥

आर्द्रोऽशुष्कः, शुष्कस्य तु निर्जीवत्वादनन्तकायत्वं न भवति। कन्दो भूमिमध्यगो वृक्षावयवः समग्रोऽपि, सर्वे कन्दा इत्यर्थः। ते च सूरणआर्द्रकलशुनवज्रकन्दहरिद्राकर्चूरपलाशकन्दगृञ्जनलोढकाक-सेरुकमुद्गरमुस्तामूलकआलुकपिण्डालुकहस्तिकन्दमनुष्यकन्दप्रभृ--तयः ; किशलयः पत्रादर्वाग् बीजस्यो[1]च्छूनावस्था सर्वा न तु काचिदेव, स्नुही वज्रतरुः ; लवणनाम्नो वृक्षस्य त्वक्, त्वगेव नत्वन्ये अवयवाः ; कुमारी मांसलप्रणालाकारपत्रा, गिरिकर्णिका

---

(१) क ख -च्छ्वना-।

वल्लीविशेषः, शतावरी वल्लीविशेष एव, विरूढानि अङ्कुरितानि द्विदलधान्यानि, गुडूची वल्लीविशेषः, कोमलाऽम्लिका कोमला अबद्धास्थिका अम्लिका चिञ्चिणिका ; पल्यङ्कः शाकभेदः, अमृतवल्ली वल्लीविशेषः, वल्लः शूकरसंज्ञितः शूकरवल्ल इत्यर्थः ; शूकरसंज्ञितग्रहणं धान्यवल्लनिषेधार्थम् । एते आर्यप्रसिद्धाः । म्लेच्छप्रसिद्धास्तु अन्येऽपि सूत्रोक्ताः ; सूत्रं जीवाभिगमः । अपरेऽपि कृपापरैः श्रावकैर्वर्जनीयाः । ते च मिथ्यादृष्टीनामविज्ञाताः ; मिथ्यादृशो हि वनस्पतीनपि जीवत्वेन न मन्यन्ते कुतः पुनरनन्तकायान् ॥ ४४ ॥ ४५ ॥ ४६ ॥

अथ क्रमप्राप्तमज्ञातफलं वर्जयितुमाह—

स्वयं परेण वा ज्ञातं फलमद्याद्विशारदः ।
निषिद्धे विषफले वा मा भूदस्य प्रवर्त्तनम् ॥४७॥

अज्ञातमिति संबन्धिविशेषानिर्देशात् स्वयमात्मना, परेण वा अन्येन, ज्ञातं फलमद्याद्भक्षयेद्विशारदो धीमान् ; यत्तु स्वयं परेण वा न ज्ञातं तदज्ञातफलं वर्जयेत् ; अज्ञातफलभक्षणे दोषोऽयम्, निषिद्धे फले विषफले वा अज्ञानादस्य विशारदस्य मा भूत्प्रवृत्तिः । [1]अज्ञानतो हि प्रतिषिद्धे फले प्रवर्त्तमानस्य व्रतभङ्गः, विषफले तु जीवितनाशः ॥ ४७ ॥

---

(१) क ख अजानतो ।

अथ क्रमप्राप्तं रात्रिभोजनं निषेद्धुमाह –

अन्नं प्रेतपिशाचाद्यैः सञ्चरद्भिर्निरङ्कुशैः ।
उच्छिष्टं क्रियते यत्र तत्र नाद्याद्दिनात्यये ॥ ४८ ॥

प्रेता अधमा व्यन्तराः, पिशाचा व्यन्तरा एव ; आद्यग्रहणाद्राक्षसादिपरिग्रहः, निशाचरत्वान्निरङ्कुशैः सर्वत्र सञ्चरद्भिः स्पर्शादिनोच्छिष्टमभोज्यं क्रियते यत्र दिनात्यये रात्रौ, तत्र नाद्यान्न भुञ्जीत ।

यदाहुः—

[1]मालिंति महिअलं जामिणीसु रयणीअरा समंतेण ।
ते विट्टालेंति *फुडं रयणीए भुंजमाणं तु ॥ ४८ ॥

तथा—

घोरान्धकाररुद्धाक्षैः पतन्तो यत्र जन्तवः ।
नैव भोज्ये निरीक्ष्यन्ते तत्र भुञ्जीत को निशि ? ॥४९॥

प्रबलान्धकारनिरुद्धलोचनैः कृमिपिपीलिकामक्षिकादयः पतन्तो घृततैलतक्रादौ भोज्ये न दृश्यन्ते यत्र, तत्र तस्यां निशि सचेतनः को भुञ्जीत ? ॥ ४९ ॥

---

(१) मालयन्ति महीतलं यामिनीषु रजनीचराः समन्तात् ।
तेऽपि छलन्ति स्फुटं रजन्यां भुञ्जानं तु ॥ १ ॥

* ते वि छलंति ङ इति रत्नशेखरसूरिकृतश्रावकप्रतिक्रमणसूत्रटीकायाम् ।

नाप्रेक्ष्यसूक्ष्मजन्तूनि निश्यद्यात्प्राशुकान्यपि ।
अप्युद्यत्केवलज्ञानैर्नादृतं यन्निशाऽशनम् ॥ ५३ ॥

[illegible] प्राशुकान्यपि [illegible] न निश्यद्यात्. कुतः [illegible] अप्युद्यत्केवलज्ञानैः [illegible] नादृतं यन्निशाऽशनम् ।

[illegible]

[illegible] ॥ [illegible] ॥

[illegible] ॥ [illegible] ॥

[illegible] ॥ [illegible] ॥

[illegible]

ासनबहिर्भूता लौकिकास्तेऽपि यत् यस्मात् निशि भोज्यमभोज्यं
चक्षते ॥ ५४ ॥

येन शास्त्रेण बाह्या निशाभोज्यमभोज्यं प्रचक्षते तच्छास्त्रो-
दर्शनार्थं तदर्थेति तच्छास्त्रमेव पठति —

ाह यथा —

त्रयीतेजोमयो भानुरिति वेदविदो विदुः ।
तत्करैः पूतमखिलं शुभं कर्म समाचरेत् ॥ ५५ ॥

ायी ऋग्यजुःसामलक्षणा तस्यास्तेजः शक्तं यस्मिन्नस्मिन्
ायीतेजोमयो भानुरादित्यः, त्रयीतनुरिति ह्यादित्यस्य नाम ।
ति वेदविदो जानन्ति । तत इति शेषः । तत्करैर्भानुकरैः पूतं
ाविनीकृतमखिलं समस्तं शुभं कर्म समाचरेत् ; तदभावे शुभं
र्म न कुर्यात् ॥ ५५ ॥

एतदेवाह —

नैवाहुतिर्न च स्नानं न श्राद्धं देवतार्चनम् ।
दानं वा विहितं रात्रौ भोजनं तु विशेषतः ॥५६॥

ाहुतिरग्नौ समिदाद्याधानं, स्नानमङ्गप्रक्षालनं, श्राद्धं पितृकर्म,
देवतार्चनं देवपूजा, दानं वितरणं ; न विहितमिति सर्वत्र
सम्बन्धो योगः ; भोजनं तु विशेषतो न विहितमिति । ननु
ाक्तभोजनं श्रूयते, न च रात्रिभोजनं विना तद्भवति ।
ष्यते । नक्तशब्दार्थापरिज्ञानादेवमुच्यते ॥ ५६ ।

तदेवाह—

दिवसस्याष्टमे भागे मन्दीभूते दिवाकरे ।

नक्तं तु तद्विजानीयान्न नक्तं निशि भोजनम् ॥ ५७॥

दिवसस्य दिनस्याष्टमे भागे पाश्चात्येऽर्धप्रहरे यद्भोजनं तन्नक्तमिति विजानीयात्। द्विविधा हि शब्दस्य प्रवृत्तिर्मुख्या गौणी च; तत्र क्वचिन्मुख्यया व्यवहारः, क्वचिन्मुख्यार्थबाधायां सत्यां गौण्या; नक्तशब्दस्य रात्रिभोजनलक्षणमुख्यार्थबाधा, रात्रिभोजनस्य तत्र तत्र प्रतिषिद्धत्वादिति गौणार्थ एव नक्तशब्दस्यासौ दिवसशेषभोजनं वर्तते। तत्र निमित्तमुक्तं मन्दीभूते दिवाकरे, मुख्यार्थप्रतिषेधाच्च न निशि भोजनं नक्तम् ॥ ५७ ॥

रात्रिभोजनप्रतिषेधमेव पर्यायेण श्लोकद्वयेनाह

देवैस्तु भुक्तं पूर्वाह्णे मध्याह्ने ऋषिभिस्तथा ।

अपराह्णे च पितृभिः सायाह्ने दैत्यदानवैः ॥ ५८॥

सन्ध्यायां यक्षरक्षोभिः सदा भुक्तं कुलोद्वह ! ।

सर्ववेलां व्यतिक्रम्य रात्रौ भुक्तमभोजनम् ॥ ५९ ॥

[illegible] ॥ ५८ ॥ ५९ ॥

॥ आयुर्वेदेऽप्युक्तम् ॥

एवं पुराणेन रात्रिभोजनप्रतिषेधस्य संवादमभिधायायुर्वेदेन संवादमाह, आयुर्वेदेऽप्युक्तमित्यनेन ।

आयुर्वेदस्—

हृन्नाभिपद्मसङ्कोचश्चण्डरोचिरपायतः ।
अतो नक्तं न भोक्तव्यं सूक्ष्मजीवादनादपि ॥६०॥

इह शरीरे द्वे पद्मे ; हृत्पद्मं च यदधोमुखं, नाभिपद्मं च यदूर्द्ध्वमुखं, द्वयोरपि च पद्मयोः रात्रौ सङ्कोचः ; कुतश्चण्डरोचिषः सूर्यस्यापायादस्तमयात् । अतो हृत्पद्मनाभिपद्मसङ्कोचाद्धेतोर्नक्तं रात्रौ न भोक्तव्यम् ; सूक्ष्मजीवादनादपीति द्वितीयं निशिभोजनप्रतिषेधकारणम् । सूक्ष्मा ये जीवास्तेषामदनं भक्षणं, तस्मादपि रात्रौ न भोक्तव्यम् ॥ ६० ॥

परपक्षसंवादमभिधाय स्वपक्षं समर्थयते—

संसजज्जीवसङ्घातं भुञ्जाना निशि भोजनम् ।
राक्षसेभ्यो विशिष्यन्ते मूढात्मानः कथं नु ते ? ॥६१॥

संवध्यमानजीवसमूहं, भोजनं भोज्यं, भुञ्जाना निशि रात्रौ, राक्षसेभ्यः क्रव्यादेभ्यः कथं नु कथं नाम, विशिष्यन्ते भिद्यन्ते, राक्षसा एव ते इत्यर्थः । मूढात्मानो जडाः ; अपि च, लब्धे मानुषत्वे जिनधर्मपरिष्कृते विरतिरेव कर्तुमुचिता, विरतिहीनस्तु शृङ्गपुच्छहीनः पशुरेव ॥ ६१ ॥

एतदेवाह—

वासरे च रजन्यां च यः खादन्नेव तिष्ठति ।
शृङ्गपुच्छपरिभ्रष्टः स्पष्टं स पशुरेव हि ॥ ६२ ॥

स्पष्टम् ॥ ६२ ॥

रात्रिभोजननिवृत्तेभ्योऽपि सविशेषपुण्यवतो दर्शयति—

अह्नो मुखेऽवसाने च यो द्वे द्वे घटिके त्यजन् ।
निशाभोजनदोषज्ञोऽश्नात्यसौ पुण्यभाजनम् ॥ ६३ ॥

अह्नो मुखे आरम्भे, अवसाने पश्चिमे भागे, द्वे द्वे घटिके, मुहूर्त्तं मुहूर्त्तं रात्रेः, प्रत्यासन्नं त्यजन् परिहरन्, योऽश्नाति स पुण्यभाजनम्, निशाभोजनदोषज्ञ इति । निशाभोजने सम्पातिमजन्तुसम्पातलक्षणा ये दोषास्तान् जानन् रात्रिप्रत्यासन्नमपि मुहूर्त्तं मुहूर्त्तं सदोषत्वेन जानाति ; अत एवागमे सर्वजघन्यं प्रत्याख्यानं मुहूर्त्तप्रमाणनमस्कारसहितमुच्यते । पाश्चात्यमुहूर्त्तादप्यर्वाक् श्रावको भोजनं करोति, तदनन्तरं रात्रिभोजनं प्रत्याख्याति ॥६३॥

ननु यो दिवैव भुङ्क्ते तस्य रात्रिभोजनप्रत्याख्याने फलं नास्ति, फलविशेषो वा कश्चिदुच्यतामित्याह—

अकृत्वा नियमं दोषाभोजनाद्दिनभोज्यपि ।
फलं भजेन्न निर्व्याजं न वृद्धिर्भाषितं विना ॥ ६४ ॥

नियमं निवृत्तिं, रात्रिभोजनादकृत्वा दिने भोक्तुं शीलमस्यासौ दिनभोजी सोऽपि निशाभोजनविरतेः फलं निर्व्याजं निश्छद्म,

ऽर्थेन च भवेत् । यत एवमाह — न रात्रिभोजिनं दिवा, रात्रिः ममाप्यत्र, अतिथि नासिन् दिवा न स्यात् । लौकिकमतेन, यथा वासरमेव भोजनार्थं सर्वेदिति ॥ ६४ ॥

पूर्वोक्तस्य विपर्ययमाह

ये वासरं परित्यज्य रजन्यामेव भुञ्जते ।

ते परित्यज्य माणिक्यं काचमाददते जडाः ॥६५॥

दिवसं परित्यज्य नक्तंतनतया रात्रावेव ये भुञ्जते ; तदाना: स्पष्टः ॥ ६५ ॥

ननु नियमः सर्वत्र फलवान्, ततो यस्य 'रात्रावेव मया भोक्तव्यं न दिवा' इति नियमस्तस्य का गतिरित्याह —

वासरे सति ये श्रेयस्काम्यया निशि भुञ्जते ।

ते वपन्त्यूषरक्षेत्रे शालीन् सत्यपि पल्वले ॥ ६६ ॥

वासरे सति वासरभोजने सत्यपि सुखादिसंस्कारादिहेतोः श्रेयस्काम्यया ये रात्रावेव भुञ्जते ते शालिवपनयोग्ये पल्वले सत्यपि ऊषरे क्षेत्रे शालीन् वपन्ति । यथा ऊषरे क्षेत्रे शालिवपनं निष्फलं, तथा रात्रावेव मया भोक्तव्यमिति निष्फलो नियमः । अधर्मनिवृत्तिरूपो हि नियमः फलवानयं तु धर्मनिवृत्तिरूपत्वादफलो विपरीतफलो वा ॥ ६६ ॥

रात्रिभोजनस्य फलमाह —

उलूककाकमार्जारगृध्रशम्बरशूकराः ।

अहिवृश्चिकगोधाश्च जायन्ते रात्रिभोजनात् ॥६७॥

रात्रिभोजनादुलूकादिषु जन्म भवति। उलूकादय उपलक्षणं; तेनान्येष्वप्यधमतिर्यक्षु रात्रिभोजिनो जायन्ते ॥ ६७ ॥

वनमालोदाहरणेन रात्रिभोजनदोषस्य महत्तां दर्शयति—

श्रूयते ह्यन्यशपथाननादृत्यैव लक्ष्मणः।
निशाभोजनशपथं कारितो वनमालया ॥ ६८ ॥

श्रूयते रामायणे दशरथनन्दनो लक्ष्मणः पितृनिदेशात् सह रामेण सीतया च दक्षिणापथे प्रस्थितोऽन्तरा कूबरनगरे महीधरराजतनयां वनमालामुपयेमे; ततश्च रामेण सह परतो देशान्तरं यियासन् स्वभार्यां वनमालां प्रतिमोचयति स्म; सा तु तद्विरहकातरा पुनरागमनमसम्भावयन्ती लक्ष्मणं शपथानकारयत्। यथा प्रिये! रामं मनीषिते देशे परिस्थाप्य यद्यहं भवतीं स्वदर्शनेन न प्रीणयामि, तदा प्राणातिपातादिपातकिनां गतिं यामीति; सा तु तैः शपथैरतुष्यन्ती यदि रात्रिभोजनकारिणां शपथं करोषि, तदा त्वां प्रतिमुञ्चामि, नान्यथेति तमुवाच; स तथेत्यभ्युपगत्य देशान्तरं प्रस्थितवान्। एवमन्यशपथाननादृत्य लक्ष्मणो वनमालया रात्रिभोजनशपथं कारितः। विशेषचरितं तु ग्रन्थगौरवभयान्नेह लिख्यते ॥ ६८ ॥

शास्त्रं निदर्शनं च विना सकलजनानुभवसिद्धं रात्रिभोजनविरतेः फलमाह—

करोति विरतिं धन्यो यः सदा निशि भोजनात्।
सोऽर्धं पुरुषायुषस्य स्यादवश्यमुपोषितः ॥ ६९ ॥

यः कश्चिद्धर्मधनी हि रात्रिभोजनस्य विरतिं करोति, सोऽर्धं पुरुषायुषस्योपोषितः स्यात्। उपवासस्य चैकस्यापि निर्जराकारणत्वान्महाफलत्वं पञ्चाशद्वर्षसम्मितानां तूपवासानां कियत्फलं सम्भाव्यते ; इदं च शतवर्षायुषः पुरुषानधिकृत्योक्तम्। पूर्वकोटीजीविनस्तु प्रति तदर्धमुपवासानां न्यायसिद्धमेव ॥ ६८ ॥

तदेवं रात्रिभोजनस्य भूयांसो दोषास्तत्परिवर्जने तु ये गुणास्तान् वक्तुमस्माकमशक्तिरेवेत्याह—

रजनीभोजनत्यागे ये गुणाः परितोऽपि तान्।
न सर्वज्ञादृते कश्चिदपरो वक्तुमीश्वरः ॥ ७० ॥

स्पष्टम् ॥ ७० ॥

अथ क्रमप्राप्तमामगोरससंपृक्तद्विदलादिभोजनप्रतिषेधमाह—

आमगोरससंपृक्तद्विदलादिषु जन्तवः।
दृष्टाः केवलिभिः सूक्ष्मास्तस्मात्तानि विवर्जयेत् ॥७१॥

इह हीयं स्थितिः—केचिद्भावा हेतुगम्याः, केचित्त्वागमगम्यास्तत्र ये यथा हेत्वादिगम्यास्ते तथैव प्रवचनधरैः प्रतिपादनीयाः। आगमगम्येषु हेतून्, हेतुगम्येषु त्वागममात्रं प्रतिपादयन्नाज्ञाविराधकः स्यात्।

यदाह—

'जो हेउवायपक्खम्मि हेउओ आगमे य आगमिओ।

---

(१) यो हेतुवादपक्षे हेतुक आगमे चागमिकः।

यः स्वायुःपर्यन्तं हि रात्रिभोजनस्य विरतिं करोति, सोऽर्द्धं स्वकायुषोऽर्धोपोषितः स्यात् । उपवासस्य चैकस्यापि निर्जराकारणत्वात्सफलत्वमत्र पञ्चाशद्वर्षमितानां तूपवासानां कियत्फलं वक्तव्यम् ; इदं च शतवर्षायुषः पुरुषानधिकृत्योक्तम् । पूर्वकोटीजीविनस्तु प्रति तदर्द्धमुपवासानां न्याय्यमिदमेव ॥ ६८ ॥

तदेवं रात्रिभोजनस्य भूयांसो दोषास्तत्परिवर्जने तु ये गुणास्तान् वक्तुमसामर्थ्यं दर्शयन्नाह —

रजनीभोजनत्यागे ये गुणाः परितोऽपि तान् ।
न सर्वज्ञादृते कश्चिदपरो वक्तुमीश्वरः ॥ ७० ॥

स्पष्टम् ॥ ७० ॥

अथ आमगोरससंपृक्तद्विदलादिभोजनप्रतिषेधमाह—

आमगोरससंपृक्तद्विदलादिषु जन्तवः ।
दृष्टाः केवलिभिः सूक्ष्मास्तस्मात्तानि विवर्जयेत् ॥७१॥

इह हीयं स्थितिः—केचिद्भावा हेतुगम्याः, केचित्त्वागमगम्यास्तत्र ये यथा हेत्वादिगम्यास्ते तथैव प्रवचनधरैः प्रतिपादनीयाः । आगमगम्येषु हेतून्, हेतुगम्येषु त्वागममात्रं प्रतिपादयन्नाज्ञाविराधकः स्यात् ।

यदाह—

[1]जो हेउवायपक्खम्मि हेउओ आगमे य आगमिओ ।

---

(१) यो हेतुवादपक्षे हेतुक आगमे चागमिकः ।

रात्रिभोजनादुलूकादिषु जन्म भवति। उलूकादय उपलक्षणं; तेनान्येष्वप्यधमतिर्यक्षु रात्रिभोजिनो जायन्ते ॥ ६७ ॥

वनमालोदाहरणेन रात्रिभोजनदोषस्य महत्तां दर्शयति—

श्रूयते ह्यन्यशपथाननादृत्यैव लक्ष्मणः।
निशाभोजनशपथं कारितो वनमालया ॥ ६८ ॥

श्रूयते रामायणे दशरथनन्दनो लक्ष्मणः पितृनिदेशात् सह रामेण सीतया च दक्षिणापथे प्रस्थितोऽन्तरा कूबरनगरे महीधरराजतनयां वनमालामुपयेमे; ततश्च रामेण सह परतो देशान्तरं यियासन् स्वभार्यां वनमालां प्रतिमोचयति स्म; सा तु तद्विरहकातरा पुनरागमनमसम्भावयन्ती लक्ष्मणं शपथानकारयत्। यथा प्रिये! रामं मनीषिते देशे परिस्थाप्य यद्यहं भवतीं स्वदर्शनेन न प्रीणयामि, तदा प्राणातिपातादिपातकिनां गतिं यामीति; सा तु तैः शपथैरतुष्यन्ती यदि रात्रिभोजनकारिणां शपथं करोषि, तदा त्वां प्रतिमुञ्चामि, नान्यथेति तमुवाच; स तथेत्यभ्युपगम्य देशान्तरं प्रस्थितवान्। एवमन्यशपथाननादृत्य लक्ष्मणो वनमालया रात्रिभोजनशपथं कारितः। विशेषचरितं तु रामायणादवसेयमिति ॥ ६८ ॥

एवं निदर्शनेन विना सकलजनानुभवसिद्धं रात्रिभोजनविरतेः फलमाह—

करोति विरतिं धन्यो यः सदा निशि भोजनात्।
सोऽर्धं पुरुषायुषस्य स्यादवश्यमुपोषितः ॥ ६९ ॥

ाधिनो हि रात्रिभोजनस्य विरतिं करोति, सोऽर्द्धं
पोषितः स्यात्। उपवासस्य चैकस्यापि निर्जरा-
ाफलत्वं पञ्चाशद्वर्षसम्मितानां तूपवासानां कियत्फलं
इदं च शतवर्षायुषः पुरुषानधिकृत्योक्तम्। पूर्वकोटी-
ते तदर्द्धमुपवासानां न्यायसिद्धमेव ॥ ६८ ॥

ात्रिभोजनस्य भूयांसो दोषास्तत्परिवर्जने तु ये
ुमस्माकमशक्तिरेवेत्याह—

भोजनत्यागे ये गुणाः परितोऽपि तान्।
ज्ञाहते कश्चिदपरो वक्तुमीश्वरः ॥ ७० ॥

॥

समामगोरससंपृक्तद्विदलादिभोजनप्रतिषेधमाह—

रससंपृक्तद्विदलादिषु जन्तवः।
लिभिः सूक्ष्मास्तस्मात्तानि विवर्जयेत् ॥७१॥

तिः—केचिद्भावाः हेतुगम्याः, केचित्त्वागमगम्यास्तत्र
ादिगम्यास्ते तथैव प्रवचनधरैः प्रतिपादनीयाः।
हेतून्, हेतुगम्येषु त्वागममात्रं प्रतिपादयन्नाज्ञा-
ात्।

ेउवायपक्खम्मि हेउओ आगमे य आगमिओ।

) यो हेतुवादपक्षे हेतुक आगमे चागमिकः।

रात्रिभोजनादुलूकादिषु जन्म भवति। उलूकादय उपलक्षणं; तेनान्येष्वप्यधमतिर्यक्षु रात्रिभोजिनो जायन्ते ॥ ६७ ॥

वनमालोदाहरणेन रात्रिभोजनदोषस्य महत्तां दर्शयति—

श्रूयते ह्यन्यशपथाननादृत्यैव लक्ष्मणः ।
निशाभोजनशपथं कारितो वनमालया ॥ ६८ ॥

श्रूयते रामायणे दशरथनन्दनो लक्ष्मणः पितृनिर्देशात् सह रामेण सीतया च दक्षिणापथे प्रस्थितोऽन्तरा कूबरनगरे महीधरराजतनयां वनमालामुपयेमे; ततश्च रामेण सह परतो देशान्तरं यियासन् स्वभार्यां वनमालां प्रतिमोचयति स्म; सा तु तद्विरहकातरा पुनरागमनमसम्भावयन्ती लक्ष्मणं शपथानकारयत्। यथा प्रिये! रामं मनीषिते देशे परिस्थाप्य यद्यहं भवतीं स्वदर्शनेन न प्रीणयामि, तदा प्राणातिपातादिपातकिनां गतिं यामीति; सा तु तैः शपथैरतुष्यन्ती यदि रात्रिभोजनकारिणां शपथं करोषि, तदा त्वां प्रतिमुञ्चामि, नान्यथेति तमुवाच; स तथेत्यभ्युपगत्य देशान्तरं प्रस्थितवान्। एवमन्यशपथाननादृत्य लक्ष्मणो वनमालया रात्रिभोजनशपथं कारितः। विशेषचरितं तु ग्रन्थगौरवभयान्नेह लिख्यते ॥ ६८ ॥

शास्त्रं निदर्शनं च विना सकलजनानुभवसिद्धं रात्रिभोजनविरतेः फलमाह—

करोति विरतिं धन्यो यः सदा निशि भोजनात् ।
सोऽर्द्धं पुरुषायुषस्य स्यादवश्यमुपोषितः ॥ ६९ ॥

महेत्यर्थमतिचारप्रकरण एव वक्ष्यते। अवसितं भोगोपभोगव्रतम्॥ ७२॥

अथानर्थदण्डस्य तृतीयगुणव्रतस्यावसरः तच्चतुर्द्धेति श्लोकद्वयेनाह—

आर्त्तं रौद्रमपध्यानं पापकर्मोपदेशिता।
हिंसोपकारिदानं च प्रमादाचरणं तथा॥ ७३॥
शरीराद्यर्थदण्डस्य प्रतिपक्षतया स्थितः।
योऽनर्थदण्डस्तत्त्यागस्तृतीयं तु गुणव्रतम्॥ ७४॥

अपकृष्टं ध्यानमपध्यानं, तदनर्थदण्डस्य प्रथमो भेदः। तच्च द्वेधा—आर्त्तं रौद्रं च; तत्र ऋतं दुःखं तत्र भवमार्त्तं; यदि वा अर्त्तिः पीडा यातनं च, तत्र भवमार्त्तम्। तच्चतुर्द्धा—अमनोज्ञानां शब्दादीनां संप्रयोगे तद्विप्रयोगचिन्तनमसंप्रयोगप्रार्थना च प्रथमम्। शूलादिरोगसम्भवे च तद्वियोगप्रणिधानं तदसंप्रयोगचिन्ता च द्वितीयम्। इष्टानां च शब्दादीनां विषयाणां सातवेदनायाश्चावियोगाध्यवसानं, संप्रयोगाभिलाषश्च तृतीयम्। देवेन्द्रचक्रवर्त्यादिविभवप्रार्थनारूपं निदानं चतुर्थम्।

यदाहुः—

'अमणुन्नाणं सद्दाइविसयवत्थूण दोसमइलस्स।
धणिअं विओअचिंतणमसंपओगाणुसरणं च॥ १॥

---

(१) अमनोज्ञानां शब्दादिविषयवस्तूनां द्वेषमलिनस्य।
अत्यर्थं वियोगचिन्तनमसंप्रयोगानुसरणं च॥ १॥

'सो समयपन्नवओ सिद्धंतविराहओ अन्नो ॥ १ ॥

इत्यामगोरससंपृक्तद्विदलादौ न हेतुगम्यो जीवसद्भावः, किन्त्वागमगम्य एव। तथाहि। आमगोरससंपृक्ते द्विदले आदिशब्दात्पुष्पितौदने, अहर्द्वितयातीते दध्नि, कुथितान्ने च, ये जन्तवस्ते केवलज्ञानिभिर्दृष्टा इति जन्तुमिश्रामगोरसमिश्रद्विदलादिभोजनं वर्जयेत्। तद्भोजनाद्धि प्राणातिपातलक्षणो दोषः। न च केवलिनां निर्दोषत्वेनाप्तानां वचनानि विपर्ययन्ति ॥ ७१ ॥

अपि च। न मद्यादीनि कुथितान्नपर्यवसानान्येवाभोज्यानि, किन्त्वन्यान्यपि जीवसंसक्तिबहुलान्यागमादुपलभ्य वर्जनीयानीत्याह—

जन्तुमिश्रं फलं पुष्पं पत्रं चान्यदपि त्यजेत्।
सन्धानमपि संसक्तं जिनधर्मपरायणः ॥ ७२ ॥

जन्तुभिर्मिश्रं फलं मधूकबिल्वादेः, पुष्पमरणिशिग्रुमधूकादेः, पत्रं प्रावृषि तण्डुलीयकादेः, अन्यदपि मूलादि त्यजेत्। सन्धानमाम्रफलादीनां यदि संसक्तं भवेत्, तदा जिनधर्मपरायणः कृपालुत्वात्त्यजेदिति संबन्धः। इदं च भोजनतो भोगोपभोगयोर्व्रतमुक्तम्; भोगोपभोगकारणं धनोपार्जनमपि भोगोपभोग उच्यते। उपचारात्। तत्परिमाणमपि भोगोपभोगव्रतम्। यथा श्रावकस्य खरकर्मपरिहारेण कर्मान्तरेण जीविका। एतच्च

(१) स स्वसमयप्रज्ञापकः सिद्धान्तविराधकोऽन्यः ॥ १ ॥

नात्रोपार्थमतिचारप्रकरण एव वक्ष्यते। अवसितं भोगोपभोगव्रतम् ॥ ७२ ॥

अथानर्थदण्डस्य तृतीयगुणव्रतस्यावसरः तच्चतुर्द्धेति श्लोकद्वयेनाह—

आर्त्तं रौद्रमपध्यानं पापकर्मोपदेशिता ।
हिंसोपकारिदानं च प्रमादाचरणं तथा ॥ ७३ ॥
शरीराद्यर्थदण्डस्य प्रतिपक्षतया स्थितः ।
योऽनर्थदण्डस्तत्त्यागस्तृतीयं तु गुणव्रतम् ॥ ७४ ॥

अपकृष्टं ध्यानमपध्यानं, तदनर्थदण्डस्य प्रथमो भेदः। तच्च द्वेधा—आर्त्तं रौद्रं च; तत्र ऋतं दुःखं तत्र भवमार्त्तं; यदि वा अर्त्तिः पीडा यातनं च, तत्र भवमार्त्तम्। तच्चतुर्द्धा—अमनोज्ञानां शब्दादीनां संप्रयोगे तद्विप्रयोगचिन्तनमसंप्रयोगप्रार्थना च प्रथमम्। शूलादिरोगसम्भवे च तद्वियोगप्रणिधानं तदसंप्रयोगचिन्ता च द्वितीयम्। इष्टानां च शब्दादीनां विषयाणां सातवेदनायाश्चावियोगाध्यवसानं, संप्रयोगाभिलाषश्च तृतीयम्। देवेन्द्रचक्रवर्त्यादिविभवप्रार्थनारूपं निदानं चतुर्थम्।

यदाहुः—

'अमणुण्णाणं सद्दाइविसयवत्थूण दोसमइलस्स ।
धणिअं विओअचिंतणमसंपओगाणुसरणं च ॥ १ ॥

(१) अमनोज्ञानां शब्दादिविषयवस्तूनां द्वेषमलिनस्य ।
अत्यर्थं वियोगचिन्तनमसंप्रयोगानुसरणं च ॥ १ ॥

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible] रौद्रम् । [illegible] हिंसानुबन्धि मृषानुबन्धि स्तेयानुबन्धि सं-
रक्षणानुबन्धि च ।

यदाहुः —

¹सत्तवहवेहबंधणडहणंकणमारणाइपणिहाणं ।
अइकोहग्गहघत्थं निग्घिणमणसोऽहमविवागं ॥ १ ॥

---

(१) तथा शूलशिरोरोगादिवेदनाया. वियोगप्रणिधानम् ।
तदसंप्रयोगचिन्ता तत्प्रतीकाराकुलमनसः ॥ २ ॥

(२) इष्टानां विषयादीनां वेदनायाश्च रागरक्तस्य ।
अवियोगाध्यवसानं तथा संयोगाभिलाषश्च ॥ ३ ॥

(३) देवेन्द्रचक्रवर्त्तित्वादिगुणर्द्धिप्रार्थनामयम् ।
अधमं निदानचिन्तनमज्ञानानुगतमत्यन्तम् ॥ ४ ॥

(४) एतत् चतुर्विधं रागद्वेषमोहाङ्कितस्य जीवस्य ।
आर्तध्यानं संसारवर्द्धनं तिर्यग्गतिमूलम् ॥ ५ ॥

(५) सत्त्ववधवेधबन्धनदहनाङ्कनमारणादिप्रणिधानम् ।
अतिक्रोधग्रहग्रस्तं निर्घृणमनसोऽधमविपाकम् ॥ १ ॥

[1]पिसुणासब्भासब्भूयभूयघायाइवयणपणिहाणं ।
मायाविणो अइसंधणपरस्स पच्छन्नपावस्स ॥ २ ॥
[2]तह तिव्वकोहलोहाउलस्स भूओवघायणमणज्जं ।
परदव्वहरणचित्तं परलोगावायनिरवेक्खं ॥ ३ ॥
[3]सद्दाइविसयसाहणधणसंरक्खणपरायणमणिट्ठं ।
सव्वाभिसंकणपरोवघायकलुसाउलं चित्तं ॥ ४ ॥
[4]एयं चउव्विहं रागदोसमोहंकियस्स जीवस्स ।
रोद्दज्झाणं संसारवड्ढणं निरयगइमूलं ॥ ५ ॥

एवमार्तरौद्रध्यानात्मकमपध्यानमनर्थदण्डस्य प्रथमो भेदः । पापकर्मोपदेशिता वक्ष्यमाणा द्वितीयः । हिंसोपकारिणां शस्त्रादीनां दानमिति तृतीयः । प्रमादानां गीतनृत्तादीनामाचरणं चतुर्थः । शरीरादिनिमित्तं यः प्राणिनां दण्डः सोऽर्थाय प्रयोजनाय दण्डोऽर्थदण्डस्तस्य शरीराद्यर्थदण्डस्य यः प्रतिपक्षरूपोऽनर्थदण्डो निष्प्रयोजनो दण्ड इति यावत्; तस्य त्यागोऽनर्थदण्डविरतिस्तृतीयं गुणव्रतम् ।

---

(१) पिशुनासभ्यासद्भूतभूतघातादिवचनप्रणिधानम् ।
मायाविनोऽतिसन्धानपरस्य प्रच्छन्नपापस्य ॥ २ ॥
(२) तथा तीव्रक्रोधलोभाकुलस्य भूतोपघातनमनार्यम् ।
परद्रव्यहरणचित्तं परलोकापायनिरपेक्षम् ॥ ३ ॥
(३) शब्दादिविषयसाधनधनसंरक्षणपरायणमनिष्टम् ।
सर्वाभिशङ्कनपरोपघातकलुषाकुलं चित्तम् ॥ ४ ॥
(४) एवं चतुर्विधं रागद्वेषमोहाङ्कितस्य जीवस्य ।
रौद्रध्यानं संसारवर्धनं नरकगतिमूलम् ॥ ५ ॥

यदाह—

'जं इंदियसयणाई पडुच्च पावं करेज्ज सो होइ।

अत्थे दंडो एत्तो अन्नो उ अणत्थदंडो उ ।१।३३।३४।

अपध्यानस्य स्वरूपं परिमाणं चाह—

वैरिघातो नरेन्द्रत्वं पुरघाताग्निदीपने।

खचरत्वाद्यपध्यानं मुहूर्तात्परतस्त्यजेत् ॥ ७५ ॥

वैरिघातपुरघाताग्निदीपनादिविषयं रौद्रध्यानमपध्यानं, नरेन्द्र खचरत्वमादिशब्दादप्सरोविद्याधरीपरिभोगादि, तद्विषयमार्तध्यानमपध्यानं, तस्य तत्परिमाणरूपं व्रतं मुहूर्तात्परतस्त्यजेदिति ॥७५

अथ पापोपदेशस्वरूपं तद्विरतिं चाह—

वृषभान् दमय क्षेत्रं कृष षण्ढय वाजिनः।

दाक्षिण्याविषये पापोपदेशोऽयं न कल्पते ॥ ७६

वृषभान् वत्सतरान् प्रसङ्गादिना दमय दान्तान् कुरु; प्रत्यास दति खलु वर्षाकालः, तथा क्षेत्रं बीजावापभुवं कृष; इष्टः स्ने मेघो, यास्यति वापकालो, भृता वा केदारा गाह्यन्तां. शरदि वयमध्ये उत्पन्नाश्च व्रीहयः; तथा नदीयोऽश्वः प्रयोजनं राज मिति षण्ढय वर्धितकान् कुरु, वाजिनोऽश्वान्, उपलक्षणं चै दन्येषां गोपि दवाग्निदानादीनाम्; अयं पापरूप उपदेशः, श्रा काणां न कल्पते न युज्यते। सर्वत्र पापोपदेशनियमं कर्तुमश

(१) यदिन्द्रियस्वजनादीन् प्रतीत्य पापं कुर्यात् स भवति।
अर्थे दण्डः इतः अन्यस्तु अनर्थदण्डस्तु ॥ १ ॥

पवादोऽयमुच्यते। दाक्षिण्याविषय इति। बन्धुपुत्रादिविषय-
ाख्यतः पापोपदेशोऽशक्यपरिहारः। दाक्षिण्याभावे तु
तथा मौखर्येण पापोपदेशो न कल्पते ॥ ७६ ॥

। हिंसोपकारीणि तद्दानपरिहारं चाह -

यन्त्रलाङ्गलशस्त्राग्निमुशलोदूखलादिकम्।
दाक्षिण्याविषये हिंस्रं नार्पयेत्करुणापरः ॥ ७७ ॥

शकटादि, लाङ्गलं हलं, शस्त्रं खड्गादि, अग्निर्वह्निः, मुशल-
ऽयं, उदूखलमुलूखलं, आदिशब्दाद्धनुर्भस्त्रादिपरिग्रहः।
ं वस्तु, करुणापरः श्रावको नार्पयेत्; दाक्षिण्याविषय इति
ात् ॥ ७७ ॥

अथ प्रमादाचरणमनर्थदण्डस्य चतुर्थभेदं तत्परिहारं
च श्लोकद्वयेनाह—

कुतूहलाद्गीतनृत्तनाटकादिनिरीक्षणम्।
कामशास्त्रप्रसक्तिश्च द्यूतमद्यादिसेवनम् ॥ ७८ ॥
जलक्रीडाऽऽन्दोलनादिविनोदो जन्तुयोधनम्।
रिपोः सुतादिना वैरं भक्तस्त्रीदेशराट्कथाः ॥ ७९ ॥
रोगमार्गश्रमौ मुक्त्वा स्वापश्च सकलां निशाम्।
एवमादि परिहरेत्प्रमादाचरणं सुधीः ॥ ८० ॥

हमार्त्कौतुकाद्गीतस्य नृत्तस्य नाटकस्य आदिशब्दात्प्रेक्ष-
देर्निरीक्षणं, तेन तेनेन्द्रियेण यथोचितं विषयीकरणम्।

कुतूहलग्रहणाज्जिनयात्रादौ, प्रासङ्गिकनिरीक्षणे च न प्र
चरणम्। तथा कामशास्त्रे वात्स्यायनादिकृते, प्रसक्तिः पुन
परिशीलनम्; तथा द्यूतमद्यकादिभिः क्रीडनम्; मद्य
आदिशब्दान्मृगयादि; तेषां सेवनं परिशीलन; तथा जल
तडागजलयन्त्रादिषु मज्जनोन्मज्जनशृङ्गिकास्फोटनादि
तथा आन्दोलनं वृक्षशाखादौ दोलाखेलनं; आदिशब्दा
वचयादि; तथा जन्तूनां कुक्कुटादीनां योधनं परस्परेण
हननम्; तथा रिपोः शत्रोः सम्बन्धिना पुत्रपौत्रादिना वै
अयमर्थो येन तावत्कथञ्चिदायातं वैरं तद्यः परिहर्
शक्नोति तस्यापि पुत्रपौत्रादिना यद्वैरं तत्प्रमादाचरणम्;
भक्तकथा, यथा इदं चेदं च मांसाकमाषमोदकादि साधु
साध्वनेन भुज्यते, अहमपि वा इदं भोक्ष्ये इत्यादि
तथा स्त्रीकथा, स्त्रीणां नेपथ्याङ्गहारहावभावादिवर्ण
"कर्णाटी सुरतोपचारचतुरा लाटी विदग्धप्रिया" इत्यादि
वा; तथा देशकथा, यथा दक्षिणापथः प्रचुरान्नपानः स्त्रीस
प्रधानः, पूर्वदेशो विचित्रवस्त्रगुडखण्डशालिमद्यादिप्र
उत्तरापथे शूराः पुरुषा जविनो वाजिनो गोधूमप्रधा
धान्यानि सुलभं कुङ्कुमं मधुराणि द्राक्षादाडिमकपित्थादी
पश्चिमदेशे सुखस्पर्शानि च वस्त्राणि सुलभा इक्षवः शीतं वारि
मादि; राट्कथा राजकथा, यथा शूरोऽस्मदीयो राजा,
चौडः, गजपतिर्गौडः, अश्वपतिस्तुरुष्क इत्यादि। एवं प्रति
त्राणि भक्तादिकथा वाच्या; तथा रोगो ज्वरादिः, मार्ग

'असणं ओयणसत्तुगमुग्गजगाराइ खज्जगविही य।
खीराइसूरणाई मंडगपभिई अ विन्नेयं ॥ १ ॥

पाने सौवीरं यवादिधावनं सुरादि सर्वाप्कायः कर्कटकजला-दिकं च।

यदाह —

'पाणं सोवीरजवोदगाइ चित्तं सुराइयं चेव।
आउक्काओ सव्वो कक्कडगजलाइयं च तहा ॥ १ ॥

खादिमे भृष्टधान्यं गुडपर्पटिकाखर्जूरनालिकेरद्राक्षाकर्कटिकाम्रपनस-[illegible]।

यदाह —

'भत्तोसं दंताई खज्जूरं नालिकेरदक्खाई।
कक्कडिअंबगफणसाइ बहुविहं खाइमं नेयं ॥ १ ॥

[illegible]

[illegible]

[illegible]

स्वादिम

(१)दंतवण तंबोलं चित्तं तुलसीकुहेडगाईयं ।
महुपिप्पलिसुंठाई अणेगहा साइमं होइ ॥ १ । ८१ ॥

एतानि त्रीणि गुणव्रतानि ।

अथ चत्वारि शिक्षाव्रतान्युच्यन्ते, तत्रापि सामायिकदेशावकाशिकपौषधातिथिसंविभागलक्षणेषु चतुर्षु शिक्षाव्रतेषु प्रथमं सामायिकाख्यं शिक्षाव्रतमाह —

त्यक्तार्त्तरौद्रध्यानस्य त्यक्तसावद्यकर्मणः ।
मुहूर्तं समता या तां विदुः सामायिकव्रतम् ॥८२॥

मुहूर्तं मुहूर्तकालं, या समता रागद्वेषहेतुषु मध्यस्थता, तां सामायिकव्रतं विदुः ; समस्य रागद्वेषविनिर्मुक्तस्य सतः, आयो ज्ञानादीनां लाभः प्रशमसुखरूपः, समायः ; समाय एव सामायिकम् ; विनयादित्वादिकण् । समायः प्रयोजनमस्येति वा सामायिकम् । तच्च सामायिकं मनोवाक्कायचेष्टापरिहारं विना न भवतीति त्यक्तार्त्तरौद्रध्यानस्येत्युक्तं, त्यक्तसावद्यकर्मण इति च ; त्यक्तं सावद्यं वाचिकं कायिकं च कर्म येन तस्य । सामायिकस्थश्च श्रावकः गृहस्थोऽपि यतिरिव भवति ।

(१) दन्तपावनं ताम्बूलं चित्रं तुलसीकुहेडकादिकम् ।
मधुपिप्पलिशुण्ठ्यादि अनेकधा स्वादिमं भवति ॥ १ ॥

यदाह—

[1]सामाइयंमि उ कए समणो इव सावओ हवइ जम्हा ।
एएण कारणेणं बहुसो सामाइयं कुज्जा ॥ १ ॥

अतएव तस्य देवस्नानपूजादौ नाधिकारः। नन्वगर्हितं कर्म कुर्वाणस्य देवस्नानादौ को दोषः ; सामायिकं हि सावद्यव्यापार-निषेधात्मकं, निरवद्यव्यापारविधानात्मकं च ; तत्स्वाध्यायपठन-परिवर्त्तनादिवत् देवपूजादौ को दोषः ?। नैवम्। यतेरिव देवस्नानपूजनादौ नाधिकारः। भावस्तवार्थं च द्रव्यस्तवोपादा-नम् ; सामायिके च सति संप्राप्तो भावस्तव इति किं द्रव्यस्तव-करणेन ?।

यदाह—

[2]दव्वत्थओ य भावत्थओ य दव्वत्थओ बहुगुणोत्ति बुद्धि सिया ।
अणिउणजणवयणमिणं छज्जीवहियं जिणा बिंति ॥ १ ॥

इह श्रावकः सामायिककर्त्ता द्विविधो भवति। ऋद्धिमानन्टद्धि-कश्च ; योऽसावनृद्धिकः स चतुर्षु स्थानेषु सामायिकं करोति ; जिनगृहे, साधुसमीपे, पौषधशालायां, स्वगृहे वा ; यत्र वा विश्राम्यति, निर्व्यापारो वा आस्ते तत्र च। तत्र यदा साधुसमीपे

(१) सामायिके एव कृते श्रमण इव श्रावको भवति यस्मात् ।
एतेन कारणेन बहुशः सामायिकं कुर्यात् ॥ १ ॥

(२) द्रव्यस्तवश्च भावस्तवश्च द्रव्यस्तवो बहुगुण इति बुद्धिः स्यात् ।
अनिपुणजनवचनमिदं षड्जीवहितं जिना ब्रुवते ॥ १ ॥

करोति तदायं विधिः; यदि कस्माच्चिदपि भयं नास्ति, केनचिद्विवादो नास्ति, ऋणं वा न धारयति; मा भूत्तत्कृता-कर्षणापकर्षणनिमित्तचित्तसंक्लेशः; तदा स्वगृहेऽपि सामायिकं कृत्वा ईर्यां शोधयन्, सावद्यां भाषां परिहरन्, काष्ठलेष्ट्वादिना यदि कार्यं तदा तत्स्वामिनमनुज्ञाप्य प्रतिलिख्य प्रमार्ज्य च गृह्णन्, खेलसिङ्घाणकादींश्चाविवेचयन् विवेचयंश्च स्थण्डिलं प्रत्यवेक्ष्य प्रमृज्य च; एवं पञ्चसमितिसमितस्त्रिगुप्तिगुप्तः साध्वा-श्रयं गत्वा साधून्नमस्कृत्य सामायिकं करोति यथा—

करेमि भंते सामाइयं सावज्जं जोगं पच्चक्खामि जाव साहू पज्जुवासामि दुविहं तिविहेणं मणेणं वायाए काएणं न करेमि न कारवेमि तस्स भंते पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि ॥

सामायिकसूत्रस्यायमर्थः—करेमि अभ्युपगच्छामि; भंते इति गुरोरामन्त्रणम्, हे भदन्त! भन्दते सुखवान् कल्याणवांश्च भवति; भदुङ् सुखकल्याणयोः, अस्य औणादिकान्तप्रत्ययान्तस्य निपातनात् रूपम्। आमन्त्रणं च प्रत्यक्षस्य गुरोस्तदभावे परोक्षस्यापि बुद्ध्या प्रत्यक्षीकृतस्य भवति; यथा जिनानामभावे जिनप्रतिमाया आरोपितजिनत्वायाः स्तुतिपूजासम्बोधनादिकं भवति, गुरोश्चाभिमुखीकरणं तदायत्तः सर्वो धर्म इति प्रदर्शनार्थम्।

यदाह—

र्देनि, त्रिविधेन करणेन न करोमि न कारयामीति सूत्रोपात्तमेवं त्रिविधमित्यस्य विवरणम् । किं पुनः कारणमुद्देशक्रममतिलङ्घ्य व्यत्यासेन निर्देशः कृतः । उच्यते । योगस्य करणाधीनतोपदर्शनार्थम् । करणाधीनता हि योगानाम्, करणभावे भावात्तदभावे चाभावाद्योगस्य । तस्मेति, तस्य अत्राधिकृतो योगः संबध्यते; अवयवावयविभावलक्षणसम्बन्धे षष्ठी; योऽयं योगस्त्रिकालविषयस्तस्यातीतमवयवं प्रतिक्रामामि निवर्त्ते प्रतीपं क्रामामीत्यर्थः; निन्दामि जुगुप्से गर्हामि स एवार्थः, केवलमात्मसाक्षिकी निन्दा, गुरुसाक्षिकी गर्हा । भन्ते इति पुनर्गुरोरामन्त्रणं भक्त्यतिशयख्यापनार्थं न पुनरुक्तम्; अथवा सामायिकक्रियाप्रत्यर्पणाय पुनर्गुरोः सम्बोधनम् । अनेन चैतत् ज्ञापितं भवति, सर्वक्रियाऽवसाने गुरोः प्रत्यर्पणं कार्यमिति ।

उक्तं च भाष्यकारेण—

'सामाइयपच्चप्पणवयणोवायं भयंतसद्दोत्ति ।

सव्वकिरियावसाणे भणियं पच्चप्पणमणेण ॥ १ ॥

अप्पाणमिति; आत्मानमतीतकालसावद्ययोगकारिणम्; वोसिरामीति, व्युत्सृजामि; विशब्दो विविधार्थो विशेषार्थो वा; उच्छब्दो भृशार्थः । विविधं विशेषेण वा भृशं सृजामि त्यजामीत्यर्थः । अत्र च करेमि भंते सामाइयमिति वर्त्तमानस्य

(१) सामायिकप्रत्यर्पणवचनोपायो भदन्तशब्द इति ।
सर्वक्रियाऽवसाने भणितं प्रत्यर्पणमनेन ॥ १ ॥

सावद्ययोगस्य प्रत्याख्यानम्। सावद्यं योगं गुरुसाक्षिकमात्मना गर्हणम्; तस्स भंते पडिक्कमामीत्यतीतानर्थान् नैकाभिः प्रत्या-ख्यानमुक्तमिति त्रयाणां वाक्यानां न पौनरुक्त्यम्।

उक्तं च -

अइयं निंदामि पडुप्पन्नं संवरेमि अणागयं पच्चक्खामीति।

एवं कृतसामायिक ईर्यापथिकायाः प्रतिक्रामति पश्चादागमन-मालोच्य यथाज्येष्ठमाचार्यादीन् वन्दते, पुनरपि गुरुं वन्दित्वा प्रत्युपेक्ष्य निविष्टः, शृणोति, पठति, पृच्छति वा। एवं चैत्यभवने-ऽपि द्रष्टव्यम्। यदा तु स्वगृहे, पौषधशालायां वा सामायिकं गृहीत्वा तत्रैवास्ते तदागमनं नास्ति, यस्तु राजादिर्महर्द्धिकः स-गन्धसिन्धुरस्कन्धाधिरूढश्छत्रचामरादिराजालङ्करणालङ्कृतो हास्ति-काश्वीयपादातिरथकट्यापरिकरितो भेरीभाङ्कारभरिताम्बरतलो बन्दिवृन्दकोलाहलाकुलीकृतनभस्तलोऽनेकसामन्तमण्डलेश्वराहम-हमिकासंप्रेक्ष्यमाणपादकमलः पौरजनैः सश्रद्धमङ्गुल्योपदर्श्यमानो मनोरथैरुपस्पृश्यमानस्तेषामेवाञ्जलिबन्धान् लाजाञ्जलिपातान् शिरःप्रणामाननुमोदमानः अहो धन्यो धर्मो य एवंविधै-रप्युपसेव्य इति प्राकृतजनैरपि श्लाघ्यमानोऽकृतसामायिक एव जिनालयं साधुवसतिं वा गच्छति, तत्र गतो राजककुदानि छत्रचामरोपानद्मुकुटखड्गरूपाणि परिहरति; जिनार्चनं साधु-वन्दनं वा करोति, यदि त्वसौ कृतसामायिक एव गच्छेत् तदा गजाश्वादिभिरधिकरणं स्यात्; तच्च न युज्यते कर्तुम्। तथा कृत-सामायिकेन पादाभ्यामेव गन्तव्यम्, तच्चानुचितं भूपतीनामिति।

ऽऽगतस्य च यदासौ श्रावको भवति तदा न कोऽप्यभ्युत्थानादि करोति । अथ यथा भद्रकस्तदा पूजा कृता भवत्विति पूर्वमेवासनं रचनं । आचार्यास्तु पूर्वमेवोत्थिता आसते मा उत्थानानुत्थान- कृता दोषा भूवन्निति, आगतश्चासौ सामायिकं करोतीत्यादि पूर्ववत् ॥ ८२ ॥

सामायिकस्थस्य महानिर्जरो भवतीति दृष्टान्तद्वारेणाह—

सामायिकव्रतस्थस्य गृहिणोऽपि स्थिरात्मनः ।
चन्द्रावतंसकस्येव क्षीयते कर्म सञ्चितम् ॥ ८३ ॥

गृहस्थस्यापि कृतसामायिकस्य कर्मनिर्जरा भवतीति चन्द्रा- वतंसकः उदाहरणम् ।

तच्च सम्प्रदायगम्यम् । स चायम्—

अस्ति साकेतनगरं श्रीसङ्केतनिकेतनम् ।
हसितेन्द्रपुरश्रीकं सितार्हच्चैत्यकेतनैः ॥ १ ॥
तत्र लोकदृगानन्दो द्वितीय इव चन्द्रमाः ।
चन्द्रावतंसो राजाऽसीदवतंस इवावनेः ॥ २ ॥
स यथा धारयामास शस्त्राणि त्राणहेतवे ।
तीक्ष्णानि शिक्षावशतो व्रतान्यपि तथा सुधीः ॥ ३ ॥
माघमासे विभावर्यां सोऽन्यदा वासवेश्मनि ।
आदीपज्वलनं स्थास्यामीति सामायिके स्थितः ॥ ४ ॥
तच्छय्यापालिका ध्वान्तं स्वामिनो मा स्म भूदिति ।
याते प्राग्यामिनीयामे प्रदीपे तैलमक्षिपत् ॥ ५ ॥

गते यामे द्वितीयस्मिन्नपि सा भक्तमानिनी ।
जाग्रती दीपके क्षीणतैले तैलं न्यधात्पुनः ॥ ६ ॥
त्रियामायास्तृतीयस्मिन्नपि यामे व्यतीयुषि ।
मल्लिकायां प्रदीपस्य तैलं चिक्षेप सा पुनः ॥ ७ ॥
विभातायां विभावर्यामवमानमथासदत् ।
अमोत्पन्नव्यथाक्रान्तो राजा स इव दीपकः ॥ ८ ॥

सामायिकं समधिगम्य निहत्य कर्म
चन्द्रावतंसनृपतिस्त्रिदिवं ततोऽगात् ।
सामायिकव्रतजुषो गृहिणोऽपि सद्यः
क्षीयेत कर्म निचितं सुगतिर्भवेच्च ॥ ९ ॥

॥ इति चन्द्रावतंसराजर्षिकथानकम् ॥ ८३ ॥

द्वितीयं शिक्षाव्रतमाह--

दिग्व्रते परिमाणं यत्तस्य संक्षेपणं पुनः ।
दिने रात्रौ च देशावकाशिकव्रतमुच्यते ॥ ८४ ॥

दिग्व्रते प्रथमगुणव्रते यद्दशस्वपि दिक्षु गमनपरिमाणं तस्य दिवा रात्रौ चोपलक्षणत्वात्प्रहरादौ च यत् सङ्क्षेपणं तद्देशावकाशिकव्रतम् । देशे दिग्व्रतगृहीतपरिमाणस्य विभागे अवकाशो-ऽवस्थानं देशावकाशः सोऽत्रास्तीति देशावकाशिकं "अतोऽनेक-स्वरात्" ॥ ७ । २ । ६ ॥ इतीकः । दिग्व्रतसंक्षेपकरणमणुव्रतादि-पकरणस्याप्युपलक्षणं द्रष्टव्यम् । एषामपि संक्षेपस्यावश्यं

कथितत्वात् । प्रतिव्रतं च संक्षेपकरणस्य विभिन्नव्रतत्वे द्वादश व्रतानीति संख्याविरोधः स्यात् ॥ ८४ ॥

अथ तृतीयं शिक्षाव्रतमाह –

चतुष्पर्व्यां चतुर्थादिकुव्यापारनिषेधनम् ।
ब्रह्मचर्यक्रियास्नानादित्यागः पोषधव्रतम् ॥ ८५ ॥

चतुष्पर्वी अष्टमी चतुर्दशी-पूर्णिमा-अमावास्यालक्षणा, चतुर्णां पर्वणां समाहारश्चतुष्पर्वी । पर्वशब्दोऽकारान्तोऽप्यस्ति ; तस्यां चतुर्थादिकं तपः, कुव्यापारस्य सावद्यव्यापारस्य निषेधः, ब्रह्मचर्य-क्रिया ब्रह्मचर्यस्य करणं, स्नानादेः शरीरसत्कारस्य त्यागः । आदि-शब्दादुद्वर्त्तनवर्णकविलेपनपुष्पगन्धविशिष्टवस्त्राभरणादिपरिग्रहः । पोषं पुष्टिं प्रक्रमाद्धर्मस्य धत्ते पोषधः स एव व्रतं पोषधव्रतम् । भवतः पोषध इत्यर्थः । द्विविधं हि पोषधव्रतं देशतः सर्वतश्च । तत्राहारपोषधो देशतो विवक्षितविकृतेरविकृतेराचामाम्लस्य वा सकृदेव द्विरेव वा भोजनमिति । सर्वतस्तु चतुर्विधस्याप्याहार-स्याहोरात्रं यावत्प्रत्याख्यानम् ; कुव्यापारनिषेधपोषधस्तु देशत एकतरस्य कस्यापि कुव्यापारस्याकरणं, सर्वतस्तु सर्वेषामपि कृषिसेवावाणिज्यपाशुपाल्यगृहकर्मादीनामकरणं, ब्रह्मचर्यपोषधो-ऽपि देशतो दिवैव रात्रावेव वा, सकृदेव द्विरेव वा स्त्रीसेवां मुक्त्वा ब्रह्मचर्यकरणम् ; सर्वतस्तु अहोरात्रं यावत् ब्रह्मचर्य-पालनम् । देशतः स्नानादेः शरीरसत्कारस्यैकतरस्याकरणं सर्वतस्तु सर्वस्यापि तस्याकरणम् ; इह च देशतः कुव्यापारनिषेधपोषधं

यदा करोति तदा सामायिकं करोति वा नवा ; यदा तु सर्वतः करोति तदा सामायिकं नियमात्करोति, अकरणे तु तत्फलेन वञ्च्यते। सर्वतः पोषधव्रतं च चैत्यगृहे वा, साधुमूले वा, गृहे वा, पोषधशालायां वा त्यक्तमणिसुवर्णाद्यलङ्कारो व्यपगतमालाविलेपनवर्णकः परिहृतप्रहरणः प्रतिपद्यते। तत्र च क्वते पठति च पुस्तकं वाचयति धर्मध्यानं ध्यायति, यथैतान् साधुगुणानहं मन्दभाग्यो न समर्थो धारयितुमिति। इह च यद्याहारशरीरसत्कारब्रह्मचर्यपोषधवत् कुव्यापारपोषधव्रतमप्यन्यत्रानाभोगेनेत्याद्याकारोच्चारणपूर्वकं प्रतिपद्यते तदा सामायिकमपि सार्थकं स्यात्। स्थूलत्वात्पोषधप्रत्याख्यानस्य सूक्ष्मत्वाच्च सामायिकस्येति। तथा पोषधवताऽपि सावद्यव्यापारा न कार्या एव ततः सामायिकमकुर्वंस्तल्लाभाद्भ्रश्यतीति। यदि पुनः सामाचारीविशेषात् सामायिकमिव द्विविधं त्रिविधेनेत्येवं पोषधं प्रतिपद्यते तदा सामायिकार्थस्य पोषधेनैव गतत्वान्न सामायिकमत्यन्तं फलवत्। यदि परं पोषधसामायिकलक्षणं व्रतद्वयं प्रतिपन्नं मयेत्यभिप्रायात् फलवदिति ॥ ८५ ॥

इदानीं पोषधव्रतकर्तॄन् प्रशंसति—

गृहिणोऽपि हि धन्यास्ते पुण्यं ये पोषधव्रतम्।
दुष्पालं पालयन्त्येव यथा स चुलनीपिता ॥ ८६ ॥

यतयस्तावद् धन्या एव गृहिणोऽपि गृहस्था अपि ते धन्याः धर्मधनं

ध्याः ये निःसत्त्वजनदुष्पालं पुण्यं पवित्रं पोषधव्रतं पालयन्ति,
दा स चुलनीपितेति दृष्टान्तः ; स च सम्प्रदायगम्यः ।

स चायम्—

अस्ति वाराणसी नामानुगङ्गं नगरी वरा ।
विचित्ररचनारम्या तिलकश्रीरिवावनेः ॥ १ ॥
सुत्रामेवामरावत्यामविसूत्रितविक्रमः ।
जितशत्रुरभूत्तत्र धरित्रीधवपुङ्गवः ॥ २ ॥
आसीद्गृहपतिस्तस्यां महेभ्यश्चुलनीपिता ।
प्राप्तो मनुष्यधर्मेव मनुष्यत्वं कुतोऽपि हि ॥ ३ ॥
जगदानन्दिनस्तस्यानुरूपा रूपशालिनी ।
श्यामा नामाभवद्भार्या श्यामेव तुहिनद्युतेः ॥ ४ ॥
अष्टौ निधानेऽष्टौ वृद्धावष्टौ च व्यवहारगाः ।
इति तस्याभवन् हेमचतुर्विंशतिकोटयः ॥ ५ ॥
एकैकशो गोसहस्रैर्दशभिः प्रमितानि तु ।
तस्यासन् गोकुलान्यष्टौ कुलवेश्मानि सम्पदाम् ॥ ६ ॥
तस्यां पुर्यामथान्येद्युरुद्याने कोष्ठकाभिधे ।
भगवान् समवसृतो विहरंश्चरमो जिनः ॥ ७ ॥
ततो भगवतः पादवन्दनाय सुरासुराः ।
सेन्द्राः समाययुस्तत्र जितशत्रुश्च भूपतिः ॥ ८ ॥
पद्भ्यां चचाल चुलनीपिताऽप्युचितभूषणः ।
वन्दितुं नन्दितमनाः श्रीवीरं त्रिजगत्पतिम् ॥ ९ ॥

भगवन्तं ततो नत्वोपविश्य चुलनीपिता ।
शुश्राव परया भक्त्या प्राञ्जलिर्धर्मदेशनाम् ॥ १० ॥
अथोत्थितायां सदसि प्रणम्य चरणौ प्रभोः ।
इति विज्ञपयामास विनीतश्चुलनीपिता ॥ ११ ॥
स्वामिन्नस्मादृशां बोधहेतोर्विहरसे महीम् ।
जगद्बोधं विना नान्यो ह्यर्थश्चङ्क्रमणे रवेः ॥ १२ ॥
सर्वोऽपि याच्यते गत्वा स दत्ते यदि वा नवा ।
आगत्य याचितो धर्मं दत्से हेतुः कृपाऽत्र ते ॥ १३ ॥
जानामि यतिधर्मं चेत् गृह्णामि स्वामिनोऽन्तिके ।
योग्यता परमियतो मन्दभाग्यस्य नास्ति मे ॥ १४ ॥
याचे श्रावकधर्मं तु स्वामिन् ! देहि प्रसीद मे ।
आदत्तेऽब्धावप्युदञ्चौ भरणं निजमेव हि ॥ १५ ॥
यथासुखं गृहाणेति स्वामिनाऽनुमतस्ततः ।
स प्रत्याख्यत्स्थूलहिंसां मृषावादं च चौरिकाम् ॥ १६ ॥
प्रत्याख्यच्च स्वभार्यायाः श्यामाया अपरस्त्रियम् ।
अष्टाष्टकोट्यभ्यधिकं स्वर्णं निध्यादिषु त्रिषु ॥ १७ ॥
व्रजेभ्योऽन्यानथाष्टभ्यः प्रत्याचख्यौ व्रजानपि ।
हलपञ्चशतीतोऽन्यां कृषियोग्यां महीमपि ॥ १८ ॥
अनःशतेभ्यः पञ्चभ्यो दिग्यायिभ्योऽपरं त्वनः ।
संवत्सराय पञ्चभ्यः प्रत्याचख्यौ महामतिः ॥ १९ ॥
दिग्यात्रिकाणि चत्वारि चत्वारि प्रवहन्ति च ।
वाहनानि विना सोऽथ प्रत्याख्यदितराणि तु ॥ २० ॥

अन्यत्र गन्धकाषाय्याः प्रत्याख्यदङ्गपुंसनम् ।
आर्द्राया मधुकयष्टेरितरद्दन्तधावनम् ॥ २१ ॥
अन्यतः क्षीरामलकात्प्रत्याचख्यौ फलान्यपि ।
शतसहस्रपाकाभ्यां तैलाभ्यां म्रक्षणान्तरम् ॥ २२ ॥
गन्धाढ्यादन्यतः प्रत्याचख्यावुद्वर्तनान्यपि ।
अष्टाभ्य औष्ट्रिकेभ्योऽम्भःकुम्भेभ्योऽधिकमज्जनम् ॥ २३ ॥
वस्त्रं प्रत्याख्यदन्यच्च कार्पासाद्वस्त्रयुग्मकात् ।
विलेपनानि चान्यत्र कुङ्कुमागुरुचन्दनात् ॥ २४ ॥
पुष्पं प्रत्याख्यदन्यच्च पद्माज्जातिस्रजोऽपि च ।
कर्णिकानाममुद्राभ्यामन्यानि भूषणानि च ॥ २५ ॥
मुमोच धूपमगरुतुरुष्काभ्यामथापरम् ।
अन्याश्च काष्ठपेयायाः पेया अपि समन्ततः ॥ २६ ॥
खण्डखाद्याद् घृतपूराच्चेतरत् खाद्यमत्यजत् ।
ओदनान्यपि निःशेषाण्यन्यतः कलमौदनात् ॥ २७ ॥
कलायमुद्गमाषेभ्य इतरं सूपमत्यजत् ।
शरत्कालभवात्सर्वं गोघृतादपरं घृतम् ॥ २८ ॥
शाकं पल्यङ्कमण्डूकीशाकाभ्यामन्यमत्यजत् ।
विना स्नेहाम्लदाल्यम्ले तीमनान्यपि सर्वतः ॥ २९ ॥
अन्तरिक्षोदकादन्यदुदकं पर्यवर्जयत् ।
मुखवासं च ताम्बूलात्पञ्चसौगन्धिकादृते ॥ ३० ॥
अपध्यानं हिंस्रदानं प्रमादाचरितं तथा ।
पापकर्मोपदेशं चानर्थदण्डानवर्जयत् ॥ ३१ ॥

एवं श्रावकधर्मं स सम्यक् सम्यक्त्वपूर्वकम् ।
सर्वातिचाररहितं प्रपेदे पुरतः प्रभोः ॥ ३२ ॥
भगवन्तं ततो नत्वा गत्वा च निजवेश्मनि ।
प्रतिपन्नं तथा धर्मं स्वभार्यायै न्यवेदयत् ॥ ३३ ॥
तेनाथ साऽप्यनुज्ञाता रथमारुह्य तत्क्षणम् ।
उपेत्य भगवत्पार्श्वे गृहिधर्ममशिश्रियत् ॥ ३४ ॥
तदा च गौतमो नत्वा पप्रच्छेति जगत्पतिम् ।
महाव्रतधरः किं स्यान्न वाऽयं चुलनीपिता ? ॥ ३५ ॥
अथोचे स्वामिना नैष यतिधर्मं प्रपत्स्यते ।
गृहिधर्मरतः किं तु मृत्वा सौधर्ममेष्यति ॥ ३६ ॥
अरुणाभे विमाने च चतुष्पल्योपमस्थितिः ।
ततश्च्युत्वा विदेहेषूत्पद्य निर्वाणमेष्यति ॥ ३७ ॥ (युग्मम्)
गृहभारं ज्येष्ठपुत्रे न्यस्याथ चुलनीपिता ।
तस्थौ पौषधशालायां पालयन् पौषधव्रतम् ॥ ३८ ॥
तस्याथ पौषधस्थस्य मायामिथ्यात्ववान् सुरः ।
निशीथे आशिदागच्छत्पार्श्वं व्रतजिघांसया ॥ ३९ ॥
घोराकारः पुरोभूय खड्गमाकृष्य भीषणम् ।
स इत्यूचे तमभ्येत्य चुलनीपितरं सुरः ॥ ४० ॥
अप्रार्थितप्रार्थक रे ! श्रमणोपासकव्रतम् ।
त्वया किमिदमारब्धं मदादेशेन मुच्यताम् ॥ ४१ ॥
मुञ्चसीदं न चेत्तत्र ज्येष्ठपुत्रमहं तव ।
कृपाणेनास्मिन् गृहे खण्डयिष्यामि खण्डशः ॥ ४२ ॥

अग्रतः प्रेक्षमाणस्य पुत्रांस्त्रीनपि तानहम् ।
छित्त्वा कटाहे पक्ष्यामि शूलैर्भेत्स्यामि तत्क्षणात् ॥ ४३ ॥
आचमिष्यामि तन्मांसशोणितानि तथाऽधुना ।
प्रेक्षमाणो यथा हि त्वं स्वयमेव विपत्स्यसे ॥ ४४ ॥
देवस्त्वेवं विब्रुवति तथैवं चुलनीपिता ।
न चकम्पे केसरीव गर्जत्यूर्जितमम्बुदे ॥ ४५ ॥
अक्षोभं प्रेक्षमाणस्तु चुलनीपितरं सुरः ।
विभीषयितुकामस्तं तथैवोचे पुनः पुनः ॥ ४६ ॥
एवं विभाषमाणस्य सुरस्य चुलनीपिता ।
न मनागप्यसौ चुक्षुभे श्वान इव द्विपः ॥ ४७ ॥
स विहत्य पुरो ज्येष्ठतनयं चुलनीपितुः ।
निस्त्रिंशेन नृशंसात्मा पशुवद् व्यशसत्ततः ॥ ४८ ॥
छित्त्वा त्रिधा कटाहान्तस्तन्मांसानि पपाच च ।
बभञ्ज च शितैः शूलैराचचाम च सोऽमरः ॥ ४९ ॥
अधिसेहे च तत्सर्वं तत्त्वज्ञः चुलनीपिता ।
अन्यत्वभावनाभाजां स्वाङ्गच्छेदोऽपि नार्त्तये ॥ ५० ॥
अथोचे स सुरो रे रे ! व्रतमद्यापि नोज्झसि ।
तद् ज्येष्ठमिव ते पुत्रं हन्मि मध्यममप्यहम् ॥ ५१ ॥
ततोऽहन्मध्यमं पुत्रं तथैवोचे पुनः पुनः ।
निरीक्ष्याक्षुभितं तं च कनिष्ठं चावधीत्सुतम् ॥ ५२ ॥
तत्राप्यालोक्य निष्कम्पं तं क्रुद्धः स सुरोऽब्रवीत् ।
नाद्याप्युज्झसि पाखण्डं मातरं ते विहन्मि तत् ॥ ५३ ॥

एवं श्रावकधर्मं स सम्यक् सम्यक्त्वपूर्वकम् ।
सर्वातिचाररहितं प्रपेदे पुरतः प्रभोः ॥ ३२ ॥
भगवन्तं ततो नत्वा गत्वा च निजवेश्मनि ।
प्रतिपन्नं तथा धर्मं स्वभार्यायै न्यवेदयत् ॥ ३३ ॥
तेनाथ साऽप्यनुज्ञाता रथमारुह्य तत्क्षणम् ।
[illegible] भगवत्पार्श्वे गृहिधर्ममशिश्रियत् ॥ ३४ ॥
ततश्च गौतमो नत्वा पप्रच्छेति जगत्पतिम् ।
[illegible] किं [illegible] ॥ ३५ ॥
भगवान् स्वामिना नैष यतिधर्मं ग्रहीष्यति ।
[illegible] ॥ ३६ ॥
[illegible] ।
[illegible] ॥ ३७ ॥ [illegible]
[illegible]

भवतः प्रेक्षमाणस्य पुत्रांस्त्रीनितान्यहम् ।
छित्त्वा कटाहे पक्ष्यामि शूलैर्भेत्स्यामि तत्क्षणात् ॥ ४३ ॥
आचमिष्यामि तन्मांसशोणितानि तथाऽधुना ।
प्रेक्षमाणो यथा हि त्वं स्वयमेव विपत्स्यसे ॥ ४४ ॥
देवे त्वेवं विवदति तथैवं चुलनीपिता ।
न चकम्पे केसरीव गर्जत्यूर्जितमम्बुदे ॥ ४५ ॥
अक्षोभं प्रेक्षमाणस्तु चुलनीपितरं सुरः ।
विक्षोभयितुकामस्तं तथैवोचे पुनः पुनः ॥ ४६ ॥
एवं विभाषमाणस्य सुरस्य चुलनीपिता ।
न मनागप्यबिभेत्तालानस्थ इव द्विपः ॥ ४७ ॥
स विकृत्य पुरो ज्येष्ठतनयं चुलनीपितुः ।
निस्त्रिंशेन नृशंसात्मा पशुवद् व्यशसत्ततः ॥ ४८ ॥
छित्त्वा त्रिधा कटाहान्तस्तन्मांसानि पपाच च ।
बभ्रज्ज च शितैः शूलैराचचाम च सोऽमरः ॥ ४९ ॥
अधिसेहे च तत्सर्वं तत्त्वज्ञः चुलनीपिता ।
अन्यत्वभावनाभाजां स्वाङ्गच्छेदोऽपि नार्त्तये ॥ ५० ॥
अथोचे स सुरो रे रे ! व्रतमद्यापि नोज्झसि ।
तज्ज्येष्ठमिव ते पुत्रं हन्मि मध्यममप्यहम् ॥ ५१ ॥
ततोऽहन्मध्यमं पुत्रं तथैवोचे पुनः पुनः ।
निरीक्ष्याक्षुभितं तं च कनिष्ठं चावधीत्सुतम् ॥ ५२ ॥
तत्राप्यालोक्य निष्कम्पं तं क्रुद्धः स सुरोऽब्रवीत् ।
नाद्याप्युज्झसि पाखण्डं मातरं ते विहन्मि तत् ॥ ५३ ॥

भद्रां नामाथ चुलनीपितुर्मातरमातुराम् ।
विकरोति स्म रुदतीं करुणं कुररीमिव ॥ ५४ ॥
स सुरः पुनरप्यूचे मुच्यतां प्रकृतं त्वया ।
स्वकुटुम्बप्रणाशाय कृत्यातुल्यमिदं व्रतम् ॥ ५५ ॥
अन्यथा कुलमेढिं ते मातरं हरिणीमिव ।
हत्वा भक्ष्यामि पक्ष्यामि भक्षयिष्यामि च क्षणात् ॥ ५६ ॥
ततोऽप्यभीतं चुलनीपितरं वीक्ष्य सोऽमरः ।
भद्रामाराटयत्तारं सूनान्यस्तामजामिव ॥ ५७ ॥
यया भार इवोढस्त्वमुदरेणोदरंभरिः ।
मातरं हन्यमानां तां पश्येत्यूचे पुनः सुरः ॥ ५८ ॥
अथैवं चिन्तयामास चेतसा चुलनीपिता ।
अहो दुरात्मा कोऽप्येष परमाधार्मिकोपमः ॥ ५९ ॥
पुत्रत्रयं मे पुरतो जघान च चखाद च ।
क्रव्यादिव ममाम्बामप्यधुना हन्तुमुद्यतः ॥ ६० ॥
यावन्न हन्त्यमूं तावद्रक्ष्यामीति चचाल सः ।
कुर्वाणेन महाशब्दमुत्पेते च सुरेण खे ॥ ६१ ॥
तं च कोलाहलं श्रुत्वा भद्रा द्रुतमुपेत्य तम् ।
किमेतदिति चापृच्छत्सोऽशंसत्तदशेषतः ॥ ६२ ॥
ततोऽभाषिष्ट भद्रैषं मिथ्यादृक्कोऽप्ययं सुरः ।
पोषधव्रतविघ्नं ते चक्रे कृत्रिमभीषणैः ॥ ६३ ॥
पोषधव्रतभङ्गस्य कुरुष्वालोचनं ततः ।
पापाय व्रतभङ्गः स्यादनालोचनं यतः ॥ ६४ ॥

तथैव प्रतिपेदेऽथ तद्दायं चुलनीपिता ।
प्रकारान्तोचनां तस्य व्रतभङ्गस्य शुद्धधीः ॥ ६५ ॥
सर्वकालेन भेजेऽसौ श्रावकप्रतिमाः क्रमात् ।
सोपानानीव स स्वर्गसौधारोहणकर्मणे ॥ ६६ ॥
निस्त्रिंशधारानिशितं स एवं श्रावकव्रतम् ।
सुचिरं पालयामास भगवद्वचनोचितम् ॥ ६७ ॥
ततः संलेखनापूर्वं प्रपद्यानशनं सुधीः ।
मृत्वा सौधर्म उत्पेदे विमाने सोऽरुणप्रभे ॥ ६८ ॥

दुष्पालमेवं चुलनीपिता यथा
तत्पालयामास स पौषधव्रतम् ।
ये पालयन्त्येव तथा परेऽप्यदो
दृढव्रतास्ते खलु मुक्तिगामिनः ॥ ६९ ॥

॥ इति चुलनीपितुः कथानकम् ॥ ८६ ॥

इदानीं चतुर्थं शिक्षाव्रतमाह—

दानं चतुर्विधाहारपानाच्छादनसद्मनाम् ।
अतिथिभ्योऽतिथिसंविभागव्रतमुदीरितम् ॥ ८७ ॥

अतिथिभ्यस्तिथिपर्वाद्युत्सवरहितेभ्यो भिक्षार्थं भोजनकाले उपस्थितेभ्यः साधुभ्यो, दानं वितरणं, चतुर्विधस्याशनपानखाद्यस्वाद्यरूपस्याहारस्य, पानस्यालाब्वादेः, आच्छादनस्य वस्त्रस्य कम्बलस्य वा, सद्मनो वसतेरुपलक्षणात्पीठफलकशय्यासंस्तारकादीनामपि ।

अनेन हिरण्यादिदाननिषेधस्तेषां यतेरनधिकारात्। तदेतदतिथि-संविभागव्रतमुच्यते। अतिथिः सङ्गतो निर्दोषो विभागः पश्चात्-कर्मादिदोषपरिहारायांशदानरूपोऽतिथिसंविभागस्तद्रूपं व्रतम-तिथिसंविभागव्रतम्। आहारादीनां च न्यायार्जितानां प्रासुकैषणी-यानां कल्पनीयानां च देशकालश्रद्धासत्कारपूर्वकमात्मानुग्रहबुद्ध्या यतिभ्यो दानमतिथिसंविभागः।

यदूचुः—

'नायागयाणं कप्पणिज्जाणं अन्नपाणाईणं दव्वाणं देसकाल-सद्धासक्कारकमजुत्तं पराए भत्तीए आयाणुग्गहबुद्धीए संजयाणं दाणं अतिहिसंविभागो।

अनूदितं चैतत्—

प्रायः शुद्धैस्त्रिविधविधिना प्रासुकैरेषणीयैः
कल्प्यप्रायैः स्वयमुपहृतैर्वस्तुभिः पानकाद्यैः।
काले प्राप्तान् सदनमममश्रद्धया साधुवर्गान्
धन्याः केचित्परमवहिता हन्त ! संमानयन्ति ॥ १ ॥
अशनमखिलं खाद्यं स्वाद्यं भवेदथ पानकं
यतिजनहितं वस्त्रं पात्रं सकम्बलप्रोञ्छनम्।
वसतिफलकप्रायं मुख्यं चरित्रविवर्धनं
निजकमनसः प्रीत्याधायि प्रदेयमुपासकैः ॥ २ ॥

---

१. न्यायागतानां कल्पनीयानां अन्नपानादीनां द्रव्याणां देशकालश्रद्धासत्कार-क्रमयुक्तं परया भक्त्या आत्मानुग्रहबुद्ध्या संयतानां दानं अतिथिसंविभागः।

यदा—

'साहूण कप्पणिज्जं जं नवि दिन्नं कहिंचि किंचि तहिं ।
धीरा जहुत्तकारी सुसावगा तं न भुंजंति ॥ १ ॥
'वसहीसयणासणभत्तपाणभेसज्जवत्थपत्ताई ।
जइवि न पज्जत्तधणो थोवाओ वि थोवयं देइ ॥ २ ॥

वाचकमुख्यस्त्वाह—

किञ्चिच्छुद्धं कल्प्यमकल्प्यं स्यात् स्यादकल्प्यमपि कल्प्यम् ।
पिण्डः शय्या वस्त्रं पात्रं वा भेषजाद्यं वा ॥ १ ॥
देशं कालं पुरुषमवस्थामुपयोगशुद्धिपरिणामान् ।
प्रसमीक्ष्य भवति कल्प्यं नैकान्तात्कल्पते कल्प्यम् ॥ २ ॥

ननु यथा शास्त्रे आहारदातारः श्रूयन्ते न तथा वस्त्रादिदातारः, न च वस्त्रादिदानस्य फलं श्रूयते तत्र वस्त्रादिदानं युक्तम् । नैवम् । भगवत्याद्दौ वस्त्रादिदानस्य साक्षादुक्तत्वात् ।

यथा—

'समणे निग्गंथे फासुएणं एसणिज्जेणं असणपाणखाइम-साइमेणं वत्थपडिग्गहकंबलपायपुंछणेणं पीढफलगसेज्जासंथारएणं पडिलाभेमाणे विहरइ ।

---

(१) साधूनां कल्पनीयं यद् नापि दत्तं कथंचित् किञ्चित् तस्मिन् ।
धीरा यथोक्तकारिणः सुश्रावकास्तद्य भुञ्जते ॥ १ ॥

(२) वसतिशयनासनभक्तपानभैषज्यवस्त्रपात्रादि ।
यद्यपि न पर्याप्तधनः स्तोकादपि स्तोकं दद्यात् ॥ २ ॥

(३) श्रमणान् निर्ग्रन्थान् प्रासुकेन एषणीयेन अशनपानखादिमस्वादिमेन

इत्याहारवत्संयमाधारशरीरोपकारकत्वाद्वस्त्रादयोऽपि साधुभ्यो देयाः । संयमोपकारित्वं च वस्त्रस्य तावत् तृणग्रहणानलसेवानिवारणार्थत्वेन, धर्मशुक्लध्यानसाधनार्थत्वेन, ग्लानपीडापरिहारार्थत्वेन, मृतकपरिष्ठापनार्थत्वेन च ।

यदाहुः—

[1]तणगहणानलसेवानिवारणा धम्मसुक्कझाणट्ठा ।

दिट्ठं कप्पग्गहणं गिलाणमरणट्ठया चेव ॥ १ ॥

वाचकोऽप्याह—

शीतवातातपैर्दंशैर्मशकैश्चापि खेदितः ।

मा सम्यक्त्वादिषु ध्यानं न सम्यक् संविधास्यति ॥१॥ इत्यादि

पात्रस्याप्युपयोगः, अशुद्धस्यान्नादेर्ग्रहणेन तत्परिष्ठापनं, संसक्तावस्थाविराधनात् । प्रमादात्पूतरकसहितस्य तण्डुलोदकादेर्ग्रहणे सति तत्परिष्ठापनासुखं च । एवमादयोऽन्येऽपि पात्रग्रहणे गुणाः ।

यदाहुः—

[2]छक्कायरक्खणट्ठा पायग्गहणं जिणेहिं पन्नत्तं ।

जे अ गुणा संभोए हवंति ते पायगहणे वि ॥ १ ॥

भक्तपानदूषणकमशनपाद्योःअशनेन पीठफलककाद्याधारकेण [illegible] [illegible] ।

(१) तृणग्रहणानलसेवानिवारणार्थं धर्मशुक्लध्यानार्थम् ।
दृष्टं कल्पग्रहणं ग्लानमरणार्थं चैव ॥ १ ॥

(२) षट्कायरक्षणार्थं पात्रग्रहणं जिनैः प्रज्ञप्तम् ।
ये च गुणाः संभोगे भवन्ति ते पात्रग्रहणेऽपि ॥ १ ॥

¹थेरंतबालवुड्ढा सेहा एसा गुरूअसहुवग्गे ।
साहारणोग्गहालद्धिकारणा पायग्गहणं तु ॥ २ ॥

ननु तीर्थंकराणां वस्त्रपात्रपरिभोगो न श्रूयते, तीर्थंकरचरितानुकारश्च तच्छिष्याणां युक्तः । वदन्ति हि—

²जारिसयं गुरुलिङ्गं सीसेण वि तारिसेण हविअव्वम् ।

इति सैवं वोचः—

अच्छिद्रपाणयस्तीर्थंकराः, अपि चन्द्रादित्यौ यावच्छिखा गच्छति ; न तु पानीयबिन्दुरप्यधः पतति ; चतुर्विधज्ञानबलाच्च ते संसक्तासंसक्तमशुद्धं शुद्धं च जलादि ज्ञात्वा निर्दोषमेवोपाददते, इति नैषां पात्रधारणे गुणः । वस्त्रं तु दीक्षाकाले तीर्थंकरा अपि गृह्णन्ति ।

यदाहुः—

³सव्वे वि एगदूसेण निग्गया जिणवरा चउव्वीसं ।
न य नाम अन्नलिंगे न य गिहिलिंगे कुलिंगे वा ॥ १ ॥

परमार्थं च—

---

(१) स्थाविरबालवृद्धात् शिक्षकात् असहिष्णुकात् गुरोरसहिष्णुवर्गात् ।
साधारणावग्रहालब्धिकारणात् पात्रग्रहणं तु ॥ २ ॥

(२) यादृशं गुरुलिङ्गं शिष्येणापि तादृशेन भवितव्यम् ।

(३) सर्वेऽपि एकदूष्येण निर्गता जिनवराश्चतुर्विंशतिः ।
न च नामान्यलिङ्गे न च गृहिलिङ्गे कुलिङ्गे वा ॥ १ ॥

'सेवेमि जे अईया जे अणागया जे अ वट्टमाणा ते सव्वे सोवहिधम्मो देसियव्वो त्ति कट्टु एगं देवदूसमादाय निक्खमिंसु निक्खमंति निक्खमिस्संति वा ।

प्रव्रज्योत्तरकालं च सर्वबाधासहत्वान्न वस्त्रेण प्रयोजनमिति यथाकथञ्चित्तदपैतु नाम । गुरुलिङ्गानुवर्त्तनं च तच्छिष्याणां यदुक्तं, तदैरावणानुकरणमिव सामान्यकरिणाम् । किं च । तीर्थकरानुकारमिच्छद्भिर्मठे निवसनमाधाकर्मिकादिपरिभोगस्तैलाभ्यङ्गोऽङ्गारशकटीसेवनं तृणपट्टीपरिधानं कमण्डलुधारणं बहुसाधुमध्ये निवासश्छद्मस्थानां धर्मदेशनायाः करणं शिष्यशिष्यादीक्षादिकं सर्वमविधेयं स्यात्, तच्च कुर्वन्ति ।

कम्बलस्य च वर्षासु बहिर्निर्गतानां तात्कालिकवृष्टावप्कायरक्षणमुपयोगः, बालवृद्धग्लाननिमित्तं वर्षत्यपि जलधरे भिक्षार्थं निःसरतां कम्बलावृतदेहानां न तथाविधाप्कायविराधना, उच्चारप्रस्रवणादिपीडितानां कम्बलावृतदेहानां गच्छतामपि न तथाविधा विराधना । छत्राद्याच्छादितानां कम्बलसत्करणेऽपि गच्छतां को दोष इति चेत् । न । 'छत्तस्स य धारणट्ठाए' इत्यागमेन छत्रस्य प्रतिषिद्धत्वात् ॥ रजोहरणं पुनः साधोर्जीवरक्षार्थं प्रतिलेखनाकारित्वादुपयोगीति कस्तत्र विवादं कुर्यात् । मुखवस्त्रमपि सम्पातिमत्रसरक्षणादुष्णमुखवातविराध्यमान[illegible]

१. [illegible]

कायजीवरक्षणान्मुखे धूलिप्रवेशरक्षणाच्चोपयोगि । पीठफलकयोर्वर्षासु पनककुन्थ्वादिसंसक्तायां भुवि भूशयनस्य प्रतिषिद्धत्वाच्छयनासनादावुपयोगः । शय्यासंस्तारकयोश्च शीतोष्णकालयोः शयनादावुपयोगः । वसतिश्च निवासार्थं यतीनामत्यन्तोपकारिणी ।

यदाह—

[1]जो देइ उवस्सयं मुणिवराण णेगगुणजोगधारीण ।
तेणं दिण्णा वत्थन्नपाणसयणासणवियप्पा ॥ १ ॥
[2]जं तत्थ ठियाण भवे सव्वेसिं तेण तेसिमुवओगो ।
रक्खपरिपालणा वि, अतो दिण्णा एव ते सव्वे ॥ २ ॥
[3]सीयायवचोराणं दंसाणं तह य वालमसगाणं ।
रक्खंतो मुणिवसभे सुरलोयसुहं समज्जिणइ ॥ ३ ॥

एवं यदन्यदप्यौघिकमौपग्रहिकं वा धर्मोपकरणं तत्साधूनां धारयतां न दोषः ; तद्दातॄणां तु सुतरां गुण एव ॥

उपकरणमानं तु—

---

(१) यो ददात्युपाश्रयं मुनिवरेभ्यो नैकगुणयोगधारिभ्यः ।
तेन दत्ता वस्त्रान्नपानशयनासनविकल्पाः ॥ १ ॥
(२) यस्मात् स्थितानां भवेत् सर्वेषां तेन तेषामुपयोगः ।
रक्षापरिपालना अपि, अतो दत्ता एव ते सर्वे ॥ २ ॥
(३) शीतातपचोरेभ्यो दंशेभ्यस्तथा च व्यालमशकेभ्यः ।
रक्षन् मुनिवरान् सुरलोकसुखं समर्जयति ॥ ३ ॥

कृतकारितानुमतिप्रमेदारम्भवर्जिताः ।
मोक्षैकतानमनसो यतयः पात्रमुत्तमम् ॥ २० ॥
सम्यग्दर्शनवन्तस्तु देशचारित्रयोगिनः ।
यतिधर्मेच्छवः पात्रं मध्यमं गृहमेधिनः ॥ २१ ॥
सम्यक्त्वमात्रसन्तुष्टा व्रतशीलेषु [1]निःसहाः ।
तीर्थप्रभावनोद्युक्ता जघन्यं पात्रमुच्यते ॥ २२ ॥
कुशास्त्रश्रवणोत्पन्नवैराग्यान्निष्परिग्रहाः ।
ब्रह्मचर्यरताः स्तेयमृषाहिंसापराङ्मुखाः ॥ २३ ॥
धीरव्रता मौनजुषः कन्दमूलफलाशिनः ।
शिलोञ्छवृत्तयः पत्रभोजिनो भैक्षजीविनः ॥ २४ ॥
कषायवस्त्रा निर्वस्त्राः शिखामौण्ड्यजटाधराः ।
एकदण्डास्त्रिदण्डा वा गृहारण्यनिवासिनः ॥ २५ ॥
पञ्चाग्निसाधका ग्रीष्मे गलन्तीधारिणो हिमे ।
भस्माङ्गरागाः खट्वाङ्गकपालास्थिविभूषणाः ॥ २६ ॥
स्वबुद्ध्या धर्मवन्तोऽपि मिथ्यादर्शनदूषिताः ।
जिनधर्मद्विषो मूढाः कुपात्रं स्युः [2]कुतीर्थिनः ॥ २७ ॥
प्राणिप्राणापहरणा मृषावादपरायणाः ।
परस्वहरणोद्युक्ताः प्रकामं कामगर्दभाः ॥ २८ ॥
परिग्रहारम्भरता न सन्तुष्टाः कदाचन ।
मांसाशिनो मद्यरताः कोपनाः कलहप्रियाः ॥ २९ ॥

[illegible]
[illegible]

जिनानां दानदातारः प्रथमे मोक्षगामिनः ।
धनाढ्यो दानधर्माद्बोधिबीजमुपार्जयन् ॥ ५० ॥

जिनानां पारणे भिक्षादातॄणां मन्दिराजिरे ।
हर्षोत्कर्षपराः सद्यः पुष्पवृष्टिं व्यधुः सुराः ॥ ५१ ॥

इत्यतिथिसंविभागव्रतमेतदुदीरितं प्रपञ्चेन ।
देयादेये पात्रापात्रे ज्ञात्वा यथोचितं कुर्यात् ॥ ५२ ॥ ८७ ॥

यद्यपि विवेकिनः श्रद्धावतः सत्पात्रदाने साक्षात्पारम्पर्येण वा मोक्षः फलं, तथापि मुग्धजनानुग्रहार्थं पात्रदानस्य प्रासङ्गिकं फलमाह —

पश्य सङ्गमको नाम सम्पदं वत्सपालकः ।
चमत्कारकरीं प्राप मुनिदानप्रभावतः ॥ ८८ ॥

पश्येत्यनेन मुग्धबुद्धिमभिमुखयति। सङ्गमको नामेति सङ्गमकाभिधानः, वत्सपालो वत्सपालनजीवकः, चमत्कारकरीं सम्पदं प्राप्तः, मुनिदानप्रभावतः। अत्र सङ्गमकस्य पारम्पर्येण मोक्षोऽपि फलमस्ति, तथापि प्रासङ्गिकफलाभिधानपरमेतत् स [illegible] [illegible] सम्प्रदायगम्यम् ।

[illegible] —

[illegible] ।
[illegible] ॥ [illegible]

[illegible]

सोऽचिन्त्यप्रदिदं चिन्तामणिकमिव चेतनम् ।
जङ्गमः कल्पशाखीव कामधेनुरिवापरः ॥ १२ ॥
साधु साधु महासाधुमेद्भाग्यैरयमाययौ ।
कुतोऽन्यथा वराकस्य ममेदृक्पात्रसङ्गमः ? ॥ १३ ॥
भाग्योदयेन केनापि ममाद्य समपद्यत ।
चित्तं वित्तं च पात्रं च त्रिवेणीसङ्गमो ह्ययम् ॥ १४ ॥
इत्यसौ स्थालमुत्पाट्य पायसं साधवे ददौ ।
जग्राहानुग्रहायास्य महाकारुणिको मुनिः ॥ १५ ॥
ययौ च स मुनिर्गेहान्मध्याद् धन्याऽपि निर्ययौ ।
मन्ये भुक्तमनेनेति ददौ सा पायसं पुनः ॥ १६ ॥
तत्पायसमतृप्तः सन्नाकण्ठं बुभुजेऽथ सः ।
तदजीर्णेन यामिन्यां स्मरन् साधुं व्यपद्यत ॥ १७ ॥
तेन दानप्रभावेण सोऽथ राजगृहे पुरे ।
गोभद्रेभ्यस्य भार्याया भद्राया उदरेऽभवत् ॥ १८ ॥
शालिक्षेत्रं सुनिष्पन्नं स्वप्नेऽपश्यच्च सा ततः ।
भर्तुः शशंस, सोऽप्यस्याः सूनुः स्यादित्यचीकथत् ॥ १९ ॥
चेद्दानधर्मकर्माणि करोमीति बभार सा ।
दोहदं. तं तु गोभद्रः पूरयामास भद्रधीः ॥ २० ॥
पूर्णे काले ततो भद्रा द्युतिद्योतितदिग्मुखम् ।
असूत तनयं रत्नं विदूरं गिरिभूरिव ॥ २१ ॥
दृष्टस्वप्नानुसारेण सूनोस्तस्य शुभे दिने ।
चक्रतुः पितरौ शालिभद्र इत्यभिधां शुभाम् ॥ २२ ॥

[1]धात्रीभिः पञ्चभिः पाल्यमानः स ववृधे क्रमात् ।
किञ्चिदूनाष्टवर्षः सन् पित्राऽप्यध्यापितः कलाः ॥ २३
संप्राप्तयौवनश्चासौ युवतीजनवल्लभः ।
सवयोभिः समं रेमे प्रद्युम्न इव नूतनः ॥ २४ ॥
तत्पुरश्रेष्ठिनोऽभ्येत्य कन्या द्वात्रिंशतं निजाः ।
प्रदातुं शालिभद्राय भद्रानाथं ययाचिरे ॥ २५ ॥
अथ प्रहृष्टो गोभद्रः शालिभद्रेण सादरम् ।
सर्वलक्षणसंपूर्णाः कन्यकाः पर्यणाययत् ॥ २६ ॥
शालिभद्रस्ततो रम्ये विमान इव मन्दिरे ।
विललास समं ताभिः पतिर्दिविषदामिव ॥ २७ ॥
विवेदानन्दमग्नोऽयं न रात्रिं न च वासरम् ।
तस्यापूरयतां भोगसामग्रीं पितरौ स्वयम् ॥ २८ ॥
श्रीवीरपादमूलेऽथ गोभद्रो व्रतमग्रहीत् ।
कृत्वा चानशनं मृत्वा देवलोकं जगाम [2]च ॥ २९ ॥
अवधिज्ञानतो ज्ञात्वा शालिभद्रं निजात्मजम् ।
तत्पुण्यावर्जितः सोऽभूत्पुत्रवात्सल्यतत्परः ॥ ३० ॥
दिव्यानि वस्त्रनेपथ्यादीन्यस्य प्रतिवासरम् ।
सभार्यस्यार्पयामास कल्पशाखीव सोऽमरः ॥ ३१ ॥
यद्यन्मर्त्योचितं कार्यं भद्रा तत्तदसाधयत् ।
पूर्वदानप्रभावेण भोगान् सोऽभुङ्क्त केवलम् ॥ ३२ ॥

---

(1) ख ग घ ङ पाल्यमानः स धात्रीभिः पञ्चभिर्व- । (2) क ख

विचित्रवस्त्रमाणिक्यचित्रकत्वक्षयीं ततः ।
आराजहर्म्यं स्वगृहादृट्टशोभां व्यधत्त सा ॥ ४४ ॥
तयाऽऽहूतस्ततो राजा हृतां सद्यः सुरैरिव ।
विभावयन् हट्टशोभां शालिभद्रगृहं ययौ ॥ ४५ ॥
स्वर्णस्तम्भोपरि प्रेङ्खदिन्द्रनीलाश्मतोरणम् ।
मौक्तिकस्वस्तिकश्रेणिदन्तुरद्वारभूतलम् ॥ ४६ ॥
दिव्यवस्त्रकृतोल्लोचं सुगन्धिद्रव्यधूपितम् ।
भुवि दिव्यविमानानां प्रतिमानमिव स्थितम् ॥ ४७
तद्विवेश विशामीशो विस्मयस्मेरलोचनः ।
भूमिकायां चतुर्थ्यां तु सिंहासन उपाविशत् ॥ ४८
सप्तम्यां भुवि भद्रेत्य शालिभद्रं ततोऽवदत् ।
इहायातः श्रेणिकोऽस्ति तं द्रष्टुं क्षणमेहि तत् ॥ ४९
अम्ब ! त्वमेव यद्वेत्सि तमर्थं कारय स्वयम् ।
किं मया तत्र कर्त्तव्यं स भद्रामित्यभाषत ? ॥ ५०
ततो भद्राऽप्युवाचैनं[1] क्रेतव्यं वस्तु न ह्यदः ।
किन्त्वसौ सर्वलोकानां युष्माकमपि च प्रभुः ॥ ५१
तच्छ्रुत्वा शालिभद्रोऽपि सविषादमचिन्तयत् ।
धिक् सांसारिकमैश्वर्यं यन्ममाप्यपरः प्रभुः ॥ ५२ ॥
भोगिभोगैरिवैभिर्मे भोगैरलमतः परम् ।
दीक्षां मङ्क्षु ग्रहीष्यामि श्रीवीरचरणान्तिके ॥ ५३

---

(1) ख घ -युवाचैवं ।

एवं संवेगयुक्तोऽपि स मातुरुपरोधतः ।
सभार्योऽभ्येत्य राजानमनमद्विनयान्वितः ॥ ५४ ॥
सस्वजे श्रेणिकेनाथ स्वाङ्के सुत इवासितः ।
स्नेहाच्छिरसि चाघ्रातः क्षणाच्चाश्रूणि सोऽमुचत् ॥ ५५ ॥
ततो भद्रा जगादेवं देवायं मुच्यतां यतः ।
मानुष्यमाल्यगन्धेन मनुष्योऽप्येष बाध्यते ॥ ५६ ॥
देवभूयं गतः श्रेष्ठी सभार्यस्यास्य यच्छति ।
दिव्यनेपथ्यवस्त्राङ्गरागादीन् प्रतिवासरम् ॥ ५७ ॥
ततो राज्ञा विसृष्टोऽसौ ययौ सप्तमभूमिकाम् ।
इहैव भोक्तव्यमिति विज्ञप्तो भद्रया नृपः ॥ ५८ ॥
भद्राद्राक्षिण्यतो राजा प्रत्यपद्यत तत्तथा ।
सद्यः साऽसाधयत्सर्वं श्रीमतां किं न सिध्यति ? ॥ ५९ ॥
सस्नौ स्नानीयतैलाम्बुचूर्णैस्तूर्णं ततो नृपः ।
अङ्गुलीयं तदङ्गुल्याः क्रीडावाप्यां पपात [1]च ॥ ६० ॥
यावदन्वेषयामास भूपतिस्तदितस्ततः ।
तावद्भद्राऽऽदिशद्दासीं वाप्यम्भोऽन्यत्र नाय्यताम् ॥ ६१ ॥
तथाकृते तया चित्रदिव्याभरणमध्यगम् ।
अङ्गाराभं स्वाङ्गुलीयं दृष्ट्वा राजा विसिष्मिये ॥ ६२ ॥
किमेतदिति राज्ञोक्ता दास्यवोचदिदं त्वहम् ! ।
निर्माल्यं शालिभद्रस्य सभार्यस्य निधीयते ॥ ६३ ॥

---

(१) क तत् ।

सर्वथा धन्य एवैष धन्योऽहमपि संप्रति ।
राज्ये यस्येदृशाः सन्ति विमम्शेति भूपतिः ॥ ६४ ॥
बुभुजे सपरीवारो भूभुजामग्रणीस्ततः ।
चित्रालङ्कारवस्त्राद्यैरर्चितश्च गृहं ययौ ॥ ६५ ॥
शालिभद्रोऽपि संसारविमोक्षं यावदिच्छति ।
अभ्येत्य धर्मसुहृदा विज्ञप्तस्तावदीदृशम् ॥ ६६ ॥
आगाच्चतुर्ज्ञानधरः सुरासुरनमस्कृतः ।
मूर्त्तो धर्म इवोद्याने धर्मघोषाभिधो मुनिः ॥ ६७ ॥
शालिभद्रस्ततो हर्षादधिरुह्य रथं ययौ ।
आचार्यपादान् वन्दित्वा साधूंश्चोपाविशत्पुरः ॥ ६८ ॥
स सूरिर्देशनां कुर्वन् नत्वा तेनेत्यपृच्छ्यत ।
भगवन् ! कर्मणा केन प्रभुरन्यो न जायते ? ॥ ६९ ॥
भगवानप्युवाचेदं दीक्षां गृह्णन्ति ये [1]जनाः ।
अशेषस्यापि जगतः स्वामिभावं भजन्ति ते ॥ ७० ॥
यद्येवं नाथ ! तद्गत्वा निजामापृच्छ्य मातरम् ।
ग्रहीष्यामि व्रतमिति शालिभद्रो व्यजिज्ञपत् ॥ ७१ ॥
न प्रमादो विधातव्य इत्युक्तः सूरिणा ततः ।
शालिभद्रो गृहं गत्वा भद्रां नत्वेत्यभाषत ॥ ७२ ॥
धर्मः श्रीधर्मघोषस्य सूरेरद्य मुखाम्बुजात् ।
विश्वदुःखविमोक्षस्योपायभूतो मया श्रुतः ॥ ७३ ॥

---

(१) ख च नराः ।

अकार्षीः माखिन्नं वत्स ! पितुस्तस्यासि नन्दनः ।
प्रणमामेति भद्राऽपि शालिभद्रं प्रमोदतः ॥ ७४ ॥
सोऽप्यवोचदिदं मातस्त्वं विचारय प्रसीद मे ।
[illegible] ततमहं न तस्य पितुः सुतः ॥ ७५ ॥
माऽप्यवादीदिदं वत्स ! युक्तस्तेऽसौ व्रतोद्यमः ।
किन्तु त्वं लोहचणकाश्चर्वणीया निरन्तरम् ॥ ७६ ॥
सुकुमारः प्रकृत्याऽपि दिव्यभोगैश्च लालितः ।
[illegible] कथं त्वं वत्स्यसि व्रतम् ? ॥ ७७ ॥
शालिभद्रोऽभ्यधात् [illegible] भोगलालिताः ।
[illegible] व्रतकष्टानां कातरा न तु [illegible] ॥ ७८ ॥
[illegible]
[illegible] ॥ ७९ ॥
[illegible]
[illegible] ॥ ८० ॥
[illegible]

तदाऽऽयान्ती पुरे तस्मिन्विक्रेतुं दधिसर्पिषी ।
शालिभद्रस्य प्राग्जन्ममाता धन्याऽभवत्पुरः ॥ ५ ॥
शालिभद्रं तु सा प्रेक्ष्य सञ्जात[1]प्रस्नवस्तनी ।
वन्दित्वा चरणौ भक्त्या द्वाभ्यामपि ददौ दधि ॥ ६ ॥
श्रीवीरस्यान्तिके गत्वा तदालोच्य कृताञ्जलिः ।
शालिभद्रोऽवदत्स्वामिन्मातृतः पारणं कथम् ? ॥ ७ ॥
सर्वज्ञोऽप्याचचक्षेऽथ शालिभद्र ! महामुने ! ।
प्राग्जन्ममातरं धन्यामन्यदप्यन्यजन्मजम् ॥ ८ ॥
कृत्वा पारणकं दध्नाऽऽपृच्छ्य च स्वामिनं ततः ।
वैभाराद्रिं ययौ शालिभद्रो धन्यसमन्वितः ॥ ९ ॥
शिलातले शालिभद्रः सधन्यः प्रतिलेखिते ।
पादपोपगमं नाम तत्रानशनमाश्रयत् ॥ १० ॥
तदा च भद्रा तन्माता श्रेणिकश्च महीपतिः ।
आजग्मतुर्भक्तियुक्तौ श्रीवीरचरणान्तिकम् ॥ ११ ॥
ततो भद्राऽवदद्धन्यशालिभद्रौ क्व तौ मुनी ? ।
भिक्षार्थं नागतौ कस्मादस्मद्वेश्म जगत्पते ! ॥ १२ ॥
सर्वज्ञोऽपि बभाषे तौ त्वद्वेश्मनि मुनी गतौ ।
ज्ञातौ न तु भवत्येहागमनव्यग्रचित्तया ॥ १३ ॥
प्राग्जन्ममाता त्वत्सूनोर्धन्या यान्ती पुरं प्रति ।
ददौ दधि तयोस्तेन पारणं चक्रतुश्च तौ ॥ १४ ॥

---

(१) ए -प्रस्नव- ।

उभावथ महासत्त्वौ [1]सत्वरौ भवमुज्झितुम् ।
वैभारपर्वते गत्वाऽनशनं तौ प्रचक्रतुः ॥ १५ ॥
श्रेणिकेन समं भद्रा वैभाराद्रिं ययौ ततः ।
तथास्थितावपश्यच्च तावश्मघटिताविव ॥ १६ ॥
तत्कष्टमथ पश्यन्ती स्मरन्ती तत्सुखानि च ।
साऽरोदीद्रोदयन्तीव वैभाराद्रिं प्रतिस्वनैः ॥ १७ ॥
आयातोऽपि गृहं वत्स ! मया तु स्वल्पभाग्यया ।
न ज्ञातोऽसि प्रमादेनाप्रसादं मा कृथा मयि ॥ १८ ॥
यद्यपि त्यक्तवानस्त्वं तथापि निजदर्शनात् ।
आनन्दयिष्यसि दृशौ पुरेत्यासीन्मनोरथः ॥ १९ ॥
आरम्भेणामुना पुत्र ! शरीरत्यागहेतुना ।
मनोरथं तमपि मे भङ्क्तुमस्युद्यतोऽधुना ॥ २० ॥
प्रारब्धं यत्तपस्तत्र न ते विघ्नीभवाम्यहम् ।
किन्त्वेतत्कर्कशतमं शिलातलमितो भव ॥ २१ ॥
अथोचे श्रेणिको हर्षस्थाने [2]किमम्ब ! रोदिषि ? ।
ईदृग् यस्याः सुतः स्त्रीषु [3]त्वमेका पुत्रवत्यसि ॥ २२ ॥
तत्त्वज्ञोऽयं महासत्त्वस्त्यक्त्वा तृणमिव श्रियम् ।
प्रपेदे स्वामिनः पादान् साक्षादिव परं पदम् ॥ २३ ॥

---

(१) ख घ मात्वरं ।
(२) क ग घ किं नाम ।
(३) ख ट त्वं शोका ।

असौ जगत्स्वामिशिष्यानुरूपं तप्यते तपः ।
मुधाऽनुतप्यते मुग्धे ! किं त्वया स्त्रीस्वभावतः ? ॥ २४ ॥
भद्रेवं बोधिता राज्ञा वन्दित्वा तौ महामुनी ।
विमनस्का निजं धाम जगाम श्रेणिकस्तथा ॥ २५ ॥
मृत्वा ततस्तौ सर्वार्थसिद्धस्वर्गे बभूवतुः ।
सुरोत्तमौ त्रयस्त्रिंशत्सागरप्रमितायुषौ ॥ २६ ॥

सत्पात्रदानफलसम्पदमद्वितीयां
स प्राप सङ्गमक आयतिवर्द्धमानाम् ।
कार्यो नरैरवितथातिथिसंविभागे
भाग्यार्थिभिर्ननु ततः सततं प्रयत्नः ॥ १२० ॥

॥ इति सङ्गमककथानकम् ॥ ८८ ॥

उक्तानि द्वादशव्रतानि, अथ तल्लोपमतिचाररक्षणलक्षणं प्रस्तोतुमाह—

व्रतानि सातिचाराणि सुकृताय भवन्ति न ।
अतिचारास्ततो हेयाः पञ्च पञ्च व्रते व्रते ॥ ८९ ॥

अतिचारो मालिन्यं तद्युक्तानि व्रतानि न सुकृताय भवन्ति, तदर्थमेकैकस्मिन् व्रते पञ्च पञ्चातिचाराः परिहरणीयाः । ननु सर्वविरतावेवातिचारा भवन्ति, संज्वलनोदय एव तेषामभि-धानात् ।

यदाह—

'सव्वेवि अ अइआरा संजलणाणं तु उदयतो हुंति ।

मूलच्छिज्जं पुण होइ बारसण्हं कसायाणं ॥ १ ॥

संज्वलनोदयश्च सर्वविरतानामेव, देशविरतानां तु प्रत्याख्यानावरणोदय इति न देशविरतावतिचारसम्भवः । युज्यते चैतत्, अल्पीयस्त्वात्तस्याः, कुन्थुशरीरे व्रणाद्यभाववत् ।

तथाहि—

प्रथमाणुव्रते स्थूलं सङ्कल्पं निरपराधं द्विविधं त्रिविधेनेत्यादिविकल्पैर्विशेषितत्वेनातिसूक्ष्मतां गते देशाभावात्कथं देशविराधनारूपा अतिचारा भवन्तु, अतः सर्वनाश एव तस्योपपद्यते । महाव्रतेषु तु ते संभवन्ति, महत्त्वादेव ; हस्तिशरीरे व्रणपट्टबन्धादिवदिति । उच्यते । देशविरतावतिचारा न संभवन्तीत्यसङ्गतम् । उपासकदशादिषु प्रतिव्रतमतिचारपञ्चकाभिधानात् । अथ भङ्गा एव ते, न त्वतिचाराः । नैवम् । भङ्गाद्भेदेनातिचारस्यागमे संमतत्वात् । यच्चोक्तम् । सर्वेऽप्यतिचाराः संज्वलनोदय एव । तत्सत्यम् । केवलं सर्वविरतिचारित्रमेवाश्रित्य तदुच्यते, न तु सम्यक्त्वदेशविरती । यतः—सव्वेवि अ अइयारा इत्यादि गाथाया एवं व्याख्या—संज्वलनानामेवोदये सर्वविरतावतिचारा भवन्ति, शेषोदये तु मूलच्छेद्यमेव तस्याम् । एवं च न देशविरतावतिचाराभावः ॥ ८८ ॥

---

(१) सर्वेऽपि च अतिचाराः संज्वलनानां तु उदयतो भवन्ति ।
मूलच्छेद्यं पुनर्भवति द्वादशानां कषायाणाम् ॥ १ ॥

विच्छेदोऽधिकभाराधिरोपणम् ।
रोधश्चाहिंसायां परिकीर्त्तिताः ॥९०॥

ति अमी पञ्चातिचाराः—बन्धो रज्ज्वादिना न्धनम् ; स्वपुत्रादीनामपि विनयग्रहणार्थं दित्युक्तम् ; क्रोधात् प्रबलकषायोदयाद्यो ः १ । छविः शरीरं त्वग्वा, तस्याः छेदो ादवल्मीकोपहतपादस्य पुत्रादेरपि क्रियते ति । क्रोधाद्यः छविच्छेदः स द्वितीयोऽति- दुःसहवस्य भारस्यारोपणं गो-करभ-रासभ- शिरसि वा वाहनायाधिरोपणम् ; एतदपि ेन क्रोधात्तदुपलक्षिताल्लोभाद्वा यदधिक- ऽतिचारः ३ । प्रहारो लगुडादिना ताडनं तिचारः ४ । अन्नादिरोधो भोजनपानादे- पञ्चमोऽतिचारः ५ । अत्र चायमाम्नायः- न्धो द्विपदानां चतुष्पदानां वा स्यात्, सोऽपि ावकानर्थकस्तावद् विधातुं न युज्यते, सार्थकः ापेक्षो निरपेक्षश्च, तत्र सापेक्षो यो दाम- यच प्रदीपनादिषु मोचयितुं छेत्तुं वा ात् निश्चलमत्यर्थं बध्यते । एवं तावद्

* ८८ ।

ं बहुना ? मूलगुणस्याहिंसालक्षणस्यातिचारो यथा न भवति
या यतनया वर्त्तनीयम् । ननु हिंसैव श्रावकेण प्रत्याख्याता
नो बन्धादिकरणेऽपि न दोषो हिंसाविरतेरखण्डितत्वात् ;
थ बन्धादयोऽपि प्रत्याख्यातास्तदा तत्करणे व्रतभङ्ग एव, विरति-
ण्डनात् । किञ्च । बन्धादीनां प्रत्याख्येयत्वे व्रतेयत्ता [1]विशीर्येत ;
तिव्रतमतिचारव्रतानामाधिक्यादिति । एवं च न बन्धादीना-
तिचारतेति । उच्यते—सत्यं हिंसैव प्रत्याख्याता न बन्धादयः.
वलं तत्प्रत्याख्याने अर्थतस्तेऽपि प्रत्याख्याता द्रष्टव्याः, हिंसो·
यत्वात्तेषाम् । न च बन्धादिकरणेऽपि व्रतभङ्गः किन्त्वतिचार
। कथम् । इह द्विविधं व्रतम्- अन्तर्वृत्त्या बहिर्वृत्त्या च ; तत्र
रयामीति विकल्पाभावेन यदा कोपाद्यावेशात्परप्राणप्रहाण-
विगणयन् बन्धादौ प्रवर्त्तते न च हिंसा भवति, तदा
र्दयताविरत्यनपेक्षप्रवृत्तत्वेनान्तर्वृत्त्या व्रतस्य भङ्गः, हिंसाया
भावाच्च बहिर्वृत्त्या पालनमिति । देशस्य भञ्जनाद्देशस्यैव
लनादतिचारव्यपदेशः प्रवर्त्तते ।

ादुक्तम्—

। मारयामीति कृतव्रतस्य विनैव मृत्युं क इहातिचारः ? ।
निगद्यते यः कुपितो वधादीन् करोत्यसौ स्यान्नियमाऽनपेक्षः ॥१॥
त्योरभावान्नियमोऽस्ति तस्य कोपाद्दयाहीनतया तु भग्नः ।
ःशस्य भङ्गादनुपालनाच्च पूज्या अतीचारमुदाहरन्ति ॥ २ ॥

(१) क विशीर्येत ।

यच्चोक्तम्—व्रतेयत्ता 'विशीर्येत इति । तदयुक्तम् । विशुद्धाहिंसासद्भावे हि बन्धादीनामभाव एव । तत् स्थितमेतद्बन्धादयोऽतिचारा एव । बन्धादिग्रहणस्य चोपलक्षणत्वान्मन्त्रतन्त्रप्रयोगादयोऽन्येऽप्यतिचारतया ज्ञेयाः ॥ ९० ॥

अथ द्वितीयस्य व्रतस्यातिचारानाह—

मिथ्योपदेशः सहसाऽभ्याख्यानं गुह्यभाषणम् ।
विश्वस्तमन्त्रभेदश्च कूटलेखश्च सूनृते ॥ ९१ ॥

मिथ्योपदेशोऽसदुपदेशः, प्रतिपन्नसत्यव्रतस्य हि परपीडाकरं वचनमसत्यमेव, ततः प्रमादात्परपीडाकरणे उपदेशे अतिचारो यथा, वाह्यन्तां खरोष्ट्रादयो हन्यन्तां दस्यव इति । यद्वा । यथास्थितोऽर्थस्तथोपदेशः साधीयान्, विपरीतस्तु अयथार्थोपदेशो यथा—परेण सन्देहापन्नेन पृष्टे न तथोपदेशः । यद्वा । विवादे स्वयं परेण वा अन्यतराभिसन्धानोपायोपदेश इति प्रथमोऽतिचारः १ । सहसा अनालोच्याभ्याख्यानमसद्दोषाध्यारोपणं यथा—चौरस्त्वं पारदारिको वेत्यादि । अन्ये तु सहसाऽभ्याख्यानस्थाने रहस्याभ्याख्यानं पठन्ति ; व्याचक्षते च—रह एकान्तस्तत्र भवं रहस्यं रहस्येनाभ्याख्यानमभिशंसनमसदध्यारोपणं, रहस्याभ्याख्यानं यथा—यदि वृद्धा स्त्री ततस्तस्यै कथयति,—अयं तव भर्त्ता तरुण्यामतिप्रसक्तः, अथ तरुणी तत एवमाह—अयं ते भर्त्ता प्रौढचेष्टितायां मध्यमवयसि योषिति प्रसक्तः, तथाऽयं खरकामी मृदुकाम इति वा परिहसति,

(1) क ङ विशीर्यत-।

तथा स्त्रियमभ्याख्याति भर्त्तुः पुरः - यथा पत्नी ते कथयति एवमयं मां रहसि कामगर्दभः खलीकरोति, अथवा दम्पत्योरन्यस्य वा पुंसः स्त्रिया वा येन रागप्रकर्ष उत्पद्यते तेन तादृशा रहस्येनानेकप्रकारेणाभिशंसनं हास्यक्रीडादिना नत्वभिनिवेशेन ; तथा सति व्रतभङ्ग एव स्यात् ।

यदाह

'सहसाभक्खाणाई जाणंतो जइ करेज्ज तो भंगो ।
जइ पुण णाभोगाईहिंतो तो होइ अइयारो ॥ १ ॥

इति द्वितीयोऽतिचारः २ । तथा गुह्यं गूहनीयं न सर्वस्मै यत्कथनीयं राजादिकार्य्यसंबद्धं तस्यानधिकृतेनैवाकारेङ्गितादिभिर्ज्ञात्वाऽन्यस्मै प्रकाशनं गुह्यभाषणं यथा—एते हीदमिदं च राजविरुद्धादिकं मन्त्रयन्ते, अथवा गुह्यभाषणं पैशुन्यं यथा—द्वयोः प्रीतौ सत्यामेकस्याकारादिनोपलभ्याभिप्रायमितरस्य तथा कथयति यथा प्रीतिः प्रणश्यति । इति तृतीयोऽतिचारः ३ । तथा विश्वस्ता विश्वासमुपगता ये मित्रकलत्रादयस्तेषां मन्त्रो मन्त्रणं तस्य भेदः प्रकाशनं तस्यानुवादरूपत्वेन, सत्यत्वात् यद्यपि नाति चारता घटते तथापि मन्त्रितार्थप्रकाशनजनितलज्जादितो मित्रकलत्रादेर्मरणादिसम्भवेन परमार्थतोऽस्यासत्यत्वात् कथञ्चिद्भङ्गरूपत्वेनातिचारतैव । गुह्यभाषणे गुह्यमाकारादिना विज्ञायानधि-

(१) सहसाभ्याख्यानादीन् जानन् यदि कुर्यात् ततो भङ्गः ।
यदि पुनरनाभोगादिभ्यस्ततो भवत्यतिचारः ॥ १ ॥

क्षत एव गुह्यं प्रकाशयति, इह तु स्वयं मन्त्रयित्वैव मन्त्रं भिनत्तीत्यनयोर्भेदः। इति चतुर्थोऽतिचारः ४। तथा कूटमसद्भूतं तस्य लेखो लेखनं कूटलेखः, अन्यस्वरूपाक्षरमुद्राकरणम्, एतच्च यद्यपि कायेनासत्यां वाचं न वदामीत्यस्य न वदामि न वादयामीत्यस्य वा व्रतस्य भङ्ग एव, तथापि सहसाकारानाभोगादिना अतिक्रमादिना वाऽतिचारः; अथवा असत्यमित्यसत्यभणनं मया प्रत्याख्यातमिदं पुनर्लेखनमिति भावनया व्रतसापेक्षस्यातिचार एवेति पञ्चमोऽतिचारः ५ ॥ ९१ ॥

अथ तृतीयव्रतातिचारानाह—

स्तेनानुज्ञा-तदानीतादानं द्विड्राज्यलङ्घनम्।
प्रतिरूपक्रिया मानान्यत्वं चास्तेयसंश्रिताः ॥ ९२ ॥

स्तेनाश्चौरास्तेषामनुज्ञा-हरत यूयमिति हरणक्रियायां प्रेरणा, अथवा स्तेनोपकरणानि कुशिकाकर्त्तरिकाघर्घरिकादीनि तेषामर्पणं विक्रयणं वा स्तेनानुज्ञा। अत्र च यद्यपि चौर्यं न करोमि न कारयामीत्येवं प्रतिपन्नव्रतस्य स्तेनानुज्ञाव्रतभङ्ग एव, तथापि किमधुना यूयं निर्व्यापारास्तिष्ठत ?, यदि वो भक्तादि नास्ति तदाऽहं तद्ददामि ?, भवदानीतमोषस्य वा यदि विक्रायको न विद्यते तदाऽहं विक्रेष्ये ? इत्येवंविधवचनैश्चौरान् व्यापारयतः स्वकल्पनया तद्व्यापारणं परिहरतो व्रतसापेक्षस्यासावतिचारः। इति प्रथमोऽतिचारः १। तथा तच्छब्देन स्तेनपरामर्शः स्तेनैरानीतमाहृतं कनकवस्त्रादि तस्यादानं ग्रहणं मूल्येन मुधिकया

वा तदानीतादानं, स्तेनानीतं हि काणक्रयेण मुधिकया वा प्रच्छन्नं गृह्णंश्चौरो भवति, ततश्चौर्यकरणाद्व्रतभङ्गः, वाणिज्यमेव मया क्रियते न चौरिकेत्यध्यवसायेन व्रतसापेक्षत्वान्न 'तद्भङ्ग इति भङ्गाभङ्गरूपोऽतिचारः। इति द्वितीयः २। तथा द्विषोर्विरुद्धयो-राज्ञोरिति शेषः. राज्यं नियमिता भूमिः कटकं वा तस्य लङ्घनं व्यवस्थाऽतिक्रमः; व्यवस्था च परस्परविरुद्धराजकृतैव, तल्लङ्घनं चान्यतरराज्यनिवासिन इतरराज्ये प्रवेशः, इतरराज्य-निवासिनो वा अन्यतरराज्ये प्रवेशः, द्विड्राज्यलङ्घनस्य यद्यपि स्वस्वामिना अननुज्ञातस्य 'सामिजीवादत्तं तित्थयरेणं तहेव य गुरूहिं' इत्यदत्तादानलक्षणयोगेन तत्कारिणां च चौर्यदण्ड-योगेन अदत्तादानरूपत्वाद्व्रतभङ्ग एव, तथापि द्विड्राज्यलङ्घनं कुर्वता मया वाणिज्यमेव कृतं न चौर्यमिति भावनया व्रतसापेक्षत्वाल्लोके च चौरोऽयमिति व्यपदेशाभावादतिचारता। इति तृतीयः ३। तथा प्रतिरूपं सदृशं व्रीहीणां पलञ्जिः, घृतस्य वसा, हिङ्गोः खदिरादिवेष्टः, तैलस्य मूत्रं, जात्यसुवर्णरूप्ययो-र्युक्तिसुवर्णरूप्ये, इत्यादिप्रतिरूपेण क्रियाव्यवहारः, व्रीह्यादिषु पलञ्जयादि प्रक्षिप्य तत्तद्विक्रीणीते। यद्वा, अपहृतानां गवादीनां सश्रृङ्गाणामग्निपक्वकालिङ्गीफलस्वेदादिना श्रृङ्गाण्यधोमुखानि प्रगुणानि तिर्यग्वलितानि वा यथारुचि विधायाऽन्यविधत्वमिव तेषामापाद्य सुखेन धारणविक्रयादि करोति। इति चतुर्थः ४।

(१) स च वा भ-।   (२) क ट - ...।

क्षत एव गुह्यं प्रकाशयति, इह तु स्वयं मन्त्रयित्वेव मन्त्रं भिनत्तीत्यनयोर्भेदः। इति चतुर्थोऽतिचारः ४। तथा कूटमसद्भूतं तस्य लेखो लेखनं कूटलेखः, अन्यस्वरूपाक्षरमुद्राकरणम्, एतच्च यद्यपि कायेनासत्यां वाचं न वदामीत्यस्य न वदामि न वादयामीत्यस्य वा व्रतस्य भङ्ग एव, तथापि सहसाकारानाभोगादिना अतिक्रमादिना वाऽतिचारः; अथवा असत्यमित्यसत्यभणनं मया प्रत्याख्यातमिदं पुनर्लेखनमिति भावनया व्रतसापेक्षस्यातिचार एवेति पञ्चमोऽतिचारः ५ ॥ ९१ ॥

अथ तृतीयव्रतातिचारानाह —

स्तेनानुज्ञा-तदानीतादानं द्विट्राज्यलङ्घनम्।
प्रतिरूपक्रिया मानान्यत्वं चास्तेयसंश्रिताः ॥ ९२ ॥

स्तेनाश्चौरास्तेषामनुज्ञा-हरत यूयमिति हरणक्रियायां प्रेरणा, अथवा स्तेनोपकरणानि कुशिकाकर्त्तरिकाघर्घरिकादीनि तेषामर्पणं विक्रयणं वा स्तेनानुज्ञा। अत्र च यद्यपि चौर्यं न करोमि न कारयामीत्येवं प्रतिपन्नव्रतस्य स्तेनानुज्ञाव्रतभङ्ग एव, तथापि किमधुना यूयं निर्व्यापारास्तिष्ठत ?, यदि वो भक्तादि नास्ति तदाऽहं तद्ददामि ?, भवदानीतमोषस्य वा यदि विक्रायको न विद्यते तदाऽहं विक्रेष्ये ? इत्येवंविधवचनैश्चौरान् व्यापारयतः स्वकल्पनया तद्व्यापारणं परिहरतो व्रतसापेक्षस्यासावतिचारः। इति प्रथमोऽतिचारः १। तथा तच्छब्देन स्तेनपरामर्शः स्तेनैरानीतमाहृतं कनकवस्त्रादि तस्यादानं ग्रहणं मूल्येन मुधिकया

स्तोकमप्युच्यते, इत्वरं स्तोकमल्पमात्ता इत्वरात्ता, विस्पष्टपटुवत् समासः। अथवा इत्वरकालमात्ता इत्वरात्ता, मयूरव्यंसकादित्वात् समासः, कालशब्दलोपश्च। तस्यां गम आसेवनम्। इयं चात्र भावना—भाटीप्रदानादित्वरकालस्वीकारेण स्वकलत्रीकृत्य वेश्यां सेवमानस्य स्वबुद्धिकल्पनया स्वदारत्वेन व्रतसापेक्षचित्तत्वान्न भङ्गः, अल्पकालपरिग्रहाच्च वस्तुतोऽन्यकलत्रत्वाद्भङ्गः, इति भङ्गाभङ्गरूपत्वादित्वरात्तागमोऽतिचारः। इति प्रथमः १। तथा अनात्ता अपरिगृहीता वेश्या स्वैरिणी, प्रोषितभर्तृका कुलाङ्गना वाऽनाथा तस्यां गतिरासेवनम्। इयं चानाभोगादिना अतिक्रमादिना वा अतिचारः। इमौ चातिचारौ स्वदारसन्तोषिण एव, न तु परदारवर्जकस्य; इत्वरात्ताया वेश्यात्वेन अनात्तायाः स्वनाथतयैवापरदारत्वात्, शेषास्त्वतिचारा द्वयोरपि; इदं च सूत्राऽनुपाति।

यदाहुः—

'सदारसंतोसस्स इमे पञ्च अइयारा जाणियव्वा न समायरियव्वा।

अन्ये त्वाहुः—इत्वरात्तागमः स्वदारसन्तोषवतोऽतिचारस्तत्र भावना कृतैव, अनात्तागतिस्तु परदारवर्जिनः। अनात्ता हि वेश्या यदा तां गृहीतान्यसत्कभाटिकामभिगच्छति, तदा परदारगमनजन्यदोषसम्भवात् कथञ्चित् परदारत्वाच्चाभङ्गत्वेन भङ्गाभङ्गरूपोऽतिचारः। इति द्वितीयः २। तथाऽन्येषां स्वस्वापत्यव्यतिरि-

---

(1) स्वदारसन्तोषस्येमे पञ्चातिचारा ज्ञातव्याः, न समाचरितव्याः।

तथा मीयतेऽनेनेति मानं कुडवादि, पलादि, हस्तादि, तस्यान्यत्वं हीनाधिकत्वं, हीनमानेन ददाति, अधिकमानेन गृह्णाति। इति पञ्चमः ५। प्रतिरूपक्रिया मानान्यत्वं च परव्यसनेन परधनग्रहणरूपत्वाद्भङ्ग एव, केवलं खात्रखननादिकमेव चौर्य्यं प्रसिद्धं, मया तु वणिक्कलैव कृतेति भावनया व्रतरक्षणोद्यतत्वादतिचारावेवेति। अथवा स्तेनानुज्ञादयः पञ्चाप्यमी व्यक्तचौर्य्यरूपा एव, केवलं सहसाकारादिना अतिक्रमव्यतिक्रमादिना वा प्रकारेण विधीयमाना अतिचारतया व्यपदिश्यन्ते। न चैते राजसेवकादीनां न सम्भवन्ति, तथाहि—आद्ययोः स्पष्ट एव सम्भवः, द्विड्राज्यलङ्घनं तु यदा सामन्तादिः कश्चित् स्वस्वामिनो वृत्तिमुपजीवति, तद्विरुद्धस्य च सहायो भवति; तदाऽस्यातिचारो भवति, प्रतिरूपक्रिया मानान्यत्वं च यदा राजा भाण्डागारे द्रव्याणां विनिमयं मानान्यत्वं च कारयति, तदा राज्ञोऽप्यतिचारो भवति। एते च पञ्चाप्यस्तेयव्रताश्रिता अतिचाराः ॥ ९३ ॥

अथ चतुर्थव्रतातिचारानाह—

इत्वरात्तागमोऽनात्तागतिरन्यविवाहनम्।
मदनात्याग्रहोऽनङ्गक्रीडा च ब्रह्मणि स्मृताः ॥ ९४ ॥

ब्रह्मणि ब्रह्मचर्य्यव्रते, एतेऽतिचाराः स्मृताः। इत्वरी प्रतिपुरुषगमनशीला, वेश्या इत्यर्थः; सा चासावात्ता च कञ्चित्कालं भाटीप्रदानादिना संगृहीता, पुंवद्भावे इत्वरात्ता। अथवा इत्वरं

र्मुहुर्योषायामारोहति, जातबलक्षयश्च वाजीकरणान्युपयुङ्क्ते ; अनेन खल्वौषधप्रयोगेण गजप्रसेकी तुरगावमर्दीव पुरुषो भवतीति बुद्धया । इति चतुर्थः ४ । तथा अनङ्गः कामः, स च पुंसः स्त्रीपुंनपुंसकेषु सेवनेच्छा, हस्तकर्मादीच्छा वा वेदोदयात् । योषितोऽपि योषिन्नपुंसकपुरुषादेवनेच्छा हस्तकर्मादीच्छा वा, नपुंसकस्यापि नपुंसकपुरुषस्त्रीसेवनेच्छा हस्तकर्मादीच्छा वा । एषोऽनङ्गो नान्यः कश्चित् तेन तस्मिन् वा क्रीडा रमणमनङ्गक्रीडा । यद्वा । आहार्यैः काष्ठपुस्तफलमृत्तिकाचर्मादिभिर्घटितैः प्रजननैः स्वलिङ्गेन कृतकृत्योऽपि योषितामवाच्यदेशं भूयो भूयः कुथ्नाति, केशाकर्षणप्रहारदानदन्तनखकदर्थनाऽऽदिप्रकारैश्च मोहनीयकर्मावेशात् तथा क्रीडति यथा बलवान् रागः प्रसूयते । अथवाऽङ्गं देहावयवो मैथुनापेक्षया योनिर्मेहनं वा तद्व्यतिरिक्तान्यङ्गानि कुचकक्षोरुवदनादीनि तेषु क्रीडा अनङ्गक्रीडा । इह च श्रावकाऽत्यन्तपापभीरुतया ब्रह्मचर्यं चिकीर्षुरपि यदा वेदोदयासहिष्णुतया तद्विधातुं न शक्नोति, तदा यापनामात्रार्थं स्वदारसन्तोषादि प्रतिपद्यते । मैथुनमात्रेणैव च यापनायां सम्भवन्त्यां मदनात्याग्रहानङ्गक्रीडे वर्थतः प्रतिषिद्धे । तत्सेवने न च कश्चिद्गुणः, प्रत्युत तात्कालिकी क्षिदा राजयक्ष्मादयश्च रोगा दोषा एव भवन्ति । एवं प्रतिषिद्धाचरणाद्भङ्गो नियमाबाधनाच्चाभङ्ग इत्यतिचारावेतौ । अन्ये त्वन्यथाऽतिचारद्वयमपि भावयन्ति—स हि स्वदारसन्तोषी मैथुनमेव मया प्रत्याख्यातमिति स्वकल्पनया वेश्यादौ तत् परिहरति, नालिङ्गनादि ; परदारविवर्जकोऽपि

न्यानां विवाहनं विवाहकरणं कन्याफललिप्सया, स्नेहसम्
वा परिणयनविधानम्। इदं च स्वदारसन्तोषवता स्
परदारवर्जकेन च स्वकलत्रवेश्याभ्यामन्यत्र मनोवाक्काये
कार्यं न च कारणीयमिति यदा प्रतिपन्नं व्रतं भव
अन्यविवाहकरणं मैथुनकारणमर्थतः प्रतिपिद्धमेव भवति,
तु मन्यते—विवाह एवाऽयं मया विधीयते न मैथुनं
इति व्रतसापेक्षत्वादतिचार इति कन्याफललिप्सा च
सम्यक्त्वाऽवस्थायां सम्भवति, मिथ्यादृष्टेस्तु भद्रकावस्था
यस्यार्थं व्रतादानं सा सम्भवति। ननु स्वविवाहनवत् स्वापत्य
नाप समान एव दोषः। सत्यम्। यदि स्वकन्याया वि
कारयेत्, तदा स्वच्छन्दचारिणी स्यात्, ततश्च शासनो
स्यात्, विहितविवाहा तु पतिनियन्त्रितत्वेन न तथा स्यात्
यदाहुः

पिता रक्षति कौमारे भर्ता रक्षति यौवने।

पुत्रस्तु स्थविरे भावे न स्त्री स्वातन्त्र्यमर्हति ॥ १ ॥

[illegible]

चारिणं वा स्वपतिमतिक्रमादिनाऽभिसरन्त्या अतिचारः। शेषा-
स्त्वयः स्त्रियाः पूर्ववत् ॥ ८४ ॥

अथ पञ्चमव्रतस्याऽतिचारानाह—

धनधान्यस्य कुप्यस्य गवादेः क्षेत्रवास्तुनः।
हिरण्यहेम्नश्च संख्याऽतिक्रमोऽत्र परिग्रहे ॥८५॥

अत्र श्रावकधर्मोचिते परिग्रहव्रते यः संख्याऽतिक्रमः सोऽतिचारः
कस्य कस्येत्याह—धनं गणिमधरिममेयपरीक्ष्यलक्षणम्।

यदाह—

[1]गणिमं जाईफलफोप्फलाइ धरिमं तु कुङ्कुमगुडाइ।
मेज्जं चोप्पडलोणाइ रयणवत्थाइ परिच्छेज्जं ॥ १ ॥

धान्यं सप्तदशविधम्।

यदाह—

व्रीहिर्यवो मसूरो गोधूममुद्गमाषतिलचणकाः।
अणवः प्रियङ्गुकोद्रवमकुष्टकाः शालिराढक्यः ॥ १ ॥
किञ्च कलायकुलत्थौ शणसप्तदशानि धान्यानि।

धनं च धान्यं च धनधान्यं तस्य धनधान्यस्य। अत्रोत्तरत्र च
समाहारनिर्देशः परिग्रहस्य पञ्चविधत्वज्ञापनार्थः। तथा सति
ह्यतिचारपञ्चकं सुयोजं भवति। कुप्यं रूप्यसुवर्णव्यतिरिक्तं कांस्य-

---

(१) गणिमा जातिफलपूगफलादि धरिमा तु कुङ्कुमगुडादि।
मेयं स्नेहलवणादि रत्नवस्त्रादि परिच्छेद्यम् ॥ १ ॥

[illegible] कृतधनधान्यपरिमाणस्य [illegible] भवति,
[illegible] धनधान्यादीनां परिग्रहविषयाणां
[illegible] : तत्र धनधान्यस्य बन्धनात् संख्यातिक्रमो यथा –
कृतधनधान्यपरिमाणस्य [illegible] लाभतः धनं धान्यं वा
ददाति, तच्च [illegible] गृहगतधान्यादि
विक्रीते वा सति ग्रहीष्यामीति भावनया बन्धनात्, मूढकात्,
रज्ज्वादिसंयमनात्, सत्यङ्कारदानादिरूपाद्वा स्वीकृत्य तद् गृह-
एव तत् स्थापयतोऽतिचारः १। कुप्यस्य भावतः संख्यातिक्रमो
यथा कुप्यस्य या संख्या कृता ततः कथञ्चिद् द्विगुणत्वे
सति तदसहमानाद् भावतो स्थालादिभाजनद्वयेनैकाकरणरूपात्
पर्यायान्तरात् स्वाभाविकसंख्याबाधनात् संख्यापूरणान्नाति-
चारः। अथवा भावतोऽभिप्रायाद्विवक्षितकालावधेः
परतो ग्रहीष्यामि अतो मान्यस्य देयमिति परार्पितकया व्यवस्था-
पयतोऽतिचारः २। तथा गोमहिष्यादेर्वडवादेर्विवक्षितसंवत्सराद्य-
वधिमध्ये एव प्रसवे अधिकद्विपदादिभावाद् व्रतभङ्गः स्यादिति
मत्वा कियत्यपि काले गते गर्भतो गर्भग्रहणाद्गर्भस्थगवादि-
भावेन बहिरलब्धभावेन कथञ्चिद् व्रतभङ्गाद् व्रतिनोऽतिचारः ३।
तथा क्षेत्रवास्तुनो योजनात् क्षेत्रवास्त्वन्तरमीलनाद्गृहीतसंख्याया-
धिक्यतोऽतिचारः। तथाहि – किलैकमेव क्षेत्रं वास्तु वेत्यभिग्रह-
वतोऽधिकतरतदभिलाषे सति व्रतभङ्गभयात् प्राक्तनक्षेत्रवास्तु-
प्रत्यासन्नं तद् गृहीत्वा पूर्वेण सह तस्यैकत्वकरणार्थं वृत्तिभित्त्या-
द्यपनयनेन तत्र योजयतो व्रतसापेक्षत्वात् कथञ्चिद्विरति-

माणाद्विक्रम तिर्यादिस-

तिचारा भवन्ति, अन्यथा-
र न कारयामीति वा
परतः स्वयं गमनतः
ाणातिक्रमं परिहरति,
त् परेण नयनानयनयोर्न
द्देशस्य दिग्व्रतविषयस्य
क्षेत्रान्तरपरिमाणप्रक्षेपेण
रः। तथाहि--केनापि
रिमाणं कृतं, स चोत्पन्न-
ानि व्यवस्थाप्य अन्यस्यां
उभाभ्यामपि प्रकाराभ्यां
तत्वादित्येवमेकत्र क्षेत्रं
यदि वाऽनाभोगात्
नवर्तितव्यं, ज्ञाते वा न

ातिक्रमस्तिर्यग्दिक्प्रमाणाति-

गन्तव्यम्, अन्योऽपि न विसर्जनीयः। अथानाज्ञया कोऽपि गतो भवेत् तदा यत् तेन लब्धं, स्वयं वा विस्मृतितो गतेन लब्धं तत् परिहर्तव्यम् ॥ ९७ ॥

अथ द्वितीयगुणव्रतस्य भोगोपभोगमानरूपस्यातिचारानाह—

सचित्तस्तेन सम्बद्धः सन्मिश्रोऽभिषवस्तथा।
दुष्पक्वाहार इत्येते भोगोपभोगमानगाः ॥ ९८ ॥

सह चित्तेन चेतनया वर्तते यः स सचित्तः आहार एव, आहारस्तु दुष्पक्वाहार इत्यस्मादाकृष्य सम्बध्यते, एवमुत्तरेष्वप्याहारशब्दो योजनीयः। सचित्तस्तु कन्दमूलफलादिः पृथ्वीकायादिर्वा। इह च निवृत्तिविषयीकृतप्रवृत्तौ भङ्गसद्भावेऽप्यतिचाराभिधानं व्रतसापेक्षस्यानाभोगातिक्रमादिना प्रवृत्तौ द्रष्टव्यम् १। तेन सचित्तेन सम्बद्धः प्रतिबद्धः सचित्तसंबद्धः, सचेतनवृक्षादिना सम्बद्धो गुन्दादिः पक्वफलादिर्वा, सचित्तान्तर्बीजः खर्जूराम्रादिः, तदाहारो हि सचित्ताहारवर्जकस्यानाभोगादिना सावद्याहारप्रवृत्तिरूपत्वादतिचारः। अथवा बीजं त्यक्ष्यामि तस्यैव सचेतनत्वात्, कटाहं तु भक्षयिष्यामि तस्याचेतनत्वादिति बुद्ध्या पक्वं खर्जूरादिफलं मुखे प्रक्षिपतः सचित्तवर्जकस्य सचित्तप्रतिबद्धाहारो द्वितीयः २। तथा सचित्तेन मिश्रः शबलः आहारः सचित्तमिश्राहारः। यथा—आर्द्रकदाडिमबीजकर्कटिकामिश्रितकादिमिश्रः पूरणादिः, तिलमिश्रो यवधानादिर्वा, अनाभोगातिक्रमादिनाऽतिचारः। [illegible] पिष्टादिना [illegible]

तन्नमिति युक्ता आहारः सम्मिश्राहारः व्रतसापेक्षत्वादतिचार इति तृतीयः ३ । अभिषवोऽनेकद्रव्यसंधाननिष्पन्नः सुरासौवीरकादिः, मांसप्रकारखण्डादिर्वा, सुरामध्वाद्यभिष्यन्दिवृष्यद्रव्योपयोगो वा, अयमपि सावद्याहारवर्जकस्यानाभोगातिक्रमादिनाऽतिचार इति चतुर्थः ४ । तथा दुष्पक्वो मन्दपक्वः स चासावाहारश्च दुष्पक्वाहारः, स चार्धस्विन्नपृथुकतन्दुलयवगोधूमस्थूलमण्डक[1]कर्कटकफलादिरैहिकप्रत्यवायकारी यावता चांशेन सचेतनस्तावता परलोकमप्युपहन्ति पृथुकादेर्दुष्पक्वतया सम्भवत्सचेतनावयवत्वात् पक्वत्वेनाचेतनइति भुञ्जानस्याऽतिचार इति पञ्चमः ५ । केचित् त्वपक्वाहारमप्यतिचारत्वेन वर्णयन्ति । अपक्वं चाग्न्यादिना यदसंस्कृतम् । एष च सचित्ताहारे प्रथमातिचारेऽन्तर्भवति । तुच्छौषधिभक्षणमपि केचिदतिचारमाहुः । तुच्छौषधयश्च मुद्गादिकोमलशिम्बीरूपास्ताश्च यदि सचित्तास्तदा सचित्तातिचार एवान्तर्भवन्ति, अथ अग्निपाकादिना अचित्तास्तर्हि को दोषः ? इति । एवं रात्रिभोजनमद्यादिनिवृत्तिष्वपि अनाभोगातिक्रमादिभिरतिचारा भावनीयाः । एते पञ्चातिचारा भोगाभोगपरिमाणगता बोद्धव्याः ॥ ९८ ॥

अथ भोगोपभोगातिचारानुपसंहरन् भोगोपभोगव्रतस्य
लक्षणान्तरं तद्गतांश्चातिचारानुपदर्शयितुमाह—

अमी भोजनतस्त्याज्याः कर्मतः खरकर्म तु ।
तस्मिन् पञ्चदश मलान् कर्मादानानि संत्यजेत् ॥९९॥

---

(१) क -कटुकफल-।

क्रमेण पञ्चदशाप्यतिचारान् व्याचष्टे, तत्राङ्गारजीविका

अङ्गारभ्राष्ट्रकरणं कुम्भायःस्वर्णकारिता।
ठठारत्वेष्टकापाकाविति ह्यङ्गारजीविका॥ १

अङ्गारकरणं काष्ठदाहेनाऽङ्गारनिष्पादनं तद्विक्रयश्च, अ
हि षण्णां जीवनिकायानां विराधनासम्भवः। एवं च ये
विराधनारूपा आरम्भास्ते तेऽङ्गारकर्मण्यन्तर्भवन्ति; प्रपञ्चा
उक्तः। भ्राष्ट्रस्य चणकादिभर्जनस्थानस्य करणं भ्राष्ट्रकरण
जीविकेत्यर्थः। तथा कुम्भकारिता कुम्भकरणपाचनविक्रय
जीविका। तथा अयो लोहं तस्य करणघटनादिना जी
स्वर्णकारिता सुवर्णरूप्ययोर्गालनघटनादिना जीविका।
स्वर्णानि करोतीत्येवं शीलस्तस्य भावस्तत्ता। तथा ठठार
नागवङ्गकांसपित्तलादीनां करणघटनादिना जीविका।
पाकः इष्टकाकवेल्लुकादीनां पाकस्तेन जीविका। इत्ये
अङ्गारजीविका॥ १०२॥

अथ वनजीविकामाह—

छिन्नाच्छिन्नवनपत्रप्रसूनफलविक्रयः।
कणानां दलनात् पेषाद् वृत्तिश्च वनजीविका

छिन्नस्य द्विधाकृतस्य अच्छिन्नस्य च वनस्य वनस्पति
पत्राणां प्रसूनानां फलानां च छिन्नाच्छिन्नानां विक्रयो व
केत्युत्तरेण सम्बन्धः। कणानां च घरट्टादिना दलना

करणात्, शिलाशिलापुत्रकादिना पेषात् चूर्णीकरणाद्या इति सा वनजीविका। वनजीविका च वनस्पतिकायादि[illegible] सम्भवा ॥ १०३ ॥

अथ शकटजीविकामाह—

शकटानां तदङ्गानां घटनं खेटनं तथा।
विक्रयश्चेति शकटजीविका परिकीर्तिता ॥१०४॥

शकटानां चतुष्पदवाह्यानां वाहनानां, तदङ्गानां शकटाङ्गानां चक्रादीनां, घटनं स्वयं परेण वा निष्पादनं, खेटनं वाहनं, त[illegible] शकटानामेव सम्भवति स्वयं परेण वा; विक्रयश्च शकटा[illegible] तदङ्गानां च, इति सकलभूतोपमर्दजननी गवादीनां च ब[illegible] बन्धादिहेतुः शकटजीविका प्रकीर्तिता ॥ १०४ ॥

अथ भाटकजीविकामाह —

शकटोक्षलुलायोष्ट्रखराश्वतरवाजिनाम्।
भारस्य वाहनाद् वृत्तिर्भवेद्भाटकजीविका ॥१०५॥

शकटाश्च [illegible], उक्षाणो बलीवर्दाः, लुलाया महिषाः, उ[illegible] करभाः, खरा रासभाः, अश्वतरा वेसराः, वाजिनोऽश्वाः, तेषां [illegible] [illegible] वाहनं, मूल्याद् या वृत्तिः [illegible] भाटकजीविका ॥ १०५ ॥

अथ स्फोटजीविकामाह—

सरःकूपादिखननशिलाकुट्टनकर्मभिः ।
पृथिव्यारम्भसम्भूतैर्जीवनं स्फोटजीविका ॥१०६॥

सरसः कूपस्य आदिग्रहणाद् वापीदीर्घिकादेः खननमोड्डकर्म, हलादिना वा क्षेत्रादेर्भूविदारणं; शिलाकुट्टनकर्म पाषाणघटनकर्म; एतैः पृथिव्याः पृथिवीकायस्य य आरम्भ उपमर्दस्तस्य सम्भूतं सम्भवो येभ्यस्तैः पृथिव्यारम्भसम्भूतैः; उपलक्षणं चैतद् भूमिखनने वनस्पतित्रसादिजन्तुघातानाम्। एभिर्जीवनं स्फोटजीविका; स्फोटः पृथिव्या विदारणं तेन जीविका स्फोटजीविका ॥ १०६ ॥

अथ दन्तवाणिज्यमाह—

दन्तकेशनखास्थित्वग्रोम्णो ग्रहणमाकरे ।
त्रसाङ्गस्य वणिज्यार्थं दन्तवाणिज्यमुच्यते ॥१०७॥

दन्ता हस्तिनां उपलक्षणत्वादन्येऽपि त्रसजीवावयवा दन्तग्रहणेन गृह्यन्ते। तदेवाह—केशाश्चमर्यादीनां, नखा घूकादीनां, अस्थीनि शङ्खादीनां, त्वक् चित्रकादीनां, रोमाणि हंसादीनां, तेषां ग्रहणं मूल्यादिना स्वीकारः, रोम्ण इत्येकवचनं प्राण्यङ्गत्वात्। आकरे तदुत्पत्तिस्थाने, त्रसाङ्गस्य त्रसजीवावयवस्य, वणिज्यार्थं वाणिज्यनिमित्तं; आकरे हि दन्तादिग्रहणाय पुलिन्दानां यदा द्रव्यं ददाति तदा तत्प्रतिक्रयार्थं हस्त्यादिवधं ते कुर्वन्ति,

आकरग्रहणं चानाकरे दन्तादेर्ग्रहणे विक्रये च न दोष
ज्ञापनार्थम् ॥ १०७ ॥

अथ लाक्षावाणिज्यमाह—

लाक्षामनःशिलानीलीधातकीटङ्कणादिनः ।
विक्रयः पापसदनं लाक्षावाणिज्यमुच्यते ॥ १०८

लाक्षा जतु अत्रापि लाक्षाग्रहणमुपलक्षणमन्येषां सावद्यानां म
शिलादीनाम् । तान्येवाह—मनःशिला कुनटी, नीली गुलि
धातकी वृक्षविशेषः तस्याः त्वक् पुष्पं च मद्यगन्धात्
धातकी, टङ्कणः क्षारविशेषः ; आदिशब्दात् संकुटादयो गृ
तेषां विक्रयः । स च पापसदनं टङ्कणमनःशिलयोर्बाह्यजीवघा
तेन, नील्या जन्तुघाताविनाभावेन, धातक्या मद्यहेतुत्वेन
लाक्षायाश्च कृमिहेतुत्वेन पापसदनत्वं तत्परिहर्तव्यमि
सदनत्वम् । तदेतल्लाक्षावाणिज्यमुच्यते ॥ १०८ ॥

अथ रसकेशवाणिज्ये एकेनैव आह—

नवनीतवसाक्षौद्रमद्यप्रभृतिविक्रयः ।
द्विपाच्चतुष्पाद्विक्रयो वाणिज्यं रसकेशयोः ॥

[illegible]
[illegible]
[illegible]
[illegible]

निवृत्तो दन्तवाणिज्यमिति निर्देशः । रसकेशयोरिति यथा-संख्येन योगः । दोषाश्च मद्यादौ जन्तुसंमूर्च्छनं, वसादौ [illegible]-[illegible], मधुनः मदनजननं [illegible] ; [illegible] तु तेषां पारवश्यं वधबन्धादयः [illegible]-[illegible] इति ॥ १०९ ॥

अथ विषवाणिज्यमाह —

विषास्त्रहलयन्त्रायोहरितालादिवस्तुनः ।
विक्रयो जीवितघ्नस्य विषवाणिज्यमुच्यते ॥११०॥

विषं शृङ्गिकादि सर्वोपलक्षणं जीवघातहेतूनामस्त्रादीनाम् । [illegible] — अस्त्रं खड्गादि, हलं लाङ्गलं, यन्त्रमरघट्टादि, अयः कुशांकुशकुद्दालादिरूपं, हरितालं धातुविशेषः । आदिशब्दादन्येषामुपविषाणां ग्रहणम् । एवमादिवस्तुनो विक्रयो विषवाणिज्यं विषादिविशेषणं जीवितघ्नस्य अमीषां जीवितघ्नत्वं प्रसिद्धमेव ॥ ११० ॥

अथ यन्त्रपीडाकर्माह —

तिलेक्षुसर्षपैरण्डजलयन्त्रादिपीडनम् ।
दलतैलस्य च कृतिर्यन्त्रपीडा प्रकीर्तिता ॥१११॥

यन्त्रशब्दः प्रत्येकमभिसम्बध्यते । तिलयन्त्रं तिलपीलनोपकरणम्, इक्षुयन्त्रं कोल्हुकादि, सर्षपैरण्डयन्त्रे तत्पीलनोपकरणे, जलयन्त्र-मरघट्टादि, दलतैलं यत्र दलं तिलादि दीयते तैलं च प्रति-

भोगादिना क्रियमाणा अतिचाराः, उपेत्य क्रियमाणास्तु भङ्गा एवेति ॥ ११४ ॥

अथानर्थदण्डविरतिव्रतस्याऽतिचारानाह—

संयुक्ताधिकरणत्वमुपभोगातिरिक्तता ।
मौखर्य्यमथ कौत्कुच्यं कन्दर्पोऽनर्थदण्डगाः ॥११५॥

अनर्थदण्डगा इत्यनर्थदण्डविरतिव्रतगामिन एते पञ्चातिचाराः। तद्यथा—अधिक्रियते दुर्गतावात्माऽनेनेत्यधिकरणमुदूखलादिसंयुक्तम्, उदूखलेन मुशलं, हलेन फालः, शकटेन युगं, धनुषा शराः, एवमेकमधिकरणमधिकरणान्तरेण संयुक्तं संयुक्ताऽधिकरणं तस्य भावस्तत्त्वम्। इह च श्रावकेण संयुक्तमधिकरणं न धारणीयम्। तथा सति हि यः कश्चित् संयुक्तमधिकरणमाददीत, वियुक्ताधिकरणतायां तु सुखेन परः प्रतिषेधयितुं शक्यते। एतच्च हिंस्रप्रदानरूपस्यानर्थदण्डस्यातिचारः १। तथा उपभोगस्योपलक्षणत्वाद्भोगस्य चोक्तनिर्वचनस्य यदतिरिक्तत्वमतिरेकः सा उपभोगातिरिक्तता। अयं प्रमादाचरितस्याऽतिचारः। इह च स्नानपानभोजनचन्दनकुङ्कुमकस्तूरिकावस्त्राभरणादीनामतिरिक्तानामारम्भोऽनर्थदण्डः। अत्राऽपि वृद्धसम्प्रदायः—अतिरिक्तानि बहूनि तैलामलकानि यदि गृह्णाति, तदा तल्लौल्येन बहवः स्नानार्थं तडागादौ व्रजन्ति, ततश्च पूतरकाप्कायादिवधोऽधिकः स्यात्; न चैवं कल्पते, ततः को विधिः? तत्र स्नानेच्छुना तावद्गृह एव स्नातव्यम्, तदभावे तु आमलकैर्गृह एव शिरो घर्षयित्वा तानि सर्वाणि शाटयित्वा

कायस्य वाचो मनसश्च प्रणिहितिः प्रणिधानम्, दुष्टं च तत्प्रणिधानं दुष्टप्रणिधानं सावद्ये प्रवर्तनं कायदुष्प्रणिधानं, वाग्दुष्प्रणिधानं, मनोदुष्प्रणिधानं चेत्यर्थः। तत्र शरीरावयवानां पाणिपादादीनामनिभृतताऽवस्थापनं कायदुष्प्रणिधानम्, वर्णसंस्काराभावोऽर्थानवगमश्चापलं च वाग्दुष्प्रणिधानम्, क्रोधलोभद्रोहाऽभिमानेर्ष्यादयः कार्यव्यासङ्गसम्भ्रमश्च मनोदुष्प्रणिधानम्; एते त्रयोऽतिचाराः।

यदाहुः—

[1]अनिरिक्खियापमज्जियथण्डिले ठाणमाइ सेवन्तो।
हिंसाभावे वि न सो कडसामाइओ पमायाउ ॥ १ ॥
कडसामाइउ पुव्विं बुद्धीए पेहिऊण भासिज्जा।
मइ निरवज्जं वयणं अन्नह सामाइयं न हवे ॥ २ ॥
सामाइयं तु काउं घरचिन्तं जो उ चिन्तए अट्टो।
अट्टवसट्टोवगओ निरत्थयं तस्स सामाइयं ॥ ३ ॥

तथाऽनादरोऽनुत्साहः प्रतिनियतवेलायां सामायिकस्याकरणम्,

---

१. अनिरीक्षिताऽप्रमार्जितस्थण्डिले स्थानादि सेवमानः।
हिंसाभावेऽपि न स कृतसामायिकः प्रमादात् ॥ १ ॥
कृतसामायिकः पूर्वं बुद्ध्या प्रेक्ष्य भाषेत।
सदा निरवद्यं वचनमन्यथा सामायिकं न भवेत् ॥ २ ॥
सामायिकं तु कृत्वा गृहचिन्तां यस्तु चिन्तयेत् आर्त्तः।
आर्त्तवशार्त्तोपगतो निरर्थकं तस्य सामायिकम् ॥ ३ ॥

यथा कथञ्चिद्वा करणम्, प्रबलप्रमादादिदोषात् करणानन्तरमेव पारणं च।

यदाहुः—

[1]काऊण तक्खणं चिय पारेइ करेइ वा जहिच्छाए।

अणवट्ठियसामाइयं अणायराओ न तं सुद्धं॥१॥

इति चतुर्थः॥४॥ स्मृतौ स्मरणे सामायिकस्याऽनुपस्थापनं स्मृत्यनुपस्थापनं सामायिकं मया कर्तव्यं न कर्तव्यमिति वा, सामायिकं मया कृतं न कृतमिति वा, प्रबलप्रमादाद्यदा न स्मरति तदा अतिचारः, स्मृतिमूलत्वान्मोक्षसाधनाऽनुष्ठानस्य।

यदाहुः—

[2]न सरइ पमायजुत्तो जो सामाइयं कया य कायव्वं।

कयमकयं वा तस्स हु कयं पि विहलं तयं नेयं॥१॥

ननु कायदुष्प्रणिधानादौ सामायिकस्य निरर्थकत्वादिप्रतिपादने— न वस्तुतोऽभाव एवोक्तः, अतिचारश्च मालिन्यरूप एव भवतीति कथं समायिकाभावे स भवेत्?, अतो भङ्गा एवैते नातिचारा इति चेत्। उच्यते। अनाभोगतोऽतिचारत्वम्। ननु द्विविधं त्रिविधेन सावद्यप्रत्याख्यानं सामायिकं, तत्र च कायदुष्प्रणिधानादौ प्रत्याख्यानभङ्गात् सामायिकाभाव एव, तद्भङ्गजनितं च प्रायश्चित्तं

---

(१) कृत्वा तत्क्षणमेव पारयति करोति वा यथेच्छम्।
अनवस्थितसामायिकमनादरात् न तत् शुद्धम्॥१॥

(२) न स्मरति प्रमादयुक्तो यः सामायिकं कदा च कर्तव्यम्।
कृतमकृतं वा तस्य खलु कृतमपि विफलं तज्ज्ञेयम्॥१॥

कायस्य वाचो मनसश्च प्रणिहितिः प्रणिधानम्, दुष्टं च तत्प्रणिधानं दुष्टप्रणिधानं सावद्ये प्रवर्तनं कायदुष्प्रणिधानं, वाग्दुष्प्रणिधानं, मनोदुष्प्रणिधानं चेत्यर्थः। तत्र शरीरावयवानां पाणिपादादीनामनिभृतताऽवस्थापनं कायदुष्प्रणिधानम्, वर्णसंस्काराभावोऽर्थानवगमश्चापलं च वाग्दुष्प्रणिधानम्, क्रोधलोभद्रोहाऽभिमानेर्ष्यादयः कार्यव्यासङ्गसम्भ्रमश्च मनोदुष्प्रणिधानम्; एते त्रयोऽतिचाराः।

यदाहुः—

'अनिरिक्खियापमज्जियथण्डिल्ले ठाणमाइ सेवन्तो।
हिंसाभावे वि न सो कडसामाइओ पमायाउ ॥ १ ॥
कडसामाइउ पुव्विं बुद्धीए पेहिऊण भासिज्जा।
सइ निरवज्जं वयणं अन्नह सामाइयं न हवे ॥ २ ॥
सामाइयं तु काउं घरचिन्तं जो उ चिन्तए सड्ढो।
अट्टवसट्टोवगओ निरत्थयं तस्स सामाइयं ॥ २ ॥

तथाऽनादरोऽनुत्साहः प्रतिनियतवेलायां सामायिकस्याकरणम्,

(१) अनिरीक्षिताऽप्रमार्जितस्थण्डिले स्थानादि सेवमानः।
हिंसाभावेऽपि न स कृतसामायिकः प्रमादात् ॥ १ ॥
कृतसामायिकः पूर्वं बुद्ध्या प्रेक्ष्य भाषेत।
सदा निरवद्यं वचनमन्यथा सामायिकं न भवेत् ॥ २ ॥
सामायिकं तु कृत्वा गृहचिन्तां यस्तु चिन्तयेत् श्राद्धः।
आर्तवशार्तोपगतो निरर्थकं तस्य सामायिकम् ॥ २ ॥

यथा कथञ्चिद्वा करणम्, प्रबलप्रमादादिदोषात् करणानन्तरमेव पारणं च ।

यदाहुः —

'काऊण तक्खणं चिय पारेइ करेइ वा जहिच्छाए ।

अणवट्ठियसामाइयं अणायराओ न तं सुद्धं ॥ १ ॥

इति चतुर्थः ॥ ४ ॥ स्मृतौ स्मरणे सामायिकस्याऽनुपस्थापनं स्मृत्यनुपस्थापनं सामायिकं मया कर्तव्यं न कर्तव्यमिति वा, सामायिकं मया कृतं न कृतमिति वा, प्रबलप्रमादाद्यदा न स्मरति तदा अतिचारः, स्मृतिमूलत्वान्मोक्षसाधनाऽनुष्ठानस्य ।

यदाहुः —

²न सरइ पमायजुत्तो जो सामाइयं कया य कायव्वं ।

कयमकयं वा तस्स हु कयं पि विहलं तयं नेयं ॥ १ ॥

ननु कायदुष्प्रणिधानादौ सामायिकस्य निरर्थकत्वादिप्रतिपादने— न वस्तुतोऽभाव एवोक्तः, अतिचारस्य मालिन्यरूप एव भवतीति कथं समायिकाभावे स भवेत् ?, अतो भङ्गा एवैते नातिचारा इति चेत् । उच्यते । अनाभोगतोऽतिचारत्वम् । ननु द्विविधं त्रिविधेन सावद्यप्रत्याख्यानं सामायिकं, तत्र च कायदुष्प्रणिधानादौ प्रत्याख्यानभङ्गात् सामायिकाभाव एव, तद्भङ्गजनितं च प्रायश्चित्तं

---

(१) कृत्वा तत्क्षणमेव पारयति करोति वा यथेच्छम् ।
अनवस्थितसामायिकमनादरात् न तत् शुद्धम् ॥ १ ॥

(२) न स्मरति प्रमादयुक्तो यः सामायिकं कदा च कर्तव्यम् ।
कृतमकृतं वा तस्य खलु कृतमपि विफलं तज्ज्ञेयम् ॥ १ ॥

प्रवीए' इति वचनप्रामाण्यादित्याहुः । नायमेकान्तो वचनान्तरस्याऽपि श्रवणात् । व्यवहारभाष्येऽप्युक्तम्—

'राजसुयाई पञ्च वि पोसहसालाइ संमिलिआ ।

इत्यलं प्रसङ्गेन ॥ ११६ ॥

एते पञ्चातिचाराः सामायिकव्रते उक्ताः, इदानीं देशावकाशिकव्रतातिचारानाह—

प्रेष्यप्रयोगानयने पुद्गलक्षेपणं तथा ।
शब्दरूपाऽनुपातौ च व्रते देशावकाशिके ॥ ११७ ॥

दिग्व्रतविशेष एव देशावकाशिकव्रतम्, इयांस्तु विशेषः—दिग्व्रतं यावज्जीवं संवत्सरचतुर्मासीपरिमाणं वा, देशावकाशिकं तु दिवसप्रहरमुहूर्तादिपरिमाणम् । तस्य च पञ्चातिचाराः । तद्यथा—प्रेष्यस्याऽऽदेश्यस्य प्रयोगो विवक्षितक्षेत्राद्बहिष्प्रयोजनाय व्यापारणम्, स्वयं गमने हि व्रतभङ्गः स्यादिति प्रेष्यप्रयोगः । देशावकाशिकव्रतं हि मा भूद् गमनागमनादिव्यापारजनितप्राण्युपमर्द इत्यभिप्रायेण गृह्यते, स तु स्वयं कृतोऽन्येन कारित इति न कश्चित् फले विशेषः ; प्रत्युत स्वयं गमने ईर्यापथविशुद्धेर्गुणः, परस्य पुनरनिपुणत्वादीर्यासमित्यभावे दोष इति प्रथमोऽतिचारः १ । आनयनं विवक्षितक्षेत्राद् बहिः स्थितस्य सचेतनादिद्रव्यस्य विवक्षितक्षेत्रे प्रापणं सामर्थ्यात् प्रेष्येण ; स्वयं गमने हि व्रतभङ्गः स्यात्, परेण तु आनयने न व्रतभङ्गः स्यादिति

(१) राजसुतादयः पञ्चाऽपि पोषधशालायां संमिलिताः ।

संक्षेपकरणं देशावकाशिकव्रतम्?। अत्रोच्यते। प्राणातिपातादिविरमणव्रतान्तरसंक्षेपकरणेषु वधबन्धादय एवातिचाराः, दिग्व्रतसंक्षेपकरणे तु संक्षिप्तत्वात् क्षेत्रस्य, प्रेष्यप्रयोगादयोऽतिचाराः। भिन्नातिचारसम्भवाच्च दिग्व्रतसंक्षेपकरणस्यैव देशावकाशिकत्वं साक्षादुक्तमिति ॥ ११७ ॥

अथ पौषधव्रतस्यातिचारानाह—

उत्सर्गादानसंस्तारानवेक्ष्याप्रमृज्य च।
अनादरः स्मृत्यनुपस्थापनं चेति पौषधे ॥ ११८ ॥

उत्सर्जनमुत्सर्गस्त्याग उच्चारप्रस्रवणखेलसिंघाणकादीनामवेक्ष्य प्रमृज्य च स्थण्डिलादौ उत्सर्गः कार्यः। अवेक्षणं चक्षुषा निरीक्षणम्। प्रमार्जनं वस्त्रप्रान्तादिना स्थण्डिलादेरेव विशुद्धीकरणम्। अथानवेक्ष्याप्रमृज्य चोत्सर्गं करोति तदा पौषधव्रतमतिचरतीति प्रथमोऽतिचारः १। आदानं ग्रहणं यष्टिपीठफलकादीनाम्, तदप्यवेक्ष्य प्रमृज्य च कार्यम्, अनवेक्षितस्याप्रमार्जितस्य चादानमतिचारः। आदानग्रहणेन निक्षेपोऽप्युपलक्ष्यते यष्ट्यादीनाम्, तेन सोऽप्यवेक्ष्य प्रमार्ज्य च कार्य्यः; अनवेक्ष्याप्रमृज्य च निक्षेपोऽतिचार इति द्वितीयः २। तथा संस्तीर्यते यः प्रतिपन्नपौषधव्रतेन दर्भकुशकम्बलिवस्त्रादिः स संस्तारः, स चावेक्ष्य प्रमार्ज्य च कर्तव्यः, अनवेक्ष्याप्रमार्ज्य च करणेऽतिचारः। इह चानवेक्षणेन दुरवेक्षणम्, अप्रमार्जनेन दुष्प्रमार्जनं संगृह्यते, नञः कुत्सार्थस्यापि दर्शनात्, यथा कुत्सितो ब्राह्मणोऽब्राह्मणः।

यत् सूत्रम्—'अप्पडिलेहिअदुप्पडिलेहिअसिज्जासंथा
अप्पमज्जिअदुप्पमज्जिअसिज्जासंथारए, अप्पडिलेहिअदुप्पडिलेहि
उच्चारपासवणभूमीए, अप्पमज्जिअदुप्पमज्जिअउच्चारपासवणभूमि

इति तृतीयः ३। तथा अनादरः पोषधव्रतप्रतिपत्तिकर्त
तायामिति चतुर्थः ४। तथा स्मृत्यनुपस्थापनं तद्विषयमेवे
पञ्चमः, पोषधे सर्वतः पोषधे, देशतः पोषधे तु न
विधिः ५॥ ११८॥

अथातिथिसंविभागव्रतस्यातिचारानाह—

सचित्ते क्षेपणं तेन पिधानं काललङ्घनम्।
मत्सरोऽन्यापदेशश्च तुर्यशिक्षाव्रते स्मृताः॥११९॥

सचित्ते सजीवे पृथ्वीजलकुम्भोपचुल्लीधान्यादौ, क्षेपणं निक्षेपे
देयस्य वस्तुनः, तच्च अदानबुद्ध्या निक्षिपति, एतज्ज्ञानात्यसौ
तुच्छबुद्धिः यत् सचित्तनिक्षिप्तं न गृह्णते साधव इत्यतो देयं
चोपस्थाप्यते न चाददते साधव इति लाभोऽयं ममेति प्रथमो-
ऽतिचारः १। तथा तेन सचित्तेन सूरणकन्दपत्रपुष्पफलादिना
तथाविधयैव बुद्ध्या पिधत्ते, इति द्वितीयः २। तथा कालस्य
साधूनामुचितभिक्षासमयस्य लङ्घनमतिक्रमः, अयमर्थः – उचितो
या भिक्षाकालः साधूनां तं लङ्घयित्वा, अनागतं वा भुङ्क्ते

(१ अप्रतिलेखितदुष्प्रतिलेखितशय्यासंस्तारके, अप्रमार्जितदुष्प्रमार्जितशय्यासंस्तारके, अप्रतिलेखितदुष्प्रतिलेखितोच्चारप्रस्रवणभूमौ, अप्रमार्जितदुष्प्रमार्जितोच्चारप्रस्रवणभूमौ।

पोपधनतो। इति तृतीयः ३। तथा मत्सरः कोपः यथा मार्गितः सन् कुप्यति, सदपि मार्गितं न ददाति। अथवाऽनेन तावद् द्रमकेण मार्गितेन दत्तम्, किमहं ततोऽपि हीन इति मात्सर्याद्ददाति; अत्र परोन्नतिवैमनस्यं मात्सर्यम्, यदुक्त-मस्माभिरेवाऽनेकार्थसंग्रहे—मत्सरः परसम्पत्त्यक्षमायां तद्वति क्रुधि। इति चतुर्थः ४। तथा अन्यस्य परस्य सम्बन्धीदं गुड-खण्डादीति व्यपदेशो व्याजोऽन्यापदेशः, यदनेकार्थसंग्रहे—अपदेशस्तु कारणे व्याजे लक्ष्येऽपि। इति पञ्चमः ५। एते पञ्चातिचारास्तुर्यशिक्षाव्रते अतिथिसंविभागनाम्नि स्मृताः। अति-चारभावना पुनरियम्—यदा अनाभोगादिना अतिचरन्ति तदा अतिचाराः, अन्यथा तु भङ्गाः; इत्यवसितानि सम्यक्त्वमूलानि द्वादशव्रतानि, तदतिचाराश्चाभिहिताः॥ ११९॥

इदानीमुक्तशेषं निर्दिशन् श्रावकस्य महाश्रावकत्वमाह—

एवं व्रतस्थितो भक्त्या सप्तक्षेत्र्यां धनं वपन्।
दयया चातिदीनेषु महाश्रावक उच्यते॥ १२०॥

एवं पूर्वोक्तप्रकारेण सम्यक्त्वमूलेष्वतिचारविशुद्धेषु द्वादशसु व्रतेषु स्थितो निश्चलचित्तत्वेन निलीनः, सप्तानां क्षेत्राणां समा-हारः सप्तक्षेत्री जैनबिम्बभवनागमसाधुसाध्वीश्रावकश्राविकालक्षणा तस्यां, न्यायोपात्तं धनं वपन् निक्षिपन्; क्षेत्रे हि बीजस्य वपन-मुचितमित्युक्तं वपन्निति, वपनमपि क्षेत्रे उचितं नाऽक्षेत्रे इति सप्तक्षेत्र्यामित्युक्तम्। क्षेत्रत्वं च सप्तानां रूढमेव। वपनं च

समचेत्रयां यथोचितस्य द्रव्यस्य भक्त्या श्रद्धया, तथाहि—जिनबिम्बस्य तावद्विशिष्टलक्षणलक्षितस्य प्रसादनीयस्य वज्रेन्द्रनीलाञ्जनचन्द्रकान्तसूर्यकान्तरिष्टाङ्ककर्केतनविद्रुमसुवर्णरूप्यचन्दनोपलमृदादिभिः सारद्रव्यैर्विधापनम् ।

यदाह —

सन्मृत्तिकामलशिलातलरूप्यदारु-
सौवर्णरत्नमणिचन्दनचारुबिम्बम् ।
कुर्वन्ति जैनमिह ये स्वधनानुरूपं
ते प्राप्नुवन्ति नृसुरेषु महासुखानि ॥ १ ॥

तथाहि —

'पासाइया पडिमा लक्खणजुत्ता समत्तलङ्करणा ।
जह पल्हाएइ मणं तह निज्जरमो वियाणाहि ॥ १ ॥

तथा निर्मितस्य जिनबिम्बस्य शास्त्रोक्तविधिना प्रतिष्ठापनम्, अष्टाभिश्च प्रकारैरभ्यर्चनं, यात्राविधानं, विशिष्टाभरणभूषणं, विचित्रवस्त्रैः परिधापनमिति जिनबिम्बे धनवपनम् ।

यदाह —

[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]

ननु जिनबिम्बानां पूजादिकरणे न कश्चिदुपयोगः, न हि पूजादिभिस्तानि रुष्यन्ति तुष्यन्ति वा, न चातुष्टरुष्टाभ्यो देवताभ्यः फलमाप्यते । नैवम् । चिन्तामण्यादिभ्य इवाऽरुष्ट-तुष्टेभ्योऽपि फलप्राप्त्यविरोधात् ।

यदुक्तं वीतरागस्तोत्रेऽस्माभिः —

अप्रसन्नात् कथं प्राप्यं फलमेतदसङ्गतम् ? ।
चिन्तामण्यादयः किं न फलन्त्यपि विचेतनाः ॥ १ ॥

तथा —

'उवगाराभावम्मि वि पुज्जाणं पूयगस्स उवगारो ।
मन्ताइसरणजलणाइसेवणे जह तहेहं पि ॥ १ ॥

एष तावत् स्वकारितानां बिम्बानां पूजादिविधिरुक्तः, अन्यकारितानामपि । अकारितानां च शाश्वतप्रतिमानां यथार्हं पूजनार्चनादिविधिरनुष्ठेयः । त्रिविधा हि जिनप्रतिमाः—भक्तिकारिताः स्वयं परेण वा चैत्येषु कारिताः, या इदानीमपि मनुष्यादिभिर्विधाप्यन्ते ; मङ्गल्यकारिता या गृहेषु द्वारपत्रेषु मङ्गलाय कार्यन्ते, शाश्वतास्तु अकारिता एव अधस्तिर्यगूर्ध्वलोकावस्थितेषु जिनभवनेषु वर्तन्त इति । न हि लोकत्रयेऽपि तत्स्थानमस्ति यत्र पारमेश्वरीभिः प्रतिमाभिः पवित्रितमिति । जिनप्रतिमानां च वीतरागस्वरूपाध्यारोपेण पूजादिविधिरुचित इति । जिनभवनक्षेत्रे स्वधनवपनं यथा—शल्यादिरहितभूमौ स्वयंसिद्धस्योपलकाष्ठादि-

(१) उपकाराभावेऽपि पूज्यानां पूजकस्योपकारः ।
मन्त्रादिस्मरणज्वलनादिसेवने यथा तथेहापि ॥ १ ॥

किं पुनरुपचितदृढघनशिलासमुद्घातघटितजिनभवनम्।
ये कारयन्ति शुभमतिविमानिनस्ते महाधन्याः ॥ २ ॥

राजादीन् विधापयितुः प्रचुरतरभाण्डागारग्रामनगरमण्डलगोकुलादिप्रदानं जिनभवनक्षेत्रे वपनम्, तथा जीर्णशीर्णानां चैत्यानां समारचनम्, नष्टभ्रष्टानां समुद्धरणं चेति। ननु निरवद्यजिनधर्मसमाचरणचतुराणां जिनभवनबिम्बपूजादिकारणमनुचितमिव प्रतिभासते षड्जीवनिकायविराधनाहेतुत्वात्तस्य, भूमीखननदलपाटकानयनगर्तापूरणेष्टकाचयनजलप्लावनवनस्पतित्रसकायविराधनासम्भवेन न हि तद्भवति। उच्यते। य आरम्भपरिग्रहप्रसक्तः कुटुम्बपरिपालननिमित्तं धनोपार्जनं करोति, तस्य धनोपार्जनं विफलं मा भूदिति जिनभवनादौ धनव्ययः श्रेयानेव। न च धर्मार्थं धनोपार्जनं युक्तम्।

यतः—

धर्मार्थं यस्य वित्तेहा तस्यानीहा गरीयसी।
प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ॥ १ ॥

इत्युक्तमेव। न च वापीकूपतडागादिखननवदशुभोदर्कं जिनभवनादिकरणम्, अपि तु सङ्घसमागमधर्मदेशनाकरणव्रतप्रतिपत्त्यादिकारणेन शुभोदर्कमेव। षड्जीवनिकायविराधना च यतनाकारिणामगारिणां कृपापरवशत्वेन सूक्ष्मानपि जन्तून् रक्षयतामविराधनैव।

यदाहुः—

[1]जा जयमाणस्स भवे विराहणा सुत्तविहिसमग्गस्स ।
सा होइ निज्जरफला अब्भत्थविसोहिजुत्तस्स ॥ १ ॥
[2]परमरहस्समिसीणं समत्तगणिपिडगझरिअसाराणं ।
परिणामिअं पमाणं निच्छयमवलम्बमाणाणं ॥ २ ॥

यस्तु निजकुटुम्बार्थमपि नारम्भं करोति प्रतिमाप्रतिपन्नादिः, तस्य मा भूज्जिनबिम्बादिविधापनमपि ।

यदाहुः—

[3]देहाइनिमित्तं पि हु जे कायवहम्मि इह पयट्टन्ति ।
जिणपूआकायवहम्मि तेसिमपवत्तणं मोहो ॥ १ ॥

इत्यलं प्रसङ्गेन । जिनागमक्षेत्रे च स्वधनवपनं यथा—जिनागमो हि कुशास्त्रजनितसंस्कारविषसमुच्छेदनमहामन्त्रायमाणो धर्माधर्मकृत्याकृत्यभक्ष्याभक्ष्यपेयापेयगम्यागम्यसारासारादिविवेचनहेतुः संतमसे दीप इव, समुद्रे द्वीपमिव, मरौ कल्पतरुरिव, संसारे दुरापः । जिनादयोऽप्येतत्प्रामाण्यादेव निर्णीयन्ते । यदवोचाम स्तुतिषु—

यदीयसम्यक्त्वबलात् प्रतीमो भवादृशानां परमात्मभावम् ।
कुवासनापाशविनाशनाय नमोऽस्तु तस्मै तव शासनाय ॥१॥

---

(१) या यतमानस्य भवेद् विराधना सूत्रविधिसमग्रस्य ।
सा भवति निर्जरफलाऽध्यात्मविशोधियुक्तस्य ॥ १ ॥

(२) परमरहस्यमृषीणां समस्तगणिपिटकभृतसाराणाम् ।
परिणामिकं प्रमाणं निश्चयमवलम्बमानानाम् ॥ २ ॥

(३) देहादिनिमित्तमपि खलु ये कायवधे इह प्रवर्तन्ते ।
जिनपूजाकायवधे तेषामप्रवर्तनं मोहः ॥ १ ॥

जिनागमबहुमानिना च देवगुरुधर्मादयोऽपि बहुमता भवन्ति । किं च केवलज्ञानादपि जिनागम एव प्रामाण्येनाऽतिरिच्यते ।

यदाहुः—

[1]ओहे सुओवउत्तो सुयनाणी जइ हु गिह्णइ असुद्धं ।

तं केवली वि भुञ्जइ अपमाणं सुअं भवे इहरा ॥ १ ॥

एकमपि जिनागमवचनं भविनां भवनाशहेतुः ।

यदाहुः—

एकमपि च जिनवचनाद्यस्मान्निर्वाहकं पदं भवति ।

श्रूयन्ते चानन्ताः सामायिकमात्रपदसिद्धाः ॥ १ ॥ इति ॥

यद्यपि च मिथ्यादृष्टिभ्य आतुरेभ्य इव पथ्यान्नं न रोचते जिनवचनम्, तथापि नान्यत् स्वर्गापवर्गमार्गप्रकाशनसमर्थम्; इति सम्यग्दृष्टिभिस्तदादरेण श्रद्धातव्यम्, यतः कल्याणभाजिन एव जिनवचनं भावतो भावयन्ति । इतरेषां तु कर्णशूलकारित्वेनामृतमपि विषायते । यदि चेदं जिनवचनं नाभविष्यत्, तदा धर्माऽधर्मव्यवस्थाशून्यं भवान्धकूपे भुवनमपतिष्यत् । यथा च हरीतकीं भक्षयेद् विरेककामः इति वचनाद्धरीतकीभक्षणप्रभवविरेकलक्षणेन प्रत्ययेन सकलस्याऽप्यायुर्वेदस्य प्रामाण्यमवनीयते, तथा अष्टाङ्गनिमित्तकेवलिकाचन्द्रार्कग्रहचारधातुवादरसरसायनादिभिरप्यागमोपदिष्टैर्दृष्टार्थवाक्यानां प्रामाण्यनिश्चयेनाऽदृष्टार्थानामपि

(१) ओघे श्रुतोपयुक्तः श्रुतज्ञानी यदि खलु गृह्णात्यशुद्धम् ।
तद् केवल्यपि भुङ्क्तेऽप्रमाणं श्रुतं भवेदितरथा ॥ १ ॥

संत्यज्य राज्यलक्ष्मीं पतिपुत्रभ्रातृबन्धुसम्बन्धम्।

पारिव्राज्यवहायाः किमसत्त्वं सत्यभामादेः ? ॥ ३ ॥

ननु महापापेन मिथ्यात्वसहायेन स्त्रीत्वमर्ज्यते; न हि सम्यग्दृष्टिः स्त्रीत्वं कदाचिद् बध्नाति इति कथं स्त्रीशरीरवर्तिन आत्मनो मुक्तिः स्यात्?। मैवं वोचः, सम्यक्त्वप्रतिपत्तिकाल एवाऽन्तःकोटीकोटिस्थितिकानां सर्वकर्मणां भावेन मिथ्यात्वमोहनीयादीनां क्षयादिसम्भवान्मिथ्यात्वसहितपापकर्मसम्भवत्वमकारणम्, मोक्षकारणवैकल्यं तु तासु वक्तुमुचितम्। तच्च नास्ति।

यतः—

जानीते जिनवचनं श्रद्धत्ते चरति चाऽऽर्यिका शबलम्।

नाऽस्यास्त्यसम्भवोऽस्यां नादृष्टविरोधगतिरस्ति ॥१॥ इति।

तत्सिद्धमेतन्मुक्तिसाधनधनासु साध्वीषु साधुवद् धनवपनमुचितमिति। एतच्चाधिकं यत् साध्वीनां दुःशीलेभ्यो नास्तिकेभ्यो गोपनम्, स्वगृहप्रत्यासत्तौ च समन्ततो गुप्ताया गुप्तद्वाराया वसतेर्दानम्, स्वस्त्रीभिश्च तासां परिचर्याविधापनम्, स्वपुत्रिकाणां च तत्सन्निधौ धारणम्, व्रतोद्यतानां स्वपुत्र्यादीनां प्रदानं च, तथा विस्मृतकरणीयानां तत्स्मारणम्, अन्यायप्रवृत्तिप्रवृत्तौ तन्निवारणम्, सकृदन्यायप्रवृत्तौ शिक्षणम्, पुनः पुनः प्रवृत्तौ निष्ठुरभाषणादिना ताडनम्, उचितेन वस्त्रादिना [illegible]।

[illegible] स्वधनवपनं यथा — साधर्मिकाः [illegible] श्रावका [illegible]

Conquest of Syria, Fasc. 1-9 @ /10/ each ... ... Rs. 5
Catalogue of Arabic Books and Manuscripts, 1-2 @ 1/- each ... 2
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1-3 @ 1/ each 3
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/8/ each 31
Farhang-i-Rashīdī, Fasc. 1-14 @ 1/8/ each 21
Fihrist-i-Ṭūsī. or, Ṭūsy's list of Shy'ah Books, Fasc. 1-4 @ 1/- each ... 4
Futūḥ-ush-Shām of Wāqidī, Fasc. 1-9 @ /10/ each 5
Ditto of Āzādī, Fasc. 1-4 @ /10/ each 2
History of Gujarat 1
Haft Asmān, History of the Persian Masnawī, Fasc. 1 @ /12/ each ... 0
History of the Caliphs, (English) Fasc. 1-6 @ 1/4/ each 7
Iqbālnāmah-i-Jahāngīrī, Fasc. 1-3 @ /10/ each 1
Iṣābah, with Supplement, 51 Fasc. @ 1/- each 51
Ma'āṣir-i-'Ālamgīrī, Fasc. 1-6 @ /10/ each 3
Maāṣir-ul-Umarā, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. II, Fasc. 10-12; Index to Vol. III, Fasc. 11-12 @ /1/ each 35
Maaseri Rabinsi, Part 1, Fasc. 1... 2
Maghāzī of Wāqidī, Fasc. 1-5 @ /10/ each 3
Muntakhabu-t-Tawārīkh, Fasc. 1-15 @ /10/ each 9
Ditto (English) Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5 and 3 Indexes; Vol. III. Fasc 1 @ 1/ each 16
Muntakhabu-l-Lubāb, Fasc. 1-19 @ /10/ each 11
Nukhbatu-l-Fikr, Fasc. 1 @ /10/ 0
Niẓāmī's Khiradnāmah-i-Iskandarī, Fasc 1-2 @ /12/ each 1
Qawaninu 's-Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut. Col. D. C. Phillott 5
Riyāzu-s-Salāṭīn, Fasc 1-5 @ /10/ each 3
Ditto (English) Fasc. 1-5 @ 1/ 5
Ṭabaqāt-i-Nāṣirī, (English), Fasc. 1-14 @ 1/- each 14
Ditto Index 1
Tārīkh-i-Fīrūz Shāhī of Ẓiyāu-d-dīn Barnī Fasc. 1-7 @ /10/ each ... 4
Tārīkh-i-Fīrūzshāhī, of Shams-i-Sirāj Aif. Fasc. 1-6 @ /10/ each ... 3
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each 3
Tuzuk-i-Jahāngīrī, (Eng) Fasc. 1 @ 1/ 1
Wīs-o-Rāmīn, Fasc. 1-5 @ /10/ each 3
Zafarnāmah, Vol. I, Fasc. 1-9, Vol. II, Fasc 1-8 @ /10/ each 10

ASIATIC SOCIETY'S PUBLICATIONS.

1. Asiatic Researches. Vols. XIX and XX @ 10/ each 20
2. Proceedings of the Asiatic Society from 1870 to 1904 @ /8/ per No.
3. Journal of the Asiatic Society for 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (8), 1904 (16), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members

N. B.—The figures enclosed in brakets give the number of Nos in each Volume.

4. Journal and Proceedings, N. S., 1905, to date, (Nos. 1-4 of 1905 are out of stock), @ 1-8 per No. to Members and Rs. 2 per No. to Non-Members.
5. Materials for Flora of the Malayan Peninsula, by Sir Geo. King. and J. S. Gamble (Extra No J. A. S. B Vol II, & fasc. 1) ... 4
Do Do (Extra No J. A. S. B. Vol. II & Fasc. 2.) ... 3
A Grammar and Dictionary of Kanawari, the Language of Kanawar in the [illegible], Punjab [illegible] by Pandit Tika Ram Joshi, and edited by H. [illegible] Rose (Ex. No. J[illegible] Vol 5. 1909) ... 3
An Introduction to the Maithili Dialect of the Bihari Language as spoken in North Bihar by Dr G. A. Grierson Second Edition, Part I, Grammar (Ex. No. J[illegible] Vol 6, 19[illegible]) 5
[illegible] (A Lecture, by Dr Trevor Jenkins). 0
6. M[illegible], 1905, to date. Price varies from number to number. Di[illegible] of 25[illegible] to Members
7. C[illegible] R[illegible] of the R[illegible] of the Society from 1784-1883 ... 3
[illegible] of the Library of the Asiatic Society, Bengal, Part I, A to E; Part 2, F to M. Part 3, N to R ... 4
[illegible] and H[illegible] D[illegible] of New Indian Lepidoptera, Parts I-III [illegible] Plates, [illegible] each 19
[illegible] Parts I & II [illegible] ... 3
[illegible] of Haji [illegible], by Haji Shaikh [illegible] ... 15

BIBLIOTHECA INDICA:

A COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, NO. 1407

योगशास्त्रम् ।

स्वोपज्ञविवरणसहितम् ।



THE YOGAŚASTRA.

With the commentary called

SVOPAJNAVIVARANA.

BY

SRÍ HEMACHANDRĀCHĀRYA.

EDITED BY

ÇĀSTRA VIÇĀRADA JAINĀCĀRYA

ÇRĪ VIJAYA DHARMA SŪRI.

FASCICULUS IV

Calcutta:

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS,
No 5, Nandakumar Chawdhury's 2nd Lane.

AND PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL, 1, PARK STREET.

1916.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 1, PARK STREET, CACUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENT, Mr. BERNARD QUARITCH,
11, GRAFTON STREET, NEW BOND STREET, LONDON, W.,

*Complete copies of those works marked with an asterisk * cannot be supplied.—Some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

	Rs.	As.
Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each ...	1	14
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each ...	14	6
Aitereya Lochana. ...	2	0
Amarkosha, Fasc. 1 ...	2	0
*Aṇu Bhāṣhya, Fasc. 2-5 @ /10/ each ...	2	8
Anumana Didhiti Prasarini, Fasc. 1 @ /10/- ...	1	4
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each ...	3	12
Atmatattaviveka, Fasc. I. ...	0	10
Açvavaidyaka, Fasc. 1-5 @ /10/ each ...	3	2
Avadana Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-10; Vol. II. Fasc. 1-10 @ 1/ each ...	20	0
Bālam Bhaṭṭī, Vol. I, Fasc. 1-2, Vol II, Fasc. 1 @ /10/ each ...	1	14
Baudhāyana S'rauta Sūtra, Fasc. 1-3 Vol. II, Fasc 1-5 @ /10/ each ...	5	0
Bhāsavritty ...	0	10
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-6; Vol. 2, Fasc. 1, @ /10 each ...	4	6
Bauddhastotrasangraha ...	2	0
Bṛhaddēvatā Fasc. 1-4 @ /10/ each ...	2	8
Bṛhaddharma Purāṇa Fasc 1-6 @ /10/ each ...	3	12
Bodhicaryāvatāra of Çantideva, Fasc. 1-6 @ /10/ each ...	3	12
Cri Cantinatha Charita, Fasc. 1-3 ...	1	14
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each ...	1	4
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ...	8	0
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7, Vol II, Fasc. 1-5, Vol. III, Fasc. 1-7 Vol. V, Fasc. 1-4 @ /10/ each ...	14	6
Ditto Vol. VI, Fasc. 1-3 @ 1/4/ each ...	3	[illegible]
Ditto Vol. VII, Fasc. 1-5 @ /10/ ...	3	[illegible]
Ditto Vol. IX, Fasc 1-2 ...	1	4
Çatasāhasrikā Prajñāpāramitā Part, I. Fasc. 1-17 @ /10/ each ...	10	1[illegible]
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1-25; Vol. III. Part I, Fasc. 1-18. Part II, Fasc. 1-10. Vol IV. Fasc 1-6 @ /10/ each ...	36	1[illegible]
Ditto Vol. IV, Fasc. 7-8, @ 1/4/ each ...	2	[illegible]
Ditto Vol. IV, Fasc. 9-10 @ /10/ ...	1	[illegible]
Çlockavartika, (English) Fasc 1-7 @ 1/4/ each ...	8	1[illegible]
*Çrauta Sūtra of Çānkhāyana, Vol I, Fasc. 1-7; Vol II, Fasc 1-4; Vol. III, Fasc. 1-4; Vol 4, Fasc 1 @ /10/ each ...	10	1[illegible]
Çri Bhāshyam, Fasc 1-3 @ /10 each ...	1	[illegible]
Dāna Kriyā Kaumudī, Fasc 1-2 @ /10/ each ...	1	[illegible]
Gadādhara Paddhati Kālasāra Vol. I, Fasc 1-7 @ /10/ each ...	4	[illegible]
Ditto Ācārasārah Vol II, Fasc 1-4 @ /10/ each ...	3	[illegible]
Gobhilya Grihya Sutra, Vol I [illegible] @ /10/ each ...	3	[illegible]
Ditto Vol II. Fasc [illegible] 2 @ 1/4/ each ...	2	[illegible]
Ditto (Appendix) Gobhila Parisista ...	2	[illegible]
Ditto Grihya Sangraha ...	0	[illegible]
Haralata ...	1	[illegible]
Kāmandakīya [illegible], Fasc I ...	1	[illegible]
Kāla Viveka, Fasc 1-7 @ /10/ each ...	1	[illegible]
[illegible], Fasc 1-8 @ /12/ each ...	4	[illegible]
*[illegible] Purāṇa, Fasc 4-9 @ /10/ each ...	4	[illegible]
[illegible], Fasc. 1-2 @ /10/ each ...	5	[illegible]
[illegible], Fasc 1-11 @ /10/ each ...	1	[illegible]
[illegible], Vol I, Fasc 1-9; Vol II, Fasc 1-12 Vol III, Fasc. 1-1[illegible] @ /10/ each ...	6	[illegible]
[illegible]	19	[illegible]
[illegible]	2	[illegible]
[illegible]	1	[illegible]
[illegible]	5	[illegible]
[illegible]	6	[illegible]
[illegible]	2	[illegible]

समानधार्मिकाणां च सङ्गमोऽपि महते पुण्याय, किं पुनस्तदनुरूपा प्रतिपत्तिः ? । सा च स्वपुत्रादिजन्मोत्सवे विवाहेऽन्यस्मिन्नपि तथाविधे प्रकरणे साधर्मिकाणां निमन्त्रणम्, विशिष्टभोजनताम्बूलवस्त्राभरणादिदानम्, आपन्निमग्नानां च स्वधनव्ययेनाऽभ्युद्धरणम्, अन्तरायदोषात् विभवक्षये पुनः पूर्वभूमिकाप्रापणम्, धर्मे च विषीदतां तेन तेन प्रकारेण धर्मे स्थैर्यारोपणम्, प्रमाद्यतां च स्मारणवारणचोदना[1]प्रतिचोदनाऽऽदिकरणम्, वाचनाप्रच्छना[2]परावर्तनाऽनुप्रेक्षाधर्मकथादिषु यथायोग्यं विनियोजनं, विशिष्टधर्मानुष्ठानकरणार्थं च साधारणपौषधशालादेः करणमिति । श्राविकासु धनवपनं श्रावकवदन्यूनातिरिक्तमुन्नेतव्यम् । ताश्च ज्ञानदर्शनचारित्रवत्यः शीलसन्तोषप्रधानाः सधवा विधवा वा जिनशासनानुरक्तमनसः साधर्मिकत्वेन माननीयाः । ननु स्त्रीणां कुतः शीलशालित्वम् ?, कुतो वा रत्नत्रययुक्तत्वम् ?, स्त्रियो हि नाम लोके लोकोत्तरे चाऽनुभवाच्च दोषभाजनत्वेन प्रसिद्धाः । एताः खल्वभूमिजा विषकन्दल्यः, अनभ्रसम्भवा वज्राशनयः, असंज्ञका व्याधयः, अकारणो मृत्युः, अकन्दरा व्याघ्रः, प्रत्यक्षा राक्षस्यः ; असत्यवचनस्य, साहसस्य, बन्धुस्नेहविघातस्य, सन्तापहेतुत्वस्य, निर्विवेकत्वस्य च परमं कारणमिति दूरतः परिहार्याः, तत्कथं दानसंमानवात्सल्यविधानं तासु युक्तियुक्तम् ? । उच्यते । अनेकान्त एषः, यत् स्त्रीणां दोषबहुलत्वमुच्यते, पुरुषेष्वपि हि समानमेतत् । तेऽपि क्रूराशया दोषबहुला नास्तिकाः कृतघ्नाः स्वामिद्रोहिणो देवगुरुवञ्चकाश्च

(१) ह—चोदन- ।   (२) ह—त—परिवर्तना- ।

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 1, PARK STREET, CACUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENT, MR. BERNARD QUARITCH,
11, GRAFTON STREET, NEW BOND STREET, LONDON, W.

*Complete copies of those works marked with an asterisk * cannot be supplied.—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

	Rs.	1	16
Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each			
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each		14	6
Aitereya Lochana.		2	0
Amarkosha, Fasc 1		2	[illegible]
*Aṇu Bhāṣhya, Fasc. 2-5 @ /10/ each		2	[illegible]
Anumana Didhiti Prasarini, Fasc. 1 @ /10/-		1	4
Aṣṭasāhasrikā Prajñāpāramitā, Fasc 1-6 @ /10/ each		3	12
Atmatattaviveka, Fasc. I.		0	10
Açvavaidyaka, Fasc. 1-5 @ /10/ each		3	2
Avadana Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-10; Vol. II. Fasc. 1-10 @ 1/ each		20	0
Bālam Bhaṭṭ. Vol. I, Fasc 1-2, Vol II, Fasc. 1 @ /10/ each		1	14
Baudhāyana S'rauta Sūtra, Fasc 1-3 Vol. II, Fasc 1-5 @ /10/ each ...		5	0
Bhāsavritty		0	12
Bhāṭṭa Dipikā Vol I. Fasc. 1-6: Vol. 2, Fasc. 1, @ /10 each		4	6
Bauddhastotrasangraha		2	0
Bṛhaddēvatā Fasc. 1-4 @ /10/ each		2	8
Bṛhaddharma Purāṇa Fasc 1-6 @ /10/ each		3	12
Bodhicaryāvatāra of Çantideva, Fasc. 1-6 @ /10/ each		3	12
Cri Cantinatha Charita, Fasc. 1-3		1	14
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each		1	4
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each		8	0
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7, Vol II, Fasc. 1-5,. Vol. III, Fasc. 1-7 Vol. V, Fasc. 1-4 @ /10/ each		14	6
Ditto Vol. VI, Fasc. 1-3 @ 1/4/ each		3	[illegible]
Ditto Vol. VII, Fasc. 1-5 @ /10/		3	[illegible]
Ditto Vol. IX. Fasc 1-2		1	[illegible]
Çatasāhasrikā Prajñāpāramitā Part, I. Fasc. 1-17 @ /10/ each		10	10
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1-25; Vol. III. Part I, Fasc. 1-18. Part II, Fasc. 1-10. Vol. IV. Fasc. 1-6 @ /10/ each		36	1
Ditto Vol. IV, Fasc. 7-8, @ 1/4/ each		2	[illegible]
Ditto Vol. IV, Fasc. 9-10 @ /10/		1	[illegible]
Çlockavartika, (English) Fasc 1 7 @ 1/4/ each		8	1
*Çrauta Sūtra of Çānkhāyana, Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-4; Vol. III, Fasc. 1-4; Vol 4, Fasc 1 @ /10/ each		10	1
Çrī Bhāshyam, Fasc 1-3 @ /10/ each		1	[illegible]
Dāna Kriyā Kaumudī, Fasc 1-2 @ /10/ each		1	[illegible]
Gadadhara Paddhati Kāḷasāra Vol 1, Fasc. 1-7 @ /10/ each		4	[illegible]
Ditto Āchārasārah Vol II. Fasc. 1-4 @ /10/ each		3	[illegible]
Gobhiliya Grihya Sutra, Vol 1 @ /10/ each		3	[illegible]
Ditto Vol II. Fasc 1-2 @ 1/4/ each		2	[illegible]
Ditto (Appendix) Gobhila Parisista		2	[illegible]
Ditto Grihya Sangraha		0	[illegible]
Haralata		1	[illegible]
Karmapradiph, Fasc. I		1	[illegible]
Kāla Viveka, Fasc. 1-7 @ /10/ each		4	[illegible]
Kātantra, Fasc 1-6 @ /12/ each		4	[illegible]
*Kūrma Purāṇa, Fasc 3-9 @ /10/ each		4	[illegible]
Kiranavali, Fasc. 1-2 @ /10/ each		1	[illegible]
Madana Pārijāta, Fasc. 1-11 @ /10 each		6	[illegible]
Mahā-bhāṣya-pradipōdyota, Vol I, Fasc 1-9; Vol. II, Fasc. 1-12 Vol. III, Fasc. 1-10 @ /10/ each		19	[illegible]
Ditto Vol. IV, fasc 1 @ 1/4		[illegible]	[illegible]

भगवन्तोऽपि हि निष्क्रमणकालेऽनपेक्षितपात्रापात्रविभागं करुणया सांवत्सरिकदानं दत्तवन्त इति । तदेवं भक्त्या सप्तक्षेत्र्यां दीनेषु चातिदयया धनं वपन् महाश्रावक उच्यते । ननु श्रावक इत्युच्यताम्, महाश्रावक इति तु महत्त्वविशेषणं किमर्थमुच्यते ? । श्रावकत्वमविरतानामेकाद्यणुव्रतधारिणां च शृणोतीति व्युत्पत्त्योच्यते ; यदाह—

'सम्मत्तदंसणाई पइदियहं जइजणा सुणेइ य ।
सामायारिं परमं जो खलु तं सावयं बिन्ति ॥ १ ॥

श्रद्धालुतां श्राति पदार्थचिन्तनाद्
धनानि पात्रेषु वपत्यनारतम् ।
किरत्यपुण्यानि सुसाधुसेवना-
दथापि तं श्रावकमाहुरञ्जसा ॥ २ ॥

इति निरुक्ताच्च श्रावकत्वं सामान्यस्यापि प्रसिद्धम् ; विवक्षितस्तु निरतिचारसकलव्रतधारी सप्तक्षेत्रीलक्षणे क्षेत्रे धनवपनाद्दर्शनश्रावकतां परमां दधानो दीनेषु चात्यन्तकृपापरो महाश्रावकशब्देनोच्यत इत्यदोषः ॥ १२० ॥

सप्तक्षेत्र्यां धनवपनं व्यतिरेकद्वारेण समर्थयते—

यः सद्बाह्यमनित्यं च क्षेत्रेषु न धनं वपेत् ।
कथं वराकश्चारित्रं दुश्चरं स समाचरेत् ? ॥ १२१ ॥

---

(१) सम्यक्त्वदर्शनादिः प्रतिदिवसं यतिजनात् शृणोति च ।
सामाचारीं परमां यः खलु तं श्रावकं ब्रूते ॥ १ ॥

दृश्यन्ते । तद्दर्शनेन च महापुरुषाणामवज्ञा कर्तुं न युज्यते, स्त्रीणामपि । यद्यपि कासाञ्चिद्दोषबहुलत्वमुपलभ्यते, कासांचिद् गुणबहुलत्वमप्यस्ति । तीर्थकरादिजनन्यो हि [illegible] तत्तद्गुणगरिमयोगितया सुरेन्द्रैरपि पूज्यन्ते, मुनिभिरपि [illegible] लौकिका अप्याहुः—

निरतिशयं गरिमाणं तेन युवत्या वदन्ति विद्वांसः ।
तं कमपि वहति गर्भं जगतामपि यो गुरुर्भवति ॥१॥

[illegible] काश्चन स्वशीलप्रभावादग्निं जलमिव, विषधरं रज्जुमिव, स्थलमिव, विषममृतमिव कुर्वन्ति । चतुर्वर्णे च सङ्घे [illegible] गृहमेधिस्त्रियोऽपि । सुलसाप्रभृतयो हि श्राविकास्ती[illegible] प्रशस्यगुणाः, सुरेन्द्रैरपि स्वर्गभूमिषु पुनः पुनर्बहुमत[illegible] प्रबलमिथ्यात्वैरप्यक्षोभ्यसम्यक्त्वसम्पदः, काश्चिच्चरमदेहाः, [illegible] द्वितीयभवान्तरितमोक्षगमनाः शास्त्रेषु श्रूयन्ते । तदाभिः [illegible] मिव भगिनीनामिव स्वपुत्रीणामिव [illegible] नागिलाख्या [illegible] [illegible] । [illegible] श्राविकाः [illegible] न परि[illegible], [illegible]

भगवन्तोऽपि हि निष्क्रमणकालेऽनपेक्षितपात्रापात्रविभागं करुणया सांवत्सरिकदानं दत्तवन्त इति । तदेवं भक्त्या सप्तक्षेत्र्यां दीनेषु चातिदयया धनं वपन् महाश्रावक उच्यते । ननु श्रावक इत्युच्यताम्, महाश्रावक इति तु महत्त्वविशेषणं किमर्थमुच्यते ? । श्रावकत्वमविरतानामेकाद्यणुव्रतधारिणां च शृणोतीति व्युत्पत्त्योच्यते ; यदाह—

[1]सम्मत्तदंसणाई पइदियहं जइजणा सुणेइ य ।
सामायारिं परमं जो खलु तं सावयं बिन्ति ॥ १ ॥

श्रद्धालुतां श्राति पदार्थचिन्तनाद्
धनानि पात्रेषु वपत्यनारतम् ।
किरत्यपुण्यानि सुसाधुसेवना-
दथापि तं श्रावकमाहुरञ्जसा ॥ २ ॥

इति निरुक्ताच्च श्रावकत्वं सामान्यस्यापि प्रसिद्धम् ; विवक्षितस्तु निरतिचारसकलव्रतधारी सप्तक्षेत्रीलक्षणे क्षेत्रे धनवपनाद्दर्शनप्रभावकतां परमां दधानो दीनेषु चात्यन्तकृपापरो महाश्रावकशब्देनोच्यत इत्यदोषः ॥ १२० ॥

सप्तक्षेत्र्यां धनवपनं व्यतिरेकद्वारेण समर्थयति—

यः सद्बाह्यमनित्यं च क्षेत्रेषु न धनं वपेत् ।
कथं वराकश्चारित्रं दुश्चरं स समाचरेत् ? ॥ १२१ ॥

---

(१) संप्राप्तदर्शनादिः प्रतिदिवसं यतिजनात् शृणोति च ।
सामाचारीं परमां यः खलु तं श्रावकं ब्रूवते ॥ १ ॥

दृश्यन्ते। तद्दर्शनेन च महापुरुषाणामवज्ञा कर्तुं न युज्यते, स्त्रीणामपि। यद्यपि कासाञ्चिद्दोषबहुलत्वमुपलभ्यते, कासांचिद् गुणबहुलत्वमप्यस्ति। तीर्थंकरादिजनन्यो हि स्त्रीत्वे तत्तद्गुणगरिमयोगितया सुरेन्द्रैरपि पूज्यन्ते, मुनिभिरपि स्तूयन्ते। लौकिका अप्याहुः—

निरतिशयं गरिमाणं तेन युवत्या वदन्ति विद्वांसः।
तं कमपि वहति गर्भं जगतामपि यो गुरुर्भवति ॥१॥ इति

काश्चन स्वशीलप्रभावादग्निं जलमिव, विषधरं रज्जुमिव, स्थलमिव, विषममृतमिव कुर्वन्ति। चतुर्वर्णे च सङ्घे च, गृहमेधिस्त्रियोऽपि। सुलसाप्रभृतयो हि श्राविकास्तीर्थ[illegible] प्रशस्यगुणाः, सुरेन्द्रैरपि स्वर्गभूमिषु पुनः पुनर्बहुमत[illegible] प्रबलमिथ्यात्वैरप्यक्षोभ्यसम्यक्त्वसम्पदः, काश्चिच्चरमदेहाः, [illegible] द्वित्रिभवान्तरितमोक्षगमनाः शास्त्रेषु श्रूयन्ते। तदासां [illegible] मिव भगिनीनामिव स्वपुत्रीणामिव वात्सल्यं युक्तियुक्त[illegible] दुष्प्रसह्यचिर्णा नागिलाख्या व्रतिव्रतिनी श्रावक[illegible] मत्यर्थाः। तत्कथं श्राविकाः पापबहुलानिदर्शनेन ? [illegible] तस्मादेता न परिहरणीयाः, वात्सल्यं चासां [illegible] प्रसङ्गेन। न केवलं सप्तक्षेत्र्यां धनं वपन् महाश्रावक उच्यते, [illegible] निःस्वान्धबधिरपङ्गुरोगार्तप्रभृतिषु करुणया [illegible] धनं वपन्, न तु भक्त्या। भक्तिपूर्वकं हि [illegible] दानम्। [illegible] [illegible]

प्राप्नुयात् ?, सर्वविरतिप्रतिपत्तिकलशारोपणफलो हि श्रावकधर्मप्रासाद इति ॥ १२१ ॥

इदानीं महाश्रावकस्य दिनचर्यामाह—

ब्राह्मे मुहूर्त्ते उत्तिष्ठेत् परमेष्ठिस्तुतिं पठन् ।
किंधर्मा किंकुलश्चास्मि किंव्रतोऽस्मीति च स्मरन्॥१२२॥

पञ्चदशमुहूर्ता रजनी, तस्यां चतुर्दशो मुहूर्तो ब्राह्मस्तस्मिन्नुत्तिष्ठेत् निद्रां जह्यात्; परमे तिष्ठन्तीति परमेष्ठिनः पञ्चार्हदादयस्तेषां स्तुतिं नमो अरिहन्ताणमित्यादिरूपामात्यन्तिकतद्बहुमानकार्य्यभूतां परममङ्गलार्थं वा पठन्नव्यक्तवर्णामिति शेषः ।

यदाह—

'परमेट्ठिचिन्तणं माणसम्मि सेज्जागएण कायव्वं ।
सुत्ता विणयपवित्ती निवारिया होइ एवं तु ॥ १ ॥

अन्ये त्वविशेषेणैव नमस्कारपाठमाहुर्न सा काचिदवस्था यस्यां पञ्चनमस्कारस्यानधिकार इति मन्वानाः । न केवलं पठन्, को धर्मो यस्याऽसौ किंधर्मा, किंकुलं यस्याऽसौ किंकुलः, किं व्रतं यस्याऽसौ किंव्रतोऽस्मीत्यहमिति च स्मरन्निदं भावतः स्मरणम् । उपलक्षणत्वात्के गुरवो ममेति द्रव्यतः, कुत्र ग्रामे नगरादौ वा वसामीति क्षेत्रतः, कः कालः प्रभातादिरिति कालतश्चेत्यादि स्मरन्, धर्मस्य जैनादेः, कुलस्येक्ष्वाक्वादेः, व्रतानामणुव्रतादीनां स्मरणे तद्विरुद्धपरिहारस्योपकारत्वात् ॥ १२२ ॥

---

(१) परमेष्ठिचिन्तनं मानसे शय्यागतेन कर्त्तव्यम् ।
सूत्राविनयप्रवृत्तिर्निवारिता भवति एवं तु ॥ १ ॥

सदिति विद्यमानमसतो हि धनस्य कथं दानं भवेत् ? [illegible] बाह्यं शरीराद्बहिर्भूतं आन्तरस्य तु कस्यचिद्दानं न [illegible] बाह्यमपि यदि नित्यमाकालस्थायि भवेत् तदा न दोषः [illegible] इदं त्वनित्यं चौरजलज्वलनदायादपार्थिवादिसाधारणं [illegible] गोपितमपि पुण्यक्षयेऽवश्यं विनश्यति ; यदागमः —

'अत्थं चोरा विलुंपंति उद्दालंति य दाइया ।
राया वा [illegible] सव्वं [illegible] ॥ १ ॥
जलणो वा [illegible] पाणियं वा [illegible] ।
[illegible] ॥ २ ॥
[illegible] ।
[illegible] ॥ ३ ॥

[illegible]

[illegible]

प्राप्नुयात् १, सर्वविरतिप्रतिपत्तिकलशारोपणफलो हि श्रावकधर्मप्रासाद इति ॥ १२१ ॥

इदानीं महाश्रावकस्य दिनचर्यामाह—

ब्राह्मे मुहूर्त्ते उत्तिष्ठेत् परमेष्ठिस्तुतिं पठन् ।
किंधर्मा किंकुलश्चास्मि किंव्रतोऽस्मीति च स्मरन्॥१२२॥

पञ्चदशमुहूर्ता रजनी, तस्यां चतुर्दशो मुहूर्तो ब्राह्मस्तस्मिन्नुत्तिष्ठेत् निद्रां जह्यात् ; परमे तिष्ठन्तीति परमेष्ठिनः पञ्चार्हदादयस्तेषां स्तुतिं नमो अरिहन्ताणमित्यादिरूपामात्यन्तिकतद्बहुमानकार्य्यभूतां परममङ्गलार्थं वा पठन्नव्यक्तवर्णामिति शेषः ।

यदाह —

'परमेट्ठिचिन्तणं माणसम्मि सेज्जागएण कायव्वं ।
सुत्ता विणयपवित्ती निवारिया होइ एवं तु ॥ १ ॥

अन्ये त्वविशेषेणैव नमस्कारपाठमाहुर्न सा काचिदवस्था यस्यां पञ्चनमस्कारस्यानधिकार इति मन्वानाः । न केवलं पठन्, को धर्मो यस्याऽसौ किंधर्मा, किंकुलं यस्याऽसौ किंकुलः, किं व्रतं यस्याऽसौ किंव्रतोऽस्मीत्यहमिति च स्मरन्निदं भावतः स्मरणम् । उपलक्षणत्वात्के गुरवो ममेति द्रव्यतः, कुत्र ग्रामे नगरादौ वा वसामीति क्षेत्रतः, कः कालः प्रभातादिरिति कालतश्चेत्यादि स्मरन्, धर्मस्य जैनादेः, कुलस्येक्ष्वाक्वादेः, व्रतानामणुव्रतादीनां स्मरणे तद्विरुद्धपरिहारस्योपाकरत्वात् ॥ १२२ ॥

(१) परमेष्ठिचिन्तनं मानसे शय्यागतेन कर्त्तव्यम् ।
सुप्ता विनयप्रवृत्तिर्निवारिता भवति एवं तु ॥ १ ॥

तत:—

शुचि: पुष्पामिषस्तोत्रैर्देवमभ्यर्च्य वेश्मनि।

प्रत्याख्यानं यथाशक्ति कृत्वा देवगृहं व्रजेत् ॥१२४॥

शुचिरिति मलोत्सर्गदन्तधावनजिह्वानिर्लेखनमुखप्रक्षालनगण्डूषकरणस्नानादिना शुचि: सन्नित्यनुवादपरं लोकसिद्धो ह्ययमर्थ इति नोपदेशपरम्, अप्राप्ते हि शास्त्रमर्थवत्। न हि मलिन: स्नायात्, बुभुक्षितोऽश्नीयादित्यत्र शास्त्रमुपयुज्यते। अप्राप्ते त्वामुष्मिके मार्गे नैसर्गिकमोहान्धतमसविलुप्तालोकस्य लोकस्य शास्त्रमेव परमं चक्षुरित्येवमुत्तरत्राऽप्यप्राप्ते विषये उपदेश: सफल इति चिन्तनीयम्। न च सावद्यारम्भेषु शास्तृणां वाचनिक्यऽप्यनुमोदना युक्ता। यदाहु:—

[1]सावज्जणवज्जाणं वयणाणं जो न जाणए विसेसं।

वुत्तुं पि तस्स न खमं किमङ्ग ! पुण देसणं काउं ॥ १ ॥

इति शुचित्वमनूद्य पुष्पामिषस्तोत्रैरित्याद्युपदिशति—

वेश्मनि गृहे देवं मङ्गलचैत्यरूपं भगवन्तमर्हन्तमभ्यर्च्य पूजयित्वा, पूजाप्रकारानाह—पुष्पामिषस्तोत्रैरिति, पुष्पाणि कुसुमानि पुष्पग्रहणं सर्वेषां सुगन्धिद्रव्याणां विलेपनधूपगन्धवासवस्त्राभरणादीनामुपलक्षणम्। आमिषं भक्ष्यं पेयं च, तच्च पक्वान्नफलाऽक्षतदीपजलघृतपूर्णपात्रादिरूपं, स्तोत्रं शक्रस्तवादिसद्भूतगुणोत्कीर्तनरूपं, तत: प्रत्याख्यानं नमस्कारसहिताद्यद्धारूपं सङ्केतरूपं च

---

(१) सावद्यानवद्यानां वचनानां यो न जानाति विशेषम्।
उक्तमपि तस्य न क्षमं किमङ्ग ! पुनर्देशनां कर्तुम् ॥

ग्रन्थिसहितादि कृत्वा यथाशक्तीति शक्त्यनतिक्रमेण, शक्तितस्त्यागतपसी इति सुप्रसिद्धमेव, देवगृहं भक्तिचैत्यरूपं व्रजेद्गच्छेत्। अत्र च स्नानविलेपनवर्णकविशिष्टवस्त्राभरणालङ्कारशस्त्रपरिग्रहविशिष्टवाहनाधिरोहणप्रभृतीनां स्वतः सिद्धानां नोपदेशः। अप्राप्ते शास्त्रमर्थवदित्युक्तमेव देवगृहव्रजनविधिः पुनरयम्-यदि राजा भवति तदा "सव्वाए इड्ढीए सव्वाए दित्तीए सव्वाए जुईए सव्वबलेणं सव्वपोरिसेणं" इत्यादिवचनात्प्रभावनानिमित्तं महर्द्धा याति।

अथ सामान्यविभवस्तदा औद्धत्यपरिहारेण लोकोपहासं परिहरन् व्रजति॥ १२३॥

ततः —

प्रविश्य विधिना तत्र त्रिः प्रदक्षिणयेज्जिनम्।
पुष्पादिभिस्तमभ्यर्च्य स्तवनैरुत्तमैः स्तुयात्॥ १२४॥

तत्र देवगृहे विधिना विधिपूर्वकं प्रविश्य त्रीन् वारान् प्रदक्षिणयेत् प्रदक्षिणीकुर्यात्। जिनगृहे प्रवेशविधिश्चायम्–पुष्पताम्बूलादिसचित्तद्रव्याणां छुरिकापादुकादेरचित्तद्रव्यस्य च परिहारेण मनएकाग्रतया जिनबिम्बदर्शनेऽञ्जलिबन्धं शिरसि आरोपयन् मनसा नमस्कारं कुर्वन् पञ्चविधाभिगमेन नैषेधिकीपूर्वं प्रविशति।

१ [illegible]

करणम्, ततः सुरभिणा गन्धद्रव्यादिना विलेपनविधानम्, ततः सुगन्धिजाति-चम्पक-शतपत्र-विचकिल-कमलादिमालाभिर्भगवतोऽभ्यर्चनम्, रत्नसुवर्णमुक्ताभरणादिभिरलङ्करणम्, वस्त्रादिभिः परिधापनम्, पुरतश्च सिद्धार्थकशालितण्डुलादिभिरष्टमाङ्गलिकालेखनम्, तत्पुरतश्च बलिमङ्गलदीपदधिघृतादीनां ढौकनम्, भगवतश्च भालस्थले गोरोचनया तिलककरणम्, ततश्चारात्रिकाद्युत्तारणम् ।

यदाह —

'गन्धवरधूवसव्वोसहीहिं उदगाइएहिं चित्तेहिं ।
सुरहिविलेवणवरकुसुमदामबलिदीवएहिं च ॥ १ ॥
सिद्धत्थदहिअक्खयगोरोअणमाइएहिं जहलाभं ।
कंचणमोत्तियरयणाइदामएहिं च विविहेहिं ॥ २ ॥
पवरेहिं साहणेहिं पायं भावो वि जायए पवरो ।
न य अन्नो उवओगो एएसि सया ण लट्ठयरो ॥ ३ ॥ त्ति ।

एवं भगवन्तमभ्यर्च्य पूजयित्वा ऐर्यापथिकीप्रतिक्रमणपूर्वकं शक्रस्तवादिभिर्दण्डकैश्चैत्यवन्दनं कृत्वा स्तवनैः स्तोत्रैरुत्तमैरुत्तम-

---

(१) गन्धवरधूपसर्वौषधीभिरुदकादिकैश्चित्रैः ।
सुरभिविलेपनवरकुसुमदामबलिदीपकैश्च ॥ १ ॥
सिद्धार्थक-दध्यक्षत-गोरोचनादिकैर्यथालाभम् ।
काञ्चनमौक्तिकरत्नादिदामभिश्च विविधैः ॥ २ ॥
प्रवरैः साधनैः प्रायो भावोऽपि जायते प्रवरः ।
न चान्य उपयोग एतेषां स्यात् मनोहरतरः ॥ ३ ॥ इति ।

[illegible]

[illegible] किं पठन: ।

[illegible]

[illegible] दिव्याः श्रियं प्राप्नुवः ॥ १ ॥

[illegible]

[illegible]

[illegible] ।

[illegible]

[illegible] प्रभावाः पुनातु ॥ १ ॥

[illegible] ।

यथा—

¹तिन्नि निसीहिय तिन्नि य पयाहिणा तिन्नि चेव य पणामा ।
तिविहा पूया य तहा अवत्थतियभावणं चेव ॥ १ ॥
तिदिसिनिरिक्खणविरई भूमीइ पमज्जणं च तिक्खुत्तो ।
वण्णाइतियं मुद्दातियं च तिविहं च पणिहाणं ॥ २ ॥
पुप्फामिसथुइभेया तिविहा पूया अवत्थतियगं तु ।

---

(१) क पतन ।

१ तिस्रो नैषेधिक्यस्तिस्रः प्रदक्षिणास्तिस्र एव च प्रणामाः ।
त्रिविधा पूजा च तथाऽवस्थात्रिकभावनं चैव ॥ १ ॥
त्रिदिग्निरीक्षणविरतिर्भूमौ प्रमार्जनं च त्रिकृत्वः ।
वर्णादित्रिकं मुद्रात्रिकं च त्रिविधं च प्रणिधानम् ॥ २ ॥
पुष्पामिषस्तुतिभेदात्त्रिविधा पूजाऽवस्थात्रिकं तु ।

कविरचितैः स्तूयाद् गुणोत्कीर्तनं कुर्यात्। स्तोत्राणां चोत्तमत्व-
मिदमुक्तम्—

यथा—

पिण्डक्रियागुणगतैर्गम्भीरैर्विविधवर्णसंयुक्तैः।
आशयविशुद्धिजनकैः संवेगपरायणैः पुण्यैः ॥ १ ॥
पापनिवेदनगर्भैः प्रणिधानपुरस्सरैर्विचित्रार्थैः।
अस्खलितादिगुणयुतैः स्तोत्रैश्च महामतिग्रथितैः ॥२॥ इति।

न पुनरेवंविधैः—

एकं ध्याननिमीलनान्मुकुलितं चक्षुर्द्वितीयं पुनः
पार्वत्या विपुले नितम्बफलके शृङ्गारभारालसम्।
अन्यद्दूरविकृष्टचापमदनक्रोधानलोद्दीपितं
शम्भोर्भिन्नरसं समाधिसमये नेत्रत्रयं पातु वः ॥ १ ॥

तथा—

धन्या केयं स्थिता ते शिरसि शशिकला किं नु नामैतदस्या
नामैवास्यास्तदेतत् परिचितमपि ते विस्मृतं कस्य हेतोः।
नारीं पृच्छामि नेन्दुं कथयतु विजया न प्रमाणं यदीन्दु-
र्देव्या निह्नोतुमिच्छोरिति सुरसरितं शाठ्यमव्याद्विभोर्वः ॥ १ ॥

[illegible]

[illegible]
[illegible]

[illegible]
[illegible]

यथा —

एतत्किं शिरसि स्थितं मम पितुः खण्डं सुधादीधिते-
र्भालाङ्गे किमिदं विलोचनमिदं हस्तेऽस्य किं पन्नगः ।
इत्थं क्रौञ्चरिपोः क्रमादुपगते दिग्वाससः शूलिनः
प्रश्ने वामकरोपरोधसुभगं देव्याः स्मितं पातु वः ॥ १ ॥

तथा —

उत्तिष्ठन्त्या रतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा
धृत्वा चान्येन वासो विगलितकबरीभारमंसं वहन्त्याः ।
भूयस्तत्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा वः
शय्यामालिङ्ग्य नीतं वपुरलसलसद्बाहु लक्ष्म्याः पुनातु ॥ १ ॥

[1]अनेन च सम्पूर्णो वन्दनाविधिरुपलक्षितः ।

यथा—

[2]तिन्नि निसीहिय तिन्नि य पयाहिणा तिन्नि चेव य पणामा ।
तिविहा पूया य तहा अवत्थतियभावणं चेव ॥ १ ॥
तिदिसिनिरक्खणविरई भूमीइ पमज्जणं च तिक्खुत्तो ।
वण्णाइतियं मुद्दातियं च तिविहं च पणिहाणं ॥ २ ॥
पुप्फामिसथुइभेया तिविहा पूया अवत्थतियगं तु ।

---

(१) च एतेन ।

(२) तिस्रो नैषेधिक्यस्तिस्रश्च प्रदक्षिणास्त्रय एव च प्रणामाः ।
त्रिविधा पूजा च तथाऽवस्थात्रिकभावनं चैव ॥ १ ॥
त्रिदिग्निरीक्षणविरतिर्भूमौ प्रमार्जनं च त्रिकृत्वः ।
वर्णादित्रिकं मुद्रात्रिकं च त्रिविधं च प्रणिधानम् ॥ २ ॥
पुष्पामिषस्तुतिभेदात्त्रिविधा पूजाऽवस्थात्रिकं तु ।

[1]छउमत्थ-केवलित्तं सिद्धत्तं भुवणनाहस्स ॥ ३ ॥
वण्णाइतियं तु पुणो वण्णत्थालम्बणस्सरूवं तु ।
मणवयणकायजणिअं तिविहं पणिहाणमवि होइ ॥ ४ ॥

तथा —

[2]पंचंगो पणिवाओ थयपाढो होइ जोगमुद्दाए ।
वन्दन जिणमुद्दाए पणिहाणं मुत्तसुत्तीए ॥ १ ॥
दो जाणू दोन्नि करा पंचमयं होइ उत्तिमंगं तु ।
सम्मं संपणिवाओ नेओ पंचंगपणिवाओ ॥ २ ॥
अन्नोन्नंतरिअंगुलिकोसागारेहिं दोहिं हत्थेहिं ।
पिट्टोवरिकोप्परसंठिएहिं तह जोगमुद्दत्ति ॥ ३ ॥
चत्तारि अंगुलाइं पुरओ ऊणाइं जत्थ पच्छिमओ ।
पायाणं उस्सग्गो एसा [3]पुण होइ जिणमुद्दा ॥ ४ ॥

---

(१) छद्मस्थ-केवलित्वं सिद्धत्वं भुवननाथस्य ॥ ३ ॥
वर्णादित्रिकं तु पुनर्वर्णार्थालम्बनस्वरूपं तु ।
मनो-वचन-कायजनितं त्रिविधं प्रणिधानमपि भवति ॥ ४ ॥

(२) पञ्चाङ्गः प्रणिपातः स्तवपाठो भवति योगमुद्रया ।
वन्दनं जिनमुद्रया प्रणिधानं मुक्ताशुक्त्या ॥ १ ॥
द्वे जानुनी द्वौ करौ पञ्चमकं भवत्युत्तमाङ्गं तु ।
सम्यक् संप्रणिपातो ज्ञेयः पञ्चाङ्गप्रणिपातः ॥ २ ॥
अन्योन्यान्तरिताङ्गुलिकोशाकाराभ्यां द्वाभ्यां हस्ताभ्याम् ।
उदरोपरि कूर्परसंस्थिताभ्यां तथा योगमुद्रेति ॥ ३ ॥
चत्वार्यङ्गुलानि पुरतः ऊनानि यत्र पश्चिमतः ।
पादयोरुत्सर्गः एषा पुनर्भवति जिनमुद्रा ॥ ४ ॥

३ [illegible]

[1]मुत्तासुत्तीमुद्दा [2]जत्थ समा दोवि गब्भिया हत्था ।
ते पुण णिडालदेसे लग्गा अन्ने अलग्गत्ति ॥ ५ ॥ इत्यादि ।

ऐर्यापथिकीप्रतिक्रमणपूर्वकं चैत्यवन्दनमित्युक्तम् । तत्र ऐर्यापथिकीसूत्रं व्याख्यायते-तच्च इच्छामि पडिक्कमिउमित्यादि तस्स मिच्छामि दुक्कडमित्यन्तम्, इच्छामि पडिक्कमिउं इरियावहियाए विराहणाए; इच्छामि अभिलषामि प्रतिक्रमितुं प्रतीपं क्रमितुम्, ईरणमीर्या गमनमित्यर्थः, तत्प्रधानः पन्था ईर्यापथः, तत्र भवा ऐर्यापथिकी; काऽसौ? विराधना जन्तुबाधा, तस्या ऐर्यापथिक्या विराधनायाः सकाशात् प्रतिक्रमितुमिच्छामीति सम्बन्धः । अस्मिंश्च व्याख्याने ईर्यापथनिमित्ताया एव विराधनायाः प्रतिक्रमणं स्यात् न तु शयनादेरुत्थितस्य कृतलोचादेर्वा; तस्मादन्यथा व्याख्यायते—ईर्यापथः साध्वाचारः, यदाह ईर्यापथो मौनध्यानादिकं भिक्षुव्रतं तत्र भवा ऐर्यापथिकी; काऽसौ? विराधना साध्वाचारातिक्रमरूपा तस्या इच्छामि प्रतिक्रमितुमिति सम्बन्धः । साध्वाचाराऽतिक्रमश्च प्राणातिपातादिरूपः । तत्र च प्राणातिपातस्यैव गरीयस्त्वम्, शेषाणां तु पापस्थानानामत्रैवान्तर्भावः, अत एव प्राणातिपातविराधनाया एवोत्तरः प्रपञ्चः । का भवति विराधना? गमणागमणे गमने चागमनं च समाहारद्वन्द्वस्तस्मिन्,

(1) मुक्ताशुक्तिमुद्रा यत्र समौ द्वावपि गर्भितौ हस्तौ ।
तौ पुनर्ललाटदेशे लग्नावन्ये अलग्नाविति ॥ ५ ॥

(2) क ग ङ एसा जहिं ।

ता; वत्तिया वर्तिताः पुञ्जीकृताः धूलिनिकचवरादिना स्थगिताः; लेसिया श्लेषिताः भित्त्यादिषु वा लगिताः; संघाइया संघातिताः परस्परमङ्गैरेव लगिताः; संघट्टिया संघट्टिताः मनाक् स्पृष्टाः; परियाविया परितापिताः समन्ततः पीडिताः; किलामिया क्लामिता ग्लानिमापादिता मारणान्तिकं समुद्घातं नीता इत्यर्थः; उद्दविया अपद्राविता उत्त्रासिताः; ठाणाओ ठाणं संकामिया स्वस्थानात् परस्थानं नीताः; जीवियाओ ववरोविया जीविताद् व्यपरोपिता मारिता इत्यर्थः; तस्स तस्य अभिहया इत्याद्यालोचितविराधनाप्रकारस्य सर्वस्य मिच्छामि दुक्कडं मिथ्या मे दुष्कृतम् एतद् दुष्कृतं मिथ्या मे भवतु विफलं भवत्वित्यर्थः। मिच्छामि दुक्कडमित्यस्य पूर्वाचार्या निरुक्तविधिमुपदर्शयन्ति—

तद्यथा

'मि त्ति मिउमद्दवत्ते छत्ति य दोसाण छायणे होइ।
मित्ति य मेराए ठिओ दुत्ति दुगुंछामि अप्पाणं ॥ १ ॥
कत्ति कडं मे पावं डत्ति य डेवेमि तं उवसमेणं।
एसो मिच्छादुक्कडपयक्खरत्थो समासेणं ॥ २ ॥

एवमालोचनाप्रतिक्रमणरूपं द्विविधं प्रायश्चित्तं प्रतिपद्य कायोत्सर्गलक्षणं प्रायश्चित्तं प्रतिपित्सुरिदं सूत्रं पठति–तस्स उत्तरीकरणेणं

---

(१) मीति मृदु-मार्दवार्थे छेति च दोषाणां छादने भवति।
मीति मर्यादायां स्थितो दु-इति जुगुप्स आत्मानम् ॥ १ ॥
केति कृतं मे पापं डेति च लङ्घयामि तदुपशमेन।
एष मिच्छादुक्कड (मिथ्यादुष्कृत) पदाक्षरार्थः समासेन ॥ २ ॥

पायच्छित्तकरणेणं विसोहीकरणेणं विसल्लीकरणेणं पावाणं कम्माणं निग्घायणट्ठाए ठामि काउस्सग्गं। तस्यालोचितप्रतिक्रान्तस्य विराधनाप्रकारस्य उत्तरीकरणादिना हेतुभूतेन ठामि काउस्सग्गमिति योगः। तत्रोत्तरकरणं पुनः संस्कारद्वारेण परिष्करणमनुत्तरस्योत्तरस्य करणमुत्तरीकरणम्; अयं भावः—विराधनस्य हि पूर्वमालोचनादिकं कृतं तस्यैव कायोत्सर्गकरणमुत्तरकरणम्, तेन पापकर्मनिर्घातना भवति। उत्तरीकरणं च प्रायश्चित्तकरणद्वारेण भवति इत्याह-पायच्छित्तकरणेणं प्रायो बाहुल्येन चित्तं जीवं मनो वा शोधयति प्रायश्चित्तम्; यद्वा, पापं छिनत्तीति पापच्छित् प्राकृतत्वात्पायच्छित्तं तस्य करणेन हेतुभूतेन। प्रायश्चित्तकरणं च विशुद्धिद्वारेण भवतीत्याह विसोहीकरणेणं विशोधनं विशुद्धिः अपराधमलिनस्यात्मनो निर्मलीकरणं विशुद्धेः करणं विशुद्धिकरणं तेन हेतुभूतेन विशुद्धिकरणं च विशल्यीकरणद्वारेण भवति अत आह विसल्लीकरणेणं विगतानि शल्यानि मायादीनि यस्यासौ विशल्यः, अविशल्यस्य विशल्यस्य करणं तेन हेतुभूतेन। निग्घायणट्ठाए पावाणं कम्माणं निर्घातनार्थं पापानां संसारनिबन्धनभूतानां कर्मणां ज्ञानावरणादीनां निर्घातनार्थाय निर्घातनमुच्छेदः स एवार्थः प्रयो- [illegible] ठामि काउस्सग्गं [illegible] कायोत्सर्गं [illegible] [illegible]

कायस्य उत्सर्ग इत्यर्थः, उच्छ्वसितं हि निरोद्धुमशक्यम्, तन्निरोधे सद्यः प्राणविघाताद्यापत्तेः ।

यदाह—

'उसासं न निरुंभइ अभिग्गहिओवि किमुअ चिट्ठाए ।
सज्ज मरणं निरोहे सुहुमुस्सासं तु जयणाउ ॥ १ ॥

एवं निःश्वसिताद्यपि नीससिएणं अधःश्वसितं निःश्वसितं तस्मात्; खासिएणं काशितात्; छिएणं क्षुतात्; जंभाइएणं विवृतवदनस्य प्रबलपवननिर्गमो जृम्भितं तस्मात्; उड्डुएणं उद्गारितात्; वायनिसग्गेणं अपानेन पवननिर्गमो वातनिसर्गस्तस्मात्; भमलिए शरीरभ्रमेराकस्मिक्याः; पित्तमुच्छाए पित्तप्राबल्यान्मनाग्मोहो मूर्छा तस्याः; सुहुमेहिं अंगसंचालेहिं सूक्ष्मेभ्यो लघ्वालघ्येभ्योऽङ्गसञ्चारेभ्यो गात्रविचलनप्रकारेभ्यो रोमोद्गमादिभ्यः; सुहुमेहिं खेलसंचालेहिं सूक्ष्मेभ्यः खेलस्य श्लेष्मणः सञ्चारेभ्यः; आत्मनो हि वीर्ययुक्तद्रव्यतया अन्तःसूक्ष्मश्लेष्मसञ्चारः सम्भवतीत्यतोऽन्यत्रोच्यते सुहुमेहिं दिट्ठिसंचालेहिं सूक्ष्मेभ्यो दृष्टिसञ्चारेभ्यो निमेषादिभ्यः; सूक्ष्मा हि दृष्टिसञ्चारास्तदा सर्वथा निरोद्धुं शक्यन्ते यदा एकस्मिन् द्रव्ये दृष्टिनिवेशः स्थिरीकर्तुं शक्यते, न च शक्यते कर्तुमिति । उच्छ्वसितादिभ्योऽन्यत्र कायोत्सर्गं करोमीत्येतावता किमुक्तं भवति एवमाइएहिं आगारेहिं अभग्गो अविराहिओ हुज्ज मे काउस्सग्गो एवमादिभिरुच्छ्वसितनिःश्वसितादिभिः पूर्वोक्तैराकारैरपवादरूपै-

(१) उच्छ्वासं न निरुणद्धि आभिग्रहिकोऽपि किमुत चेष्टा ।
सद्यो मरणं निरोधे सूक्ष्मोच्छ्वासं तु यतनया ॥ १ ॥

रभग्नोऽविराधितो मे कायोत्सर्गो भूयादिति सम्बन्धः; आदि-शब्दादन्यैरपि यदा अग्नेर्विद्युतो वा ज्योतिः स्पृशति तदा प्रावरणायोपधिग्रहणं कुर्वतो न कायोत्सर्गभङ्गः। ननु नमस्कारमेवाभिधाय किमिति तद्ग्रहणं न करोति येन तद्भङ्गो न भवति ?। उच्यते—नाऽत्र नमस्कारेण पारणमेवावशिष्टकायोत्सर्गमानं क्रियते, किन्तु यो यत्परिमाणः कायोत्सर्ग उक्तस्तावन्तं कालं प्रतीक्ष्य तत ऊर्द्धं नमस्कारमपठित्वा पारयतो भङ्गोऽपरिसमाप्तेऽपि च पठतो भङ्ग एव, तस्माद्यो यत्परिमाणः कायोत्सर्गस्तस्मिन् पूर्ण एव नमो अरिहंताणमिति वक्तव्यम्। तथा मार्जारमूषिकादिपुरतो गमनेऽग्रतः सरतोऽपि न भङ्गः। तथा चौरसंभ्रमे राजसंभ्रमे वा अस्थानेऽपि नमस्कारमुच्चारयतो न भङ्गः। तथा सर्पेण आत्मनि परे वा साध्वादौ सहसा उच्चारयतो न भङ्गः।

यदाहुः—

'अगणि-उच्छिन्दिज्ज बोहिअखोभाइ-दीहडक्को या।
आगारेहिं न भग्गो उस्सग्गो एवमाईहिं॥ १ ॥

आक्रियन्ते आगृह्यन्ते इत्याकाराः कायोत्सर्गापवादप्रकारा इत्यर्थः, तैराकारैर्विद्यमानैरपि अभग्नः सर्वथा विनाशितः, न भ[illegible] ऽभग्नः, विराधितो देशभग्नः, न विराधितोऽविराधितो भ[illegible] कायोत्सर्गः। कियन्तं कालं यावदित्याह—जाव अरिहंता[illegible] [illegible]नतं नमोक्कारेणं न पारेमि तावदिति कालावधारणं, [illegible]

[illegible]
[illegible]

एताश्च यथास्थानं नामतः प्रमाणतश्च कथयिष्यन्ते। व्याख्या नमोत्थुणं अरहंताणं भगवंताणं तत्र नम इति नैपातिकं पदं पूजार्थं, पूजा च द्रव्यभावसङ्कोचः। तत्र करशिरःपादादिद्रव्यसंन्यासो द्रव्यसङ्कोचः, भावसङ्कोचस्तु विशुद्धस्य मनसो नियोगः, अस्त्विति भवतु। प्रार्थनैषा धर्मबीजमाशयविशुद्धिजनकत्वात्। णमिति वाक्यालङ्कारे। अतिशयपूजामर्हन्तीति अर्हन्तः।

यदाह—

'अरहंति वंदणनमंसणाइं अरहंति पूयसक्कारं।

सिद्धिगमणं च अरिहा अरहंता तेण वुच्चंति ॥ १ ॥

सुगद्विषार्हः सत्रिशत्रुस्तुत्ये ॥५।२।२६॥ इति वर्त्तमानकालेऽतृश्। कथं वर्तमानकालत्वमिति चेत्, पूजार्हत्वस्याऽनुपरमात्। एष एव हि न्यायो वर्तमानकालो यत्रारब्धस्यापवर्गो नास्ति। तथा अरिहननादर्हन्तः, अरयश्च मोहादयः साम्परायिककर्मबन्धहेतवः, तेषां सर्वेषामनेकभवगहनव्यसनप्रापणकारणानां हननादर्हन्तः। तथा रजोहननादर्हन्तः, रजश्च घातिकर्मचतुष्टयं [illegible] ज्ञानादिगुणलाभावर्तं [illegible] इव तद्गुणानामभिव्यक्तिर्भवति अतः हननादर्हन्तः। तथा रह-स्याभावादर्हन्तः; तथाहि भगवतां निरवशेष[illegible] [illegible] [illegible] [illegible] नास्ति, तासां [illegible] [illegible] [illegible] [illegible]

(१) [illegible]

[illegible]

प्रणामस्तु पञ्चधा—

एकाङ्गः शिरसो नामे स द्व्यङ्गः करयोर्द्वयोः ।
त्रयाणां नमने त्र्यङ्गः करयोः शिरसस्तथा ॥ १ ॥
चतुर्णां करयोर्जान्वोर्नमने चतुरङ्गकः ।
शिरसः करयोर्जान्वोः पञ्चाङ्गः पञ्चके नते ॥ २ ॥

मध्यमा तु स्थापनार्हतस्तवदण्डकेन स्तुत्या चैकया भवति ।

यदाह—

'नवकारेण जहन्ना दंडगथुइजुगल मज्झिमा णेया ।
संपुण्णा उक्कोसा विहिणा खलु वंदणा तिविहा ॥ १ ॥'

इत्युत्कृष्टया चैत्यवन्दनया वन्दितुकामो विरतः साधुः श्रावको वा अविरतसम्यग्दृष्टिरपुनर्बन्धको वा यथाभद्रको यथोचितं परि[illegible] [illegible]लिखितप्रमार्जितस्थण्डिलो भुवनगुरौ [illegible] संवेगवैराग्यवशादुत्पन्नरोमाञ्चकञ्चुको [illegible] दुर्लभं भगवत्पादवन्दनमिति मन्यमानो [illegible] नादिगुणान्वितः तदर्थानुस्मरणाय प्रणिपातदण्डकादि [illegible] [illegible] भवति । यदाह

[illegible]

[illegible]

[illegible]

यथाह

[illegible]

[illegible]

प्रणामस्तु पञ्चधा—

एकाङ्गः शिरसो नामे स द्व्यङ्गः करयोर्द्वयोः ।
त्रयाणां नमने त्र्यङ्गः करयोः शिरसस्तथा ॥ १ ॥
चतुर्णां करयोर्जान्वोर्नमने चतुरङ्गकः ।
शिरसः करयोर्जान्वोः पञ्चाङ्गः पञ्चके नते ॥ २ ॥

मध्यमा तु स्थापनार्हतस्तवदण्डकेन स्तुत्या चैकया भवति ।

यदाह—

[1]नवकारेण जहन्ना दंडगथुइजुगल मज्झिमा णेया ।
संपुन्ना उक्कोसा विहिणा खलु वंदणा तिविहा ॥ १ ॥

इत्युत्कृष्टया चैत्यवन्दनया वन्दितुकामो विरतः साधुः श्राव अविरतसम्यग्दृष्टिरपुनर्बन्धको वा यथाभद्रको यथोचितं प्र लेखितप्रमार्जितस्थण्डिलो भुवनगुरौ विनिवेशितनयनमान संवेगवैराग्यवशादुत्पन्नरोमाञ्चकञ्चुको मुदश्रुपूर्णलोचनः दुर्लभं भगवत्पादवन्दनमिति बहु मन्यमानो योगमुद्रया अस्ख तादिगुणोपेतं तदर्थानुस्मरणगर्भं प्रणिपातदण्डकसूत्रं पठ तत्र च त्रयस्त्रिंशदालापका आलापकद्विकादिप्रमाणाश्च विश्रा भूमिरूपा नवसम्पदो भवन्ति । यदाह—

[2]दो तिअ चउर ति पंचा दोन्नि अ चउरो य हुंति तिन्न
सक्कथए नव संपय तित्तीसं हुंति आलावा ॥ १ ॥

(1) नमस्कारेण जघन्या दण्डकस्तुतियुगलात् मध्यमा ज्ञेया ।
सम्पूर्णोत्कृष्टा विधिना खलु वन्दना त्रिविधा ॥ १ ॥

(2) द्वौ त्रयश्चत्वारस्त्रयः पञ्च द्वौ च चत्वारश्च भवन्ति त्रयश्च ।
शक्रस्तवे नव सम्पदस्त्रयस्त्रिंशद् भवन्ति आलापाः ॥ १ ॥

द्वैतव्यवच्छेदेनाऽर्हद्बहुत्वख्यापनार्थम्, विषयबहुत्वेन नमस्कर्तुः फलातिशयज्ञापनार्थं च। एते चाऽर्हन्तो नामाद्यनेकभेदा इति भावार्हत्सम्परिग्रहार्थमाह भगवद्भ्यः—

भगोऽर्कज्ञानमाहात्म्ययशोवैराग्यमुक्तिषु।
रूपवीर्यप्रयत्नेच्छाश्रीधर्मैश्वर्ययोनिषु॥ १॥

इति वचनादर्कयोनिवर्जमिह द्वादशधा भगशब्दस्यार्थः स विद्यते येषां ते भगवन्तः, निन्दावर्जं भूम्यादिष्वर्थेषु सत्सु; ज्ञानं तावद्गर्भनिवासात् प्रभृति श्रादीनां मतिश्रुतावधिलक्षणं दीक्षानन्तरं स्वघातिकर्मचतुष्टयक्षयात् मनःपर्यायज्ञानमधिकम्, घातिक्षये चानन्तमनन्तविषयं निःशेषभावाभावस्वभावावभासकं केवलज्ञानम्। १। माहात्म्यं प्रभावातिशयः, तच्च सर्वकल्याणकेषु नारकाणामपि सुखोत्पादकत्वेन नित्यान्धकारेष्वपि नरकेषु प्रकाशजनकत्वेन गर्भनिवासात् प्रभृति कुलस्य धनादिवर्द्धना-ऽपरागसामन्तानां च प्रणत्येतिमारिवैरोपद्रवनिर्जितराजकत्वे-नाऽतिवृष्ट्यनावृष्टिप्रभृत्युपद्रवरहितजनपदत्वेन चलितासनसम-सुरासुरप्रणतपादपद्मत्वेन चाऽप्रमेयम्। २। यशस्तु रागद्वेषपरीष-होपसर्गपराक्रमसमुत्थमाकालमक्षतं यथार्थं दिवि देवसु-न्दरीभिः पाताले नागकन्याभिर्गीयते सुरासुरैः किन्नराभिश्च ३। वैराग्यं सकलसांसारिकसुखोपभोगानुभवतामपि यत तत्र रतिवर्जः, यदा तु सर्वविषयत्यागपूर्वकं प्रव्रज्यां प्रतिपद्यन्ते तदाऽस्त्येवेति किम्, यदा तु क्षीणकर्माणो भवन्ति तदा सुखदुःखादौ सर्वत्रौ-दासीन्यमिति त्रिविधमप्युत्कृष्टमपि भवति।

रहस्यं नास्ति, तस्माद्रहस्याभावादर्हन्तः। एषु विपर्ययेषु पृषोदरादित्वादर्हदिति सिद्ध्यति। अथवा अविद्यमानं रह एकान्तरूपो देशोऽन्तश्च मध्यं गिरिगुहादीनां सर्ववेदितया प्रच्छन्नस्य कस्याप्यभावेन येषां तेऽरहोऽन्तरस्तेभ्योऽरहोऽन्तर्भ्यः। अथवा अरहद्भ्यः क्षीणरागत्वात् कचिदप्यासक्तिमगच्छद्भ्यः। अथवा अरहद्भ्यो रागद्वेषहेतुभूतमनोज्ञेतरविषयसंपर्केऽपि वीतरागत्वादिकं स्वभावमत्यजद्भ्यः। अरिहंताणमिति पाठान्तरं वा; तत्र कर्मारिहन्तृभ्यः।

आह च--

'अट्ठविहं पि हु कम्मं अरिभूयं होइ सयलजीवाणं।
तं कम्ममरिहंता अरिहंता तेण वुच्चंति ॥ १ ॥

अरुहंताणमित्यपि पाठान्तरम्। तत्र अरोहद्भ्योऽनुपजायमानेभ्यः, क्षीणकर्मबीजत्वात्।

उक्तञ्च —

दग्धे बीजे यथात्यन्तं प्रादुर्भवति नाङ्कुरः।
कर्मबीजे तथा दग्धे नारोहति भवाङ्कुरः ॥ २ ॥

[illegible] प्राकृते [illegible]; [illegible] 'उच्चार्हति' [illegible] ॥ [illegible], [illegible]

द्वैतच्छेदेनाऽर्हद्बहुत्वख्यापनार्थम्, विषयबहुत्वेन नमस्कर्तुः फलातिशयज्ञापनार्थं च। एते चाऽर्हन्तो नामाद्यनेकभेदा इति भावार्हत्त्वम्परिग्रहार्थमाह भगवन्तः—

भगोऽर्कज्ञानमाहात्म्ययशोवैराग्यमुक्तिषु।
रूपवीर्यप्रयत्नेच्छाश्रीधर्मैश्वर्ययोनिषु ॥ १ ॥

इति वचनादर्कयोनिवर्जमिह द्वादशधा भगशब्दस्यार्थः स विद्यते येषां ते भगवन्तः, निन्दावर्जे भूम्यादिष्वर्थेषु मतुः; ज्ञानं तावद्गर्भनिवासात् प्रभृति आदीक्षातो मतिश्रुतावधिलक्षणं दीक्षानन्तरं त्वघातिकर्मचतुष्टयक्षयाद् मनःपर्यायज्ञानसहितम्, घातिक्षये चानन्तमनन्तविषयं निःशेषभावाभावस्वभावावभासकं केवलज्ञानम्। १। माहात्म्यं प्रभावातिशयः, तच्च सर्वकल्याणकेषु नारकाणामपि सुखोत्पादकत्वेन नित्यसन्तमसेष्वपि नरकेषु प्रकाशजनकत्वेन गर्भनिवासात् प्रभृति कुलस्य धनादिवर्धनेनाऽप्रणतसामन्तानां च प्रणत्येतिमारिवैरोपद्दतिवर्जितराज्यकरणेनाऽतिवृष्ट्यनावृष्टिप्रभृत्युपद्रवरहितजनपदत्वेन चलितासनसकलसुरासुरप्रणतपादपद्मत्वेन चाऽवसेयम्। २। यशस्तु रागद्वेषपरीषहोपसर्गपराक्रमसमुत्थमाकालप्रतिष्ठं यत्सर्वदा दिवि सुरसुन्दरीभिः पाताले नागकन्याभिर्गीयते सुरासुरैर्नित्यमभिष्टूयते च।३। वैराग्यं मरुन्नरेन्द्रलक्ष्मीमनुभवतामपि यत्र तत्र रतिर्नाम, यदा तु सर्वविषयत्यागपूर्वकं प्रव्रज्यां प्रतिपद्यन्ते तदाऽलमेभिरिति, यदा तु क्षीणकर्माणो भवन्ति तदा सुखदुःखयोर्भवमोक्षयोरौदासीन्यमिति त्रिविधमप्यतिशायि भवति।

यदवोचाम वीतरागस्तोत्रे—

यदा मरुन्नरेन्द्रश्रीस्त्वया नाथोपभुज्यते।

यत्र तत्र रतिर्नाम विरक्तत्वं तदापि ते ॥ १ ॥

नित्यं विरक्तः कामेभ्यो यदा योगं प्रपद्यसे।

अलमेभिरिति प्राज्यं तदा वैराग्यमस्ति ते ॥ २ ॥

सुखे दुःखे भवे मोक्षे यदौदासीन्यमीशिषे।

तदा वैराग्यमेवेति कुत्र नाऽसि विरागवान् ॥३॥ इति ।४।

मुक्तिश्च सकलक्लेशप्रहाणलक्षणा सन्निहितैवेति ।५।

रूपं तु—

'सव्वसुरा जइ रूवं अंगुट्ठपमाणयं विउव्विज्जा।

जिणपायंगुट्ठं पइ न सोहए तं जहिंगालो ॥ १ ॥

इति निदर्शनात् सिद्धं सर्वातिशायि। ६। वीर्यं च मेरोर्दण्ड-
रूपतां धरित्र्याश्च छत्ररूपतां कर्तुं सामर्थ्यम् श्रूयते; हि तत्काल-
जातेनैव श्रीमहावीरेण शक्रशङ्कापनोदाय वामपादाङ्गुष्ठेन मे-
पर्वतः प्रकम्पितः। ७। प्रयत्नः परमवीर्यसमुत्थ एकरात्रिक्यादि-
महाप्रतिमाभावहेतुः समुद्घातशैलेश्यवस्थाव्यङ्ग्यः। ८। इच्छा त-
जन्मान्तरे सुरजन्मनि तीर्थंकरजन्मनि च दुःखपङ्कमग्नस्य जग-
दुद्दिधीर्षातिशयवती। ९। श्राघातिकर्मोच्छेदविकाशायाशेषवृत्ता-
लोकसम्पत्तिः, अतिशयसुखसम्पत्तानुपमा। १०। धर्मः पुण्य-
रूपाणां महायोगात्मको निर्जराफलोऽतिशयानाम्। ११। [illegible]

1 सर्वसुरा यदि रूपमङ्गुष्ठप्रमाणकं विकुर्युः।
जिनपादाङ्गुष्ठं प्रति न शोभते तद् यथाङ्गारः ॥ १ ॥

भव्यत्वादिसामग्रीपरिपाकात्तु न परोपदेशात् सम्यग्विशेषेण बुद्धा अवगततत्त्वाः स्वयंसंबुद्धास्तेभ्यः। यद्यपि भवान्तरेषु तथाविधगुरुसन्निधानायत्तबोधास्तेऽभूवन्, तथापि तीर्थकरजन्मनि परोपदेशनिरपेक्षा एव बुद्धाः, यद्यपि च तीर्थकरजन्मनि लोकान्तिकत्रिदशवचनात् "भयवं तित्थं पवत्तेह" इत्येवंलक्षणाद् दीक्षां प्रतिपद्यन्ते, तथापि वैतालिकवचनानुसारप्रवृत्तनरेन्द्रयावत् स्वयमेव प्रव्रज्यां प्रतिपद्यन्ते। इदानीं स्तोतव्यसम्पद एव हेतुविशेषसम्पदुच्यते—पुरिसोत्तमाणं पुरिससीहाणं पुरिसवरपुण्डरीआणं पुरिसवरगन्धहत्थीणं - पुरि शरीरे शयनात् पुरुषा विशिष्टकर्मोदयाद्विशिष्टसंस्थानवत्शरीरस्वामिनः सत्त्वास्तेषामुत्तमाः सहजतथाभव्यत्वादिभावतः श्रेष्ठाः पुरुषोत्तमाः; तथाहि—आसंसारमेते परार्थव्यसनिन उपसर्जनीकृतस्वार्था उपचितक्रियावन्तोऽदीनभावाः सफलारम्भिणो दृढानुशयाः कृतज्ञतापतयोऽनुपहतचित्ता देवगुरुबहुमानिनो गम्भीराशया इति। न खल्वसमारचितमपि जात्यरत्नं समानमितरेण। न च समारचितोऽपि काचादिर्जात्यरत्नीभवति। एवं च यदाहुः सौगताः—नास्तीह कश्चिदभाजन सत्त्व इति, सर्वे बुद्धा भविष्यन्ति इति च; तद् प्रत्युक्तम्। एते च बाह्यार्थसंवादसत्यवादिभिः संस्कृताचार्यशिवैर्निरुपमानस्तवार्हा एवेष्यन्ते हीनाधिकाभ्यामुपमा मृषेति वचनात्तदवच्छेदार्थमाह—पुरुषसिंहेभ्यः पुरुषाः सिंहा इव प्रधान

(१) भगवंस्तीर्थं प्रवर्तयत।

शौर्यादिगुणभावेन पुरुषसिंहाः, यथा सिंहाः शौर्यादिगुणयोगिनः तथा भगवन्तोऽपि कर्मशत्रून् प्रति शूरतया तदुच्छेदं प्रति क्रूरतया क्रोधादीन् प्रत्यसहनतया रागादीन् प्रति वीर्ययोगेन तपःकर्म प्रति वीरतया ख्याताः, तथा एषामवज्ञा परीषहेषु, न भयमुपसर्गेभ्यः, न चिन्ताऽपि इन्द्रियवर्गे, न खेदः संयमाध्वनि, न प्रकम्पो ध्याने, न चैवमुपमा वृथा तदाशेन तदसाधारणगुणाभिधानादिति । एते च कुवादिभिः सजातीयोपमायोगेन एवेष्यन्ते विजातीयोपमायां तत्तद्धर्मापत्त्या पुरुषत्वाद्यभावप्राप्तिः । यदाहुः—न विजातीयोपमायोगे तद्धर्मापत्त्या तदवस्तुत्वमिति तद्व्यपोहायाह—पुरुषवरपुण्डरीकेभ्यः पुरुषा वरपुण्डरीकाणीव संसारजलासङ्गादिना धर्मकलापेन पुरुषवरपुण्डरीकाणि तेभ्यः, यथाहि पुण्डरीकाणि पङ्के जातानि जलेन वर्धितानि तदुभयं विहायोपरि वर्तन्ते प्रकृतिसुन्दराणि च भवन्ति निवासो भुवनलक्ष्म्याः, आयतनं चक्षुराद्यानन्दस्य प्रवरगुणयोगतो विशिष्टतिर्यङ्नरामरैः सेव्यन्ते सुखहेतवो भवन्ति; तथा भगवन्तोऽपि कर्मपङ्के जाता दिव्यभोगजलेन वर्धिता उभयं विहाय वर्तन्ते, सुन्दराश्चातिशययोगेन निवासो गुणसम्पदः, हेतवः परमानन्दस्य केवलादिगुणभावेन तिर्यङ्नरामरैः सेव्यन्ते निर्वृत्तिसुखहेतवश्च जायन्ते इति भिन्नजातीयोपमायोगेऽप्यर्थतो विरोधाभावेन यथोदितदोषाऽसम्भवः । यदि तु विजातीयोपमायोगेन तद्धर्मापत्तिरापाद्यते तर्हि सिंहादिसजातीयोपमायोगे तद्धर्माणां पशुत्वादीनामप्यापत्तिः स्यादिति । एतेऽपि यथोत्तरं गुणक्रमाभिधानवादिभिः सुरगुरो-

इति वचनात्, तदिह येषामेव बीजाधानोद्भेदपोषणैर्योगः,
च तत्तदुपद्रवरक्षणेन ते एव भव्या लोकशब्देन गृह्यन्ते, न
योगक्षेमे सकलभव्यसत्त्वविषये कस्यचित्सम्भवतः सर्वेषामेव मु
प्रसङ्गात्तस्मादुक्तस्यैव लोकस्य नाथा इति. तथा लोकहितेभ्यः,
लोकशब्देन सकल एव सांव्यवहारिकादिभेदभिन्नः प्राणि
गृह्यते, तस्मै सम्यग्दर्शनप्ररूपणरक्षणायोगेन हिता लोकहित
तथा लोकप्रदीपेभ्यः, अत्र लोकशब्देन विशिष्ट एव देशनांशु
मिथ्यात्वतमोऽपनयनेन यथार्हं प्रकाशितज्ञेयभावः संज्ञिलोकः प
गृह्यते तं प्रत्येव भगवतां प्रदीपत्वोपपत्तेः। नह्यन्धं प्रति प्रदी
प्रदीपो नाम। तदेवंविधं लोकं प्रति प्रदीपा लोकप्रदीपाः, त
लोकप्रद्योतकरेभ्यः, इह लोकशब्देन विशिष्टचतुर्दशपूर्वविल्लो
परिगृह्यते, तत्रैव तत्त्वतः प्रद्योतकरत्वोपपत्तेः, प्रद्योतं च
प्रकारं जीवादिवस्तुतत्त्वं तत्प्रद्योतकरणञ्च विशिष्टानामेव पूर्व
भवति, तेऽपि षट्स्थानपतिता एव श्रूयन्ते, न च तेषां सर्वेषाम
प्रद्योतः सम्भवति, प्रद्योतो हि विशिष्टतत्त्वसंवेदनयोग्यता सा
विशिष्टानामेव भवति। तेन विशिष्टचतुर्दशपूर्वविल्लोकापेक्ष
प्रद्योतकरा एवं लोकोत्तमत्वादिभिः पञ्चभिः प्रकारैः पर
करणाः स्तोतव्यसम्पदः सामान्येनोपयोगसम्पच्चतुर्थी।४। इदा
मुपयोगसम्पद एव हेतुसंपदुच्यते। अभयदयाणं चक्खुदय
मग्गदयाणं सरणदयाणं बोहिदयाणं—इह अभयं सप्तधा इ
परलोका-ऽऽदाना-ऽकस्मादा-ऽऽजीव-मरण-श्लाघाभेदेनैतत्प्रतिपक्ष
ऽभयं विशिष्टमात्मनः स्वास्थ्यं निःश्रेयसे धर्मभूमिकानिबन्धन

धृतिरित्यन्येषां तदित्थंभूतमभयं गुणप्रकर्षयोगादचिन्त्यशक्तियुक्तत्वात् सर्वथा परार्थकारित्वाद् भगवन्त एव ददतीत्यभयदास्तेभ्यः; तथा चक्षुर्देभ्यः, इह चक्षुर्विशिष्टमात्मधर्मरूपं तत्त्वावबोधनिबन्धनं गृह्यते। तच्च श्रद्धेत्यन्येषां तद्विहीनस्याचक्षुष्मत इव वस्तुतत्त्वदर्शनायोगाद्, न च मार्गाऽनुसारिणी श्रद्धा सुखेनावाप्यते सत्यां चास्यां कल्याणचक्षुषो भवति वस्तुतत्त्वदर्शनम्, तदियं धर्मकल्पद्रुमस्यावन्ध्यबीजभूता भगवद्भ्य एव भवतीति चक्षुर्ददतीति चक्षुर्दाः; तथा मार्गदेभ्यः, इह मार्गो भुजङ्गमनलिकायामतुल्यो विशिष्टगुणस्थानावाप्तिप्रवणः स्वरसवाही क्षयोपशमविशेषोऽयमसुमन्ये सुखेत्याचक्षते अस्मिन्सति न यथोचितगुणस्थानावाप्तिर्मार्गविषमतया चेतःस्खलनेन प्रतिबन्धोपपत्तेः, मार्गश्च भगवद्भ्य एवेति मार्गं ददतीति मार्गदाः; तथा शरणदेभ्यः, इह शरणं भयार्तत्राणं तच्च संसारकान्तारगतानामतिप्रबलरागादिपीडितानां समाश्वासनस्थानकल्पं तत्त्वचिन्तारूपमध्यवसानं विविदिषेत्यन्येषामस्मिंश्च सति तत्त्वगोचराः शुश्रूषा-श्रवण ग्रहण धारण-विज्ञानो हाऽपोह तत्त्वाभिनिवेशाः प्रज्ञागुणा भवन्ति। तत्त्वचिन्तामन्तरेण तेषामभावात् सम्भवन्त्यस्तु तामन्तरेणाऽपि तदाभासा न पुनः स्वार्थसाधकत्वेन भावसाराः, तत्त्वचिन्तारूपं शरणं भगवद्भ्य एव भवतीति शरणं ददतीति शरणदाः; तथा बोधिदेभ्यः, इह बोधिर्जिनप्रणीतधर्मप्राप्तिः, इयं पुनर्यथाप्रवृत्तापूर्वानिवृत्तिकरणत्रयाभिव्यक्तग्रन्थिभेदपूर्वकमभिव्यक्तः प्रशमसंवेगनिर्वेदा-

कम्पास्तिक्याभिव्यक्तिलक्षणं तत्त्वार्थश्रद्धानं सम्यग्दर्शनमुच्यते विज्ञप्तिरित्यन्ये। पञ्चकमप्येतदपुनर्बन्धकस्य, पुनर्बन्धके यथोचितस्यास्याभावादिति च यथोत्तरं पूर्वपूर्वफलभूताः, तथा हि-अभयफलं चक्षुः, चक्षुःफलं मार्गः मार्गफलं शरणम्, शरणफलं बोधिः सा च भगवद्भ्य एव भवतीति बोधिं ददतीति बोधिदाः। एवमभयदानचक्षुर्दानमार्गदानशरणदानबोधिदानेभ्यो यथोदितोपयोगसिद्धेरुपयोगसम्पद एव हेतुसम्पदुक्ता; साम्प्रतं स्तोतव्यसम्पद एव विशेषोपयोगसम्पदुच्यते—धम्मदयाणं धम्मदेसयाणं धम्मनायगाणं धम्मसारहीणं धम्मवरचाउरन्तचक्कवट्टीणं—धर्मदेभ्यः, इह धर्मश्चारित्रधर्मो गृह्यते स च यति-श्रावकसम्बन्धिभेदेन द्वेधा यतिधर्मः सर्वसावद्ययोगविरतिलक्षणः; श्रावकधर्मस्तु देशविरतिरूपः, स चायमुभयरूपोऽपि भगवद्भ्य एव हेत्वन्तराणां सद्भावेऽपि भगवतामेव प्रधानहेतुत्वादिति धर्मं ददतीति धर्मदाः, धर्मदत्वं च धर्मदेशनाद्वारेणैव भवति नान्यथेत्याह—धर्मदेशकेभ्यः, धर्मं प्रस्तुतं यथाभव्यमवन्ध्यतया देशयन्तीति धर्मदेशकाः, तथा धर्मनायकेभ्यः, धर्मोऽधिकृत एव तस्य नायकाः स्वामिनस्तद्वशीकरणभावात् तदुत्कर्षप्राप्तेस्तत्फलभोगात् तद्विघातानुपपत्तेश्च धर्मनायकाः, तथा धर्मसारथिभ्यः प्रस्तुतस्य धर्मस्य स्वपरापेक्षया सम्यक्प्रवर्तनपालनदमनयोगतः सारथयो धर्मसारथयः, तथा धर्मवरचतुरन्तचक्रवर्तिभ्यः, धर्मः प्रस्तुतः स एव त्रिकोटिपरिशुद्धितया कुगतादिप्रणीतधर्मचक्रापेक्षया उभयलोकहितत्वेन चक्रवर्त्यादिचक्रापेक्षया च वरं प्रधानं

चतसृणां गतीनां नारकतिर्यग्नरामरलक्षणानामन्तो यस्मात् तच्चतुरन्तं चक्रमिव चक्रं रौद्रमिथ्यात्वादिभावशत्रुलवनात्तेन वर्तन्ते इत्येवंशीला धर्मवरचतुरन्तचक्रवर्तिनः चाउरन्तेति सम्- ज्ञादित्वादात्वमेवं धर्मदत्वादिभिः पञ्चभिः स्तोतव्यसम्पदेव विशे- षोपयोगसम्पदुक्ता । ६ । इदानीं

सर्वं पश्यतु वा मा वा तत्त्वमिष्टं तु पश्यतु ।
कीटसंख्यापरिज्ञानं तस्य नः क्वोपयुज्यते ? ॥ १ ॥ इति

सर्वदर्शनप्रतिक्षेपेणेष्टतत्त्वदर्शनवादिनः सौगतान् प्रतिक्षिपन्ति अप्पडिहयवरनाणदंसणधराणं वियट्टछउमाणं — अप्रतिहते क्वा- ऽप्रतिस्खलिते वरे क्षायिकत्वात् प्रधाने ज्ञानदर्शने विशेष- सामान्यावबोधरूपे धारयन्तीति अप्रतिहतवरज्ञानदर्शनधराः । अप्रतिहतवरज्ञानदर्शनधरत्वं च निरावरणत्वेन सर्वज्ञानदर्शि- स्वभावतया च, ज्ञानपूर्वकं चादौ सर्वा लब्धयः साकारोप- योगोपयुक्तस्येति ज्ञापनार्थमिति । एते च कैश्चित् [illegible] [illegible] यदाह

ज्ञानिनो धर्मतीर्थस्य कर्तारः परमं पदम् ।
गत्वा गच्छन्ति भूयोऽपि भवं तीर्थनिकारतः ॥ १ ॥

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

तन्निवृत्त्यर्थमाह—व्यावृत्तच्छद्मभ्यः, छादयतीति छद्म ज्ञानावरणादिघातिकर्म तद्बन्धयोग्यतालक्षणो भवाधिकारश्च, व्यावृत्तं निवृत्तं छद्म येभ्यस्ते तथाविधाः, नाऽक्षीणे संसारे अपवर्गः क्षीणे च जन्मपरिग्रह इत्यसत्, हेत्वभावात्। न च तीर्थनिकारजन्मपराभवो हेतुस्तेषां मोहाभावात् मोहे वा अपवर्ग इति प्रलापमात्रमेवमप्रतिहतवरज्ञानदर्शनधरत्वेन व्यावृत्तच्छद्मतया च स्तोतव्यसम्पद एव सकारणा स्वरूपसम्पत्। एते च कल्पिता विद्यावादिभिः परमार्थतो जिनादय एवेष्यन्ते भ्रान्तिमात्रमसद्विद्येति वचनात् एतद्व्यपोहाय आह—जिणाणं जावयाणं रागादिजेतृत्वाज्जिनाः, न च रागादीनामसत्त्वं प्रतिप्राण्यनुभवसिद्धत्वात्। न चाऽनुभवोऽपि भ्रान्तः सुखदुःखाद्यनुभवेष्वपि भ्रान्तिप्रसङ्गात्, एवं च जेयसम्भवाज्जिनत्वमविरुद्धम्। एवं रागादीनेव सदुपदेशादिना जापयन्तीति जापकाः तेभ्यः, एतेऽपि कालकारणवादिभिरनन्तशिष्यैर्भावतोऽतीर्णादय एवेष्यन्ते काल एव कृत्स्नं जगदावर्तयति इति वचनात् एतन्निरासायाह—तिण्णाणं तारयाणं—सम्यग्ज्ञानदर्शनचारित्रपोतेन भवार्णवं तीर्णवन्तः तीर्णाः, न चैषां तीर्णानां पारगतानामावर्तः सम्भवति तद्भावे मुक्त्यसिद्धेः, एवं च न मुक्तः पुनर्भवे भवतीति तीर्णत्वसिद्धिः, एवं तारयन्ति अन्यानपीति तारकास्तेभ्यः, एतेऽपि परोक्षज्ञानवादिभिर्मीमांसकभेदैरबुद्धादय एवेष्यन्ते अप्रत्यक्षा हि नो बुद्धिः प्रत्यक्षोऽर्थः इति वचनात् एतद्व्यवच्छेदार्थमाह—बुद्धाणं बोहयाणं—अज्ञाननिद्राप्रसुप्ते ज [illegible] -देशेन जीवाजीवादिरूपं तत्त्वं स्वसंविदित

चतसृणां गतीनां नारकतिर्यग्नरामरलक्षणानामन्तो यस्मात् तच्चतुरन्तं चक्रमिव चक्रं रौद्रमिथ्यात्वादिभावशत्रुलवनात्तेन वर्तन्ते इत्येवंशीला धर्मवरचतुरन्तचक्रवर्तिनः तेभ्य इति सम्प्रदानादिलक्षणमिदं धर्मदत्वादिभिः पञ्चभिः स्तोतव्यसम्पदेव विशेषोपयोगसम्पदुक्ता । ६ । इदानीं

सर्वं पश्यतु वा मा वा तत्त्वमिष्टं तु पश्यतु ।

कीटसंख्यापरिज्ञानं तस्य नः क्वोपयुज्यते ? ॥ १ ॥ इति सर्वदर्शनप्रतिक्षेपेणेष्टतत्त्वदर्शनवादिनः सौगतान् प्रतिक्षिपति-अप्पडिहयवरनाणदंसणधराणं वियट्टछउमाणं —अप्रतिहते सर्वत्राऽप्रतिस्खलिते वरे क्षायिकत्वात् प्रधाने ज्ञानदर्शने विशेषसामान्यावबोधरूपे धारयतीति अप्रतिहतवरज्ञानदर्शनधरास्तेभ्यः, अप्रतिहतवरज्ञानदर्शनधरत्वं च निरावरणत्वेन सर्वज्ञानदर्शनस्वभावतया च, ज्ञानग्रहणं चादौ सर्वा लब्धयः साकारोपयोगोपयुक्तस्येति ज्ञापनार्थमिति । एते च केचित्तत्त्वतः खल्वव्यावृत्तच्छद्मान एवेष्यन्ते यदाह—

ज्ञानिनो धर्मतीर्थस्य कर्तारः परमं पदम् ।

गत्वा गच्छन्ति भूयोऽपि भवं तीर्थनिकारतः ॥ १ ॥

।—

दग्धेन्धनः पुनरुपैति भवं प्रमथ्य

निर्वाणमप्यनवधारितभीरुनिष्ठम् ।

मुक्तः स्वयं कृतभवश्च परार्थशूर-

स्त्वच्छासनप्रतिहतेष्विह मोहराज्यम् ॥ १ ॥ इति ।

तन्निवृत्त्यर्थमाह—व्यावृत्तच्छद्मभ्यः, छादयतीति छद्म ज्ञानावरणादिघातिकर्म तद्बन्धयोग्यतालक्षणो भवाधिकारश्च, व्यावृत्तं निवृत्तं छद्म येभ्यस्ते तथाविधाः, नाऽक्षीणे संसारे अपवर्गः क्षीणे च जन्मपरिग्रह इत्यसत्, हेत्वभावात्। न च तीर्थनिकारजन्मपराभवो हेतुस्तेषां मोहाभावात् मोहे वा अपवर्ग इति प्रलापमात्रमेवमप्रतिहतवरज्ञानदर्शनधरत्वेन व्यावृत्तच्छद्मतया च प्रीतव्यमस्यट एव सकारणा स्वरूपमस्यत्। एते च कल्पिता विद्यावादिभिः परमार्थतो जिनादय एवेष्यन्ते भ्रान्तिमात्रमसदित्येति वचनात् एतदपोहाय आह—जिणाणं जावयाणं रागादिजेतृत्वाज्जिनाः, न च रागादीनामसत्त्वं प्रतिप्राण्यनुभवसिद्धत्वात्। न चानुभवोऽपि भ्रान्तः सुखदुःखाद्यनुभवेष्वपि भ्रान्तिप्रसङ्गात्, एवं च जयसम्भवाज्जिनत्वमविरुद्धम्। एवं रागादीनेव सदुपदेशादिना जापयन्तीति जापकाः तेभ्यः, एतेऽपि कालकारणवादिभिरनन्तशोऽभिमतो ऽतीर्णादय एवेष्यन्ते काल एव कारणं जगदायतनमिति वचनात् एतन्निरासायाह—तिण्णाणं तारयाणं सम्यग्ज्ञानदर्शनचारित्रपोतेन भवार्णवं तीर्णवन्तः तीर्णाः, न चैषां तीर्णानां पारसम्भा-सावतः समावति तद्भावे गुणवृद्धिः, एवं च न भवः पुनर्भवतीति तीर्णत्वसिद्धिः, एवं तारयन्ति अन्यानपीति तारका-स्तेभ्यः, एतेऽपि परोक्षज्ञानवादिभिर्मीमांसकभेदैर्बुद्धादय एवेष्यन्ते अप्रत्यक्षा हि नो बुद्धिः प्रत्यक्षोऽर्थः इति वचनात् एतद्व्यवच्छेदार्थमाह—बुद्धाणं बोहयाणं अज्ञाननिद्राप्रसुप्ते जगत्यपरोपदेशेन जीवाजीवादिरूपं तत्त्वं बुद्धवन्त इति बु

चतसृणां गतीनां नारकतिर्यग्नरामरलक्षणानामन्तो यस्मात् तच्चतुरन्तं चक्रमिव चक्रं रौद्रमिथ्यात्वादिभावशत्रुलवनात्तेन वर्तन्ते इत्येवंशीला धर्मवरचतुरन्तचक्रवर्तिनः चाउरन्तेति समृद्धादित्वाद्दीर्घत्वमेवं धर्मदत्वादिभिः पञ्चभिः स्तोतव्यसम्पदेव विशेषोपयोगसम्पदुक्ता । ६ । इदानीं

सर्वं पश्यतु वा मा वा तत्त्वमिष्टं तु पश्यतु ।
कीटसंख्यापरिज्ञानं तस्य नः क्वोपयुज्यते ? ॥ १ ॥

इति सर्वदर्शनप्रतिक्षेपेणेष्टतत्त्वदर्शनवादिनः सौगतान् प्रतिक्षिपति— अप्पडिहयवरनाणदंसणधराणं वियट्टछउमाणं—अप्रतिहते सर्वत्राऽप्रतिस्खलिते वरे क्षायिकत्वात् प्रधाने ज्ञानदर्शने विशेषसामान्यावबोधरूपे धारयतीति अप्रतिहतवरज्ञानदर्शनधरास्तेभ्यः, अप्रतिहतवरज्ञानदर्शनधरत्वं च निरावरणत्वेन सर्वज्ञानदर्शनस्वभावतया च, ज्ञानग्रहणं चादौ सर्वा लब्धयः साकारोपयोगोपयुक्तस्येति ज्ञापनार्थमिति । एते च केचित्तत्त्वतः खल्वव्यावृत्तच्छद्मान एवेष्यन्ते यदाह—

ज्ञानिनो धर्मतीर्थस्य कर्तारः परमं पदम् ।
गत्वा गच्छन्ति भूयोऽपि भवं तीर्थनिकारतः ॥ १ ॥

तथा—

दग्धेन्धनः पुनरुपैति भवं प्रमथ्य
निर्वाणमप्यनवधारितभीरुनिष्ठम् ।
मुक्तः स्वयं कृतभवश्च परार्थशूर-
स्त्वच्छासनप्रतिहतेष्विह मोहराज्यम् ॥ १ ॥ इति ।

ा: श्रात्मानोऽपि, महान्तो भोगिवृत्तयः।
द्रकावच विज्ञानं तदावरणसम्भवम् ॥ १ ॥
रणाभावे कर्ता तत्फलसाधक इत्यप्यनैकान्तिकम्,
वकस्य तरण्डकाभावेऽपि प्लवनदर्शनात् इति बुद्धि-
णमन्तरेणाऽपि आत्मन: सर्वज्ञत्वसर्वदर्शित्वसिद्धि:।
ज्ञानस्य विशेषविषयत्वाद् दर्शनस्य च सामान्यविषय-
: सर्वार्थविषयत्वमयुक्तं तदुभयस्य सर्वार्थविषयत्वादि-
इ सामान्यविशेषयोर्भेद एव, किन्तु ते एव पदार्था:
या संप्रज्ञायमाना: सामान्यविशेषशब्दाभिधेयतां प्रति-
श्च ते एव ज्ञायन्ते ते एव दृश्यन्ते इति युक्तं ज्ञान-
र्वार्थविषयत्वमिति। ननु ज्ञानेन विषमताधर्म-
एव गम्यन्ते न समताधर्मविशिष्टा अपि दर्शनेन
धर्मविशिष्टा एव गम्यन्ते न विषमताधर्मविशिष्टा
श्च ज्ञानदर्शनाभ्यां समताविषमतालक्षणधर्मद्वयाऽग्र-
व तयो: सर्वार्थविषयत्वमिति न, धर्मधर्मिणो: सर्वथा-
मात्। ततश्चाभ्यन्तरीकृतसमताख्यधर्माण एव विष-
शिष्टा ज्ञानेन गम्यन्ते अभ्यन्तरीकृतविषमताख्य-
समताधर्मविशिष्टा दर्शनेन गम्यन्ते इति ज्ञान-
सर्वार्थविषयत्वमिति सर्वज्ञा: सर्वदर्शिनश्च तेभ्य:।
ताल्मत्रादिभिर्मुक्तत्वे सति न नियतस्थानस्था एवेष्यन्ते।
"मुक्ता: सर्वत्र तिष्ठन्ति व्योमवत्तापवर्जिता:" इति।

बुद्धाः, न चास्वसंविदितेन ज्ञानेनार्थज्ञानं सम्भवति। न ह्यदृष्टप्रदीपो बाह्यमर्थं प्रत्यक्षीकरोति, न चेन्द्रियवदस्वसंविदितस्याऽपि ज्ञानस्यार्थप्रत्यक्षीकरणमिन्द्रियस्य भावेन्द्रियत्वात् तस्य च स्वसंविदितरूपत्वात्

यदाह—

अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिद्ध्यति ॥

एवं च सिद्धं बुद्धत्वमेवमपरानपि बोधयन्तीति बोधकास्तेभ्यः, एतेऽपि जगत्कर्तृलीनमुक्तवादिभिः सन्तपनविनेयैस्तत्त्वतोऽमुक्तादय एवेष्यन्ते, ब्रह्मवद् ब्रह्मसङ्गतानां स्थितिरिति वचनात् एतन्निराचिकीर्षयाऽऽह—मुत्ताणं मोअगाणं–चतुर्गतिविपाकचित्रकर्मबन्धमुक्तत्वान् मुक्ताः कृतकृत्या निष्ठितार्था इत्यर्थः, न च जगत्कर्तरि लये निष्ठितार्थत्वं सम्भवति, जगत्करणेन कृतकृत्यत्वायोगात् हीनादिकरणे च रागद्वेषाऽनुषङ्गः, न चान्यताऽन्यस्य लयः सम्भवति एकतराभावप्रसङ्गात् एवं च जगत्कर्तरि लयाभावाद् मुक्तत्वसिद्धिः, एवं मोचयन्त्यन्यानपीति मोचकास्तेभ्यः. एवं च जिनत्वजापकत्वतीर्णत्वतारकत्वबुद्धत्वबोधकत्वमुक्तत्वमोचकत्वैः स्वपरहितसिद्धेरात्मफलकर्तृत्वं सम्पदष्टमी ।८। एतेऽपि बुद्धियोगज्ञानादिभिः कापिलैरसर्वज्ञा असर्वदर्शिन एवेष्यन्ते बुद्ध्यध्यवसितमर्थं पुरुषश्चेतयते इति वचनात् एतन्निराकरणायाह—सव्वन्नूणं सव्वदरिसीणं—सर्वं जानन्तीति सर्वज्ञाः सर्वं पश्यन्तीत्येवंशीलाः सर्वदर्शिनः तत्स्वभावत्वे निरावरणत्वात्

स्तवक

स्थिताः शीतांशुवज्जीवाः प्रकृत्या भावशुद्धया ।
चन्द्रिकावच्च विज्ञानं तदावरणमभ्रवत् ॥ १ ॥

न, तत्स्वाभाव्ये वक्ता तद्धर्मसाधक इत्यनैकान्तिकम्, चरितार्थत्वादेः तत्स्वभावत्वेऽपि ज्ञानदर्शनात् इति युक्तिबलेन तत्स्वभावत्वेऽपि आत्मनः सर्वज्ञत्वसर्वदर्शित्वसिद्धिः। यत्तूक्तं ज्ञानस्य विशेषविषयत्वाद् दर्शनस्य च सामान्यविषयत्वात्, तयोः सर्वार्थविषयत्वमयुक्तं तदुभयस्य सर्वार्थविषयत्वादित्युक्तं नहि सामान्यविशेषयोर्भेद एव, किन्तु त एव पदार्थाः तत्तद्विवक्षया संप्रज्ञायमानाः सामान्यविशेषशब्दाभिधेयतां प्रतिपद्यन्ते ततश्च त एव ज्ञायन्ते त एव दृश्यन्ते इति युक्तं ज्ञानदर्शनयोः सर्वार्थविषयत्वमिति। ननु ज्ञानेन विषमताधर्मविशिष्टा एव गम्यन्ते न समताधर्मविशिष्टा अपि दर्शनेन च समताधर्मविशिष्टा एव गम्यन्ते न विषमताधर्मविशिष्टा अपि। ततश्च ज्ञानदर्शनाभ्यां समताविषमतालक्षणधर्मद्वयाऽग्रहणादयुक्तमेव तयोः सर्वार्थविषयत्वमिति न, धर्मधर्मिणोः सर्वथाभेदानभ्युपगमात्। ततश्चाभ्यन्तरीकृतसमताख्यधर्माण एव विषमताधर्मविशिष्टा ज्ञानेन गम्यन्ते अभ्यन्तरीकृतविषमताख्यधर्माण एव समताधर्मविशिष्टा दर्शनेन गम्यन्ते इति ज्ञानदर्शनयोर्नाऽसर्वार्थविषयत्वमिति सर्वज्ञाः सर्वदर्शिनश्च ते॥। एते च सर्वगतात्मवादिभिर्मुक्तत्वे सति न नियतस्थानस्था एवेष्यन्ते। यदाहुस्ते—"मुक्ताः सर्वत्र तिष्ठन्ति व्योमवत्तापवर्जिताः" इति।

[illegible], न चात्मसंनिहितेन ज्ञानेनार्थज्ञानं सम्भवति। न चादृष्टदोषो [illegible] सर्वं प्रत्यक्षीकरोति, नचेन्द्रियादिसामग्रीविरहितस्यापि ज्ञानस्य [illegible] कारणमिन्द्रियस्य साक्षित्वात् तस्य च [illegible] [illegible]

[illegible]

[illegible] नाभिधीयते ॥

[illegible]

उक्तञ्च—

स्थितः शीतांशुवज्जीवः प्रकृत्या भावशुद्धया।
चन्द्रिकावच्च विज्ञानं तदावरणमभ्रवत्॥ १॥

न कारणाभावे कर्ता तत्फलसाधक इत्यप्यनैकान्तिकम्, परनिष्ठितप्लवकस्य तरण्डकाभावेऽपि प्लवनदर्शनात् इति बुद्धिलक्षणं कारणमन्तरेणाऽपि आत्मनः सर्वज्ञत्वसर्वदर्शित्वसिद्धिः। अन्यस्त्वाह—ज्ञानस्य विशेषविषयत्वाद् दर्शनस्य च सामान्यविषयत्वात्, तयोः सर्वार्थविषयत्वमयुक्तं तदुभयस्य सर्वार्थविषयत्वादित्युच्यते नहि सामान्यविशेषयोर्भेद एव, किन्तु ते एव पदार्थाः समविषमतया संप्रज्ञायमानाः सामान्यविशेषशब्दाभिधेयतां प्रतिपद्यन्ते ततश्च ते एव ज्ञायन्ते ते एव दृश्यन्ते इति युक्तं ज्ञानदर्शनयोः सर्वार्थविषयत्वमिति। ननु ज्ञानेन विषमताधर्मविशिष्टा एव गम्यन्ते न समताधर्मविशिष्टा अपि दर्शनेन च समताधर्मविशिष्टा एव गम्यन्ते न विषमताधर्मविशिष्टा अपि। ततश्च ज्ञानदर्शनाभ्यां समताविषमतालक्षणधर्मद्वयाऽग्रहणादयुक्तमेव तयोः सर्वार्थविषयत्वमिति न, धर्मधर्मिणोः सर्वथाभेदानभ्युपगमात्। ततश्चाभ्यन्तरीकृतसमताख्यधर्माण एव विषमताधर्मविशिष्टा ज्ञानेन गम्यन्ते अभ्यन्तरीकृतविषमताख्यधर्माण एव समताधर्मविशिष्टा दर्शनेन गम्यन्ते इति ज्ञानदर्शनयोर्नाऽसर्वार्थविषयत्वमिति सर्वज्ञाः सर्वदर्शिनश्च तेभ्यः। एते च सर्वगतात्मवादिभिर्मुक्तत्वे सति न नियतस्थानस्था एवेष्यन्ते। यदाहुस्ते—"मुक्ताः सर्वत्र तिष्ठन्ति व्योमवत्तापवर्जिताः" इति।

[illegible], न चास्मासंविदितेन [illegible] सम्भवति। न [illegible] [illegible] करोति, न [illegible] [illegible] [illegible] तस्य च [illegible]

[illegible]

[illegible]

[illegible] ॥

[illegible]

[illegible]

बुद्धाः, न चास्वसंविदितेन ज्ञानेनार्थज्ञानं सम्भवति। न ह्यदृष्टप्रदीपो बाह्यमर्थं प्रत्यक्षीकरोति, न चेन्द्रियवदस्वसंविदितस्याऽपि ज्ञानस्या-र्थप्रत्यक्षीकारणमिन्द्रियस्य भावेन्द्रियत्वात् तस्य च स्वसंविदित-रूपत्वात्

यदाह—

अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिद्ध्यति ॥

एवं च सिद्धं बुद्धत्वमेवमपरानपि बोधयन्तीति बोधकास्तेभ्यः। एतेऽपि जगत्कर्तृलीनमुक्तादिभिः सन्तापनविनेयैस्तत्त्वतोऽमुक्ता एव प्रख्यायन्ते, ब्रह्मवद् ब्रह्मसङ्गतानां स्थितिरिति वचनात् एतन्निरा-करणायाऽऽह—मुत्ताणं मोअगाणं—चतुर्गतिविपाकचित्रकर्मब-न्धमुक्तत्वान्मुक्ताः कृतकृत्या निष्ठितार्था इत्यर्थः, न च जगत्कर्तुरपि निष्ठितार्थत्वं सम्भवति, जगत्करणेन कृतकृत्यत्वायोगात् तत्करणे च रागद्वेषानुषङ्गः, न चान्यथाऽस्य लयः सम्भवति [illegible] नरकादिप्रसङ्गात् एवं च जगत्कर्तृत्वाभावात् मुक्तत्वसिद्धिः, ए[illegible] [illegible] मोचकास्तेभ्यः एवं च जिनत्व[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

उक्तञ्च —

स्थितः शीतांशुवज्जीवः प्रकृत्या भावशुद्धया ।

चन्द्रिकावच्च विज्ञानं तदावरणमभ्रवत् ॥ १ ॥

न करणाभावे कर्ता तत्फलसाधक इत्यप्यनैकान्तिकम्, परनिष्ठितप्लवकस्य तरण्डकाभावेऽपि प्लवनदर्शनात् इति बुद्धिलक्षणं करणमन्तरेणाऽपि आत्मनः सर्वज्ञत्वसर्वदर्शित्वसिद्धिः। अन्यस्त्वाह—ज्ञानस्य विशेषविषयत्वाद् दर्शनस्य च सामान्यविषयत्वात्, तयोः सर्वार्थविषयत्वमयुक्तं तदुभयस्य सर्वार्थविषयत्वादित्युच्यते नहि सामान्यविशेषयोर्भेद एव, किन्तु ते एव पदार्थाः समविषमतया संप्रज्ञायमानाः सामान्यविशेषशब्दाभिधेयतां प्रतिपद्यन्ते ततश्च ते एव ज्ञायन्ते ते एव दृश्यन्ते इति युक्तं ज्ञानदर्शनयोः सर्वार्थविषयत्वमिति। ननु ज्ञानेन विषमताधर्मविशिष्टा एव गम्यन्ते न समताधर्मविशिष्टा अपि दर्शनेन च समताधर्मविशिष्टा एव गम्यन्ते न विषमताधर्मविशिष्टा अपि। ततश्च ज्ञानदर्शनाभ्यां समताविषमतालक्षणधर्मद्वयाऽग्रहणादयुक्तमेव तयोः सर्वार्थविषयत्वमिति न, धर्मधर्मिणोः सर्वथाभेदानभ्युपगमात्। ततश्चाभ्यन्तरीकृतसमताख्यधर्माण एव विषमताधर्मविशिष्टा ज्ञानेन गम्यन्ते अभ्यन्तरीकृतविषमताख्यधर्माण एव समताधर्मविशिष्टा दर्शनेन गम्यन्ते इति ज्ञानदर्शनयोर्नाऽसर्वार्थविषयत्वमिति सर्वज्ञाः सर्वदर्शिनश्च तेभ्यः। एते च सर्वगतात्मवादिभिर्मुक्तत्वे सति न नियतस्थानस्था एवेष्यन्ते। यदाहुस्ते—"मुक्ताः सर्वत्र तिष्ठन्ति व्योमवत्तापवर्जिताः" इति।

[illegible]

[illegible] —

[illegible] ॥

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

मध्यव्यापीति जितभया अप्येते एव नान्ये इति प्रतिपादयितुमुप
संहरन्नाह—नमो जिणाणं जिअभयाणं–नमो जिनेभ्यो जितभयेभ्
इति तदेवं सव्वन्नूणं सव्वदरिसीणमित्यत आरभ्य नमो जिणाण
जिअभयाणमित्येवमन्तैस्त्रिभिरालापकैः प्रधानगुणाऽपरिक्षयप्रधान
फलावाप्तिरूपा सम्पन्नवमी ।९। अत्र स्तुतिप्रस्तावान्न पौनरुक्त्यशङ्का
करणीया । यदाह—

'सज्झाय-ज्झाण-तव-ओसहेसु उवएस-थुइ-पयाणेसु ।

सन्तगुणकित्तणेसु य न होन्ति पुणरुत्तदोसा ओ ॥ १ ॥

एताभिर्नवभिः सम्पद्भिः प्रणिपातदण्डक उच्यते, तत्पाठा-
नन्तरं प्रणिपातकरणाज्जिनजन्मादिषु स्वविमानेषु तीर्थप्रवृत्तेः
पूर्वमपि शक्रोऽनेन भगवतः स्तौतीति शक्रस्तवोऽप्युच्यते, अयञ्च
प्रायेण भावार्हद्विषयो भावार्हदध्यारोपाच्च स्थापनार्हतामपि
पुरः पठ्यमानो न दोषाय प्रणिपातदण्डकानन्तरं चाऽतीतानागत-
वर्तमानजिनवन्दनार्थं केचिदेतां गाथां पठन्ति—

²जे अ अईआ सिद्धा जे अ भविस्संति णागए काले ।

संपइ अ वट्टमाणा सव्वे तिविहेण वंदामि ॥ १ ॥

सुगमा चेयम् । ततश्चोत्थाय स्थापनार्हद्वन्दनार्थं जिनमुद्रया
अरिहंतचेइयाणमित्यादिसूत्रं पठति । अर्हतां पूर्वोक्तस्वरूपाणां

---

(१) स्वाध्याय-ध्यान-तप-औषधेषूपदेश-स्तुति-प्रदानेषु ।
सद्गुणकीर्तनेषु च न भवन्ति पुनरुक्तदोषास्तु ॥ १ ॥

(२) ये चातीताः सिद्धा ये च भविष्यन्त्यनागते काले ।
सम्प्रति च वर्तमानाः सर्वान् त्रिविधेन वन्दे ॥ २ ॥

तन्निराकरणार्थमाह—सिवमयलमरुअमणंतमक्खयमव्वाबाहमपुण-राविति सिद्धिगइनामधेयं ठाणं संपत्ताणं—शिवं सर्वोपद्रव-रहितत्वात्, अचलं स्वाभाविकप्रायोगिकचलनक्रियारहितत्वात्, अरुजं व्याधिवेदनारहितं तन्निबन्धनयोः शरीरमनसोरभावात्, अनन्तमनन्तज्ञानविषयत्वयुक्तत्वात्, अक्षयं विनाशकारणाभावात्, अव्याबाधमकर्मत्वात्, अपुनरावृत्तिः, न पुनरावृत्तिः संसारेऽवतारो यस्मात् सिद्धिगतिनामधेयं सिद्ध्यन्ति निष्ठितार्था भवन्त्यस्यां जन्तव इति सिद्धिर्लोकान्तक्षेत्रलक्षणा सैव गम्यमानत्वाद्गतिः, सिद्धि-गतिरेव नामधेयं यस्य तत्तथा, स्थानं तिष्ठन्त्यस्मिन्निति स्थानं व्यवहारतः सिद्धिक्षेत्रम्। यदाहुः—'इह बुन्दिं चइत्ता णं तत्थ-गंतूण सिज्झइ इति। निश्चयतस्तु स्वस्वरूपमेव सर्वे भावा आत्मभावे तिष्ठन्तीति वचनात्, विशेषणानि च निरुपचरितत्वेन यद्यपि मुक्तात्मन्येव भूयसा सम्भवन्ति तथापि स्थानस्थानिनोरभेदोपचारा-देवं व्यपदेशः, तदेवंविधं स्थानं सम्प्राप्ताः सम्यगशेषकर्मविच्युत्या स्वरूपगमनेन परिणामान्तरापत्त्या प्राप्तास्तेभ्यः, न हि विभूनामेवं-विधप्राप्तिसम्भवः, सर्वगतत्वे सति सदैकस्वभावत्वात्, नित्यानां चैकरूपतया अवस्थानं तद्भावाव्ययस्य नित्यत्वात्। अतः क्षेत्रतो-ऽसर्वगतपरिणामिनामेवैवं प्राप्तिः सम्भवति, अत एव काय-प्रमाणमात्मेति सुस्थितं वचनं तेभ्यो नम इति क्रियायोगः एवंभूता एव प्रेक्षावतां नमस्कारार्हा आद्यन्तसङ्गतश्च नमस्कारो

(१) इह शरीरं त्यक्त्वा तत्र गत्वा सिध्यति।

श्रावकस्तु सम्पादयन्नपि एतौ भावातिशयादधिकसम्पादनार्थं पूजासत्कारौ प्रार्थयमानो न निष्फलारम्भः, तथा सम्माणवत्तिआए-सम्मानप्रत्ययं सन्माननिमित्तं सन्मानः स्तुत्यादिभिर्गुणोन्नतिकरणं मानसप्रीतिविशेष इत्यन्ये; अथ वन्दनादयः किंनिमित्तमित्याह – बोहिलाभवत्तिआए-बोधिलाभोऽर्हत्प्रणीतधर्मावाप्तिस्तत्प्रत्ययं तन्निमित्तं बोधिलाभोऽपि किंनिमित्तमित्याह—निरुवसग्गवत्तिआए-जन्माद्युपसर्गाभावेन निरुपसर्गो मोक्षस्तत्प्रत्ययं तन्निमित्तं ननु साधुश्रावकयोर्बोधिलाभोऽस्त्येव तत्किं सतस्तस्य प्रार्थनया बोधिलाभमूलो मोक्षोऽप्यनभिलषणीय एव, उच्यते क्लिष्टकर्मोदयवशेन बोधिलाभस्य प्रतिपातसम्भवात् जन्मान्तरे च तस्यार्थ्यमानत्वान्निरुपसर्गोऽपि तद्द्वारेण प्रार्थ्यत एवेति युक्तोऽनयोरुपन्यासः; अयं च कायोत्सर्गः क्रियमाणोऽपि श्रद्धादिविकलस्य नाभिलषितार्थप्रसाधनायाऽलमित्याह—सद्धाए मेहाए धिईए धारणाए अणुप्पेहाए वड्ढमाणीए ठामि काउसग्गं—श्रद्धा मिथ्यात्वमोहनीयकर्मक्षयोपशमादिजन्योदकप्रसादकमणिवच्चेतसः प्रसादजननी तया श्रद्धया न तु बलाभियोगादिना, एवं मेधया न जडत्वेन मेधा च सच्छास्त्रग्रहणपटुः पापश्रुताऽवज्ञाकारी ज्ञानावरणीयक्षयोपशमजचित्तधर्मः, अथवा मेधया मर्यादावर्तितया नाऽसमञ्जसत्वेन एवं धृत्या मनःसमाधिलक्षणया न रागद्वेषाद्याकुलतया एवं धारणया अर्हद्गुणाविस्मरणरूपया न तु तच्छून्यतया एवमनुप्रेक्षयाऽर्हद्गुणानामेव मुहुर्मुहुरनुस्मरणेन, न तद्विकलत्वेन वर्धमानतयेति श्रद्धादिभिः प्रत्येकमभिसम्बध्यते श्रद्धादीनां क्रमो-

पन्यासो लाभापेक्षया श्रद्धायां हि सत्यां मेधा तद्भावे धृतिस्ततो धारणा तदन्वनुप्रेक्षा वृद्धिरप्यासामेव। तिष्ठामि करोमि कायोत्सर्गं ननु प्राक्करोमि कायोत्सर्गमित्युक्तं साम्प्रतं तिष्ठामीति किमर्थमुच्यते ?, सत्यं सत्सामीप्ये सद्वत्प्रत्ययो भवतीति करोमि करिष्यामि इति क्रियाऽभिमुख्यं पूर्वमुक्तमिदानीं त्वासन्नतरत्वात् क्रियाकालनिष्ठाकालयोः कथञ्चिदभेदात् तिष्ठाम्येवाहमिति किं सर्वथा तिष्ठामि कायोत्सर्गं नेत्याह—अन्नत्थऊससिएणमित्यादि-व्याख्यातं पूर्वं कायोत्सर्गश्चाष्टोच्छ्वासमात्रो न त्वत्र ध्येयनियमोऽस्ति कायोत्सर्गान्ते च यद्येक एव ततो नमो अरिहंताणमिति नमस्कारेण पारयित्वा यत्र चैत्यं वन्दनां कुर्वन्नस्ति तत्र यस्य भगवतः सन्निहितं स्थापनारूपं तस्य स्तुतिं पठति। अथ बहवस्तत एक एव स्तुतिं पठति, अन्ये तु कायोत्सर्गस्थिता एव शृण्वन्ति यावत् स्तुतिसमाप्तिः, ततः सर्वेऽपि नमस्कारेण पारयन्तीति तदनन्तरं तस्यामेवावसर्पिण्यां ये भारते वर्षे तीर्थकृतो अभूवन् तेषामेवैकक्षेत्रनिवासिनामासन्नोपकारित्वेन कीर्तनाय चतुर्विंशतिस्तवं पठति, पठन्ति वा।

तद्यथा—

लोगस्स उज्जोअगरे धम्मतित्थयरे जिणे।
अरिहंते कित्तइस्सं चउवीसंपि केवली ॥ १ ॥

अरिहंत इति विशेष्यपदम् अर्हत उक्तनिर्वचनात्, कीर्तयिष्ये नामोत्कीर्तनपूर्वकं स्तोष्ये, ते च नामस्थापनाद्रव्यार्हन्तो ऽप्यर्हन्ति भावार्हत्प्रतिपादनायाह केवलिन उत्पन्नकेवल-

BIBLIOTHECA INDICA.

A

A COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, NO. 1417

योगशास्त्रम् ।

स्वोपज्ञविवरणसहितम् ।



THE YOGAŚĀSTRA.

With the commentary called

SVOPAJÑAVIVARAṆA.

BY

SRĪ HEMACHANDRĀCHĀRYA.

EDITED BY

ÇĀSTRA VIÇĀRADA JAINĀCĀRYA

ÇRĪ VIJAYA DHARMA SŪRI.

FASCICULUS V.

Calcutta:

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS,
No 31, Nandakumar Chowdhury 2nd Lane

AND PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL, 1, PARK STREET

1918.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 1, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENT, MR. BERNARD QUARITCH,

11, GRAFTON STREET, NEW BOND STREET, LONDON, W.

*Complete copies of those works marked with an asterisk * cannot be supplied.—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

	Rs.
Açvavaidyaka, Fasc. 1-5 @ /10/ each	3
Advaita Brahma Siddhi (Text), Fasc. 1-4 @ /10/ each	2
Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each	1
Agni Purana (Text), Fasc. 1-14 @ /10/ each	8
*Aitareya Aranyaka of Rig-Veda (Text), 2-4 @ /10/ each	1
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each	14
Aitereya locana.	2
Amarakosha, Fasc. 1—2	4
*Anu Bhashyam, (Text), Fasc. 2-5 @ /10/ each	2
Anumana Didhiti Prasarini, Fasc. 1-3 @ /10/-	1
*Aphorisms of Sandilya (English), Fasc. 1 @ 1/-	1
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each	3
Atharvana Upanishadas (Text), Fasc. 1-5 @ /10/ each	3
Atmatattvaviveka, Fasc. 1-2	1
Avadana Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-13; Vol. II, Fasc. 1-12 @ 1/ each	25
Bālam Bhaṭṭī, Vol. I, Fasc. 1-2, Vol. II, Fasc. 1 @ /10/ each	1
Bardic and Historical Survey of Rajputana A Descriptive Catalogue of Bardic and Historical Manuscripts. Sec. I, Prose Chronicles, Part I, Jodhpur State	1
Do Do Sec. I, Prose Chronicles, Part II, Bikanir State	1
Do Do Sec. 2, Bardic Poetry, Part I, Bikanir State	1
Bardic and Historical Survey of Rajputana Vacanikā Rāthora Ratana Singhaji rī Mahesadāsōta rī Khiriyā Joga rī Kata, Part I, Dingala Text	1
Bauddhastotrasangraha	2
Baudhāyana S'rauta Sūtra, Fasc. 1-3; Vol. II, Fasc. 1-5; Vol. III, Fasc. 1 @ /10/ each	5
Bhāmati (Text), Fasc. 1-8, @ /10/ each	5
Bhāṣavritty	
Bhaṭṭa Dīpikā Vol. I, Fasc. 1-6; Vol. 2, Fasc. 1-2, @ /10 each	6
Bodhicaryāvatāra of Çāntideva, Fasc. 1-7 @ /10/ each	4
Brahma Sutras (English), Fasc. 1, @ 1/-	1
Bṛhaddevatā Fasc. 1-4 @ /10/ each	2
Brihaddharma Purāṇa Fasc. 1-6 @ /10/ each	3
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each	1
*Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each	8
Çatapatha Brāhmaṇa, Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-7; Vol. V, Fasc. 1-5 @ /10/ each	11
Ditto Vol. VI, Fasc. 1-3 @ 1/4/ each	3
Ditto Vol. VII, Fasc. 1-5 @ /10/	3
Ditto Vol. IX, Fasc. 1-2	1
Çatasāhasrikā Prajñāpāramitā Part, I, Fasc. 1-18, Part II, Fasc. 1, @ /10/ each	11
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1-25; Vol. III, Part I, Fasc. [illegible] Part II, Fasc. 1-10; Vol. IV, Fasc. 1-6 @ /10/ each	[illegible]
Ditto Vol. IV, Fasc. 7, @ 1/4/ each	1
Ditto Vol. IV, Fasc. [illegible] @ /10/	1
[illegible] (Text), Fasc. 1-3 @ /10/ each	[illegible]
[illegible] Fasc. 1-7 @ 1/4/ each	[illegible]
[illegible] (Text), Fasc. 2-17, @ /10/ each	[illegible]
[illegible] Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-4, [illegible] @ /10/ each	[illegible]

सुविधिः, तथा गर्भस्थे भगवति जनन्यप्येवमिति सुविधिः, पुष्पकलिकामनोहरदन्तत्वात् पुष्पदन्त इति द्वितीयं नाम । ९ । सकलसत्त्वसन्तापहरणाच्छीतलः, तथा गर्भस्थे भगवति पितुः पूर्वोत्पन्नोऽचिकित्स्यपित्तदाहो जननीकरस्पर्शादुपशान्त इति शीतलः । १० । सकलभुवनस्याऽपि प्रशस्यतमत्वेन श्रेयान्, श्रेयां-सार्थमाचष्टेति पृषोदरादित्वात् श्रेयांसो वा, तथा गर्भस्थेऽस्मिन् केनाप्यनाक्रान्तपूर्वा देवताधिष्ठितशय्या जनन्याऽऽक्रान्तेति श्रेयो जातमिति श्रेयांसः ।११। वसवो देवविशेषाः, तेषां पूज्यो वसुपूज्यः, प्रज्ञादित्वादणि वासुपूज्यः, तथा गर्भस्थेऽस्मिन् वसु हिरण्यं तेन वासवो राजकुलं पूजितवानिति वासुपूज्यः, वसुपूज्यस्य राज्ञो ऽयमिति वा "तस्येदम्" ॥६।३।१६०॥ इत्यणि वासुपूज्यः । १२ । विगतमलो विमलः, विमलानि वा ज्ञानादीन्यस्येति विमलः, तथा गर्भस्थे मातुर्मतिस्तनुश्च विमला जातेति विमलः । १३ । अनन्तकर्मांशान् जयति, अनन्तैर्वा ज्ञानादिभिर्जयति अनन्तजित्, तथा गर्भस्थे जनन्या अनन्तरत्नदाम दृष्टम्, जयति च त्रिभुवनेऽपीति अनन्तजित्, भीमो भीमसेन इति न्यायादनन्त इति । १४ । दुर्गतौ प्रपतन्तं सत्त्वसङ्घातं धारयतीति धर्मः, तथा गर्भस्थे जननी दानादिधर्मपरा जातेति धर्मः । १५ । शान्तियोगात्, तदात्मकत्वात्, तत्कर्तृत्वाद्वा शान्तिरिति, तथा गर्भस्थे पूर्वोत्पन्नाऽशिवशान्तिरभूदिति शान्तिः । १६ । कुः पृथ्वी, तस्यां स्थितवानिति निरुक्तात् कुन्थुः, तथा गर्भस्थे जननी रत्नानां कुन्थुं राशिं दृष्टवतीति कुन्थुः । १७ ।

विशेषाऽभिधानार्थसंग्राहिकाश्चेमाः श्रीभद्रबाहुस्वामिप्रणीता

गाथाः—

[1]ऊरूसु उसहलञ्छणमुसभं सुमिणम्मि तेण उसहजिणो ।
अक्खेसु जेण अजिआ जणणी अजिओ जिणो तम्हा ॥ १ ॥
अभिसम्भूआ सासत्ति सम्भवो तेण वुच्चइ भयवं ।
अभिनन्दइ अभिक्खं सक्को अभिनन्दणो तेण ॥ २ ॥
जणणी सव्वत्थ विणिच्छएसु सुमइत्ति तेण सुमइजिणो ।
पउमसयणम्मि जणणीइ डोहलो तेण पउमाभो ॥ ३ ॥
गब्भगए जं जणणी जाय सुपासा तओ सुपासजिणो ।
जणणीइ चंदपिअणम्मि डोहलो तेण चंदाभो ॥ ४ ॥
सव्वविहीसु अ कुसला गब्भगए जेण होइ सुविहिजिणो ।
पिउणो दाहोवसमो गब्भगए सीअलो तेणं ॥ ५ ॥

---

(१) ऊर्वोर्वृषभलाञ्छनमृषभं स्वप्ने तेनर्षभजिनः ।
अक्षेषु येनाजिता जननी अजितो जिनस्तस्मात् ॥ १ ॥
अभिसंभूतानि सस्यानीति संभवस्तेनोच्यते भगवान् ।
अभिनन्दत्यभीक्ष्णं शक्रोऽभिनन्दनस्तेन ॥ २ ॥
जननी सर्वत्र विनिश्चयेषु सुमतिरिति तेन सुमतिजिनः ।
पद्मशयने जनन्या दोहदस्तेन पद्माभः ॥ ३ ॥
गर्भगते यज्जननी जाता सुपार्श्वा ततः सुपार्श्वजिनः ।
जनन्याश्चन्द्रपाने दोहदस्तेन चन्द्राभः ॥ ४ ॥
सर्वविधिषु च कुशला गर्भगते तेन भवति सुविधिजिनः ।
पितुर्दाहोपशमो गर्भगते शीतलस्तेन ॥ ५ ॥

[1]महरिहसिज्जारुहणम्मि डोहलो होइ तेण सिज्जंसो ।
पूएइ वासवो जं अभिक्खणं तेण वसुपुज्जो ॥ ६ ॥
विमलतणुबुद्धिजणणी गब्भगए तेण होइ विमलजिणो ।
रयणविचित्तमणंतं दामं सुमिणे तओऽणंतो ॥ ७ ॥
गब्भगए जं जणणी जाय सुधम्मत्ति तेण धम्मजिणो ।
जाओ असिवोवसमो गब्भगए तेण संतिजिणो ॥ ८ ॥
थूहं रयणविचित्तं कुंथुं सुमिणम्मि तेण कुंथुजिणो ।
सुमिणे अरं महरिहं पासइ जणणी अरो तम्हा ॥ ९ ॥
वरसुरहिमल्लसयणम्मि डोहलो तेण होइ मल्लिजिणो ।
जाया जणणी जं सुव्वयत्ति मुणिसुव्वओ तम्हा ॥ १० ॥
पणया पच्चंतनिवा दंसियमित्ते जिणम्मि तेण नमी ।
रिट्ठरयणं च नेमिं उप्पयमाणं तओ नेमी ॥ ११ ॥

---

(१) महार्हशय्यारोहणे दोहदो भवति तेन श्रेयांसः ।
पूजयति वासवो यदभिक्षणं तेन वासुपूज्यः ॥ ६ ॥
विमलतनुबुद्धिजननी गर्भगते तेन भवति विमलजिनः ।
रत्नविचित्रमनन्तं दाम स्वप्ने ततोऽनन्तः ॥ ७ ॥
गर्भगते यज्जननी जाता सुधर्मेति तेन धर्मजिनः ।
जातोऽशिवोपशमो गर्भगते तेन शान्तिजिनः ॥ ८ ॥
[illegible] ।
[illegible] ॥ ९ ॥
[illegible] ।
[illegible] ॥ १० ॥
[illegible] ।
[illegible] ॥ ११ ॥

[1]गब्भं मयगो जगणी जं पासइ तमसि तेण पासजिणो ।
वड्ढइ य नायकुलं ति अ तेण जिणो वड्ढमाणु त्ति ॥ १२ ॥

कीर्तनं कृत्वा चेतःशुद्ध्यर्थं प्रणिधानमाह—

एवं मए अभिथुआ विहुअरयमला पहीणजरमरणा ।
चउवीसं पि जिणवरा तित्थयरा मे पसीअन्तु ॥ ५ ॥

नन्तरोदितेन विधिना मयेत्यात्मनिर्देशः, अभिष्टुता आभि-
न स्तुताः स्वनामभिः कीर्तिता इत्यर्थः । किंविशिष्टास्ते,
तरजोमलाः—रजश्च मलं च रजोमले, विधूते प्रकम्पिते अने-
त्वादपनीते वा रजोमले यैस्ते विधूतरजोमलाः, वध्यमानं च
रजः, पूर्वबद्धं तु मलम्, अथवा बद्धं रजो निकाचितं मलम्,
ा ऐर्यापथं रजः, साम्परायिकं मलमिति । यतश्चैवंभूता अत
प्रक्षीणजरामरणाः कारणाभावात् । चतुर्विंशतिरपि, अपि-
दन्येऽपि जिनवराः श्रुतादिजिनेभ्यः प्रकृष्टाः, ते च तीर्थकरा
पूर्ववत्, मे मम, किं ? प्रसीदन्तु प्रसादपरा भवन्तु । ते च
रागत्वाद्यद्यपि स्तुताः तोषम्, निन्दिताश्च द्वेषं न यान्ति,
ऽपि स्तोता स्तुतिफलम्, निन्दकश्च निन्दाफलमाप्नोत्येव, यथा
ामणिमन्त्राद्याराधकः ; यदवोचाम वीतरागस्तवे—

अप्रसन्नात् कथं प्राप्यं फलमेतदसङ्गतम् ।
चिन्तामण्यादयः किं न फलन्त्यपि विचेतनाः ? ॥ १ ॥

---

(१) गर्भे शयने जननी यत् पश्यति तमसि तेन पार्श्वजिनः ।
वर्धते च ज्ञातकुलमिति च तेन जिनो वर्धमान इति ॥ १२ ॥

इत्युक्तमेव। यद्यपि न प्रसीदन्ति, तर्हि प्रसीदन्त्विति वृथा प्रलापेन ?। नैवम्। भक्त्यतिशयत एवमभिधानेऽपि न दोषः। यदाह—क्षीणक्लेशा एते नहि प्रसीदन्ति, न स्तवकोऽपि तथा, तत्स्तवभावविशुद्धेः, प्रयोजनं कर्मविगम इति ॥ ५ ॥

तथा—

कित्तिय वंदिय महिया जे ए लोगस्स उत्तमा सिद्धा।
आरुग्गबोहिलाभं समाहिवरमुत्तमं दिंतु ॥ ६ ॥

कीर्त्तिताः स्वनामभिः प्रोक्ताः, वन्दितास्त्रिविधयोगेन सम्यक् स्तुताः, महिताः पुष्पादिभिः पूजिताः। मइया इति पाठान्तरम्, तत्र मयका मया। के एते ?, इत्याह-ये एते लोकस्य प्राणिवर्गस्य कर्ममलकलङ्काभावेनोत्तमाः प्रकृष्टाः, सिद्धान्ति स्म सिद्धाः कृतकृत्या इत्यर्थः, अरोगस्य भाव आरोग्यं सिद्धत्वं तदर्थम्, बोधिलाभः अर्हत्प्रणीतधर्मप्राप्तिरारोग्यबोधिलाभः, स ह्यनिदानो मोक्षायैव भवति तम्, तदर्थं च समाधिवरं वरसमाधिं परमस्वास्थ्यरूपं भावसमाधिमित्यर्थः, असावपि तारतम्यभेदादनेकधैव, अत आह-उत्तमं सर्वोत्कृष्टं ददतु प्रयच्छन्तु, एतच्च भक्त्याच्यते।

यत उक्तम्—

'भासा असच्चमोसा नवरं भत्तीइ भासिआ एसा।
न हु खीणपिज्जदोसा दिंति समाहिं च बोहिं च ॥१॥ इति

---

(१) भाषा असत्यमृषा नवरं भक्त्या भाषितैषा।
न खलु क्षीणप्रेमद्वेषा ददति समाधिं च बोधिं च ॥ १ ॥

तथा—

चंदेसु निम्मलयरा आइच्चेसु अहिअं पयासयरा ।

सागरवरगम्भीरा सिद्धा सिद्धिं मम दिसन्तु ॥ ७ ॥

"पञ्चम्यास्तृतीया च" ॥ ८ । ३ । १३६ ॥ इति पञ्चम्यर्थे सप्तमी, अतश्चन्द्रेभ्योऽपि निर्मलतराः सकलकर्ममलापगमात्, पाठान्तरं वा चन्देहिं निम्मलयरा, एवमादित्येभ्योऽप्यधिकं प्रकाशकराः, केवलोद्द्योतेन लोकालोकप्रकाशकत्वात् ।

उक्तं च—

'चंदाइच्चगहाणं पहा पयासेइ परिमिअं खित्तं ।

केवलिअनाणलम्भो लोआलोअं पयासेइ ॥ १ ॥

सागरवरः स्वयम्भूरमणाख्यः समुद्रः, परीषहोपसर्गाद्यक्षोभ्यत्वात् तस्मादपि गम्भीराः, सिद्धाः कर्मविगमात् कृतकृत्याः, सिद्धिं परमपदप्राप्तिम्, मम दिशन्तु प्रयच्छन्तु । एवं चतुर्विंशतिस्तवमुक्त्वा सर्वलोक एवार्हच्चैत्यानां वन्दनार्थं कायोत्सर्गार्थं [illegible] पठति पठन्ति वा । सव्वलोए अरिहंतचेइआणं करेमि [illegible] वोसिरामीति यावत् । व्याख्या पूर्ववत् । नवरम्, सर्वलोके [illegible] अधस्तिर्यगूर्ध्वलक्षणे [illegible], अधोलोके हि चमरादि भवनेषु, तिर्यग्लोके द्वीपाचलज्योतिष्कविमानादिषु, ऊर्ध्वलोके सौधर्मादिषु सन्त्यर्हच्चैत्यानि, [illegible] [illegible] [illegible] मिति सूत्रार्थः प्राक् सूचितम् । इदानीं [illegible]

(१) चन्द्रादित्यग्रहाणां प्रभा प्रकाशयति परिमितं क्षेत्रम् ।
केवलिकज्ञानलाभो लोकालोकं प्रकाशयति ॥ १ ॥

इति सर्वलोकसंग्रहः, तदनुसारिण सर्वतीर्थकरसाधारणी स्तुतिः। अन्यथा अन्यकायोत्सर्गे अन्या स्तुतिरिति न सम्यगतिप्रसङ्गादिति सर्वतीर्थकराणां स्तुतिरुक्ता। इदानीं येन ते भगवन्तस्तदभिहिताश्च भावाः स्फुटमुपलभ्यन्ते तत्प्रदीपस्थानीयं सम्यक् श्रुतमर्हति कीर्तनम्, तत्राऽपि तत्प्रणेतृन् भगवतः प्रथमं स्तौति—

पुक्खरवरदीवड्ढे धायइखंडे अ जम्बुद्दीवे अ।
भरहेरवयविदेहे धम्माइगरे नमंसामि ॥ १ ॥

भरतं भरतक्षेत्रम्, ऐरवतमैरवतक्षेत्रम्, विदेहमिति भीमो भीमसेन इति न्यायाद् महाविदेहक्षेत्रम्, एवं समाहारद्वन्द्वः, तेषु भरतैरवतविदेहेषु धर्मस्य श्रुतधर्मस्यादिकरान् सूत्रतः प्रथमकरणशीलान्, नमस्यामि स्तुवे। क्व यानि भरतैरवतमहाविदेहक्षेत्राणि ?, इत्याह—पुष्कराणि पद्मानि, तैर्वरः पुष्करवरः स चासौ द्वीपश्च पुष्करवरद्वीपः तृतीयो द्वीपः, तस्यार्धं मानुषोत्तराचलादर्वाग्भागवर्ति, तत्र द्वे भरते, द्वे ऐरवते, द्वे महाविदेहे, तथा धातकीनां खण्डानि वनानि यस्मिन् स धातकीखण्डो द्वीपः तस्मिन्, द्वे भरते, द्वे ऐरवते, द्वे महाविदेहे। जम्ब्वा उपलक्षितः तत्प्रधानो वा द्वीपो जम्बूद्वीपः, अत्रैकं भरतमेकमैरवतमेकं च महाविदेहमित्येताः पञ्चदशकर्मभूमयः, शेषास्त्वकर्मभूमयः। यदाह—"भरतैरवतविदेहाः कर्मभूमयोऽन्यत्र देवकुरूत्तरकुरुभ्यः" (तत्त्वा-३।१६) महत्तरक्षेत्रप्राधान्याङ्गीकरणात्पश्चानुपूर्व्या निर्देशः। धर्मादिकरत्वं यथा भगवतां भवति तथा अपौरुषेयवादनिराकरणावसरे प्राग्निर्णीतम्। ननु कथमपि कथं धर्मादिकरत्वं भगवताम्, 'तप्पुव्विआ अरहया'

ति वचनाद् वचनस्यानादित्वात्?। नैवम्, बीजाङ्कुरवत्तदुप-
ः-बीजाद्धि अङ्कुरो भवति अङ्कुराच्च बीजमिति। एवं भगवतां
जन्मनि श्रुतधर्माभ्यासात्तीर्थकरत्वम्, तीर्थकृतां च श्रुतधर्मादि-
त्वमदुष्टमेव। नचाऽयं नियमः श्रुतधर्मपूर्वकमेवार्हत्त्वमिति,
देव्यादीनां श्रुतधर्मपूर्वकत्वाभावेऽपि केवलज्ञानश्रवणादित्यलं
ङ्गेन। एवं श्रुतधर्मादिकराणां स्तुतिरुक्ता। इदानीं श्रुत-
स्याह—

तमतिमिरपडलविद्धंसणस्स सुरगणनरिंदमहिअस्स।

सीमाधरस्स वंदे पप्फोडिअमोहजालस्स ॥ २ ॥

तमोऽज्ञानम्, तदेव तिमिरम्, अथवा बद्धस्पृष्टनिधत्तं ज्ञाना-
णीयं कर्म तमः; निकाचितं तिमिरं, ततस्तमस्तिमिरस्य,
स्तिमिरयोर्वा पटलं वृन्दम्, तद्विध्वंसयति विनाशयतीति
द्यादित्वादने तमस्तिमिरपटलविध्वंसनस्तस्य, अज्ञाननिरासेनै-
ऽस्य प्रवृत्तेः। सुरगणैश्चतुर्विधाऽमरनिकायैर्नरेन्द्रैश्चक्रवर्त्यादि-
र्महितः पूजितस्तस्य। आगममहिमां हि कुर्वन्त्येव सुरासुरा-
यः। सीमां मर्यादाम्, सीमायां वा धारयतीति सीमाधरस्तस्य,
तधर्म इति विशेष्यम्, ततः कर्मणि द्वितीया, तस्याश्च "क्वचिद्
तीयादेः" ॥ ८। ३। १३४ ॥ इति प्राकृतसूत्रात् षष्ठी, अतस्तं
दे, तस्य वा यन्माहात्म्यं तद्वन्दे इति सम्बन्धे षष्ठी; अथवा
श्च वन्दे वन्दनं करोमीति। प्रकर्षेण स्फोटितं विदारितम्,
ोहजालं मिथ्यात्वादिरूपं येन स तथा तस्य। श्रुतधर्मे हि सति
वेकिनो मोहजालं मिथ्यात्वादिरूपं विलयमुपयात्येव ॥ इत्थं

श्रुतमभिवन्द्य तस्यैव गुणोपदर्शनद्वारेणाऽप्रमादगोचरतां प्रतिपादयन्नाह—

जाईजरामरणसोगपणासणस्स
कल्लाणपुक्खलविसालसुहावहस्स ।
को देवदाणवनरिंदगणच्चिअस्स
धम्मस्स सारमुवलब्भ करे पमायम् ? ॥ ३ ॥

कः सचेतनः, धर्मस्य श्रुतधर्मस्य, सारं सामर्थ्यम्, उपलभ्य विज्ञाय श्रुतधर्मोदितेऽनुष्ठाने प्रमादमनादरं कुर्यात् ?, न कश्चित् कुर्यादित्यर्थः । किंविशिष्टस्य श्रुतधर्मस्य ?. जातिर्जन्म, जरा विस्रसा, मरणं प्राणनाशः, शोको मानसो दुःखविशेषः, तान् प्रणाशयति अपनयति, जातिजरामरणशोकप्रणाशनः तस्य, श्रुतधर्मोक्तानुष्ठानाद्धि जात्यादयः प्रणश्यन्त्येव, अनेनास्यानर्थप्रतिघातित्वमुक्तम् । कल्यमारोग्यमणति शब्दयति इति कल्याणम्. पुष्कलं सम्पूर्णम्, न च तदल्पं किन्तु विशालं विस्तीर्णमेवम्भूतं सुखमावहति प्रापयतीति कल्याणपुष्कलविशालसुखावहः तस्य, तथाच श्रुतधर्मोक्तानुष्ठानादुक्तलक्षणमपवर्गसुखमवाप्यत एव, अनेन चाऽस्य विशिष्टार्थप्रापकत्वमाह । देवानां दानवानां नरेन्द्राणां च गणैरर्चितस्य पूजितस्य, सुरगणनरेन्द्रमहितस्य इति, अस्यैव निगमनं देवदानवेत्यादि । यतश्चैवमतः—

सिद्धे भो ! पयओ नमो जिणमए नंदी सया संयमे
देवंनागसुवण्णकिन्नरगणस्सब्भूअभावच्चिए ।
लोगो जत्थ पइट्ठिओ जगमिणं तेलुक्कमच्चासुरं
धम्मो वड्ढउ सासयं विजयओ धम्मुत्तरं वड्ढउ ॥ ४ ॥

सिद्धः फलाव्यभिचारेण प्रतिष्ठितः, अथवा सिद्धः सकलनयव्यापकत्वेन त्रिकोटिपरिशुद्धत्वेन च प्रख्यातस्तस्मिन्, भो इत्यतिशयिनामामन्त्रणम्, पश्यन्तु भवन्तः, प्रयतोऽहं यथाशक्त्येतावन्तं कालं प्रकर्षेण, यतः इत्थं परसाक्षिकं प्रयतो भूत्वा पुनर्नमस्करोति, नमो जिणमए नमो जिनमताय, प्राकृतत्वाच्चतुर्थ्याः सप्तमी। अस्मिंश्च सति नन्दिः समृद्धिः। सदा सर्वकालम्, संयमे चारित्रे भूयात्। उक्तं च—(¹)'पढमं नाणं तओ दया'। किं विशिष्टे संयमे ?, देवनागसुपर्णकिन्नरगणैः सद्भूतभावेनार्चिते—देवा विमानिनः, नागा धरणादयः, सुपर्णा गरुडाः, किन्नरा व्यन्तरविशेषाः उपलक्षणं शेषाणां, देवमित्यनुस्वारः छन्दःपूरणे, तथा च संयमवन्तोऽर्च्यन्त एव देवादिभिः। यत्र जिनमते, किं यत्र ?, लोकनं लोको ज्ञानम्, प्रतिष्ठितः तद्वशीभूतः, तथा जगदिदं ज्ञेयतया प्रतिष्ठितमिति योगः ; केचिन्मनुष्यलोकमेव जगन्मन्यन्ते, अत आह—त्रैलोक्यमर्त्यासुरमाधाराधेयरूपम्। अयमित्थम्भूतो धर्मः श्रुतधर्मो वर्धतां वृद्धिमुपयातु, शाश्वतमिति क्रियाविशेषणं शाश्वतमप्रच्युत्या वर्धतामिति ; विजयतः परवादिविजयेन, धर्मोत्तरं चारित्रधर्मोत्तरं वर्धताम्, पुनर्वृद्ध्यभिधानं मोक्षार्थिना प्रत्यहं ज्ञानवृद्धिः कार्या इति प्रदर्शनार्थम्। तथाच तीर्थंकरनामकर्महेतून् प्रतिपादयतोक्तम्—'अपुव्वनाणगहणे' इति। प्रणिधानमेतन्मोक्षबीजकल्पं परमार्थतोऽनाशंसारूपमेवेति प्रणिधानं कृत्वा श्रुतस्यैव वन्दनाद्यर्थं कायो-

---

(१) प्रथमं ज्ञानं ततो दया।

मुक्तिस्थानं प्राप्ताः परम्परागताः तेभ्यः । एते च केचिदनियतदेशा अभ्युपगम्यन्ते,

यत्र क्लेशक्षयस्तत्र विज्ञानमवतिष्ठते ।
बाधा च सर्वथाऽस्येह तदभावान्न जातुचित् ॥ १ ॥

इति वचनात्, एतन्निरासायाह लोकाग्रमुपगतेभ्यः लोकाग्रमीषत्प्राग्भाराख्यायाः पृथिव्या उपरिक्षेत्रं तदुप सामीप्येन तदपराभिन्नदेशतया निःशेषकर्मक्षयपूर्वकं गताः प्राप्ताः ।

उक्तं च—

[1] जत्थ य एगो सिद्धो तत्थ य अणंता भवक्खयविमुक्का ।
अन्नोन्नमणाबाहं चिट्ठंति सुही सुहं पत्ता ॥ १ ॥

तेभ्यः । ननु क्षीणकर्मणो जीवस्य कथं लोकाग्रं यावद्गतिः ? ।

उच्यते—पूर्वप्रयोगादियोगात् ।

यदाह—

पूर्वप्रयोगसिद्धेर्बन्धच्छेदादसङ्गभावाच्च ।
गतिपरिणामाच्च तथा सिद्धस्योर्ध्वं गतिः सिद्धा ॥ १ ॥

ननु सिद्धिक्षेत्रात्परतोऽधस्तिर्यग्वा कस्मान्न गच्छन्ति ?,

अत्राऽप्युक्तम्—

नाऽधो गौरवविगमादसङ्गभावाच्च गच्छति विमुक्तः ।
लोकान्तादपि न परं प्लवक इवोपग्रहाभावात् ॥ १ ॥

---

१ यत्र चैकः सिद्धस्तत्र चानन्ता भवक्षयविमुक्ताः ।
अन्योन्यसमनाबाधं तिष्ठन्ति सुखिनः सुखं प्राप्ताः ॥ १ ॥

योगमयोगयोश्चाभावात्तिर्यङ्न तस्य गतिरस्ति।
तस्मात्सिद्धस्योर्ध्वं ह्यालोकान्ताद्गतिर्भवति ॥ २ ॥ इति ॥

नमः सदा सर्वसिद्धेभ्यः—नमो नमोऽस्तु, सदा सर्वकालं, सर्वसिद्धेभ्यः—सर्वं साध्यं सिद्धं येषां ते सर्वसिद्धाः तेभ्यः, अथवा सर्वसिद्धेभ्यः तीर्थसिद्धादिभेदेभ्यः,यथोक्तम्—'तित्थसिद्धा १ अतित्थसिद्धा २ तित्थयरसिद्धा ३ अतित्थयरसिद्धा ४ सयंबुद्धसिद्धा ५ पत्तेयबुद्धसिद्धा ६ बुद्धबोहिअसिद्धा ७ थीलिङ्गसिद्धा ८ पुरिसलिङ्गसिद्धा ९ नपुंसकलिङ्गसिद्धा १० सलिङ्गसिद्धा ११ अन्नलिङ्गसिद्धा १२ गिहिलिङ्गसिद्धा १३ एगसिद्धा १४ अणेगसिद्धा १५। तत्र तीर्थे चतुर्विधश्रमणसङ्घे उत्पन्ने सति ये सिद्धाः ते तीर्थसिद्धाः।१। अतीर्थे जिनान्तरे साधुव्यवच्छेदे सति जातिस्मरणादिनाऽवाप्तापवर्गमार्गाः सिद्धाः अतीर्थसिद्धाः, मरुदेवीप्रभृतयो वा, तदा तीर्थस्याऽनुत्पन्नत्वात्।२। तीर्थकरसिद्धाः तीर्थकरत्वमनुभूय सिद्धाः।३। अतीर्थकरसिद्धाः सामान्यकेवलित्वे सति सिद्धाः।४। स्वयं बुद्धाः सन्तो ये सिद्धाः ते स्वयंबुद्धसिद्धाः।५। प्रत्येकबुद्धाः सन्तो ये सिद्धाः ते प्रत्येकबुद्धसिद्धाः।६। स्वयम्बुद्धप्रत्येकबुद्धयोश्च बोध्युपधिश्रुतलिङ्गकृतो विशेषः—स्वयंबुद्धा हि बाह्यप्रत्ययमन्त-

(१) तीर्थसिद्धाः, अतीर्थसिद्धाः, तीर्थकरसिद्धाः, अतीर्थकरसिद्धाः, स्वयंबुद्धसिद्धाः, प्रत्येकबुद्धसिद्धाः बुद्धबोधितसिद्धाः, स्त्रीलिङ्गसिद्धाः, पुरुषलिङ्गसिद्धाः, नपुंसकलिङ्गसिद्धाः, स्वलिङ्गसिद्धाः, अन्यलिङ्गसिद्धाः, गृहिलिङ्गसिद्धाः, एकसिद्धाः, अनेकसिद्धाः।

रेण बुध्यन्ते, प्रत्येकबुद्धास्तु बाह्यप्रत्ययेन वृषभादिना करकण्डादिवत्, उपधिस्तु स्वयंबुद्धानां पात्रादिर्द्वादशधा, प्रत्येकबुद्धानां प्रावरणवर्जो नवविधः ; स्वयंबुद्धानां पूर्वाधीतश्रुतेऽनियमः, प्रत्येकबुद्धानां तु नियमतो भवत्येव ; लिङ्गप्रतिपत्तिस्तु स्वयंबुद्धानां गुरुसन्निधावपि भवति, प्रत्येकबुद्धानां तु देवता लिङ्गं प्रयच्छति ; बुद्धा आचार्या अवगततत्त्वाः तैर्बोधिताः सन्तो ये सिद्धाः ते बुद्धबोधितसिद्धाः ।७। एते च सर्वेऽपि केचित् स्त्रीलिङ्गसिद्धाः, केचित् पुंलिङ्गसिद्धाः, केचित् नपुंसकलिङ्गसिद्धाः। ननु तीर्थकरा अपि किं स्त्रीलिङ्गसिद्धा भवन्ति ?, उच्यते, भवन्त्येव—यदुक्तं सिद्धप्राभृते—'सव्वत्थोवा तित्थयरिसिद्धा, तित्थयरतित्थे नोतित्थयरसिद्धा असंखिज्जगुणा, तित्थयरितित्थे नोतित्थयरिसिद्धाओ असंखिज्जगुणाओ, तित्थयरितित्थे नोतित्थयरसिद्धा असंखिज्जगुणा इति। नपुंसकलिङ्गसिद्धास्तु तीर्थकरसिद्धा न भवन्त्येव, प्रत्येकबुद्धसिद्धास्तु पुंलिङ्गसिद्धा एव ।८।९।१०। स्वलिङ्गेन रजोहरणादिना द्रव्यलिङ्गेन सिद्धाः स्वलिङ्गसिद्धाः ।११। अन्येषां परिव्राजकादीनां लिङ्गेन सिद्धा अन्यलिङ्गसिद्धाः। १२। गृहिलिङ्गसिद्धा मरुदेव्यादयः ।१३। एकैकस्मिन् समये एकाकिनः सिद्धाः एकसिद्धाः ।१४। एकस्मिन् समये अष्टोत्तरं शतं यावत् सिद्धा अनेकसिद्धाः ।१५। यत उक्तम्—

(१) सर्वस्तोकास्तीर्थकरीसिद्धास्तीर्थकरतीर्थे नोतीर्थकरसिद्धा असंख्येयगुणाः, तीर्थकरीतीर्थे नोतीर्थकरीसिद्धा असंख्येयगुणाः, तीर्थकरीतीर्थे नोतीर्थकरसिद्धा असंख्येयगुणाः।

'बत्तीसा अडयाला सट्ठी बाहत्तरी य बोद्धव्वा ।
चुलसीई छण्णउई दुरहिअमट्ठोत्तरसयं च ॥ १ ॥

नन्वेते सिद्धभेदाः आद्ययोस्तीर्थसिद्धाऽतीर्थसिद्धयोरेवाऽन्तर्भवन्ति, तीर्थकरसिद्धादयो हि तीर्थसिद्धा वा स्युरतीर्थसिद्धा वेति। सत्यम्, सत्यप्यन्तर्भावे पूर्वभेदद्वयादेवोत्तरभेदाप्रतिपत्तेरज्ञातज्ञापनार्थं भेदाभिधानमदुष्टमिति। इत्थं सामान्येन सर्वसिद्धनमस्कारं कृत्वा आसन्नोपकारित्वाद्वर्तमानतीर्थाधिपतेः श्रीमन्महावीरवर्धमानस्वामिनः स्तुतिं करोति—

जो देवाण वि देवो जं देवा पंजली नमंसंति ।
तं देवदेवमहिअं सिरसा वन्दे महावीरं ॥ २ ॥

यो भगवान् महावीरो देवानामपि भवनवास्यादीनां पूज्यत्वाद् देवः, अत एवाह—यं देवाः प्राञ्जलयो विनयरचितकरसम्पुटाः सन्तो नमस्यन्ति प्रणमन्ति, तं भगवन्तं देवदेवैः शक्रादिभिर्महितं पूजितम्, वन्दे शिरसा उत्तमाङ्गेन.आदरप्रदर्शनार्थं चैतत्। तं कं ? महावीरम्, विशेषेण ईरयति कर्म गमयति याति वा शिवमिति वीरः, महांश्चासौ वीरश्च महावीरस्तम्। इत्थं स्तुतिं कृत्वा पुनः परोपकाराय आत्मभाववृद्धये च फलप्रदर्शनपरमिदं पठति—

इक्को वि नमुक्कारो जिणवरवसहस्स वद्धमाणस्स ।
संसारसागराओ तारेइ नरं व नारिं वा ॥ ३ ॥

---

(१) द्वात्रिंशदष्टचत्वारिंशत् षष्टिर्द्वासप्ततिश्च बोद्धव्याः ।
चतुरशीतिः षण्णवतिर्द्विरहितमष्टोत्तरशतं च ॥ १ ॥

एकोऽप्यास्तां बहवः, नमस्कारो द्रव्यभावसंकोचलक्षणः, जिनवर वृषभाय जिनाः श्रुतावधिजिनादयः तेषां वराः केवलिनस्तेषां वृषभः तीर्थकरनामकर्मोदयाद्भासी [illegible] । स च [illegible] भावतोत्कृष्ट [illegible] । किम्? संसरणं संसारस्तिर्यग्नरनारकामरभवानुभवलक्षणः स एव [illegible] सागर इव संसारसागरः, तस्मात् तारयति पारं नयतीत्यर्थः । कमित्याह? —नरं वा नारीं वा नरग्रहणं पुरुषोत्तमधर्मप्रतिपादनार्थम्, नारीग्रहणं तासामपि तद्भव एव संसारक्षयो भवतीति ज्ञापनार्थम् । यथोक्तं यापनीयतन्त्रे —

[1]नो खलु इत्थी अजीवो, न यावि अभव्वा, न यावि दंसणविरोहिणी, नो अमाणुस्सा नो अणायरियउप्पन्ना, नो असंखेज्जाउआ, नो अइकूरमई, नो अणुवसन्तमोहा, नो असुद्धाचारा, नो असुद्धबोंदी, नो ववसायवज्जिआ, नो अपुव्वकरणविरोहिणी, नो नवगुणट्ठाणरहिआ, नो अजोग्गा लद्धीए, नो अकल्लाणभायणं ति कहं न उत्तमधम्मस्स साहगा? इति ।

---

(१) नो खलु स्त्री अजीवः, न चाप्यभव्या, न चापि दर्शनविरोधिनी, नो अमानुष्या, नो अनार्योत्पन्ना, नो असंख्येयायुष्का, नो अतिक्रूरमतिः, नो अनुपशान्तमोहा, नो अशुद्धाचारा, नो अशुद्धशरीरा, नो व्यवसायवर्जिता, नो अपूर्वकरणविरोधिनी, नो नवगुणस्थानरहिता, नो अयोग्या लब्धाः, नो अकल्याणभाजनमिति कथं नोत्तमधर्मस्य साधिका? इति ।

अयमत्र भावः, सति सम्यग्दर्शने परया भावनया क्रियमाण एकोऽपि नमस्कारस्तथाभूतस्याध्यवसायस्य हेतुर्भवति यथाभूतात् श्रेणिमवाप्य निस्तरति भवोदधिमिति। अतः कार्ये कारणोपचारादेवमुच्यते। न च चारित्रस्य वैफल्यम्, तथाभूताध्यवसायस्यैव चारित्ररूपत्वादिति। एतास्तिस्रः स्तुतयो गणधरकृतत्वाद् नियमेनोच्यन्ते. केचित्तु अन्ये अपि स्तुती पठन्ति—

यथा—

उज्जिंतसेलसिहरे दिक्खा नाणं निसीहिया जस्स

तं धम्मचक्कवट्टिं अरिट्ठनेमिं नमंसामि ॥ ४ ॥

चत्तारि अट्ठ दस दो अ वंदिआ जिणवरा चउवीसं ।

परमट्ठनिट्ठिअट्ठा सिद्धा सिद्धिं मम दिसंतु ॥ ५ ॥

सुगमे। एवमेतत्पठित्वोपचितपुण्यसम्भार उचितेष्वौचित्येन प्रवृत्तिरिति ज्ञापनार्थं पठति पठन्ति वा वेयावच्चगराणं सन्तिगराणं सम्मदिट्ठिसमाहिगराणं करेमि काउस्सग्गं वैयावृत्त्यकराणां प्रवचनार्थं व्यापृतभावानां गोमुखयक्षाऽप्रतिचक्राप्रभृतीनां शान्तिकराणां सर्वलोकस्य सम्यग्दृष्टिविषये समाधिकराणाम्, एषां सम्बन्धिनां षष्ठ्याः सप्तम्यर्थत्वादेतद्विषयमेतान् वाश्रित्य करोमि कायोत्सर्गम्। अत्र वन्दनादिप्रत्ययमित्यादि न पठ्यते, अपि तु अन्नत्थोच्छ्वसितेनेत्यादि, तेषामविरतत्वात्, इत्थमेव तद्भाववृद्धेरुपकारदर्शनात्। एतद्व्याख्या च पूर्ववत्। नवरं स्तुतिर्वैयावृत्त्यकराणां पुनस्तेनैव विधिना उपविश्य पूर्ववत् प्रणिपातदण्डकं पठित्वा मुक्ताशुक्तिमुद्रया प्रणिधानं कुर्वन्ति।

यथा —

जय वीयराय ! जगगुरु ! होउ मम तुह पभावओ भयवं ! ।
भवनिव्वेओ मग्गाणुसारिआ इट्ठफलसिद्धी ॥ १ ॥
लोगविरुद्धच्चाओ गुरुजणपूआ परत्थकरणं च ।
सुहगुरुजोगो तव्वयणसेवणा आभवमखण्डा ॥ २ ॥

जय वीतराग ! जगद्गुरो ! इति भगवतस्त्रिलोकनाथस्य बुद्धौ सन्निधानार्थमामन्त्रणम्, भवतु जायतां ममेत्यात्मनिर्देशः, तव प्रभावतः तव सामर्थ्येन, भगवन्निति पुनः सम्बोधनं भक्त्यतिशयख्यापनार्थम् । किं तदित्याह—भवनिर्वेदः संसारनिर्वेदः । न हि भवादनिर्विण्णो मोक्षाय यतते, अनिर्विण्णस्य तत्प्रतिबन्धान्मोक्षे यत्नोऽयत्न एव, निर्जीवक्रियातुल्यत्वात् । तथा मार्गाऽनुसारिता असद्ग्रहविजयेन तत्त्वानुसारिता, तथा इष्टफलसिद्धिरभिमतार्थनिष्पत्तिः ऐहलौकिकी, ययोपगृहीतस्य चित्तस्वास्थ्यं भवति तस्माच्चोपादेयप्रवृत्तिः । तथा लोकविरुद्धत्यागः सर्वजननिन्दादिलोकविरुद्धाऽनुष्ठानवर्जनम् ।

यदाह—

'सव्वस्स चेव निंदा विसेसओ तह य गुणसमिद्धाणं ।
उजुधम्मकरणहसणं रीढा जणपूयणिज्जाणं ॥ १ ॥
बहुजनविरुद्धसंगो देसाचारस्स लंघणं चेव ।
उव्वणभोउ अ तहा दाणाइवियडमन्नेओ ॥ २ ॥

(१) सर्वस्य चैव निन्दा विशेषतस्तथा च गुणसमृद्धानाम् ।
ऋजुधर्मकरणहसनं रीढा जनपूजनीयानाम् ॥ १ ॥
बहुजनविरुद्धसङ्गो देशाचारस्य लङ्घनं चैव ।
उल्बणभोगश्च तथा दानादिविकटमन्यत्तात् ॥ २ ॥

'साहुवसणम्मि तो सो सइ सामत्थम्मि अपडियारो अ।
एमाइयाइं इत्थं लोगविरुद्धाइं णेआइं' ॥ २ ॥

गुरुजनस्य पूजा उचितप्रतिपत्तिर्गुरुजनपूजा, गुरवश्च यद्यपि धर्माचार्य्या एवोच्यन्ते तथापीह मातापित्रादयोऽपि गृह्यन्ते। यदुक्तम्—

माता पिता कलाचार्य्य एतेषां ज्ञातयस्तथा।
वृद्धा धर्मोपदेष्टारो गुरुवर्गः सतां मतः ॥ १ ॥

परार्थकरणं सत्त्वार्थकरणं जीवलोकसारं पौरुषचिह्नमेतत्। सत्येतावति लौकिके सौन्दर्ये लोकोत्तरधर्माधिकारी भवतीत्याह-शुभगुरुयोगो विशिष्टचारित्रयुक्ताचार्यसम्बन्धः, तथा तद्वचनसेवा सद्गुरुवचनसेवना, न जातुचिदयमहितमुपदिशति, आभवमासंसारमखण्डा सम्पूर्णा। इदं च प्रणिधानं न निदानरूपम्, प्रायेण निस्सङ्गाभिलापरूपत्वात्। एतच्चाप्रमत्तसंयतादर्वाक् कर्तव्यम्, अप्रमत्तादीनां मोक्षेऽप्यनभिलापात्। तदेवंविधशुभफलप्रणिधानपर्यन्तं चैत्यवन्दनम् ॥ १२४ ॥

इदानीमनन्तरकरणीयमाह —

ततो गुरूणामभ्यर्णे प्रतिपत्तिपुरःसरम्।
विदधीत विशुद्धात्मा प्रत्याख्यानप्रकाशनम् ॥ १२५ ॥

---

(१) साधुव्यसने तु स सति सामर्थ्येऽप्रतिकारश्च।
एवमादिकानि इत्थं लोकविरुद्धानि ज्ञेयानि ॥ २ ॥

ततोऽनन्तरं गुरूणां धर्माचार्य्याणां देववन्दनार्थमागतानां स्नात्रादिदर्शनधर्मकथाद्यर्थं तत्रैव स्थितानामभ्यर्णे उचिते समीपे, उचितत्वं चार्धचतुर्थहस्तप्रमाणात् क्षेत्राद् बहिरवस्थानम्, प्रतिपत्तिर्व्याख्यास्यमाना वन्दनकादिरूपा वा, तत्पुरःसरं तत्पूर्वकं, विदधीत कुर्य्यात्, विशुद्धात्मा निर्मलचित्तो न तु दम्भादियुक्तः, प्रत्याख्यानस्य देवसमीपे कृतस्य प्रकाशनं गुरोः पुरतः प्रकटनम्; त्रिविधं हि प्रत्याख्यानविधानमात्मसाक्षिकं देवसाक्षिकं गुरुसाक्षिकं च ॥ १२५ ॥

प्रतिपत्तिपुरःसरमित्युक्तमिति गुरुप्रतिपत्तिं श्लोकद्वयेन दर्शयति—

अभ्युत्थानं तदालोकेऽभियानं च तदागमे ।
शिरस्यञ्जलिसंश्लेषः स्वयमासनढौकनम् ॥१२६॥
आसनाऽभिग्रहो भक्त्या वन्दना पर्य्युपासनम् ॥
तद्यानेऽनुगमश्चेति प्रतिपत्तिरियं गुरोः ॥ १२७ ॥

अभ्युत्थानं ससम्भ्रममासनत्यागः, तदालोके गुरूणामालोकने सति, अभियानमभिमुखं गमन तदागमे गुर्वागमे, शिरसि मस्तके गुरुदर्शनसमकालमञ्जलिसंश्लेषः करकोरकाकारस्तो नमो खमासमणाणंति वचनोच्चारपूर्वकं स्वयमित्यात्मना न तु परप्रेषणेन आसनढौकनमासनसन्निधापनम् ॥१२६॥ आसनाऽभिग्रहः आसन उपविष्टेषु गुरुषु स्वयमासितव्यमित्यभिग्रहः आसनाभिग्रहः, भक्त्या भक्तिपूर्वकं वन्दना पञ्चविंशत्यावश्यकविशुद्धं वन्दनं स्थानस्थितानां च गमनादिव्याकुलत्वाभावे पर्य्युपासनं सेवा, तेषां गुरूणां याने

गमनेऽनुगमनं पृष्ठतः कतिपयपदानुसरणमियं प्रतिपत्तिरुपचार-विनयरूपा गुरोर्धर्माचार्यस्य ॥ १२७ ॥

ततो गुरुपार्श्वे धर्मदेशनां श्रुत्वा—

ततः प्रतिनिवृत्तः सन् स्थानं गत्वा यथोचितम् ।
सुधीर्धर्माऽविरोधेन विदधीतार्थचिन्तनम् ॥ १२८ ॥

ततो देवगृहात् प्रतिनिवृत्तो व्यावृत्तः सन् यथोचितं स्थानं गत्वा यथोचितमिति यदा राजादिस्तदा धवलगृहं यद्यमात्यादिस्तदा करणम्; अथ वणिगादिस्तदा आपणमिति सुधीर्बुद्धिमान् विदधीत अर्थचिन्तनमर्थोपायचिन्तां धर्माविरोधेनेति धर्मस्य जिनधर्मस्य अविरोधेन अबाधया। अत्र चार्थचिन्तनमित्यनुवाद्यं तस्य स्वतःसिद्धत्वात्, धर्माविरोधेनेति विधेयमप्राप्तत्वात्। धर्माविरोधश्च राज्ञां दरिद्रेश्वरयोर्मान्यामान्ययोरुत्तमनीचयोर्माध्यस्थ्येन न्यायदर्शनात्, नियोगिनां च राजार्थप्रजार्थसाधनेन, वणिजां च कूटतुलाकूटमानादिपरिहारेण पञ्चदशकर्मादानपरिहारेण च बोद्धव्यः ॥ १२८ ॥

ततो माध्याह्निकीं पूजां कुर्यात् कृत्वा च भोजनम् ॥
तद्विद्भिः सह शास्त्रार्थरहस्यानि विचारयेत् ॥ १२९ ॥

ततस्तदनन्तरं माध्याह्निकीं मध्याह्नकालभाविनीं पूजां जिनसपर्यां कुर्यात् कृत्वा विधाय च भोजनमित्यनुवादः। माध्याह्निकीपूजाभोजनयोश्च न कालनियमः। तीव्रबुभुक्षोर्हि बुभुक्षा-

कालो भोजनकाल इति रूढेर्मध्याह्नादर्वागपि गृहीतप्रत्याख्यानं तोरयित्वा देवपूजापूर्वकं भोजनं कुर्वन्न दुष्यति। अत्र चाऽयं विधिः—

'जिनपूत्रोचिअदाणं परियणसम्भालणा उचियकिच्चं।

ठाणुवएसो य तहा पच्चक्खाणस्स सम्भरणं ॥ १ ॥

तथा भोजनाऽनन्तरं सम्भवतो ग्रन्थिसहितादेः प्रत्याख्यानस्य करणं प्रमादपरिजिहीर्षोर्हि प्रत्याख्यानं विना न युक्तं क्षणमप्यासितुम्। शास्त्रार्थानां रहस्यान्यैदंपर्य्याणि विचारयेदिदमित्थं भवति नेति वा सम्प्रधारयेत्, कथं, सह सार्धं कैस्तद्विद्भिः तच्छास्त्रार्थरहस्यं विदन्ति ये तैः, गुरुमुखात् श्रुतान्यपि शास्त्रार्थरहस्यानि परिशीलनाविकलानि न चेतसि सुदृढप्रतिष्ठानि भवन्तीति कृत्वा ॥ १२९ ॥

ततश्च सन्ध्यासमये कृत्वा देवार्चनं पुनः।

कृतावश्यककर्मा च कुर्यात् स्वाध्यायमुत्तमम् ॥१३०॥

ततस्तदनन्तरं यो द्विर्भुङ्क्ते स विकालसमये अन्तर्मुहूर्तादर्वाग् भोजनं कृत्वा सन्ध्यासमये पुनस्तृतीयवारं देवार्चनं कृत्वा साधुसमीपं गत्वा भूमिकौचित्येन षड्विधावश्यकं सामायिक-चतुर्विंशतिस्तव-वन्दनक-प्रतिक्रमण-कायोत्सर्ग-प्रत्याख्यानलक्षणं कुर्यात्; तत्र सामायिकमार्तरौद्रध्यानपरिहारेण धर्मध्यानपरि-

(१) जिनपूजोचितदानं परिजनसंभालनमुचितकृत्यम्।

स्थानोपवेशनं तथा प्रत्याख्यानस्य संस्मरणम् ॥ १ ॥

प्रथमप्रवेशे क्षामणाकाले शिष्याचार्ययोरवनमच्छिरोद्वयम्, निष्क्रम्य पुनः प्रवेशे तथैव च शिरोद्वयम् । १९ । त्रिगुप्तं मनोवाक्काय-कर्मभिर्गुप्तम् । २२ । तथा प्रथमोऽनुज्ञाप्य प्रवेशो द्वितीयः पुनर्निर्गत्य प्रवेश इति द्वौ प्रवेशौ यत्र तद् द्विप्रवेशमेकं निष्क्रमणमावश्यक्या निर्गच्छतो यत्र तदेकनिष्क्रमणम् । २५ । द्वात्रिंशद्दोषा यथा

[1]अणाढियं च थड्ढं च पविद्धं परिपिंडियं ।
टोलगइ अंकुसं चेव तहा कच्छभरिंगिअं ॥ १ ॥
मच्छोव्वत्तं मणसा य पउट्ठं तह य वेइयाबद्धं ।
भयसा चेव भयंतं मेत्ती गारवकारणा ॥ २ ॥
तेणिअं पडणीअं चेव रुट्ठं तज्जियमेव य ।
सढं च हीलिअं चेव तहा विपलिउंचिअं ॥ ३ ॥
दिट्ठमदिट्ठं च तहा सिंगं च करमोअणं ।
आलिद्धमनालिद्धं ऊणं उत्तरचूलिअं ॥ ४ ॥

---

(१) अनादृतं च स्तब्धं च प्रविद्धं परिपिण्डितम् ।
टोलगति अङ्कुशं च तथा कच्छपरिङ्गितम् ॥ १ ॥
मत्स्योद्वृत्तं मनसा च प्रदुष्टं तथा च वेदिकाबद्धम् ।
भयात् चैव भजमानं मैत्री गौरवकारणम् ॥ २ ॥
स्तैनिकं प्रत्यनीकं चैव रुष्टं तर्जितमेव च ।
शठं च हीलितं चैव तथा विपरिकुञ्चितम् ॥ ३ ॥
दृष्टादृष्टं च तथा शृङ्गं च करमोचनम् ।
आश्लिष्टमनाश्लिष्टमूनमुत्तरचूलितम् ॥ ४ ॥

ततोऽहमेवंविधेनाऽपि वन्दनं दापयितुमारब्ध इति चिन्तयतो वन्दनम् ।९। वेदिकाबद्धं जानुनोरुपरि हस्तौ निवेश्य अधो वा पार्श्वयोर्वा उत्सङ्गे वा जानु करद्वयान्तः कृत्वा वा इति पञ्चभि-र्वेदिकाभिर्बद्धं युक्तं वन्दनम् ।१०। बिभ्यत् सङ्घात् कुलात् गच्छात् क्षेत्राद्वा निष्कासयिष्येऽहमिति भयाद् वन्दनम् ।११। भजमानं भजते मां सेवायां पतितो मम अग्रे वा मम भजनं करिष्यति ततोऽहमपि वन्दनसत्कं निहोरकं निवेशयामीति बुद्ध्या वन्दनम् ।१२। मैत्रीतो मम मित्रमाचार्य इति, आचार्येणेदानीं मैत्री भवत्विति वा वन्दनम् ।१३। गौरवाद्वन्दनकसामाचारीकुशलो-ऽहमिति गर्वादन्येऽप्यवगच्छन्तु मामिति यथावदावर्तादीना-राधयतो वन्दनम् ।१४। कारणाद् ज्ञानादिव्यतिरिक्ताद्वस्त्रादि-लाभहेतोर्वन्दनम्, यद्वा ज्ञानादिनिमित्तमपि लोकपूज्योऽन्येभ्यो वाऽधिकतरो भवामीत्यभिप्रायतो वन्दनम्, यद्वा वन्दनकमूल्य-वशीकृतो मम प्रार्थनाभङ्गं न करिष्यतीति बुद्ध्या वन्दनम् ।१५। स्तैनिकं मम लाघवं भविष्यतीति परेभ्य आत्मानं निगूहयतो वन्दनम्, अयमर्थः—एवं नाम शीघ्रं वन्दते यथा स्तैनवत् केनचिद् दृष्टः केनचिन्नेति ।१६। प्रत्यनीकमाहारादिकाले वन्दनम् ।१७। यदाह—

'वक्खित्तपराहुत्ते पमत्ते मा कयावि वंदिज्जा ॥
आहारं च करिंते नीहारं वा जइ करेइ ॥ १ ॥

(१) व्याक्षिप्तपराभूतान् प्रमत्तान् मा कदापि वन्दिष्ठाः ।
आहारं च कुर्वतो नीहारं वा यदि करोति ॥ १ ॥

रुष्टं क्रोधाध्मातस्य गुरोर्वन्दनमात्मना वा क्रुद्धेन वन्दनम् ।१८। तर्जितमवन्द्यमानो न कुप्यसि वन्द्यमानश्चाविशेषज्ञतया न प्रसी-दसि इति निर्भर्त्सयतो यद्वा बहुजनमध्ये मां वन्दनं दापयंस्तिष्ठसि ज्ञास्यसे मया तवैकाकिन इति धिया तर्जन्या शिरसा वा तर्ज-यतो वा वन्दनम् ।१९। शठं शाठ्येन विश्रम्भार्थं वन्दनं ग्लानादि-व्यपदेशं वा कृत्वा न सम्यग्वन्दनम् ।२०। हीलितं हे गणिन् वाचक ! किं भवता वन्दितेनेत्यादिना अवजानतो वन्दनम् ।२१। विपरिकुञ्चितम्, अर्धवन्दित एव देशादिकथाकरणम् ।२२। दृष्टादृष्टं तमसि स्थितः केनचिद्व्यवहित एवमेवास्ते दृष्टस्तु वन्दत इति ।२३। शृङ्गं अहो कायं काय इत्याद्यावर्तानुच्चारयतो ललाटमध्यदेशम-स्पृशतः शिरसो वामदक्षिणे शृङ्गे स्पृशतो वन्दनकरणम् ।२४। करः कर इव राजदेयभाग इव अर्हत्प्रणीतो वन्दनककरोऽवश्यदातव्य इति धिया वन्दनम् ।२५। मोचनं लौकिककरादयं मुक्ता न मुच्यामहे वन्दनकरादिति बुद्ध्या वन्दनम् ।२६। आश्लिष्टानाश्लिष्टमत्र चतुर्भङ्गी, सा च अहो कायं काय इत्याद्यावर्तकाले भवति रजोहरणस्य शिरसश्च कराभ्यामाश्लेषणं, रजोहरणस्य न शिरसः, शिरसो न रजोहरणस्य, न रजोहरणस्य नाऽपि शिरसः । अत्र प्रथमः शुद्धः शेषास्तु दुष्टाः । २७ । न्यूनं व्यञ्जनाभिलापावश्यकैरसम्पूर्णम् ।२८। उत्तरचूडं वन्दनं दत्त्वा महता शब्देन मस्तकेन वन्दे इत्यभि-धानम् । २९ । मूकं आलापाननुच्चारयतो वन्दनम् ।३०। ढड्ढरं महता शब्देनोच्चारयतो वन्दनम् । ३१ । चुडली उल्मुकं यथोल्मुकं गृह्णाति तथा रजोहरणं गृहीत्वा वन्दनं, यद्वा यत्र दीर्घहस्तं

[illegible]मि वन्दे इति प्रथमं स्थानम्, [illegible]
वन्दे इति षष्ठं स्थानम् । २५ । वन्दनके च [illegible]
स्थानानि भवन्ति, तद्यथा इच्छा अनुज्ञापना अव्याबाधं यात्रा [illegible]
[illegible]पराधक्षामणा च,

यदाह —

'इच्छा य अणुण्णवणा अव्वाबाहं च जत्त जवणा य ।
अवराहखामणा वि य छट्ठाणा हुंति वंदणए ॥ १ ॥

गुरुवचनान्यपि षड् एव यथा छन्देन अनुजानामि तथेति तु[illegible]
मपि वर्तते एवमहमपि क्षमयामीति ।

यदाह —

'छंदेन अणुजाणामि तहत्ति तुब्भंपि वट्टइ एवं ।
अहमवि खामेमि तुमे आलावा वंदणरिहस्स ॥ १ ॥

एते च द्वये अपि यथास्थान सूत्रव्याख्यायां दर्शयिष्यन्ते ।

सूत्रं च—

इच्छामि खमासमणो वंदिउं जावणिज्जाए निसीहिय[illegible]
अनुजाणह मे मिउग्गहं निसीहि अहो कायं कायसंफासं खम[illegible]
ज्जो भे किलामो अप्पकिलंताणं बहुसुभेण भे दिवसो वइ[illegible]
जत्ता भे जवणिज्जं च भे खामेमि खमासमणो देवसिअं वइ[illegible]

---

(१) इच्छा चानुज्ञापना अव्याबाधं च यात्रा यापना च ।
अपराधक्षामणा चैव षट् स्थानानि भवन्ति वन्दनके ॥ १ ॥

(२) छन्देनानुजानामि तथेति तवाऽपि वर्तते एवम् ।
अहमपि क्षमयामि तवालापाद् वन्दनार्हस्य ॥ १ ॥

आवस्सिआए पडिक्कमामि खमासमणाणं देवसिआए आसायणाए तित्तीसन्नयराए जं किंचि मिच्छाए मणदुक्कडाए वयदुक्कडाए कायदुक्कडाए कोहाए माणाए मायाए लोहाए सव्वकालियाए सव्वमिच्छोवयाराए सव्वधम्माइक्कमणाए आसायणाए जो मे अइ-आरो कओ तस्स खमासमणो ! पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि ।

व्याख्या—अत्र हि शिष्यो गुरुवन्दनेन वन्दितुकामः पूर्वं लघु-वन्दनपुरःसरं संदंशकौ प्रमृज्योपविष्ट एव मुखवस्त्रिकां पञ्चविंशति-कृत्वः प्रत्युपेक्षते, 'तथा च शरीरं पञ्चविंशतिकृत्व एव प्रमृज्य परेण विनयेन मनोवाक्कायसंशुद्धो गुरोः सकाशादात्मप्रमाणात् क्षेत्राद् बहिःस्थितोऽधिज्यचापवदवनतकायः करद्वयगृहीतरजोहरणादि-र्वन्दनायोद्यत एवमाह—इच्छामि अभिलषामि अनेन बलाभि-योगः परिहृतः, क्षमाश्रमण ! 'क्षमूषि सहने' इत्यस्य षित्त्वादङि क्षमा सहनमित्यर्थः, श्राम्यति संसारविषये खिन्नो भवति तपस्य-तीति वा, नन्द्यादित्वात् कर्तरि अने श्रमणः, क्षमाप्रधानः श्रमणः क्षमाश्रमणः तस्य सम्बोधने प्राकृते खमासमणो ! "डो दीर्घो वा" ॥ (सिद्धहेम०८।३।३८) ॥ इति आमन्त्र्ये सेर्डोकारः, क्षमाग्रहणेन मार्दवार्जवाद्यो गुणाः सूचिताः । ततश्च क्षमादिगुणोपलक्षित-यतिप्रधान ! । अनेन वन्दनार्हत्वं तस्यैव सूचितम्, किं कर्तुं वन्दितुं नमस्कर्तुं भवन्तमिति गम्यते, कया, यापनीयया नैषेधिक्या, अत्र नैषेधिकयेति विशेष्यं, यापनीययेति विशेषणम्,

(१) च तथा ।

[illegible]

अत्र तावद् गुरुर्यदि व्याक्षेपाद्याकुलस्तदा भणति प्रतीक्षस्वेति। तत्र व्याक्षेपादिकारणं यदि कथनीयं भवति तदा कथयति अन्यथा तु नेति चूर्णिकाराभिमतम्, वृत्तिकारमते तु सर्वं 'तिविहेणे'ति भणति मनसा वचसा कायेन प्रतिषिद्धोऽयम्। ततः शिष्यः संक्षेपवन्दनं करोति। व्याक्षेपादिरहितश्चेत् तदा वन्दनमनुज्ञातुकामः 'छन्देनेति' वदति छन्देनाऽभिप्रायेण ममाऽप्येतदभिमतमित्यर्थः। ततो विनेयोऽवग्रहाद् बहिःस्थित एवेदमाह 'अनुजानीत' अनुमन्यध्वं मे इति आत्मनिर्देशे, किं, मितश्चासाववग्रहश्च मितावग्रहः, इहाचार्यस्य चतसृषु दिक्षु आत्मप्रमाणं क्षेत्रमवग्रहः, तमिहाचार्याऽनुज्ञां विना प्रवेष्टुं न कल्पते,

यदाह—

> '[1]आयप्पमाणमित्तो चउद्दिसिं होइ अवग्गहो गुरुणो।
> अणणुन्नायस्स सया न कप्पए तत्थ पविसेउं ॥ १ ॥

---

(१) आत्मप्रमाणमात्रश्चतुर्दिशं भवत्यवग्रहो गुरोः।
अननुज्ञातस्य सदा न कल्पते तत्र प्रवेष्टुम् ॥ १ ॥

ततो गुरुर्भणति—अनुजानामि। ततः शिष्यो भुवं प्रमृज्य नैषेधिकीं कुर्वन् गुर्ववग्रहे प्रविशति। निसीहीति निषिद्धसर्वाशुभव्यापारः सन् प्रविशाम्यहमित्यर्थः। ततः संदंशप्रमार्जनपूर्वकमुपविशति। गुरुपादान्तिके च भूमौ निधाय रजोहरणं तन्मध्ये च गुरुचरणयुगलं संस्थाप्य मुखवस्त्रिकया वामकर्णादारभ्य वामहस्तेन दक्षिणकर्णं यावल्ललाटमविच्छिन्नं च वामं जानु त्रिः[1] प्रमृज्य मुखवस्त्रिकां वामजानूपरि स्थापयति। ततोऽकारोच्चारणसमकालं रजोहरणं कराभ्यां संस्पृश्य होकारोच्चारणसमकालं ललाटं स्पृशति। ततः काकारोच्चारणसमकालं रजोहरणं स्पृष्ट्वा यंकारोच्चारणसमकालं ललाटं स्पृशति। पुनश्च काकारोच्चारणसमकालं रजोहरणं स्पृष्ट्वा यकारोच्चारणसमकालं ललाटं स्पृशति। ततः संफासमिति वदन् शिरसा पाणिभ्यां च रजोहरणं स्पृशति। ततः शिरसि बद्धाञ्जलिः 'खमणिज्जो भे किलामो' इत्यारभ्य 'दिवसो वइक्कंतो' यावद् गुरुमुखे निविष्टदृष्टिः पठति। अधस्तात् कायोऽधःकायः पादलक्षणस्तं प्रति कायेन निजदेहेन हस्तललाटलक्षणेन संस्पर्श आमर्शस्तं 'करोमि' इति गम्यते। एतदपि ममानुजानीध्वमित्यनेन योगः। आचार्यमननुज्ञाप्य हि संस्पर्शो न कार्यः। ततो भणति—खमणिज्जो क्षमणीयः सोढव्यः भे भवद्भिः, किलामो क्लमः संस्पर्शे सति देहग्लानिरूपः। तथा, अप्पकिलंताणं अल्पं स्तोकं क्लान्तं क्लमो

(१) च त्रिः प्रदक्षिणीकृत्य प्रमृज्य।

[illegible]

'ज' इत्यनुदात्तस्वरेणोच्चारयन् रजोहरणं कराभ्यां स्पृष्ट्वा रजो[illegible] ललाटयोरन्तराले 'त्ता' इति स्वरितेन स्वरेणोच्चार्य, [illegible] 'भे' इत्युच्चारयन् मस्तकस्पर्शेन ललाटं स्पृशति, यात्रा भे[illegible] तपोनियमादिलक्षणा क्षायिकक्षायोपशमिकभावरूपा[illegible] वा भे भवताम् 'उत्सर्पति' इति गम्यते। पश्चाद्गुरोः प्र[illegible] वचनम् 'तुब्भं पि वट्टइ' मम तावदुत्सर्पति, भवतोऽप्युत्सर्पति।

अधुना नियन्त्रणीयपदार्थविषयां वार्तां पृच्छन् पुनरप[illegible] विनेयः—जवणिज्जं च भे, 'ज' इत्यनुदात्तस्वरेण रजोहरणं स[illegible] 'व' इति स्वरितस्वरेण रजोहरणललाटयोरन्तराले उच्चार्य णिज[illegible] मुदात्तस्वरेणोच्चारयन् कराभ्यां ललाटं स्पृशति, न पुनः प्रतिव[illegible] प्रतीक्षते, अर्धसमाप्तत्वात् प्रश्नस्य ; ततो 'ज्जं' इत्यनुदात्तस्वरे[illegible] च्चार्य कराभ्यां रजोहरणं स्पृशन् पुनरेव रजोहरणललाटान्त[illegible] 'च' इति स्वरितस्वरेणोच्चार्य 'भे' इत्युदात्तस्वरेणोच्चारयन् करा[illegible] ललाटं स्पृष्ट्वा प्रतिवचनं शुश्रूषमाणस्तथैवास्ते ; जवणिज्जं [illegible] यापनीयमिन्द्रियनोइन्द्रियोपशमादिना प्रकारेणाबाधितं च[illegible]

भवतां 'शरीरम्' इति गम्यम्। एवं परया भक्त्या पृच्छता विनेयेन विनयः कृतो भवति। अत्रान्तरे गुरुराह—एवं आम यापनीयं च मे इत्यर्थः। इदानीमपराधक्षामणां कुर्वन् रजोहरणोपरिन्यस्तहस्तमस्तको विनेय इदमाह—'खामेमि खमासमणो! देवसियं वइक्कमं' क्षमयामि क्षमाश्रमण! दिवसे भवो दैवसिकस्तं व्यतिक्रममवश्यकरणीययोगविराधनारूपमपराधम्। अत्रान्तरे च गुरुर्वदति—'अहमवि खामेमि' अहमपि क्षमयामि दैवसिकं त्वं व्यतिक्रमं प्रमादोद्भवम्। ततो विनेयः प्रणमन् क्षमयित्वा 'आवसिआए' इत्यादि 'जो मे अइआरो कओ' इत्यन्तं स्वकीयातिचारनिवेदनपरमालोचनार्हप्रायश्चित्तसूचकं सूत्रं 'तस्स खमासमणो पडिक्कमामि' इत्यादिकं च प्रतिक्रमणार्हप्रायश्चित्ताभिधायकं पुनरकरणेनाभ्युत्थित आत्मानं शोधयिष्यामीति बुद्ध्याऽवग्रहात् निःसृत्य पठति,—अवश्यं कर्तव्येषु चरणकरणेषु भवा क्रिया आवश्यकी तया आसेवनाद्वारेण हेतुभूतया यदसाध्वनुष्ठितं तस्मात् प्रतिक्रमामि निवर्ते; इत्थं सामान्येनाभिधाय विशेषेणाभिधत्ते—क्षमाश्रमणानां संबन्धिन्या दैवसिक्या ज्ञानाद्यायस्य शातना खण्डना आशातना तया, किंविशिष्टया, त्रयस्त्रिंशदन्यतरया त्रयस्त्रिंशत्संख्यानामाशातनानामन्यतरया कयाचित्, उपलक्षणत्वाद् द्वाभ्यां तिसृभिरपि, यतो दिवसमध्ये सर्वा अपि संभवन्ति; ताश्च वक्ष्यन्ते; यत् किञ्चित् कदालम्बनमाश्रित्य मिथ्यया मिथ्यायुक्तेन कृतयेत्यर्थः; मिथ्याभावोऽत्रास्तीत्यभ्रादित्वादकारे मिथ्या, एवं क्रोधयेत्यादावपि; मनसा

दुष्कृता मनोदुष्कृता तया प्रद्वेषनिमित्तयेत्यर्थः ; वाग्दुष्कृ
असभ्यपरुषादिवचननिमित्तया, कायदुष्कृतया आसन-गम
स्थानादिनिमित्तया, क्रोधया क्रोधयुक्तया, मानया मानयुक्त
मायया मायायुक्तया, लोभया लोभयुक्तया ; अयं भावः—क्रो
यनुगतेन या काचिद् विनयभ्रंशादिलक्षणाऽऽशातना क्र
तयेति। एवं दैवसिक्याशातनोक्ता। अधुना पक्ष चतुर्मा
संवत्सरकालकृता इहभवान्यभवगतातीतानागतकालकृता च
आशातना तस्याः संग्रहार्थमाह—'सव्वकालियाए' सर्वकाले
भवा सार्वकालिकी तया। अनागतकाले कथमाशातनासंभवः
इति चेत्। उच्यते,—'श्वोऽस्य गुरोरिदमिदं वानिष्टं कर्तामि
इति चिन्तया। इत्थं भवान्तरेऽपि तद्वधादिनिदानकरणे
संभवत्येव। सर्व एव मिथ्योपचारा मातृस्थानगर्भाक्रियाविशे
यस्यां सा सर्वमिथ्योपचारा तया। सर्वे धर्मा अष्टौ प्रवचनमात
सामान्येन करणीयव्यापारा वा तेषामतिक्रमणं लङ्घनं विराध
यस्यां सा सर्वधर्मातिक्रमणा। एवंभूतयाऽऽशातनया यो मय
तिचारोऽपराधः कृतो विहितस्तस्यातिचारस्य हे क्षमाश्रमण
युष्मत्साक्षिकं प्रतिक्रमामि अपुनःकरणेन निवर्ते ; तथा, दुष्टक
कारिणं निन्दाम्यात्मानं भवोद्विग्नेन प्रशान्तेन चेतसा ; तथ
गर्हे आत्मानं दुष्टकर्मकारिणं युष्मत्साक्षिकम् ; व्युत्सृजाम्यात्म
दुष्टकर्मकारिणं तदनुमतित्यागेन। एवं ततस्थ एवार्धावनतका
पुनरेवं भणति—'इच्छामि खमासमणो' इत्यारभ्य यावद् 'वोसि
ि' इति ; परमयं विशेषः—अवग्रहाद् बहिर्निष्क्रमणरहि

आवश्यकचूर्णिदर्शितं द्वादशावर्त्तं पठति । वन्दनकविधिविशेषसंवादिकाश्चेमा गाथाः—

(१)आयारस्स उ मूलं विणओ सो गुणवओ य पडिवत्ती ।
सा य विहिवंदणाओ विही इमो बारसावत्ते ॥ १ ॥
होउमहाजाओ वहिं संडास पमज्ज उक्कुडुयट्ठाणो ।
पडिलेहियमुहपोत्तीपमज्जियावरिमदेहद्धो ॥ २ ॥
उट्ठेउं परिसंठियकुप्परट्ठियपट्टगोनमियकाओ ।
जुत्तिपरिच्छन्नपच्छद्धो पवयणकुच्छा जह न होई ॥ ३ ॥
वामंगुलिमुहपोत्तीयाकरजुयलतलत्थजुत्तरयहरणो ।
अवणिय जहोत्तदोसं गुरुसंमुह भणइ पयडमिणं ॥ ४ ॥
इच्छामि खमासमणो इच्चाई जा निसीहियाए त्ति ।
छंदेणं ति सुणेउं गुरुवयणं उग्गहं जाए ॥ ५ ॥

---

(१) आचारस्य तु मूलं विनयः स गुणवतश्च प्रतिपत्तिः ।
सा च विधिवन्दनाद् विधिरयं द्वादशावर्त्तैः ॥१॥
भूत्वा यथाजातो बहिः संदंशं प्रमृज्योत्कुटुकस्थानः ।
प्रतिलिखितमुखवस्त्रिकाप्रमार्जितोपरिमदेहार्धः ॥२॥
उत्थाय प्रतिसंस्थितकूर्परस्थितपट्टकावनतकायः ।
युक्तिपरिच्छन्नपश्चार्धः प्रवचनकुत्सा यथा न भवति ॥३॥
वामाङ्गुलिमुखवस्त्रिकाकरयुगलतलस्थयुक्तरजोहरणः ।
अपनीय यथोक्तदोषं गुरुसंमुखं भणति प्रकटमिदम् ॥४॥
इच्छामि क्षमाश्रमण ! इत्यादि यावद् नैषेधिक्येति ।
छन्देनेति श्रुत्वा गुरुवचनमवग्रहं याति ॥५॥

अणुजाणह मे मिउग्गहमणुजाणामि त्ति भणिए गुरुणा ।
उग्गहखेत्तं पविसइ पमज्ज संडासगं निसियइ ॥ ६ ॥
वामकरं रयहरणं पमज्ज भूमीइ संठवेऊण ।
सीसफुसणेण होही कज्जं ति तओ पढमयं चेव ॥ ७ ॥
वामकरगहियपोत्ती एगदेसेण वामकण्णाओ ।
आरभिऊण निडालं पमज्ज जा दाहिणो कण्णो ॥ ८ ॥
अवुच्छिन्नं वामगजाणुं नमिऊण तत्थ मुहपोत्तिं ।
रयहरणमज्झदेसे ठावए पुज्जपायजुगं ॥ ९ ॥
सुपसारियबाहुजुओ ऊरुजुयलंतरं अफुसमाणो ।
जमलट्ठियग्गपाणी अकारमुच्चारयं फुसइ ॥ १० ॥
अब्भंतरपरियट्टियकरयलमुवणीय सीसफुसणंतं ।
तो करजुयलं निज्जा होकारोच्चारसमकालं ॥ ११ ॥

---

(१) अनुजानीध्वं मे मितावग्रहमनुजानामीति भाषिते गुरुणा ।
अवग्रहक्षेत्रं प्रविशति प्रमृज्य संदंशं निषीदेत् ॥६॥
वामकरं रजोहरणं प्रमृज्य भूमौ संस्थाप्य ।
शिरःस्पर्शनेन भविष्यति कार्यमिति ततः प्रथममेव ॥७॥
वामकरगृहीतमुखवस्त्रिका एकदेशेन वामकर्णात् ।
आरभ्य ललाटं प्रमृज्य यावद् दक्षिणः कर्णः ॥८॥
अव्युच्छिन्नं वामकजानु न्यस्य तत्र मुखवस्त्रिकाम् ।
रजोहरणमध्यदेशे स्थापयेत् पूज्यपादयुगम् ॥९॥
सुप्रसारितबाहुयुग ऊरुयुगलान्तरमस्पृशन् ।
यमलस्थिताग्रपाणिरकारमुच्चारयन् स्पृशति ॥१०॥
अभ्यन्तरपरिवर्त्तितकरतलमुपनीय शिरःस्पर्शनान्तम् ।
ततः करयुगलं नयेद् होकारोच्चारसमकालम् ॥११॥

[1]पुण हिट्ठा गुरुकरयल काकारसमं ठविज्ज रयहरणं ।
यंसद्देणं समयं पुणो वि सीसं तहच्चेअ ॥ १२ ॥
काकारसमुच्चारणसमयं रयहरणमालुहिऊण ।
य त्ति य सद्देण समं पुणो वि सीसं तहच्चेअ ॥ १३ ॥
संफासं ति भणंतो सीसेणं पणमिऊण रयहरणे ।
उन्नामिअमुद्धंजलि अव्वाबाहं तओ पुच्छे ॥ १४ ॥
खमणिज्जो भे किलामो अप्पकिलंताणं बहुसुभेणं भे ।
दिण पक्खो वरिसो वा वइक्कंतो इय तओ तुसिणी ॥ १५ ॥
गुरुणा तह त्ति भणिए जत्ता जवणा य पुच्छियव्वा य ।
परिसंठिएण इणमो सराण जोएण कायव्वं ॥ १६ ॥
तत्थ य परिभासिमो मंदमइविणेअगाहणट्ठाए ।
नीउच्चमज्झमाओ सरजुत्तीओ ठवेयव्वा ॥ १७ ॥

---

(१) पुनरधस्तात् गुरुकरतलं काकारसमं स्थापयेद् रजोहरणम् ।
यंशब्देन समकं पुनरपि शिरस्तथैव ॥१२॥
काकारसमुच्चारणसमकं रजोहरणमाश्लिष्य ।
य इति च शब्देन समं पुनरपि शिरस्तथैव ॥१३॥
संफासं इति भणन् शिरसा प्रणम्य रजोहरणे ।
उन्नामितमूर्धाञ्जलिरव्याबाधां ततः पृच्छेत् ॥१४॥
क्षमणीयो भवद्भिः क्लमोऽल्पक्लान्तानां बहुशुभेन भवताम् ।
दिनं पक्षो वर्षं वा व्यतिक्रान्तमिति ततस्तूष्णीकः ॥१५॥
गुरुणा तथेति भणिते यात्रा यापना च प्रष्टव्या च ।
परिसंस्थितेनेदं स्वराणां योगेन कर्तव्यम् ॥१६॥
तत्र च परिभाषामहे मन्दमतिविनेयग्रहणार्थम् ।
नीचोच्चमध्यमाः स्वरयुक्तयः स्थापयितव्याः ॥१७॥

[1]नीओ तत्थणुदत्तो रयहरणे उच्चओ उदत्तो उ ।
सीसे निदंसणीओ तदंतरालम्मि सरिओ य ॥ १८ ॥
अणुदत्तो अ जकारो त्ता सरिओ होइ भे उदत्तसरो
पुणरवि जवणिसद्दा अनुदत्ताई मुणेअव्वा ॥ १९ ॥
ज्जं अणुदत्तो अ पुणो च स्सरिओ भे उदत्तसरणामो
एवं रयहरणाइसु तिसु ठाणेसुं सरा णेया ॥ २० ॥
पढमं आवत्ततिगं वण्णदुगेणं तु रइयमणुकमसो ।
बीयावत्ताण तिगं तिहि तिहिं वण्णेहि निप्फन्नं ॥ २
रयहरणम्मि जकारं त्ताकारं करजुएण मज्झम्मि ।
भेकारं सीसम्मि अ काउं गुरुणो वयं सुणसु ॥ २२ ॥
तुब्भं पि वट्टइ त्ति य गुरुणा भणिअम्मि सेसआवत्ता
दुण्णि वि काउं तुसिणी जा गुरुणा भणिअमेवं ति ॥

---

(१) नीचकस्त्वनुदात्तो रजोहरणे उच्चक उदात्तस्तु ।
शीर्षे निदर्शनीयस्तदन्तराले स्वरितश्च ॥१८॥
अनुदात्तश्च जकारः त्ता स्वरितो भवति भे उदात्तस्वर ।
पुनरपि जवणिशब्दा अनुदात्तादयो ज्ञातव्याः ॥१९॥
व्जं अनुदात्तश्च पुनश्च स्वरितो भे उदात्तस्वरनाम ।
एवं रजोहरणादिषु त्रिषु स्थानेषु स्वरा ज्ञेयाः ॥२०॥
प्रथममावर्तत्रिकं वर्णद्विकेन तु रचितमनुक्रमशः ।
द्वितीयावर्तानां त्रिकं त्रिभिस्त्रिभिर्वर्णैर्निष्पन्नम् ॥२१॥
रजोहरणे जकारं त्ताकारं करयुगेन मध्ये ।
भेकारं शिरसि च कृत्वा गुरोर्वचः शृणु ॥२२॥
तवापि वर्तत इति च गुरुणा भणिते शेषावर्तौ ।
द्वावपि कृत्वा तूष्णीको यावद् गुरुणा भणितमेवमिति ॥२३॥

[1]अह सीसो रयहरणे कयंजली भणइ सविणयं सिरसा ।
खामेमि खमासमणो ! देवसिआइवइक्कमणं ॥२४॥
अहमवि खामेमि तुमे गुरुणाऽणुण्णाए खामणे सीसो ।
निक्खमइ उग्गहाओ आवसियाए भणेऊण ॥२५॥
ओणयदेहो अवराहखामणं सव्वसुच्चरेऊण ।
निंदियगरहिअवोसट्टसव्वदोसो पडिक्कंतो ॥२६॥
खामित्ता विणएणं तिगुत्तो तेण पुणरवि तहेअ ।
उग्गहजायणपविसणदुओणयं दो पवेसं च ॥२७॥
पढमे छच्चावत्ता वीअपवेसम्मि हुंति छच्चेव ।
ते अ अहो इच्चाई असंकरेणं पउत्तव्वा ॥२८॥
पढमपवेसे सिरनामणं दुहा वीअए अ तह चेव ।
तेणेअ वउसिरंतं भणियमिणं एगनिक्खमणं ॥२९॥

(१) अथ शिष्यो रजोहरणे कृताञ्जलिर्भणति सविनयं शिरसा ।
क्षमयामि क्षमाश्रमण ! दैवसिकादिव्यतिक्रमणम् ॥२४॥
अहमपि क्षमयामि त्वां गुरुणाऽनुज्ञाते क्षमणे शिष्यः ।
निष्क्रामत्यवग्रहादावश्यक्या भणित्वा ॥२५॥
अवनतदेहोऽपराधक्षमणं सर्वमुच्चार्य ।
निन्दितगर्हितव्युत्सृष्टसर्वदोषः प्रतिक्रान्तः ॥२६॥
क्षमयित्वा विनयेन त्रिगुप्तस्तेन पुनरपि तथैव ।
अवग्रहयाचनप्रवेशनद्व्यवनतं द्वयोः प्रवेशं च ॥२७॥
प्रथमे षडावर्ता द्वितीयप्रवेशे भवन्ति षडेव ।
ते च अहो इत्यादयोऽसंकरेण प्रयोक्तव्याः ॥२८॥
प्रथमप्रवेशे शिरोनामनं द्विधा द्वितीयके च तथैव ।
तेनैव व्युत्सृजाम्यन्तं भणितमिदमेकनिष्क्रमणम् ॥२९॥

[1]एवमहाजाएणं तिगुत्तिसहिअं च हुंति चत्तारि।

सेसेसुं खित्तेसुं पणवीसावस्सया हुंति ॥२०॥

'तित्तीसन्नयराए' इत्युक्तमिति, त्रयस्त्रिंशदाशातना विविच्यन्ते—गुरोः पुरतो गमनं शिष्यस्य निष्कारणं विनयभङ्गहेतुत्वादाशातना, मार्गदर्शनादिकारणे तु न दोषः, गुरोः पार्श्वाभ्यामपि गमनम्, पृष्ठतोऽप्यासन्नगमनम्, निःश्वासक्षुतश्लेष्मपातादिदोषप्रसङ्गात्; ततश्च यावता भूभागेन गच्छत आशातना न भवति तावता गन्तव्यम् ।१।२।३। एवं पुरतः, पार्श्वतः, पृष्ठतश्च स्थानम्। ४।५।६। तथा, पुरतः पार्श्वतः पृष्ठतो वा निषदनम् । ७।८।९। आचार्येण सहोच्चारभूमिं गतस्याचार्यात् प्रथममेवाचमनम् ।१०। गुरोरालापनीयस्य कस्यचिच्छिष्येण प्रथममालपनम् ।११। शिष्यस्याचार्येण सह बहिर्गतस्य पुनर्निवृत्तस्याचार्यात् प्रथममेव गमनागमनालोचनम् । १२ । भिक्षामानीय शिष्येण गुरोः पूर्वं शैक्षस्य कस्यचित् पुरत आलोच्य पश्चाद् गुरोरालोचनम् । १३ । भिक्षामानीय प्रथमं शैक्षस्य कस्यचिदुपदर्श्य गुरोर्दर्शनम् । १४ । भिक्षामानीय गुरुमनापृच्छ्य शैक्षाणां यथारुचि प्रभूतभैक्ष्यदानम् ।१५। भिक्षामानीय शैक्षं कञ्चन निमन्त्र्य पश्चाद् गुरोरुपनिमन्त्रणम् । १६ । शिष्येण भिक्षामानीयाचार्याय यत् किञ्चिद् दत्त्वा स्निग्धमधुरमनोज्ञाहारशाकादीनां वर्णगन्धरसस्पर्शवतां

---

(१) एवं यथाजातेकं त्रिगुप्तिसहितं च भवन्ति चत्वारि।
शेषेषु क्षेत्रेषु पञ्चविंशतिरावश्यका भवन्ति ॥२०॥

द्रव्याणां स्वयमुपभोगः ।१७। रात्रौ 'आर्याः ! कः स्वपिति जागर्ति वा ?' इति गुरोः पृच्छतोऽपि जाग्रतोऽपि शिष्येणाप्रतिश्रवणम् । १८ । शेषकालेऽपि गुरौ व्याहरति यत्र तत्र स्थितेन शयितेन वा शिष्येण प्रतिवचनदानम् । १९ । आहूतेनासनं शयनं वा त्यक्त्वा संनिहितीभूय 'मस्तकेन वन्दे' इति वदता गुरुवचनं श्रोतव्यम्, तदकुर्वत आशातना । २० । गुरुणा आहूतस्य शिष्यस्य किमिति वचनम्, भणितव्यं च मस्तकेन वन्दे इति । २१ । गुरुं प्रति शिष्यस्य त्वंकारः । २२ । गुरुणा ग्लानादिवैयावृत्त्यादिहेतोः 'इदं कुरु' इत्यादिष्टः 'त्वमेव किं न कुरुषे' इति 'त्वमलसः' इत्युक्ते 'त्वमप्यलसः' इति च शिष्यस्य तज्जातवचनम् । २३ । गुरोः पुरतो बहोः कर्कशस्योच्चैःस्वरस्य च शिष्येण वदनम् । २४ । गुरौ कथां कथयति 'एवमेतत्' इत्यन्तराले शिष्यस्य वचनम् । २५ । गुरौ धर्मकथां कथयति 'न स्मरसि त्वमेतमर्थम्, नायमर्थः संभवति' इति शिष्यस्य वचनम् । २६ । गुरौ धर्मं कथयति सौमनस्यरहितस्य गुरूक्तमननुमोदमानस्य 'साधूक्तं भवद्भिः' इत्यप्रशंसतः शिष्यस्योपहतमनस्त्वम् । २७ । गुरौ धर्मं कथयति 'इयं भिक्षावेला सूत्रपौरुषीवेला, भोजनवेला' इत्यादिना शिष्येण पर्षद्भेदनम् । २८ । गुरौ धर्मकथां कथयति 'अहं कथयिष्यामि' इति शिष्येण कथाच्छेदनम् । २९ । तथा, आचार्येण धर्मकथायां कृतायामनुत्थितायामेव पर्षदि स्वस्य पाटवादिज्ञापनाय शिष्येण सविशेषं धर्मकथनम् । ३० । गुरोः पुरत उच्चासने समासने वा शिष्यस्योपवेशनम् ।३१। गुरोः शय्यासंस्तारकादिकस्य पादेन

घट्टनम्, अननुज्ञाप्य हस्तेन वा स्पर्शनम्, घट्टयित्वा स्पृष्ट्वा वाऽक्षामणम्; यदाह,—

[1]संघट्टइत्ता कायेण तहा उवहिणामवि ।
खमेह अवराहं मे वइज्ज न पुण त्ति अ ॥१॥ ३२ ।

गुरोः शय्यासंस्तारकादौ स्थानं निषदनं शयनं चेति ।३३।

एतदर्थसंवादिन्यो गाथाः—

[2]पुरओ पक्खासन्ने गमणं ठाणं निसीअणं ति नव ।
सेहे पुव्वं आइमइ आलवइ तह य आलोए ॥१॥
असणाइअमालोइअ पडिदंसइ देइ उवनिमतेइ ।
सेहस्स तहाहारइ लुद्धो निद्धाइ गुरुपुरओ ॥२॥
राओ गुरुस्स वयओ तुसिणी सुणिरो वि सेसकाले वि ।
तत्थ गओ वा पडिसुणेइ वेइ किंति व तुमं ति गुरुं ॥३॥

---

(१) संघट्ट्य कायेन तथोपधीनामपि ।
क्षमस्वापराधं मे वदेद् न पुनरिति च ॥१॥

(२) परतः पक्षासन्ने गमनं स्थानं निषदनमिति नव ।
शैक्षे पूर्वमाचमति आलपति तथा चालोचयति ॥१॥
अशनादिकमालोच्य प्रतिदर्शयति ददात्युपनिमन्त्रयति ।
शैक्षस्य तथाहरति लुब्धः स्निग्धादि गुरुपुरतः ॥२॥
रात्रौ गुरोर्वदतस्तूष्णीं श्रोताऽपि शेषकालेऽपि ।
तत्र गतो वा प्रतिशृणोति ब्रवीति किमिति वा त्वमपि गुरुम् ॥३॥

कर्त्तव्यः, न करणीयोऽकरणीयः, हेतुहेतुमद्भावश्चात्र यत एवोत्सूत्रो ऽत एवोन्मार्ग इत्यादि, उक्तस्तावत् कायिको वाचिकश्च । अधुना मानसिकमाह—दुज्झाओ दुष्टो ध्यातो दुर्ध्यात एकाग्रचित्ततयाऽऽर्त्तरौद्रलक्षणः, दुव्विचिंतिओ दुष्टो विचिन्तितो दुर्विचिन्तितः, अशुभ एव चलचित्ततया[1] 'जं थिरमज्झवसाणं तं झाणं जं चलं तयं चित्तं' इति वचनात्, यत एवेत्थंभूतस्तत एव अणायारो आचरणीयः श्रावकाणामाचारः, न आचारोऽनाचारः, यत एवानाचरणीयोऽत एव अणिच्छियव्वो अनेष्टव्यः मनागपि मनसापि न एष्टव्य आस्तां तावत् कर्तव्यः, यत एवेत्थंभूतोऽत एव असावगपाउग्गो अश्रावकप्रायोग्यः—अभ्युपेतसम्यक्त्वः प्रतिपन्नाणुव्रतश्च प्रतिदिवसं यतिभ्यः सकाशात् साधूनामगारिणां च सामाचारीं शृणोतीति श्रावकस्तस्य प्रायोग्य उचितः श्रावकप्रायोग्यः, न तथा, श्रावकानुचित इत्यर्थः । अयं चातिचारः क्व विषये भवतीत्याह— 'णाणे दंसणे चरित्ताचरित्ते' इति, ज्ञानविषये, दर्शनविषये, स्थूलसावद्ययोगनिवृत्तिभावाच्चारित्रं च सूक्ष्मसावद्ययोगनिवृत्त्यभावादचारित्रं च चारित्राचारित्रं तस्मिन् देशविरतिविषये इत्यर्थः । अधुना भेदेन व्याचष्टे—सुए श्रुतविषये, श्रुतग्रहणं मत्यादिज्ञानोपलक्षणम्, तत्र विपरीतप्ररूपणा, अकालस्वाध्यायश्चातिचारः, सामाइए सामायिकविषये, सामायिकग्रहणात् सम्यक्त्वसामायिकदेशविरतिसामायिकयोर्ग्रहणम् । तत्र सम्यक्त्वसामायिकातिचारः शङ्कादिः । देशविरतिसामायिकातिचारं तु भेदेनाह—तिण्हं

(१) यत् स्थिरमध्यवसानं तद् ध्यानं यच्चलं तच्चित्तम् ।

दैवसिकं मध्याह्नादारभ्य निशीथं यावद् भवति, रात्रिकं निशीथादारभ्य मध्याह्नं यावद् भवति, पाक्षिकचातुर्मासिकसांवत्सरिकाणि पक्षाद्यन्ते भवन्ति। अत्रान्तरे 'आलोअह' इति गुरुवचनमाकर्ण्य एतदेव शिष्यः समर्थयन्नाह—'इच्छं आलोएमि' इच्छाम्यभ्युपगच्छामि गुरुवचः, आलोचयामि पूर्वमभ्युपगतमर्थं क्रियया प्रकाशयामीति। इत्थं प्रस्तावनामभिधायालोचनामेव साक्षात्कारेणाह—'जो मे देवसिओ अइआरो कओ काइओ वाइओ माणसिओ उस्सुत्तो उम्मग्गो अकप्पो अकरणिज्जो दुज्झाओ दुव्विचिंतिओ अणायारो अणिच्छियव्वो असावगपाउग्गो नाणे दंसणे चरित्ताचरित्ते सुए सामाइए तिण्हं गुत्तीणं चउण्हं कसायाणं पंचण्हमणुव्वयाणं तिण्हं गुणव्वयाणं चउण्हं सिक्खावयाणं बारसविहस्स सावगधम्मस्स जं खंडिअं जं विराहिअं तस्स मिच्छामि दुक्कडं'।

व्याख्या—यो मया दिवसे भवो दैवसिकोऽतिचारोऽतिक्रमः कृतो निर्वर्तितः, स पुनरतिचार उपाधिभेदेनानेकधा भवति, अत एवाह—'काइओ' कायः प्रयोजनं प्रयोजकोऽस्यातिचारस्येति कायिकः, एवं वाइओ वाक् प्रयोजनमस्य वाचिकः, एवं मनः प्रयोजनमस्येति मानसिकः, उस्सुत्तो सूत्रादुत्क्रान्त उत्सूत्रः सूत्रमतिक्रम्य कृत इत्यर्थः, उम्मग्गो मार्गः क्षायोपशमिको भावस्तमतिक्रान्त उन्मार्गः क्षायोपशमिकभावत्यागेनौदयिकभावसंक्रमः कृत इत्यर्थः, अकप्पो कल्पो न्यायो विधिराचारश्चरणकरणव्यापार इति यावत्, न कल्पोऽकल्पोऽतद्रूप इत्यर्थः, करणीयः सामान्येन

दुर्वेद्वितीयावग्रहस्थेत्यर्थः, अनेन कायिकमाह ; अस्यातिचारस्य किमित्याह—इच्छाकारेण संदिसहेति, आत्मीयेच्छया मम प्रतिक्रमणाज्ञां प्रयच्छत, इत्युक्त्वा तूष्णीको गुरुमुखं प्रेक्षमाण आस्ते। ततो गुरुराह—'पडिक्कमह' प्रतिक्रामत। ततः शिष्यः प्राह—'इच्छं' इच्छाम्येतद् भगवद्वचः, तस्स तस्य दैवसिकातिचारस्य मिच्छा मि दुक्कडं आत्मीयं दुष्कृतं मिथ्येति जुगुप्स इत्यर्थः। तथा, द्वितीयच्छन्दनकावग्रहान्तःस्थित एव विनेयोऽर्धावनतकायः स्वापराधक्षामणां चिकीर्षुर्गुरुं प्रतीदमाह—'इच्छाकारेण संदिसह' इति, इच्छाकारेण स्वकीयाभिलाषेण न पुनर्बलाभियोगादिना, संदिशत आज्ञां प्रयच्छत यूयम्। आज्ञादानस्यैव विषयमुपदर्शयन्निदमाह–'अब्भुट्ठिओ म्हि अब्भिंतरदेवसिअं खामेमि' अभ्युत्थितोऽस्मि प्रारब्धोऽस्मि अहम्, अनेनाभिलापमात्रस्य व्यपोहेन क्षमणाक्रियायाः प्रारम्भमाह—'अब्भिंतरदेवसिअं' इति दिवसाभ्यन्तरसंभवम् अतीचारम्' इति गम्यते, क्षमयामि मर्षयामि, इत्येका वाचना। अन्ये त्वेवं पठन्ति—'इच्छामि खमासमणो अब्भुट्ठिओ म्हि अब्भिंतरदेवसिअं खामेउं' इति, इच्छामि अभिलषामि 'क्षमयितुम्' इति योगः, हे क्षमाश्रमण ! न केवलमिच्छामि, किन्तु 'अब्भुट्ठिओ म्हि' इत्यादि पूर्ववदेव। एवं स्वाभिप्रायं प्रकाश्य तूष्णीमास्ते यावद् गुरुराह—'खामेह' इति क्षमयस्वेत्यर्थः। ततः स गुरुवचनं बहु मन्यमान आह—'इच्छं खामेमि' इति, इच्छं इच्छामि भगवदाज्ञाम्, खामेमि क्षमयामि च स्वापराधम्। अनेन क्षमणक्रियायाः प्रारम्भमाह। ततो

दुश्चेष्टितोऽङ्गवस्येत्यर्थः, अनेन कायिकमाह ; अस्यातिचारस्य किमित्याह—इच्छाकारेण संदिसहेति, आत्मीयेच्छया मम प्रतिक्रमणाज्ञां प्रयच्छत, इत्युक्त्वा तूष्णीको गुरुमुखं प्रेक्षमाण आस्ते। ततो गुरुराह—'पडिक्कमह' प्रतिक्रामत। ततः शिष्यः प्राह—'इच्छं' इच्छास्येतद् भगवद्वचः, तस्य तस्य दैवसिकातिचारस्य मिच्छा मि दुक्कडं आत्मीयं दुष्कृतं मिथ्येति जुगुप्स इत्यर्थः। तथा, द्वितीयच्छन्दनकावग्रहान्तःस्थित एव विनेयोऽर्धावनतकायः स्वापराधक्षामणां चिकीर्षुर्गुरुं प्रतीदमाह—'इच्छाकारेण संदिसह' इति, इच्छाकारेण स्वकीयाभिलापेण न पुनर्बलाभियोगादिना, संदिशत आज्ञां प्रयच्छत यूयम्। आज्ञादानस्यैव विषयमुपदर्शयन्निदमाह-'अब्भुट्ठिओ अम्हि अब्भिंतरदेवसिअं खामेमि' अभ्युत्थितोऽस्मि प्रारब्धोऽस्मि अहम्, अनेनाभिलापमात्रस्य व्यपोहेन क्षमणाक्रियायाः प्रारम्भमाह—'अब्भिंतरदेवसिअं' इति दिवसाभ्यन्तरसंभवम् अतीचारम्' इति गम्यते, क्षमयामि मर्षयामि, इत्येका वाचना। अन्ये त्वेवं पठन्ति—'इच्छामि खमासमणो अब्भुट्ठिओ अम्हि अब्भिंतरदेवसिअं खामेउं' इति, इच्छामि अभिलषामि 'क्षमयितुम्' इति योगः, हे क्षमाश्रमण! न केवलमिच्छामि, किन्तु 'अब्भुट्ठिओ अम्हि' इत्यादि पूर्ववदेव। एवं स्वाभिप्रायं प्रकाश्य तूष्णीमास्ते यावद् गुरुराह—'खामेह' इति क्षमयस्वेत्यर्थः। ततः स गुरुवचनं बहु मन्यमान आह—'इच्छं खामेमि' इति, इच्छं इच्छामि भगवदाज्ञाम्, खामेमि क्षमयामि च स्वापराधम्। अनेन क्षमणक्रियायाः प्रारम्भमाह। ततो

दुश्चेष्टितोद्भवस्येत्यर्थः, अनेन कायिकमाह; अस्यातिचारस्य किमित्याह—इच्छाकारेण संदिसहेति, आत्मीयेच्छया मम प्रतिक्रमणाज्ञां प्रयच्छत. इत्युक्त्वा तूष्णीको गुरुमुखं प्रेक्षमाण आस्ते। ततो गुरुराह—'पडिक्कमह' प्रतिक्रामत। ततः शिष्यः प्राह—'इच्छं' इच्छाम्येतद् भगवद्वचः, तस्स तस्य दैवसिकातिचारस्य मिच्छा मि दुक्कडं आत्मीयं दुष्कृतं मिथ्येति जुगुप्स इत्यर्थः। तथा, द्वितीयच्छन्दनकावग्रहान्तःस्थित एव विनेयोऽर्धावनतकायः स्वापराधक्षामणां चिकीर्षुर्गुरुं प्रतीदमाह—'इच्छाकारेण संदिसह' इति, इच्छाकारेण स्वकीयाभिलाषेण न पुनर्बलाभियोगादिना, संदिशत आज्ञां प्रयच्छत यूयम्। आज्ञादानस्यैव विषयमुपदर्शयन्निदमाह-'अब्भुट्ठिओ अम्हि अब्भिंतरदेवसिअं खामेमि' अभ्युत्थितोऽस्मि प्रारब्धोऽस्मि अहम्, अनेनाभिलापमात्रस्य व्यपोहेन क्षमणाक्रियायाः प्रारम्भमाह—'अब्भिंतरदेवसिअं', इति दिवसाभ्यन्तरसंभवम् अतीचारम्' इति गम्यते, क्षमयामि मर्षयामि, इत्येका वाचना। अन्ये त्वेवं पठन्ति—'इच्छामि खमासमणो अब्भुट्ठिओ अम्हि अब्भिंतरदेवसिअं खामेउं' इति, इच्छामि अभिलषामि 'क्षमयितुम्' इति योगः, हे क्षमाश्रमण! न केवलमिच्छामि, किन्तु 'अब्भुट्ठिओ अम्हि' इत्यादि पूर्ववदेव। एवं स्वाभिप्रायं प्रकाश्य तूष्णीमास्ते यावद् गुरुराह—'खामेह' इति क्षमयस्वेत्यर्थः। ततः स गुरुवचनं बहु मन्यमान आह—'इच्छं खामेमि' इति, इच्छं इच्छामि भगवदाज्ञाम्, खामेमि क्षमयामि च स्वापराधम्। अनेन क्षमणक्रियायाः प्रारम्भमाह। ततो

त्वात्, अहं न याणामि अहं पुनर्न जानामि, मूढत्वात् ; तथा 'यूयं न जानीथ प्रच्छन्नकृतत्वादिना, अहं जानामि, स्वयं कृतत्वात् ; तथा, यूयं न जानीथ, परेण कृतत्वादिना, अहं न जानामि, विस्मरणादिना ; तथा, यूयमपि जानीथ, अहमपि जानामि, द्वयोः प्रत्यक्षत्वात्' एतदपि द्रष्टव्यम् ; तस्स तस्य षष्ठीसप्तम्योरभेदात् तस्मिन्नप्रीतिकविषये विनयपरिहीणविषये च मिच्छा मि दुक्कडं मिथ्या मे दुष्कृतमिति स्वदुश्चरितानुपात्तसूचकं स्वदोषप्रतिपत्तिसूचकं वा प्रतिक्रमणमिति पारिभाषिकं वाक्यं प्रयच्छामीति शेषः ; अथवा, तस्येति विभक्तिपरिणामात् तदप्रीतिकं विनयपरिहीनं च मिथ्या मोक्षसाधनविपर्ययभूतं वर्तते मे मम ; तथा, दुष्कृतं पापमिति स्वदोषप्रतिपत्तिरूपमपराधक्षमणमिति । वन्दनपूर्वके चालोचनक्षमणे भवत इति कृत्वा वन्दनकानन्तरं ते व्याख्याते, अन्यथा प्रतिक्रमणे तयोरवसरः ; वन्दनकस्य च फलं कर्मनिर्जरा, यदाहुः—

'वंदणएणं भंते ! जीवे किं अज्जिणइ ? । गोअमा ! अट्ठ कम्मपयडीओ[1] निविडबंधणबद्धाओ सिढिलबंधणबद्धाओ करेइ, चिरकालठिइआओ अप्पकालठिइआओ करेइ, तिव्वाणुभावाओ मंदाणुभावाओ करेइ, बहुपएसग्गाओ अप्पपएसग्गाओ करेइ, अणाइअं च णं अणवदग्गं संसारकंतारं नो परिअट्टइ । तथा,—

(१) वन्दनकेन भगवन् ! जीवः किमर्जयति ? । गौतम ! अष्ट कर्मप्रकृतीर्निबिडबन्धनबद्धाः शिथिलबन्धनबद्धाः करोति, चिरकालस्थितिका अल्पकालस्थितिकाः करोति, तीव्रानुभावा मन्दानुभावाः करोति, बहुप्रदेशिका अल्पप्रदेशिकाः करोति, अनादिकं चानन्तं संसारकान्तारं नो पर्यटति ।

[1]वंदणएणं भंते! जीवे किं अज्जिणइ?। गोअम! वंदणएणं नीयागोत्तकम्मं खवेइ उच्चागोत्तं निबंधइ, सोहग्गं अप्पडिहयं आणाफलं निव्वत्तेइ।

तथा,—

[2]विणओवयारमाणस्स भंजणा पूअणा गुरुजणस्स।
तित्थयराण य आणा सुअधम्माराहणा किरिआ॥१॥

अथ प्रतिक्रमणं—प्रतीत्युपसर्गः प्रतीपे प्रातिकूल्ये वा; पादविक्षेपे, अस्य प्रतिपूर्वस्य भावानडन्तस्य प्रतीपं क्रमणं क्रमणम्; अयमर्थः—शुभयोगेभ्योऽशुभयोगान्तरं क्रान्तस्य श्वेव क्रमणात् प्रतीपं क्रमणम्; यदाह,—

स्वस्थानाद् यत् परस्थानं प्रमादस्य वशाद् गतः।
तत्रैव क्रमणं भूयः प्रतिक्रमणमुच्यते॥१॥

प्रतिकूलं वा गमनं प्रतिक्रमणम्; यदाह,—

क्षायोपशमिकाद् भावादौदयिकवशं गतः।
तत्रापि च स एवार्थः प्रतिकूलगमात् स्मृतः॥१॥

प्रति प्रतिक्रमणं वा प्रतिक्रमणम्; उक्तं च,—

प्रति प्रतिप्रवर्तनं वा शुभेषु योगेषु मोक्षफलदेषु।
निःशल्यस्य यतेर्यत् तद् विज्ञेयं प्रतिक्रमणम्॥१॥

---

(१) वन्दनकेन भगवन्! जीवः किमर्जयति?। गौतम! वन्दनकेन नी... कर्म क्षपयति, उच्चैर्गोत्रं निबध्नाति, सौभाग्यं चाप्रतिहतमाज्ञाफलं निर्व...

(२) विनयोपचारमानस्य भञ्जना पूजना गुरुजनस्य।
तीर्थंकराणां चाज्ञा श्रुतधर्माराधना क्रिया॥१॥

तथातीतानागतवर्त्तमानकालत्रयविषयम् । नन्वतीतविषयमेव प्रतिक्रमणम्, यत उक्तम्,—"[1]अईयं पडिक्कमामि, पडुप्पन्नं संवरेमि, अणागयं पच्चक्खामि" इति, तत् कथं त्रिकालविषयता ? । उच्यते—अत्र प्रतिक्रमणशब्दोऽशुभयोगनिवृत्तिमात्रार्थः,

[2]मिच्छत्तपडिक्कमणं तहेय असंजमे पडिक्कमणं ।
कसायाण पडिक्कमणं जोगाण य अप्पसत्थाणं ॥१॥

ततश्च निन्दाद्वारेणाशुभयोगनिवृत्तिरूपमतीतविषयं प्रतिक्रमणम्, प्रत्युत्पन्नविषयमपि संवरद्वारेण अनागतमपि प्रत्याख्यानद्वारेणेति न कश्चिद् दोषः । तच्च दैवसिकादिभेदात् पञ्चधा—दिवसस्यान्ते दैवसिकम्, रात्रेरन्ते रात्रिकम्, पक्षस्यान्ते पाक्षिकम्, चतुर्णां मासानामन्ते चातुर्मासिकम्, संवत्सरस्यान्ते सांवत्सरिकम् । पुनर्द्वेधा—ध्रुवम्, अध्रुवं च । ध्रुवं भरतैरावतेषु प्रथमचरमतीर्थकरतीर्थेषु, अपराधो भवतु वा मा वा, उभयकालं प्रतिक्रमणम् । अध्रुवं मध्यमतीर्थकरतीर्थेषु विदेहेषु च कारणजाते प्रतिक्रमणम् ; यदाह,—

[3]सपडिक्कमणो धम्मो पुरिमस्स य पच्छिमस्स य जिणस्स ।
मज्झिमयाण जिणाणं कारणजाए पडिक्कमणं ॥ १ ॥

प्रतिक्रमणविधिश्चैताभ्यो गाथाभ्योऽवसेयः,—

(१) अतीतं प्रतिक्रमामि प्रत्युत्पन्नं संवृणोमि, अनागतं प्रत्याख्यामि ।

(२) मिथ्यात्वप्रतिक्रमणं तथैवासंयमे प्रतिक्रमणम् ।
कषायाणां प्रतिक्रमणं योगानां चाप्रशस्तानाम् ॥ १ ॥

(३) सप्रतिक्रमणो धर्मः प्रथमस्य च पश्चिमस्य च जिनस्य ।
मध्यमकानां जिनानां कारणे जाते प्रतिक्रमणम् ॥ १ ॥

[1]पञ्चविहायारविसुद्धिहेउमिह साहू सावगो वावि ।
पडिक्कमणं सह गुरुणा गुरुविरहे कुणइ इक्को वि ॥ १ ॥
वंदित्तु चेइआइं दाउं चउराइए खमासमणे ।
भूनिहिअसिरो सयलाइयारमिच्छोक्कडं देइ ॥ २ ॥
सामाइअपुव्वमिच्छामि ठाइउं काउस्सग्गमिच्चाइं ।
सुत्तं भणिअ पलंबिअभुयकुप्परधरियपहिरणओ ॥ ३ ॥
घोडगमाईदोसेहिं विरहिअं तो करेइ उस्सग्गं ।
नाहिअहोजाणुड्ढं चउरंगुलठविअकडिपट्टो ॥ ४ ॥
तत्थ य धरेइ हिअए जहक्कमं दिणकए अईआरे ।
पारेत्तु नमुक्कारेण पढइ चउवीसथयदंडं ॥ ५ ॥
संडासगे पमज्जिय उवविसिय अलग्गविअयबाहुजुओ ।
मुहणंतगं च कायं च पेहए पंचवीसइहा ॥ ६ ॥

---

(१) पञ्चविधाचारविशुद्धिहेतोरिह साधुः श्रावको वापि ।
प्रतिक्रमणं सह गुरुणा गुरुविरहे करोत्येकोऽपि ॥ १ ॥
वन्दित्वा चैत्यानि दत्त्वा चतुरादिकान् क्षमाश्रमणान् ।
भूनिहितशिराः सकलातिचारमिथ्यादुष्कृतं दद्यात् ॥ २ ॥
सामायिकपूर्वमिच्छामि स्थापयितुं कायोत्सर्गमित्यादि ।
सूत्रं भणित्वा प्रलम्बितभुजकूर्परपरिधानः ॥ ३ ॥
घोटकादिदोषैर्विरहितं ततः करोति उत्सर्गम् ।
नाभ्यधोजानूर्ध्वं चतुरङ्गुलस्थापितकटीपट्टः ॥ ४ ॥
तत्र च धारयति हृदये यथाक्रमं दिनकृतानतिचारान् ।
पारयित्वा नमस्कारेण पठति चतुर्विंशतिस्तवदण्डकम् ॥ ५ ॥
संदंशकं प्रमृज्योपविश्यालग्नविततबाहुयुगः ।
मुखानन्तकं च कायं च प्रेक्षते पञ्चविंशतिधा ॥ ६ ॥

[1]उट्ठियट्ठिओ सविणयं विहिणा गुरुणो करेइ किइकम्मं ।
बत्तीसदोसरहिअं पणवीसावस्सगविसुद्धं ॥ ७ ॥
अह सम्ममवणअंगो करजुअविहिधरिअपुत्तिरयहरणो ।
परिचिंतिअ अइआरे जहक्कमं गुरुपुरो वियडे ॥ ८ ॥
अह उवविसित्तु सुत्तं सामाइयमाइयं पढिय पयओ ।
अब्भुट्ठिओम्हि इच्चाइ पढइ दुह उट्ठिओ विहिणा ॥ ९ ॥
दाऊण वंदणं तो पणगाइसु जइसु खामए तिन्नि ।
किइकम्मं करे आयरिअमाइगाहातिगं पढइ ॥ १० ॥
इय सामाइयउस्सग्गसुत्तमुच्चरिय काउस्सग्गठिओ ।
चिंतइ उज्जोयदुगं चरित्तअइयारसुद्धिकए ॥ ११ ॥
विहिणा पारिय सम्मत्तसुद्धिहेउं च पढइ उज्जोअं ।
तह सव्वलोअअरहंतचेइयाराहणोसग्गं ॥ १२ ॥

---

(१) उत्थितस्थितः सविनयं विधिना गुरोः करोति कृतिकर्म्म ।
द्वात्रिंशद्दोषरहितं पञ्चविंशत्यावश्यकविशुद्धम् ॥ ७ ॥
अथ सम्यगवनताङ्गः करयुगविधिधृतपोतिकारजोहरणः ।
परिचिन्तयत्यतिचारान् यथाक्रमं गुरुपुरो विस्तृतान् ॥ ८ ॥
अथोपविश्य सूत्रं सामायिकादिकं पठित्वा प्रयतः ।
अभ्युत्थितोऽस्मीत्यादि पठति द्विधोत्थितो विधिना ॥ ९ ॥
दत्त्वा वन्दनं ततः पञ्चकादिषु यतिषु क्षमयेत् त्रिः ।
कृतिकर्म कुर्यादाचार्यादिगाथात्रिकं पठति ॥ १० ॥
इति सामायिकोत्सर्गसूत्रमुच्चार्य कायोत्सर्गस्थितः ।
चिन्तयत्युद्द्योतद्विकं चारित्रातिचारशुद्धिकृते ॥ ११ ॥
विधिना पारयित्वा सम्यक्त्वशुद्धिहेतोश्च पठेदुद्द्योतम् ।
तथा सर्वलोकार्हच्चैत्याराधनोत्सर्गम् ॥ १२ ॥

[illegible] [illegible] निलिग पावेइ [illegible] ।
[illegible] [illegible] [illegible] ॥ १२ ॥
[illegible] [illegible] [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] [illegible] ॥ १४ ॥
[illegible] [illegible] [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] [illegible] ॥ १५ ॥
[illegible] [illegible] [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] ॥ १६ ॥
[illegible] [illegible] [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] ॥ १७ ॥
[illegible] [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] ॥ १८ ॥

[illegible]

[1]एवं ता देवसिअं राइयमवि एवमेव नवरि तहिं ।
पढमं दाउं मिच्छा मि दुक्कडं पढइ सक्कत्थयं ॥ १९ ॥
उट्ठिअ करेइ विहिणा उस्सग्गं चिंतए अ उज्जोअं ।
बीयं दंसणसुद्धीए चिंतए तत्थ इममेव ॥ २० ॥
तइए निसाअइआरं जहक्कमं चिंतिऊण पारेइ ।
सिद्धत्थयं पढित्ता पमज्ज संडासमुववसइ ॥ २१ ॥
पुव्वं व पुत्तिपेहणवंदणमालोयसुत्तपढणं च ।
वंदणखामणवंदणगाहातिगपढणमुस्सग्गो ॥ २२ ॥
तत्थ य चिंतइ संजमजोगाण न होइ जेण मे हाणी ।
तं पडिवज्जामि तवं छम्मासं ता न काउमलं ॥ २३ ॥
एगाइगुणतीसूणयं पि न सहो न पंचमासमवि ।
एवं चउ ति दुमासं न समत्थो एगमासं पि ॥ २४ ॥

---

(1) एवं तावद् दैवसिकं रात्रिकमप्येवमेव नवरं तत्र ।
प्रथमं दत्त्वा मिथ्या मे दुष्कृतं पठेत् शक्रस्तवम् ॥ १९ ॥
उत्थाय कुर्याद् विधिनोत्सर्गं चिन्तयेच्चोद्द्योतम् ।
द्वितीयं दर्शनशुद्धौ चिन्तयेत् तत्रेदमेव ॥ २० ॥
तृतीये निशातीचारं यथाक्रमं चिन्तयित्वा पारयेत् ।
सिद्धस्तवं पठित्वा प्रमृज्य संदंशमुपविशेत् ॥ २१ ॥
पूर्वमिव वस्त्रिकाप्रेक्षणं वन्दनमालोचसूत्रपठनं च ।
वन्दनक्षमणावन्दनगाथात्रिकपठनमुत्सर्गः ॥ २२ ॥
तत्र च चिन्तयेत् संयमयोगानां न भवति येन मे हानिः ।
तत् प्रतिपद्ये तपः षड् मासांस्तावद् न कर्तुमलम् ॥ २३ ॥
एकाद्येकोनत्रिंशद्दूनकमपि न सहो न पञ्च मासानपि ।
एवं चतुरस्त्रीन् द्वौ मासौ न समर्थ एकमासमपि ॥ २४ ॥

'जा तं पि तेरसूणं चउतीसइमाइअं दुहाणीए।
जाव चउत्थं तो आयंबिलाइ जा पोरिसि नमो वा ॥ २५ ॥
जं सक्कं तं हियए धरेत्तु पारेत्तु पेहए पोत्तिं।
दाउं वंदणमसढो तं चिय पच्चक्खए विहिणा ॥ २६ ॥
इच्छामो अणुसट्ठिं ति भणिय उवविसिअ पढइ तिण्णि थुई।
मिउसद्देणं सक्कत्थयाइ तो चेइए वंदे ॥ २७ ॥
अह पक्खियं चउद्दसिदिणम्मि पुव्वं व तत्थ देवसिअं।
सुत्तंतं पडिकमिउं तो सम्ममिमं कमं कुणइ ॥ २८ ॥
मुहपोत्ति वंदणयं संबुद्धाखामणं तहालोए।
वंदण पत्तेयक्खामणं च वंदणयमह सुत्तं ॥ २९ ॥
सुत्तं अब्भुट्ठाणं उस्सग्गो पुत्ति वंदणं तह य।
पज्जंतियखामणं तह चउरो थोभवंदणया ॥ ३० ॥

---

(१) जातमपि त्रयोदशोनं चतुस्त्रिंशदादिकं हिहान्या।
यावच्चतुर्थं तत आचाम्लादि यावत् पौरुषीं नमो वा ॥ २५ ॥
यत् शक्यं तद् हृदये धारयित्वा पारयेत् प्रेक्षेत वस्त्रिकाम्।
दत्त्वा वन्दनमशठस्तदेव प्रत्याख्यायाद् विधिना ॥ २६ ॥
इच्छामोऽनुशास्तिमिति भणित्वोपविश्य पठेत् तिस्रः स्तुतीः।
मृदुशब्देन शक्रस्तवादि ततश्चैत्यानि वन्देत ॥ २७ ॥
अथ पाक्षिकं चतुर्दशीदिने पूर्वमिव तत्र दैवसिकम्।
सूत्रान्तं प्रतिक्रम्य ततः सम्यगिमं क्रमं कुर्यात् ॥ २८ ॥
मुखवस्त्रिका वन्दनकं संबुद्धक्षमणा तथालोचः।
वन्दनं प्रत्येकं क्षमणा च वन्दनकमथ सूत्रम् ॥ २९ ॥
सूत्रमभ्युत्थानमुत्सर्गो वस्त्रिका वन्दनं तथा च।
पार्यन्तिकक्षमणा तथा चत्वारि स्तोभवन्दनकानि ॥ ३० ॥

[1]पुव्वविहिणेव सव्वं देवसिअं वंदणाइ तो कुणइ ।
सिज्जसुरीउस्सग्गे भेओ संतिथयपढणे अ ॥ २१ ॥
एवं चिय चउमासे वरिसे अ जहक्कमं विही णेओ ।
पक्खचउमासवरिसेसु नवरि नामम्मि नाणत्तं ॥ २२ ॥
तह उस्सग्गोज्जोआ बारस वीसा समंगलिग चत्ता ।
संबुद्धखामणं ति पण सत्त साहूण जहसंखं ॥ २३ ॥

प्रतिक्रमणसूत्रविवरणं तु ग्रन्थविस्तरभयान्नोक्तम् ॥

अथ कायोत्सर्गः । कायस्य शरीरस्य स्थानमौनध्यानक्रियाव्यतिरेकेणान्यत्रोच्छ्वसितादिभ्यः क्रियान्तराध्यासमधिकृत्य य उत्सर्गस्त्यागो 'नमो अरहंताणं' इति वचनात् प्राक्, स कायोत्सर्गः । स च द्विविधः, चेष्टायामभिभवे च । चेष्टायां गमनागमनादावीर्यापथिकादिप्रतिक्रमणभावी, अभिभवे उपसर्गजयार्थम् ; यदाहुः—

[2]सो उस्सग्गो दुविहो चेट्ठाए अभिभवे अ नायव्वो ।
भिक्खायरिया पढमो उवसग्गभिउंजणे बीओ ॥ १ ॥

---

(१) पूर्वविधिनैव सर्वं दैवसिकं वन्दनादि ततः कुर्यात् ।
शय्यासुर्युत्सर्गे भेदः शान्तिस्तवपठने च ॥ २१ ॥
एवमेव चतुर्मासे वर्षे च यथाक्रमं विधिर्ज्ञेयः ।
पक्षचतुर्मासवर्षेषु, नवरं नाम्नि नानात्वम् ॥ २२ ॥
तथोत्सर्गोद्द्योता द्वादश विंशतिः समङ्गलिकाचत्वारिंशत् ।
संबुद्धक्षामणास्त्रिपञ्च सप्त साधूनां यथासंख्यम् ॥ २३ ॥
(२) स उत्सर्गो द्विविधश्चेष्टायामभिभवे च ज्ञातव्यः ।
भिक्षाचर्यायां प्रथम उपसर्गाभियोजने द्वितीयः ॥ १ ॥

तत्र चेष्टाकायोत्सर्गोऽष्ट-पञ्चविंशति-सप्तविंशति-त्रिशती-पञ्चशती-अष्टोत्तर-सहस्रोच्छ्वासान् यावद् भवति, अभिभवकायोत्सर्गस्तु मुहूर्तादारभ्य संवत्सरं यावद् बाहुबलेरिव भवति। स च कायोत्सर्ग उच्छ्रित निषण्ण-शयितभेदेन त्रेधा। एकैकश्चतुर्धा—उच्छ्रितोच्छ्रितो द्रव्यत उच्छ्रित ऊर्ध्वस्थानं भावत उच्छ्रितो धर्मध्यान-शुक्लध्याने इति प्रथमः। तथा, द्रव्यत उच्छ्रित ऊर्ध्वस्थानं भावतोऽनुच्छ्रितः कृष्णादिलेश्यापरिणाम इति द्वितीयः। द्रव्यतो नोच्छ्रितो नोर्ध्वस्थानं भावत उच्छ्रितो धर्मध्यान-शुक्लध्याने इति तृतीयः। न द्रव्यतो नापि भावत उच्छ्रित इति चतुर्थः। एवं निषण्ण-शयितयोरपि चतुर्भङ्गी वाच्या।

दोषरहितश्च कायोत्सर्गः कार्यः। दोषाश्चैकविंशतिः—आकुञ्चितैकपादस्य घोटकस्येव स्थानं घोटकदोषः ।१। खरवातप्रकम्पिताया लताया इव कम्पनं लतादोषः ।२। स्तम्भमवष्टभ्य स्थानं स्तम्भदोषः ।३। कुड्यमवष्टभ्य स्थानं कुड्यदोषः ।४। माले शिरोऽवष्टभ्य स्थानं मालदोषः ।५। हस्तौ गुह्यदेशे स्थापयित्वा शबर्या इव स्थानं शबरीदोषः ।६। शिरोऽवनम्य कुलवध्वा इव स्थानं वधूदोषः ।७। निगडितस्येव विस्तृतपादस्य मिलितपादस्य वा स्थानं निगडदोषः ।८। नाभेरुपर्याजानु चोलपट्टकं निबध्य स्थानं लम्बोत्तरदोषः ।९। दंशादिवारणार्थमज्ञानाद् वा स्तनौ चोलपट्टकं निबध्य स्थानं स्तनदोषः ; 'धात्रीवद् बालार्थं स्तनौ उन्नमय्य स्थानं स्त' इत्येके ।१०। पार्ष्णी मीलयित्वाऽग्रचरणौ विस्तार्य अङ्गुष्ठौ वा मीलयित्वा पार्ष्णी विस्तार्य स्थानं शकटो-

निष्ठीवनं वपुःस्पर्शः प्रपञ्चबहुला स्थितिः ।
सूत्रोदितविधेर्न्यूनं वयोऽपेक्षाविवर्जनम् ॥१॥
कालापेक्षाव्यतिक्रान्तिर्व्याक्षेपासक्तचित्तता ।
लोभाकुलितचित्तत्वं पापकार्योद्यमः परः ॥२॥
कृत्याकृत्यविमूढत्वं पट्टिकाद्युपरि स्थितिः । इति ।

कायोत्सर्गस्यापि फलं निर्जरैव ; यदाहुः—

'काउस्सग्गे जह संठिअस्स भज्जंति अंगुवंगाइं ।
इय भिंदंति सुविहिया अट्ठविहं कम्मसंघायं ॥१॥

कायोत्सर्गसूत्रार्थः प्राग् व्याख्यात एव ॥

अथ प्रत्याख्यानम्—प्रति प्रवृत्तिप्रतिकूलतया आ मर्यादया ख्यानं प्रकथनं प्रत्याख्यानम् । तच्च द्वेधा—मूलगुणरूपमुत्तरगुणरूपं च । मूलगुणा यतीनां महाव्रतानि, श्रावकाणामणुव्रतानि ; उत्तरगुणास्तु यतीनां पिण्डविशुद्ध्यादयः, श्रावकाणां तु गुणव्रत शिक्षाव्रतानि । मूलगुणानां तु प्रत्याख्यानत्वं हिंसादिनिवृत्तिरूपत्वात्, उत्तरगुणानां तु पिण्डविशुद्ध्यादीनां दिग्व्रतादीनां च प्रतिपक्षनिवृत्तिरूपत्वात् । तत्र स्वयं कृतप्रत्याख्यानः काले विनयपूर्वकं सम्यगुपयुक्तो गुरुवचनमनुच्चरन् स्वयं जानन् ज्ञस्य गुरोः पार्श्वे प्रत्याख्यानं करोति । अत्र चतुर्भङ्गी । द्वयोर्ज्ञत्वे प्रथमो भङ्गः शुद्धः ।१। गुरोर्ज्ञत्वे शिष्यस्याज्ञत्वे द्वितीयः । तत्र तत्काले शिष्यं संक्षेपतः प्रबोध्य यदा गुरुः प्रत्याख्यानं कारयति

(१) कायोत्सर्गे यथा संस्थितस्य भज्यन्तेऽङ्गोपाङ्गानि ।
तथा भिन्दन्ति सुविहिता अष्टविधं कर्मसंघातम् ॥१॥

तदाऽयमपि शुद्धः, अन्यथा त्वशुद्धः ।२। गुरोरज्ञत्वे शिष्यस्य ज्ञत्वे तृतीयः । अयमपि तथाविधगुरोरप्राप्तौ गुरुबहुमानाद् गुरोः पितृ-पितृव्य-मातुल-ज्येष्ठभ्रात्रादिकं साक्षिणं कुर्वतस्तृतीयः शुद्धः, अन्यथा त्वशुद्धः ।३। द्वयोरज्ञत्वे चतुर्थः, असावशुद्ध एव ।४।

उत्तरगुणप्रत्याख्यानं प्रतिदिनोपयोगि द्विविधम्—संकेतप्रत्याख्यानमद्धाप्रत्याख्यानं च । तत्र संकेतप्रत्याख्यानं श्रावकः पौरुष्यादिप्रत्याख्यानं कृत्वा क्षेत्रादौ गतो गृहे वा तिष्ठन् 'भोजनप्राप्तेः प्राक् प्रत्याख्यानरहितो मा भूवम्' इत्यङ्गुष्ठादिकं संकेतं करोति—'यावदङ्गुष्ठं मुष्टिं ग्रन्थिं वा न मुञ्चामि, गृहं वा न प्रविशामि, स्वेदबिन्दवो वा यावद् न शुष्यन्ति, एतावन्तो वोच्छ्वासा यावद् न भवन्ति, जलार्द्रमञ्चिकायां यावदेते बिन्दवो न शुष्यन्ति, दीपो वा यावद् न निर्वाति तावद् न भुञ्जे' इति ; यदाहुः—

[1]अंगुट्ठमुट्ठिगंठीघरसेउसासथिवुगजोइक्खे ।
एअं संकेय भणियं धीरेहिं अणंतनाणीहिं ॥१॥
नवकार पोरिसीए पुरिमड्ढेक्कासणेगठाणे य ।
आयंबिल भत्तट्ठे चरमे अ अभिग्गहे विगई ॥२॥

---

(१) अङ्गुष्ठमुष्टिग्रन्थिगृहस्वेदोच्छ्वासस्तिबुकज्योतिष्कान् ।
एतत् सङ्केतं भणितं धीरैरनन्तज्ञानिभिः ॥१॥
नमस्कारः पौरुषी पूर्वार्धं एकाशनमेकस्थानं च ।
आचाम्लमभक्तार्थं चरमोऽभिग्रहो विकृतिः ॥२॥

अद्धा कालस्तद्विषयं प्रत्याख्यानमद्धाप्रत्याख्यानम्। तच्च नमस्कारसहितं, पौरुषी, पूर्वार्धः, एकाशनम्, एकस्थानम्, आचामाम्लम्, उपवासः, चरमम्, अभिग्रहः, विकृतिनिषेधश्चेति दशविधम्; यदाहुः :-

नन्वेकाशनादिप्रत्याख्यानं कालप्रत्याख्यानम्; न हि तत्र कालनियमोऽस्ति ? सत्यम्, अद्धाप्रत्याख्यानपूर्वाण्येकाशनादीनि प्रायेण क्रियन्त इत्यद्धाप्रत्याख्यानत्वेनोच्यन्ते। प्रत्याख्यानं चापवादरूपाकारसहितं कर्तव्यम्, अन्यथा तु भङ्गः स्यात्, स च दोषाय; यदाहुः—

[1]वयभंगे गुरुदोसो थेवस्स वि पालणा गुणकरी अ।
गुरुलाघवं च णेयं धम्मम्मि अओ अ आगारा ॥१॥

ते च नमस्कारसहितादिषु यावन्तो भवन्ति तावन्त उपदर्श्यन्ते। तत्र नमस्कारसहिते मुहूर्तमात्रकाले नमस्कारोच्चारणावसाने प्रत्याख्याने द्वावाकारौ भवतः। आक्रियते विधीयते प्रत्याख्यानभङ्गपरिहारार्थमित्याकारः प्रत्याख्यानापवादः। ननु कालस्यानुक्तत्वात् सङ्केतप्रत्याख्यानमेवेदम्। नैवम्, सहितशब्देन मुहूर्तस्य विशेषणात्। अथ मुहूर्तशब्दो न श्रूयते, तत् कथं तस्य विशेष्यत्वम् ?। उच्यते—अद्धाप्रत्याख्यानमध्येऽस्य पाठात्, पौरुषीप्रत्याख्यानस्य वक्ष्यमाणत्वादवश्यं तदर्वाग् मुहूर्त एवावशिष्यते। अथ मुहूर्तद्वयादिकमपि कुतो न लभ्यते ?। उच्यते—अल्पाकार-

(१) व्रतभङ्गे गुरुदोषः स्तोकस्यापि पालना गुणकरी तु।
गुरुलाघवं च ज्ञेयं धर्मेऽतस्त्वाकाराः ॥१॥

त्वादस्य। पौरुष्यां हि षडाकाराः, तदस्मिन् प्रत्याख्याने आकारद्वयवति स्वल्प एव कालोऽवशिष्यते। स च नमस्कारेण सहितः, पूर्णेऽपि काले नमस्कारपाठमन्तरेण प्रत्याख्यानस्यापूर्यमाणत्वात्; सत्यपि नमस्कारपाठे मुहूर्ताभ्यन्तरे प्रत्याख्यानभङ्गात्। तत् सिद्धमेतत्—मुहूर्तमानकालं नमस्कारसहितं प्रत्याख्यानमिति। अथ प्रथम एव मुहूर्त इति कुतो लभ्यते?। सूत्रप्रामाण्यात्, पौरुषीवत्। सूत्रं चेदम्:—

उग्गए सूरे नमोक्कारसहिअं पच्चक्खाइ चउव्विहं पि आहारं असणं पाणं खाइमं साइमं अन्नत्थणाभोगेणं सहसागारेणं वोसिरइ।

व्याख्या—उद्गते सूरे सूर्योद्गमादारभ्येत्यर्थः, नमस्कारेण परमेष्ठिस्तवेन सहितं युक्तं नमस्कारसहितं प्रत्याख्याति, "सर्वे धातवः करोत्यर्थेन व्याप्ताः" इतिन्यायात् नमस्कारेण सहितं प्रत्याख्यानं करोति। इदं गुरोरनुवादभङ्ग्या वचनम्। शिष्यस्तु 'प्रत्याख्यामि' इत्येतदाह। एवं 'व्युत्सृजति' इत्यत्रापि वाच्यम्। कथम्?। चतुर्विधमिति, न पुनरेकविधादिकम्, आहारमभ्यवहार्यं 'व्युत्सृजति' इत्युत्तरेण योगः। इदं चतुर्विधाहारस्यैव भवतीति संप्रदायः, रात्रिभोजनव्रततीरणप्रायत्वादस्य। अशनमित्याद्याहारचातुर्विध्यकीर्तनम्। अशनादय आहाराः पूर्वं व्याख्याताः। अत्र नियमभङ्गभयादाकारावाह—अन्नत्थणाभोगेणं सहसागारेणं, अत्र पञ्चम्यर्थे तृतीया, अन्यत्रानाभोगात्, सहसाकाराच्च; एतौ वर्जयित्वेत्यर्थः। तत्रानाभोगोऽत्यन्तविस्मृतिः। सहसाकारोऽतिप्रवृत्तयोगानिवर्तनम्। व्युत्सृजति परिहरति॥

क्रियमाणे किञ्चिदासनं चलति ततोऽन्यत्र प्रत्याख्यानम्। गुरु-अब्भुट्ठाणेणं गुरोरभ्युत्थानार्हस्याचार्यस्य प्राघुणकस्य वाऽभ्युत्थानं प्रतीत्याम[1]नत्यजनं गुर्वभ्युत्थानं ततोऽन्यत्र। अभ्युत्थानं चावश्य-कर्त्तव्यत्वाद् भुञ्जानेनापि कर्तव्यमिति न तत्र प्रत्याख्यानभङ्गः। पारिट्ठावणिआगारेणं परिष्ठापनं सर्वथा त्यजनं प्रयोजनमस्य पारिष्ठापनिकमन्नं तदेवाकारः पारिष्ठापनिकाकारः, ततोऽन्यत्र। तत्र हि त्यज्यमाने बहुदोषसंभवात्, आश्रीयमाणे चागमिक-न्यायेन गुणसंभवाच्च[2] गुर्वाज्ञया पुनर्भुञ्जानस्य न भङ्गः। वोसिरइ इति, अनेकासनमशनाद्याहारं च परिहरति॥

अथैकस्थानकम्। तत्र सप्ताकाराः। अत्र सूत्रम्—एकट्ठाणं पच्चक्खाइ इत्याद्येकाशनवत्। आकुञ्चनप्रसारणाकारवर्जमेकम-द्वितीयं स्थानमङ्गविन्यासरूपं यत्र तदेकस्थानं प्रत्याख्यानम्। यद् यथा भोजनकालेऽङ्गोपाङ्गं स्थापितम्, तस्मिंस्तथास्थित एव भोक्तव्यम्। मुखस्य पाणेश्चाशक्यपरिहारत्वाच्चलनं न प्रतिषिद्धम्। आकुञ्चनप्रसारणाकारवर्जनं चैकाशनतो भेदज्ञापनार्थम्, अन्यथै-काशनमेव स्यात्॥

अथाचामाम्लम्। तत्राष्टावाकाराः। अत्र सूत्रम्:—

आयंबिलं पच्चक्खाइ अन्नत्थणाभोगेणं सहसागारेणं लेवालेवेणं

---

(१) ख. म वर्जनम्।

(२) ख. च्च तस्य गु.।

पाणं खाइमं साइमं अन्नत्थणाभोगेणं सहसागारेणं पारिट्ठाव-णियागारेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरइ ।

सूरे उग्गे सूर्योद्गमादारभ्य, अनेन च भोजनानन्तरं प्रत्याख्यानस्य निषेध इत्याह भक्तेन भोजनेनार्थः प्रयोजनं भक्तार्थः, न भक्तार्थोऽभक्तार्थः, अथवा न विद्यते भक्तार्थोऽस्मिन् प्रत्याख्यानविशेषे सोऽभक्तार्थ उपवास इत्यर्थः। आकाराः पूर्ववत्। नवरं पारिष्ठापनिकाकारे विशेषः। यदि त्रिविधाहारस्य प्रत्याख्याति तदा पारिष्ठापनिकं कल्पते, यदि तु चतुर्विधाहारस्य प्रत्याख्याति पानकं च नास्ति तदा न कल्पते, पानके तूद्धरिते कल्पते। वोसिरइ इति भक्तार्थमशनादि च व्युत्सृजति ॥

अथ पानकम्। तत्र पौरुषीपूर्व्वार्धैकाशनैकस्थानाचामाम्लाभक्तार्थप्रत्याख्यानेषूत्सर्गतश्चतुर्विधाहारस्य प्रत्याख्यानं न्याय्यम्। यदि तु त्रिविधाहारस्य प्रत्याख्यानं करोति तदा पानकमाश्रित्य षडाकारा भवन्ति, यत् सूत्रम् ;—

पाणस्स लेवाडेण वा अलेवाडेण वा अच्छेण वा बहुलेण वा ससित्थेण वा असित्थेण वा वोसिरइ।

इह 'अन्यत्र' इत्यस्यानुवृत्तेस्तृतीयायाः पञ्चम्यर्थत्वात् लेवाडेण वेति कृतलेपाद् वा पिच्छलत्वेन भाजनादीनामुपलेपकारकात् खर्जूरादिपानकादन्यत्र तद् वर्जयित्वेत्यर्थः। त्रिविधाहारं 'व्युत्सृजति' इति योगः। वाशब्दोऽलेपकृतपानकापेक्षयाऽवर्जनीयत्वाविशेषद्योतनार्थः, अलेपकारिणेव लेपकारिणाप्युपवासादेर्न भङ्ग इति भावः। एवमलेपकृताद् वाऽपिच्छलात् ; अच्छाद् वा

अथाभिग्रहप्रत्याख्यानम् । तच्च दण्डप्रमार्जनादिनियमरूपम् । तत्र चत्वार आकारा भवन्ति, यथा, अन्नत्थणाभोगेणं सहसागारेणं महत्तरागारेणं सव्वसमाहिवत्तिआगारेणं वोसिरइ । यदा त्वप्रावरणाभिग्रहं गृह्णाति तदा 'चोलपट्टगागारेणं' इति पञ्चम आकारो भवति, चोलपट्टकाकारादन्यत्रेत्यर्थः ॥

अथ विकृतिप्रत्याख्यानम् । तत्र नव, अष्टौ वाऽऽकाराः ; यत् सूत्रम्—

विगईओ पच्चक्खाइ अन्नत्थणाभोगेणं सहसागारेणं लेवालेवेणं गिहत्थसंसट्ठेणं उक्खित्तविवेगेणं पडुच्चमक्खिएणं पारिट्ठावणि-आगारेणं महत्तरागारेणं सव्वसमाहिवत्तिआगारेणं वोसिरइ ।

मनसो विकृतिहेतुत्वाद् विकृतयः, ताश्च दश, यदाहुः ;—

'[1]छीरं दहि नवणीअं घयं तहा तेल्लमेव गुड मज्जं ।
महु मंसं चेव तहा ओगाहिमगं च विगईओ ॥ १ ॥

तत्र पञ्च क्षीराणि, गोमहिष्यजोष्ट्रैलकासंबन्धभेदात् । दधि-नवनीत-घृतानि तु चतुर्भेदानि, उष्ट्रीणां तदभावात् । तैलानि चत्वारि, तिलातसीलट्टासर्षपसंबन्धभेदात् । शेषतैलानि तु न विकृतयः, लेपकृतानि तु भवन्ति । गुड इक्षुरसक्वाथः । स द्विधा, पिण्डो द्रवश्च । मद्यं द्वेधा काष्ठपिष्टोद्भवत्वात् । मधु त्रेधा,— माक्षिकम्, कौत्तिकं भ्रामरं च । मांसं त्रिविधम्, जल-स्थल-खचरजन्तूद्भवत्वात् ; अथवा मांसं त्रिविधम्, चर्म-रुधिर-मांस-

(१) क्षीरं दधि नवनीतं घृतं तथा तैलमेव गुडो मद्यम् ।
मधु मांसं चैव तथाऽवगाहिमकं च विकृतयः ॥ १ ॥

भेदात्। अवगाहेन स्नेहबोलनेन निर्वृत्तमवगाहिमं पक्वान्नम् "भावादिमः" (सिद्धहेम-६।३ २१।) इतीमः, यत् तापिकायां घृतादिपूर्णायां चलाचलं खाद्यकादि पच्यते, तस्यामेव तापिकायां तेनैव घृतेन द्वितीयं तृतीयं च खाद्यकादि विकृतिः, ततः परं पक्वान्नानि योगवाहिनां निर्विकृतिप्रत्याख्यानेऽपि कल्पन्ते। अन्येनैव पूपकेन तापिका पूर्यते तदा द्वितीयं पक्वान्नं निर्विकृति प्रत्याख्यानेऽपि कल्पते, लेपकृतं तु भवति। इत्येषा वृद्धसामाचारी। एतासु च दशसु विकृतिषु मद्यमांसमधुनवनीतलक्षणाश्चतस्रो विकृतयोऽभक्ष्याः। शेषास्तु षड् भक्ष्याः। तत्र भक्ष्य-विकृतिनिर्विकृतिकादिविकृतिप्रत्याख्यानं षड्विकृतिप्रत्याख्यानं च निर्वि-कृतिकमस्त्र विकृतिप्रत्याख्यानेन संगृहीतम्। व्याख्याताः पूर्व... [illegible]

[illegible]

विकृतिं त्यजतीत्यर्थः। इह च यासु विकृतिषूत्क्षिप्तविवेकः संभवति तासु नवाकाराः, अन्यासु तु द्रवरूपास्वष्टौ।

एतदर्थसंवादिन्यो गाथाः—

[1]दो चेव नमुक्कारे आगारा छच्च पोरिसीए उ।
सत्तेव य पुरिमड्ढे एक्कासणगम्मि अट्ठेव ॥ १ ॥
सत्तेगट्ठाणस्स उ अट्ठेव य अंबिलम्मि आगारा।
पंचेव अब्भत्तट्ठे छप्पाणे चरिम चत्तारि ॥ २ ॥
पंच चउरो अभिग्गहे निव्विए अट्ठ नव य आगारा।
अप्पाउरणे पंच उ हवंति सेसेसु चत्तारि ॥ ३ ॥

ननु निर्विकृतिक एवाकाराभिधानाद् विकृतिपरिमाणप्रत्याख्याने कुत आकारा अवगम्यन्ते ?। उच्यते—निर्विकृतिकग्रहणे विकृतिपरिमाणस्यापि संग्रहो भवति, त एव चाकारा भवन्ति ; यथा—एकासनस्य पौरुष्याः पूर्वार्धस्यैव च सूत्रेऽभिधानेऽपि द्व्यासनकस्य सार्धपौरुष्या अपार्धस्य च प्रत्याख्यानमदुष्टम्, अप्रमादवृद्धेः संभवात्। आकारा अप्येकासनादिसंबन्धिन एवान्येष्वपि न्याय्याः, आसनादिशब्दसाम्यात् चतुर्विधाहारपाठेऽपि

---

(1) द्वावेव नमस्कारे आकारौ षट् च पौरुष्यां तु।
सप्तैव च पूर्वार्धे एकाशनेऽष्टैव ॥ १ ॥
सप्तैकस्थानस्य त्वष्टैव चाचामाम्ले आकाराः।
पञ्चैवाभक्तार्थे षट् पानके चरमे चत्वारः ॥ २ ॥
पञ्च चतुरोऽभिग्रहे निर्विकृतिकेऽष्ट नव चाकाराः।
अप्रावरणे पञ्च तु भवन्ति शेषेषु चत्वारः ॥ ३ ॥

द्विविधत्रिविधाहारप्रत्याख्यानवत्। ननु दशासनादीनि अभिग्रहप्रत्याख्यानानि, ततस्तेषु चत्वार एवाकाराः प्राप्नुवन्ति। न, एकासनादिभिस्तुल्ययोगक्षेमत्वात्। अन्ये तु मन्यन्ते,—एवं हि प्रत्याख्याने संख्या विशीर्येत। तत एकासनादीन्येव प्रत्याख्यानानि, तदशक्तस्तु यावत्सहिष्णुस्तावत् पौरुष्यादिकं प्रत्याख्याति, तदुपरि ग्रन्थिसहितादिकमिति। प्रत्याख्यानं च सर्गनादिगुणोपेतं सुप्रत्याख्यानं भवति ;

यदाहुः —

[1]फासिअं पालियं चेव सोहिअं तीरिअं तहा।

किट्टियमाराहियं चेव एरिसयम्मि पयइअव्वं ॥ १ ॥

तत्र स्पृष्टं प्रत्याख्यानकाले विधिना प्राप्तम् ।१। पालितं पुनःपुनरुपयोगप्रतिजागरणेन रक्षितम् ।२। शोभितं गुर्वादिप्रदत्तशेषभोजनासेवनेन ।३। तीरितं पूर्णेऽपि कालावधौ किञ्चित्कालावस्थानेन ।४। कीर्तितं भोजनवेलायाममुकं मया प्रत्याख्यातमधुना पूर्णं भोक्ष्य इत्युच्चारणेन । ५ । आराधितमेभिः प्रकारैः संपूर्णैर्निष्ठां नीतमिति । ६ ।

प्रत्याख्यानस्य चानन्तर्येण पारम्पर्येण च फलमिदम् ;—

[2]पच्चक्खाणम्मि कए आसवदाराइं हुंति पिहिआइं।

आसवदारपिहाणे तण्हावुच्छेअणं होइ ॥ १ ॥

(१) स्पृष्टं पालितं चापि शोभितं तीरितं तथा।
कीर्तितमाराधितं चैवेदृशे प्रयतितव्यम् ॥ १ ॥

(२) प्रत्याख्याने कृते आस्रवद्वाराणि भवन्ति पिहितानि।
आस्रवद्वारपिधाने तृष्णाव्युच्छेदनं भवति ॥ १ ॥

[1]तण्हावुच्छेएण य अउलोवसमो भवे मणुस्साणं ।
अउलोवसमेण पुणो पच्चक्खाणं हवइ सुद्धं ॥ २ ॥
तत्तो चरित्तधम्मो कम्मविवेगो अपुव्वकरणं च ।
तत्तो केवलणाणं सासयसोक्खो तओ मोक्खो ॥३॥

न चावश्यकर्तव्यमावश्यकं चैत्यवन्दनाद्येव श्रावकस्य, न षड्विधमिति वक्तुं युक्तम्,

[2]समणेण सावएण य अवस्सकायव्वयं हवइ जम्हा ।
अंतो अहो निसिस्स य तम्हा आवस्सयं नाम ॥ १ ॥

इत्यागमे श्रावकं प्रत्यावश्यकस्योक्तत्वात् । न चात्र चैत्यवन्दनाद्येवावश्यकं वक्तुमुचितम्, 'अंतो अहो निसिस्स य' इति कालद्वयाभिधानात्, चैत्यवन्दनस्य च त्रैकालिकत्वेनोक्तत्वात् । अनुयोगद्वारेष्वपि [3]जण्णं समणो वा समणी वा सावए वा साविया वा तच्चित्ते तम्मणे तल्लेसे तदट्ठोवउत्ते तदप्पियकरणे तब्भावणाभाविए उभओकालं आवस्सयं करेइ, से तं लोउत्तरिअं भावा-

(१) तृष्णाव्युच्छेदेन चातुलोपशमो भवेद् मनुष्याणाम् ।
अतुलोपशमेन पुनः प्रत्याख्यानं भवति शुद्धम् ॥ २ ॥
ततश्चारित्रधर्मः कर्मविपाकोऽपूर्वकरणं च ।
ततः केवलज्ञानं शाश्वतसौख्यस्ततो मोक्षः ॥ ३ ॥

(२) श्रमणेन श्रावकेण चावश्यकर्तव्यकं भवति यस्मात् ।
अन्तेऽह्नो निशश्च तस्मादावश्यकं नाम ॥ १ ॥

(३) यत् श्रमणो वा श्रमणी वा श्रावको वा श्राविका वा तच्चित्तस्तन्मनास्तल्लेश्यस्तदर्थोपयुक्तस्तदर्पितकरणस्तद्भावनाभावित उभयकालमावश्यकं कुर्यात्, तल्लोकोत्तरं भावावश्यकम् ।

वश्यं इति वचनात् श्रावकस्याप्यावश्यकमुक्तमेव। ततः कृतषड्विधावश्यककर्मा स्वाध्यायम्, अणुव्रतविध्यादेः पञ्चनमस्कारस्य वा परिवर्तनं कुर्यात्; अथवा, स्वाध्यायं पञ्चविधं वाचना-प्रश्न-परिवर्तना-ऽनुप्रेक्षा-धर्मकथारूपं कुर्यात्। यस्तु साधूपाश्रयमागन्तुमशक्तो राजादिर्वा महर्द्धिको वा बह्वपायः स स्वगृह एवावश्यकं स्वाध्यायं च करोति। उत्तममित्युत्तमनिर्जराहेतुम्, यदाह;—

[1]बारसविहम्मि वि तवे सब्भिंतरबाहिरे कुसलदिट्ठे।
नवि अत्थि नवि अ होही सज्झायसमं तवोकम्मं ॥ १ ॥

तथा,

[2]सज्झाएण पसत्थं झाणं जाणइ अ सव्वपरमत्थं।
सज्झाए वट्टंतो खणे खणे जाइ वेरग्गं ॥ १ ॥

इत्यादि ॥ १३० ॥

न्याय्ये काले ततो देवगुरुस्मृतिपवित्रितः।
निद्रामल्पामुपासीत प्रायेणाब्रह्मवर्जकः ॥ १३१ ॥

न्याय्यो न्यायादनपेतः कालः, स च रात्रेः प्रथमयामोऽर्धरात्रं वा शरीरसात्म्येन, तत इति स्वाध्यायकरणानन्तरं, निद्रामल्पामुपासीतेति क्रिया। कथम्भूतः सन्? देवगुरुस्मृतिपवित्रितः—

(१) द्वादशविधेऽपि तपसि साभ्यन्तरबाह्ये कुशलदिष्टे।
नास्त्यपि नापि च भविष्यति स्वाध्यायसमं तपःकर्म ॥ १ ॥
(२) स्वाध्यायेन प्रशस्तं ध्यानं जानाति च सर्वपरमार्थम्।
स्वाध्याये वर्त्तमानः क्षणे क्षणे याति वैराग्यम् ॥ १ ॥

देवा अर्हदादयः, गुरवो धर्माचार्याः, तेषां स्मृतिश्चित्तारोपणं तया पवित्रितो निर्मलीकृतात्मा । उपलक्षणं चैतत् चतुःशरणगमन-दुष्कृतगर्हा सुकृतानुमोदना-पञ्चनमस्कारस्मरणप्रभृतीनाम् । न ह्येतत्स्मरणमन्तरेण पवित्रता भवति । तत्र देवस्मृतिः—"(१)नमो वीयरागाणं सव्वण्णूणं तिलोक्कपूइयाणं जहट्ठियवत्थुवाईणं" इत्यादि । गुरुस्मृतिश्च—"धन्यास्ते ग्राम-नगर-जनपदादयो येषु मदीया धर्माचार्या विहरन्ति ।" निद्रामल्पामिति । निद्रामिति विशेष्यम्, अल्पामिति विशेषणम् । विशेषणस्य चात्र विधिः, "सविशेषणे हि विधि-निषेधौ विशेषणमुपसंक्रामतः" इति न्यायात् । निद्रामिति च विशेष्यमिति न तत्र विधिः, दर्शनावरणीयकर्मोदयेन निद्रायाः स्वतः सिद्धत्वात्, 'अप्राप्ते हि शास्त्रमर्थवत्' इत्युक्तप्रायम् । अब्रह्म मैथुनं तद् वर्जयति अब्रह्मवर्जकः, प्रायेणेति बाहुल्येन, गृहस्थत्वादस्य ॥ १३१ ॥

पुनश्च—

निद्राच्छेदे योषिदङ्गसतत्त्वं परिचिन्तयेत् ।
स्थूलभद्रादिसाधूनां तन्निवृत्तिं परामृशन् ॥१३२॥

परिणतायां रात्रौ निद्रायाश्छेदे सति योषिदङ्गानां स्त्रीशरीराणां सतत्त्वं स्वरूपं परितश्चिन्तयेत् । किं कुर्वन् ? स्थूल-

(१) नमो वीतरागेभ्यः सर्वज्ञेभ्यस्त्रैलोक्यपूजितेभ्यो यथास्थितवस्तुवादिभ्यः ।

भद्रादीनां साधूनां तन्निवृत्तिं योषिदङ्गनिवृत्तिं परामृशन् अनुस्मरन् ।

स्थूलभद्रचरितं संप्रदायगम्यम् । स चायम् ;—

अस्ति सौधप्रभाजालधूपधूमैर्निरन्तरैः ।
जितगङ्गार्कजासङ्गं पाटलीपुत्रपत्तनम् ॥ १ ॥
तत्र त्रिखण्डपृथिवीपतिः पतिरिव श्रियः ।
समुत्खातद्विपत्कान्दो नन्दो नामाभवद् नृपः ॥ २ ॥
विसंकटः श्रियां वासोऽसंकटः शकटो धियाम् ।
शकटाल इति तस्य बभूवामात्यपुङ्गवः ॥ ३ ॥
तस्याभूज्ज्येष्ठतनयो विनयादिगुणास्पदम् ।
अस्थूलधीः स्थूलभद्रो भद्राकारनिशाकरः ॥ ४ ॥
भक्तिनिष्ठः कनिष्ठोऽस्य श्रीयकोऽजनि नन्दनः ।
नन्दराड्हृदयामन्दानन्दगोशीर्षचन्दनः ॥ ५ ॥
बभूव तत्र कोशेति वेश्या रूपश्रियोर्वशी ।
वशीकृतजगच्चेता [illegible] ॥ ६ ॥
भुञ्जानो विविधान् भोगान् स्थूलभद्रो दिवानिशम् ।
तस्यामावसथ तस्या द्वादशाब्दानि [illegible] ॥ ७ ॥
श्रीयक[illegible]ऽभूद् भूविश्वासभाजनम् ।
[illegible] हृदय नन्दस्य पृथिवीपतेः ॥ ८ ॥
तत्र [illegible] [illegible] द्विज[illegible]णीः ।
[illegible] वैयाकरणानां शिरोमणिः ॥ ९ ॥

स्वयंकृतैर्नवनवैरष्टोत्तरशतेन सः ।
वृत्तैः प्रवृत्तोऽनुदिनं नृपावलगने सुधीः ॥ १० ॥
मिथ्यादृगिति तं मन्त्री प्रशशंस न जातुचित् ।
तुष्टोऽप्यस्मै तुष्टिदानं न ददौ नृपतिस्ततः ॥ ११ ॥
ज्ञात्वा वररुचिस्तत्र दानाप्रापणकारणम् ।
आराधयितुमारेभे गृहिणीं तस्य मन्त्रिणः ॥ १२ ॥
संतुष्टया तयाऽन्येद्युः कार्यं पृष्टोऽब्रवीदिदम् ।
राज्ञः पुरस्तान्मत्काव्यं तव भर्ता प्रशंसतु ॥ १३ ॥
तया तदुपरोधेन तद्विज्ञप्तोऽवदत् पतिः ।
मिथ्यादृष्टेरमुष्याहं प्रशंसामि कथं वचः ? ॥ १४ ॥
तयोक्तः साग्रहं मन्त्री तत् तथा प्रत्यपद्यत ।
अन्यस्त्रीबालमूर्खाणामाग्रहो बलवान् खलु ॥ १५ ॥
राज्ञः पुरस्तात् पठतः काव्यं वररुचेस्ततः ।
अहो ! सुभाषितमिति वर्णयामास मन्त्रिराट् ॥ १६ ॥
दीनारशतमष्टाग्रं ततोऽस्मै नृपतिर्ददौ ।
राजमान्यस्य वाचापि जीव्यते ह्यनुकूलया ॥ १७ ॥
दीनाराष्टोत्तरशते दीयमाने दिने दिने ।
किमेतद् दीयत इति भूपं मन्त्री व्यजिज्ञपत् ? ॥ १८ ॥
अथोचे नृपतिर्मन्त्रिन् ! दद्मोऽस्मै त्वत्प्रशंसया ।
वयं यदि स्वयं दद्मो दद्मः किं न पुरा ततः ? ॥ १९ ॥
मन्त्र्यप्यूचे मया देव ! प्रशंसा नास्य निर्ममे ।
काव्यानि परकीयानि प्रशशंस सदा त्वहम् ॥ २० ॥

इदं गतामिव सर्वं तत प्राक्तनीयाकरं स्वयम् ।
इत्युक्तो मन्त्रिणा राजा ममाथ तत्त्वमस्य ॥ ३१ ॥
तस्यां निशायां नृपः सार्धं प्रविवेश स मन्त्रिणा ।
गाढस्तम्भनिलीनोऽस्थात् पर्यन्तानुपलक्षितः ॥ ३२ ॥
तदा वररुचिर्गत्वा गङ्गां सन्ध्याभिवन्दने ।
दीनाराष्टशतग्रन्थिं न्यस्य तस्थौ तटे ॥ ३३ ॥
गङ्गानिलयमादाय दीनारग्रन्थिमेव तु ।
स्वरः समर्पयामास प्रत्यहं परमस्मितम् ॥ ३४ ॥
अथ गृहाद्दीनारग्रन्थिर्गङ्गा निशात्यये ।
ययौ राज्ञा समं गङ्गामागाद् वररुचिस्तदा ॥ ३५ ॥
दृष्ट्वाग्रं रूपं दृष्टोऽस्य गङ्गामार्गो सविस्मयम् ।
स्तोतुं प्रवृत्ते गङ्गां स्तुतौ वररुचिस्ततः ॥ ३६ ॥
गुप्तोऽन्वपश्यद् यत्नं यदा वररुचिः पदा ।
दीनारग्रन्थिरपतत् नापतत् पाणिकोटरे ॥ ३७ ॥
द्रव्यं सोऽन्विषयामास पाणिना तज्जले ततः ।
[१]मृत्यावपश्यंस्तूष्णीको धूर्तो दृष्टो हि मौनभाक् ॥ ३८ ॥
इत्युचे च महामात्यः किं ते दत्ते न जाह्नवी ।
व्यामोहितमपि द्रव्यमन्विषयसि यद् मुहुः ? ॥ ३९ ॥
उपलक्ष्य स्वहस्तेनेदं निजद्रव्यमिति ब्रुवन् ।
सोऽर्पयामास दीनारग्रन्थिं वररुचेः करे ॥ ४० ॥

(१) घ ङ-चचक्ष्यं तु ।

ड्रोनारमन्निना तेनोऽसपि ह्रुन्मितेव सः ।
[illegible]मातृगामास मरणादपि दुस्सहाम् ॥ ४१ ॥
[illegible] लोक मागमत विपन्नमौ ।
[illegible] पात: पुनर्मूलालोलुपे मनितो नृपम ॥ ४२ ॥
[illegible] ज्ञातमिदं कन्नाम्नापन् मन्त्रिपुङ्गव ।
[illegible]: [illegible]मागात् मन्त्रीपति: ॥ ४३ ॥
[illegible] [illegible]: यतिकार्यं विनिन्नगन् ।
[illegible] ॥ ४४ ॥
[illegible] कार्निम् [illegible] ।
[illegible] ॥ ४५ ॥
[illegible] नन्नाय मन्त्रिणा ।
[illegible] ॥ ४६ ॥
[illegible] ।
[illegible] ॥ ४७ ॥
[illegible]

ततश्च सेवावसरे मन्त्रिणः समुपेयुषः ।
प्रणामं कुर्वतो राजा कोपात् तस्थौ पराङ्मुखः ॥ ५२ ॥
तद्भावज्ञोऽथ वेश्मेत्यामात्यः श्रीयकमब्रवीत् ।
राज्ञोऽस्मि ज्ञापितः केनाप्यभक्तो विद्विषन्निव ॥ ५३ ॥
अस्मादकस्मादस्माकं कुलक्षय उपस्थितः ।
रक्ष्यते, वत्स ! कुरुषे यथादेशमिमं मम ॥ ५४ ॥
नमयामि यदा राज्ञे शिरश्छिन्द्यास्तदासिना ।
अभक्तः स्वामिनो वध्यः पितापीति वदेस्ततः ॥ ५५ ॥
जरसापि यियासौ मय्येवं याते परासुताम् ।
त्वं मत्कुलगृहस्तम्भो नन्दिष्यसि चिरं ततः ॥ ५६ ॥
श्रीयकोऽपि रुदन्नेवमवदद् गद्गदस्वरम् ।
तात ! घोरमिदं कर्म श्वपचोऽपि करोति किम् ? ॥ ५७ ॥
अमात्योऽप्यब्रवीदेवमेवं कुर्वन् विचारणाम् ।
मनोरथान् पूरयसे वैरिणामेव केवलम् ॥ ५८ ॥
राजा यम इवोद्दण्डः सकुटुम्बं न हन्ति माम् ।
यावत्, तावन्ममैकस्य क्षयाद् रक्ष कुटुम्बकम् ॥ ५९ ॥
मुखे विषं तालपुटं न्यस्य नंस्यामि भूपतिम् ।
शिरः परासोर्मे छिन्द्याः पितृहत्या न ते ततः ॥ ६० ॥
पित्रैवं बोधितस्तत् स प्रतिपेदे चकार च ।
शुभोदर्काय धीमन्तः कुर्वन्त्यापातदारुणम् ॥ ६१ ॥
भवता किमिदं वत्स ! विदधे कर्म दुष्करम् ।
ससंभ्रममिति प्रोक्तो नृपेण श्रीयकोऽवदत् ॥ ६२ ॥

यदेव स्वामिना ज्ञातो द्रोह्ययं निहतस्तदा ।
भर्तृचित्तानुसारेण भृत्यानां हि प्रवर्तनम् ॥ ६३ ॥
भृत्यानां युज्यते दोषे स्वयं ज्ञाते विचारणा ।
स्वामिज्ञाते प्रतीकारो युज्यते न विचारणा ॥ ६४ ॥
कृतौर्ध्वदेहिकं नन्दस्ततः श्रीयकमब्रवीत् ।
सर्वव्यापारसहिता मुद्रेयं गृह्यतामिति ॥ ६५ ॥
अथ विज्ञपयामास प्रणम्य श्रीयको नृपम् ।
स्थूलभद्राभिधानोऽस्ति पितृतुल्यो ममाग्रजः ॥ ६६ ॥
पितृप्रसादाद् निर्बाधं कोशायास्तु निकेतने ।
भोगानुपभुञ्जानस्य तस्याब्दा द्वादशागमन् ॥ ६७ ॥
आहूयाथ स्थूलभद्रस्तमर्थं भूभुजोदितः ।
पर्यालोच्यामुमादेशं करिष्यामीत्यभाषत ॥ ६८ ॥
अद्यैवालोचयेत्युक्तः स्थूलभद्रो महीभुजा ।
अशोकवनिकां गत्वा विममर्शेति चेतसा ॥ ६९ ॥
शयनं भोजनं स्नानं यच्चान्यत् सुखसाधनम् ।
कालेऽपि नानुभूयन्ते वैरिभिरिव नियोगिभिः ॥ ७० ॥
नियोगिनां स्वान्यराष्ट्रचिन्ताव्यग्रे च चेतसि ।
प्रेयसीनां नावकाशः पूर्णकुम्भेऽम्भसामिव ॥ ७१ ॥
त्यक्त्वा सर्वमपि स्वार्थं राज्ञोऽर्थं कुर्वतामपि ।
उपद्रवन्ति पिशुना उलूकानामिव द्विकाः ॥ ७२ ॥

यथा स्वदेहद्रविणव्ययेनापि प्रयत्यते ।
राजार्थे, तद्वदात्मार्थे यत्यते किं न धीमता ? ॥ ७३ ॥
विमृश्यैवं व्यधात् केशोत्पाटनं पञ्चमुष्टि सः ।
रत्नकम्बलदशाभी रजोहरणमप्यथ ॥ ७४ ॥
ततश्च स महासत्त्वो गत्वा सदसि पार्थिवम् ।
आलोचितमिदं धर्मलाभः स्तादित्यवोचत ॥ ७५ ॥
ततः स राजसदनाद् गुहाया इव केसरी ।
निःससार महासारः संसारकरिरोषणः ॥ ७६ ॥
किमेष कपटं कृत्वा यायाद् वेश्यागृहं पुनः ।
इत्यप्रत्ययतः क्ष्मापो गवाक्षेण निरैक्षत ॥ ७७ ॥
प्रदेशे शवदुर्गन्धेऽप्यविकूणितनासिकम् ।
यान्तं दृष्ट्वा स्थूलभद्रं नरेन्द्रोऽधूनयच्छिरः ॥ ७८ ॥
भगवान् वीतरागोऽसावस्मिन् धिग् मे कुचिन्तितम् ।
इत्यात्मानं निनिन्दोच्चैर्नन्दस्तमभिनन्दयन् ॥ ७९ ॥
स्थूलभद्रोऽपि गत्वा श्रीसंभूतिविजयान्तिके ।
दीक्षां सामायिकोच्चारपूर्विकां प्रत्यपद्यत ॥ ८० ॥
गृहीत्वा श्रीयकं दोष्णि ततो नन्दः सगौरवम् ।
मुद्राधिकारे निःशेषव्यापारसहिते न्यधात् ॥ ८१ ॥
चकार श्रीयको राज्यचिन्तामवहितः सदा ।
साक्षादिव शकटालः प्रकृष्टनयपाटवात् ॥ ८२ ॥
स नित्यमपि कोशाया विनीतः सदने ययौ ।
स्नेहाद् भ्रातुस्तत्प्रियादि कुलीनैर्बहु मन्यते ॥ ८३ ॥

स्थूलभद्रवियोगार्ता श्रीयकं प्रेक्ष्य साऽरुदत्।
इष्टे दृष्टे हि दुःखार्ता न दुःखं धर्तुमीशते ॥ ८४ ॥
ततस्तां श्रीयकोऽवोचदार्ये! किं कुर्महे वयम्।
असौ वररुचिः पापोऽघातयज्जनकं हि नः ॥ ८५ ॥
अकाण्डोत्थितवज्राग्निप्रदीपनसहोदरम्।
स्थूलभद्रवियोगं च भवत्या अकरोदयम् ॥ ८६ ॥
त्वज्जाम्यामुपकोशायां यावद् रक्तोऽस्त्यसौ खलः।
तावत् प्रतिक्रियां काञ्चिद् विचिन्तय मनस्विनि! ॥ ८७ ॥
तदादिशोपकोशां यत् प्रतार्य कथमप्यसौ।
विधीयतां वररुचिर्मद्यपानरुचिस्त्वया ॥ ८८ ॥
प्रियोवियोजनाद् वैराद् दाक्षिण्याद् देवरस्य च।
तत् प्रतिज्ञाय सा सद्योऽप्युपकोशां समादिशत् ॥ ८९ ॥
कोशायाश्च निदेशेनोपकोशा तं तथा व्यधात्।
यथा पपौ सुरामेष स्त्रीवर्गैः क्रियते न किम्? ॥ ९० ॥
सुरापानं वररुचिः स्वैरं भ्रष्टोऽस्य कारितः।
उपकोशेति कोशायै शशंसाथ निशात्यये ॥ ९१ ॥
अथ कोशामुखात् सर्वं शुश्राव श्रीयकोऽपि तत्।
मेने च पितृवैरस्य विहितं प्रतियातनम् ॥ ९२ ॥
शकटालमहामात्यात्ययात् प्रभृति सोऽप्यभूत्।
सदा नन्दनृपसेवासमतत्परः ॥ ९३ ॥
स प्रत्यहं राजकुले सेवाकाले समापतन्।
[illegible] राजलोकेषु सतीर्थ्यवाद्[illegible] ॥ ९४ ॥

एकदा नन्दराट् सचिवगणसमन्वितः ।
सदसि श्रीयकस्याग्रे जगादेवं सगद्गदम् ॥ ९५ ॥
भक्तिमान् शक्तिमान् नित्यं शकटालो महामतिः ।
अभवन् मे महामात्यः शक्रस्येव बृहस्पतिः ॥ ९६ ॥
एवमेव विपन्नोऽसौ दैवादद्य करोमि किम् ? ।
अद्य शून्यमिवास्थानमदस्तेन विनामुना ॥ ९७ ॥
उवाच श्रीयकोऽप्येवं किं देवेह विदध्महे ।
इदं वररुचिः सर्वं पापं व्यधित मद्यपः ॥ ९८ ॥
सत्यमेव सुरां भट्टः पिबतीति नृपोदिते ।
श्वोऽमुं दर्शयितास्मीति श्रीयकः प्रत्यवोचत ॥ ९९ ॥
श्रीयकस्तु द्वितीयेऽह्नि सर्वेषामीयुषां सदः ।
स्वपुंसा शिक्षितेनाग्रे पद्ममेकैकमार्पयत् ॥ १०० ॥
तत्कालं मदनफलरसभावनयाऽन्वितम् ।
दुरात्मनो वररुचेरर्पयामास पङ्कजम् ॥ १ ॥
कुतस्त्यमद्भुतामोदमिदमित्यभिवर्णिनः ।
घ्रातुं राजादयो निन्युर्नासाग्रे स्वं स्वमम्बुजम् ॥ २ ॥
सोऽपि भट्टोऽनयद् घ्रातुं घ्राणाग्रे पङ्कजं निजम् ।
चन्द्रहाससुरां सद्यो रात्रिपीतां ततोऽवमत् ॥ ३ ॥
धिगमुं सीधुपं ब्रह्मबन्धुं वन्ध्यवधोचितम् ।
सर्वैरित्याक्रुश्यमानो निर्ययौ सदसोऽथ सः ॥ ४ ॥
ब्राह्मणा याचितास्तेन प्रायश्चित्तमचीकथन् ।
तापितत्रपुणः पानं सुरापाणाघघातकम् ॥ ५ ॥

सकामार्तः पतत्याशो रम्यास्तस्या ह्रीकया ।
तत्सारेण विपर्योऽस्यागादिति विचिन्त्य सा ॥ १७ ॥
एवमूचे स्वागतं स्वामिन् ! समादिश करोमि किम् ? ।
त्वदर्थं परिक्लान्तः सर्वस्वत् तवैव हि ॥ १८ ॥
मत्समांशी पश्यन्ती मे चित्तानिग्रमर्थ्यताम् ।
इत्युक्त्वा स्मरभट्टोऽपि सा तृषे रमतामिति ॥ १९ ॥
तया च तस्यां प्रगुणीकृतायां भगवानपि ।
ध्यानस्थानेऽविशद् धर्म इव स्ववन्नवत्तया ॥ २० ॥
अथ सा षड्रसाहारभोजनानन्तरं मुनेः ।
चित्तपत्रलग्नाहारा क्षोभाय समुपाययौ ॥ २१ ॥
सोपविष्टा पुरस्तस्योत्कृष्टा कापि दिवाम्बरा ।
चतुरं रचयामास हावभावादिकं मुहुः ॥ २२ ॥
करणाङ्गभवक्रीडोद्यामानि सुरतानि च ।
यानि तानि प्राक्तनानि स्मारयामास साऽसकृत् ॥ २३ ॥
यद् यत् क्षोभाय विदधे तया तत्र महामुनौ ।
तत् तद् मुधाऽभवद् यद्वद् वज्रे नखविलेखनम् ॥ २४ ॥
प्रतिवासरमप्येवं तत्क्षोभाय चकार सा ।
जगाम स तु न क्षोभं मनागपि महामनाः ॥ २५ ॥
तयोपसर्गकारिण्या प्रत्युतास्य महामुनेः ।
आदीप्यत ध्यानवह्निर्मेघवह्निरिवाम्भसा ॥ २६ ॥
त्वयि पूर्वमिवाज्ञानाद् रन्तुकामां धिगीश ! माम् ।
आत्मानमिति निन्दन्ती साऽपतत् तस्य पादयोः ॥ २७ ॥

कोशावेश्यागृहे नित्यं षड्रसाहारभोजनः ।
भगवन् ! समवस्थास्ये चतुर्मासीमिमामहम् ॥ ३८ ॥
स्थूलभद्रेण मात्सर्यादेतदङ्गीकरोत्ययम् ।
विचार्येत्युपयोगेन ज्ञात्वा च गुरुरादिशत् ॥ ३९ ॥
वत्स ! माभिग्रहं कार्षीरतिदुष्करदुष्करम् ।
स्थूलभद्रः क्षमः कर्तुमद्रिराज इव स्थिरः ॥ ४० ॥
न हि मे दुष्करोऽप्येष कार्यं दुष्करदुष्करः ? ।
तदवश्यं करिष्यामीत्युवाच स मुनिर्गुरुम् ॥ ४१ ॥
गुरुरूचेऽमुना भावी भ्रंशः प्राक्तपसोऽपि ते ।
आरोपितोऽतिभारो हि गात्रभङ्गाय जायते ॥ ४२ ॥
गुरोर्वचोऽवमन्याथ वीरंमन्यो मुनिः स तु ।
उन्मौनकेतनं प्राप कोशायास्तु निकेतनम् ॥ ४३ ॥
स्थूलभद्रस्पर्धयेहायाति मन्ये तपस्व्यसौ ।
भवे पतन् रक्षणीय इत्युत्थाय ननाम सा ॥ ४४ ॥
वसत्यै याचितां तेन मुनिना चित्रशालिकाम् ।
कोशा समर्पयामास स मुनिस्तत्र चाविशत् ॥ ४५ ॥
तं भुक्तषड्रसाहारं मध्याह्नेऽथ परीक्षितुम् ।
कोशापि तत्र लावण्यकोशभूता समाययौ ॥ ४६ ॥
चुक्षोभ स मुनिर्मङ्क्षु पङ्कजाक्षीमुदीक्ष्य ताम् ।
स्त्री तादृग् भोजनं तादृग् विकाराय न किं भवेत् ? ॥४७॥
स्मरार्त्तो याचमानं तं कोशाप्येवमवोचत ।
वयं हि भगवन् ! वेश्या वश्याः स्मो धनदानतः ॥ ४८ ॥

स मुनिर्व्याजहाराथ प्रसीद मृगलोचने !।
अस्मासु भवति द्रव्यं किं तैलं वालुकास्विव ? ॥ ४९ ॥
नेपालभूपोऽपूर्वस्मै साधवे रत्नकम्बलम्।
दत्ते तमानयेत्यूचे सा निर्वेदयितुं मुनिम् ॥ ५० ॥
ततश्चचाल नेपालं प्रत्यकालेऽपि बालवत्।
पङ्किलायामिलायां स निजव्रत इव स्खलन् ॥ ५१ ॥
तत्र गत्वा महीपालाद् रत्नकम्बलमाप्य च।
स मुनिर्वलितो वर्त्मन्यासंस्तत्र च दस्यवः ॥ ५२ ॥
आयाति लक्षमित्याख्यद् दस्यूनां शकुनस्ततः।
किमायातीत्यपृच्छच्च दस्युराड् द्रुस्थितं नरम् ॥ ५३ ॥
आगच्छन् भिक्षुरेकोऽस्ति न कश्चित् तादृशोऽपरः।
इत्यशंसद् द्रुमारूढश्चौरसेनापतेः स तु ॥ ५४ ॥
साधुस्तत्राथ संप्राप्तस्तैर्विधृत्य निरूपितः।
कमप्यर्थमपश्यद्भिर्मुमुचे च मलिम्लुचैः ॥ ५५ ॥
एतल्लक्षं प्रयातीति व्याहरच्छकुनः पुनः।
मुनिं चौरपतिः प्रोचे सत्यं ब्रूहि किमस्ति ते ? ॥ ५६ ॥
वेश्याकृतेऽस्य वंशस्यान्तः क्षिप्तो रत्नकम्बलः।
अस्तीत्युक्ते मुनिश्चौरराजेन मुमुचेऽथ सः ॥ ५७ ॥
स समागत्य कोशायै प्रददौ रत्नकम्बलम्।
चिक्षेप सा गृहस्रोतःपङ्के निःशङ्कमेव तम् ॥ ५८ ॥
अजल्पद् मुनिरप्येवं न्यक्षेप्यशुचिकर्दमे।
महामूल्यो ह्यसौ रत्नकम्बलः कम्बुकण्ठि ! किम् ? ॥ ५९

अथ कोशाप्युवाचैवं कम्बलं क्षुद्र ! शोचसि ।
गुणरत्नमयं स्वं तु पतन्तं त्वं न शोचसि ॥ ९० ॥
तत् श्रुत्वा जातसंवेगो मुनिस्तामित्यवोचत ।
बोधितोऽस्मि त्वया साधु संसारात् साधु रक्षितः ॥ ९१ ॥
अथातीचारपङ्कानुन्मूलयितुमात्मनः ।
यास्यामि गुरुपादान्ते धर्मलाभस्तवानघे ! ॥ ९२ ॥
कोशापि तमुवाचैवं मिथ्या मे दुष्कृतं त्वयि ।
ब्रह्मव्रतस्थयाप्येवं मया यदसि खेदितः ॥ ९३ ॥
आशातनेयं युष्माकं बोधकर्तुर्मया कृता ।
क्षन्तव्या सा गुरुवचः श्रयध्वं यात सत्वरम् ॥ ९४ ॥
इच्छामीति भणित्वा च गुर्वन्तिकमुपेत्य सः ।
गृहीत्वालोचनां तीव्रमाचचार पुनस्तपः ॥ ९५ ॥
राज्ञा प्रदत्ता कोशापि तुष्टेन रथिनेऽन्यदा ।
राजायत्तेति शिश्राय विना रागेण सा तु तम् ॥ ९६ ॥
स्थूलभद्रं विना नान्यः पुमान् कोऽपीत्यहर्निशम् ।
सा तस्य रथिनोऽभ्यर्णे वर्णयामास वर्णिनी ॥ ९७ ॥
रथी गत्वा गृहोद्याने पर्यङ्के च निषद्य सः ।
तन्मनोरञ्जनायेति स्वविज्ञानमदर्शयत् ॥ ९८ ॥
माकन्दलुम्बीं बाणेन विव्याध तमपीषुणा ।
पुङ्खेऽन्येन तमप्यन्येनेत्याहस्तं शराल्यभूत् ॥ ९९ ॥
हस्तं छित्वा क्षुरप्रेण बाणश्रेणिमुखस्थिताम् ।
लुम्बीं स्वपाणिनाऽऽकृष्यासीनस्तस्यै स आर्पयत् ॥ ७० ॥

इदानीं मम विज्ञानं पश्येत्यानाय्य मापि हि ।
व्यधत्त सार्षपं राशिं तस्योपरि ननर्त च ॥ ७१ ॥
सूचीं क्षिप्ता तत्र राशौ पुष्पपत्रैः पिधाय ताम् ।
सा ननर्त च नो सूच्या विद्धा राशिश्च न क्षतः ॥ ७२ ॥
ततः स ऊचे तुष्टोऽस्मि दुष्करेणामुना तव ।
याचस्व यद्‌ ममायत्तं ददामि तदहं ध्रुवम् ॥ ७३ ॥
सोवाच किं मयाऽकारि दुष्करं येन रञ्जितः ।
इदमप्यधिकं चास्मात् किमभ्यासेन दुष्करम् ? ॥ ७४ ॥
किञ्चाम्रलुम्बीच्छेदोऽयं नृत्यं चेदं न दुष्करम् ।
अशिक्षितं स्थूलभद्रो यच्चक्रे तत्तु दुष्करम् ॥ ७५ ॥
द्वादशाब्दानि बुभुजे भोगान् यत्र समं मया ।
तत्रैव चित्रशालायां तस्थौ सोऽखण्डितव्रतः ॥ ७६ ॥
दुग्धं नकुलसंचारादिव स्त्रीणां प्रचारतः ।
योगिनां दूष्यते चेतः स्थूलभद्रमुनिं विना ॥ ७७ ॥
दिनमेकमपि स्थातुं कोऽलं स्त्रीसंनिधौ तथा ? ।
चतुर्मासीं यथा तस्थौ स्थूलभद्रोऽक्षतव्रतः ॥ ७८ ॥
आहारः षड्रसश्चित्रशालावासोऽङ्गनान्तिके ।
अप्येकं व्रतलोपायान्यस्य लोहतनोरपि ॥ ७९ ॥
विलीयन्ते धातुमया पार्श्वे वह्नेरिव स्त्रियाः ।
स तु वज्रमयो मन्ये स्थूलभद्रो[1] महामुनिः ॥ ८० ॥

(१) क थ -भद्रम- ।

स्थूलभद्रं महासत्त्वं कृतदुष्करदुष्करम् ।
श्लाघयन्ती नृपाग्रे च मुखे वर्णयितुं परम् ॥ ८१ ॥
रथिकोऽप्यथ पप्रच्छ य एवं वर्णितं त्वया ।
को नाम स्थूलभद्रोऽयं महासत्त्वशिरोमणिः ? ॥ ८२ ॥
साप्यूचे शकटालस्य नन्दभूपालमन्त्रिणः ।
तनयः स्थूलभद्रोऽयं तवाग्रे वर्णयामि यम् ॥ ८३ ॥
तच्छ्रुत्वा सोऽपि संभ्रान्त इत्युवाच कृताञ्जलिः ।
एषोऽस्मि किङ्करस्तस्य स्थूलभद्रमहामुनेः ॥ ८४ ॥
संविग्नं साथ तं ज्ञात्वा विदधे धर्मदेशनाम् ।
प्रत्यबुध्यत सद्भिर्मोहनिद्रामपास्य सः ॥ ८५ ॥
प्रतिबुद्धं च तं बुद्ध्वा साऽऽख्यद् निजमभिग्रहम् ।
तत् श्रुत्वा विस्मयोत्फुल्ललोचनः सोऽब्रवीदिदम् ॥ ८६ ॥
बोधितोऽहं त्वया भद्रे ! स्थूलभद्रगुणोक्तिभिः ।
यास्यामि तस्य पन्थानं भवत्यैवाद्य दर्शितम् ॥ ८७ ॥
कल्याणमस्तु ते भद्रे ! पालय स्वमभिग्रहम् ।
उक्त्वेति सद्गुरोः पार्श्वे गत्वा दीक्षां स आददे ॥ ८८ ॥
भगवान् स्थूलभद्रोऽपि तीव्रं व्रतमपालयत् ।
द्वादशाब्दप्रमाणश्च दुष्कालः समभूत्तदा ॥ ८९ ॥
तीरं नीरनिधेर्गत्वा साधुसंघोऽखिलोऽप्यथ ।
गमयामास दुष्कालं करालं कालरात्रिवत् ॥ ९० ॥
अगुण्यमानं तु तदा साधूनां विस्मृतं श्रुतम् ।
अनभ्यसनतो नश्यत्यधीतं धीमतामपि ॥ ९१ ॥

अत्रार्थे सकलः संघः कायोत्सर्गं ददावथ ।
एत्य शासनदेव्यूचे ब्रूत कार्यं करोमि किम् ? ॥ २५ ॥
संघोऽप्येवमभाषिष्ट जिनपार्श्वमिमां नय ।
सोचे निर्विघ्नगत्यर्थं कायोत्सर्गेण तिष्ठत ॥ २६ ॥
संघे तत्प्रतिपेदाने मां साऽनैषीज्जिनान्तिके ।
ततः सीमन्धरस्वामी वन्दितो भगवान् मया ॥ २७ ॥
भरतादागताऽऽर्येयं निर्दोषेत्यवदज्जिनः ।
कृपया मन्निमित्तं च व्याचक्रे चूलिकाद्वयम् ॥ २८ ॥
ततोऽहं छिन्नसन्देहा देव्यानीता यथाश्रयम् ।
श्रीसंघस्यार्पितवती चूलिकाद्वितयं च तत् ॥ २९ ॥
इत्याख्याय स्थूलभद्रानुज्ञाता निजमाश्रयम् ।
ता ययुः स्थूलभद्रोऽपि वाचनार्थमगाद् गुरुम् ॥ ३० ॥
न ददौ वाचनां तस्याऽयोग्योऽसीत्यादिशन् गुरुः ।
दीक्षादिनात् प्रभृत्येषोऽप्यपराधान् व्यचिन्तयत् ॥ ३१ ॥
चिन्तयित्वा च न ह्यागः स्मरामीति जगाद च ।
कृत्वा न मन्यसे शान्तं पापमित्यवदद् गुरुः ॥ ३२ ॥
स्थूलभद्रस्ततः स्मृत्वा पपात गुरुपादयोः ।
न करिष्यामि भूयोऽदः क्षम्यतामिति चाब्रवीत् ॥ ३३ ॥
न करिष्यसि भूयस्त्वमकार्षीर्यदिदं पुनः ।
न दास्ये वाचनां तेनेत्याचार्यास्तमनूचिरे ॥ ३४ ॥
स्थूलभद्रस्ततः सर्वसंघेनामानयद् गुरुन् ।
महतां कुपितानां हि महान्तोऽलं प्रसादने ॥ ३५ ॥

तदर्थं सकलः संघः कायोत्सर्गं ददावथ ।
एत्य शासनदेव्यूचे ब्रूत कार्यं करोमि किम् ? ॥ २५ ॥
संघोऽप्येवमभाषिष्ट जिनपार्श्वमिमां नय ।
सोचे निर्विघ्नगत्यर्थं कायोत्सर्गेण तिष्ठत ॥ २६ ॥
संघे तत्प्रतिपेदाने मां साऽनैषीज्जिनान्तिके ।
ततः सीमन्धरस्वामी वन्दितो भगवान् मया ॥ २७ ॥
भरतादागताऽऽर्येयं निर्दोषेत्यवदज्जिनः ।
कृपया मन्निमित्तं च व्याचक्रे चूलिकाद्वयम् ॥ २८ ॥
ततोऽहं छिन्नसन्देहा देव्यानीता यथाश्रयम् ।
श्रीसंघस्यार्पितवती चूलिकाद्वितयं च तत् ॥ २९ ॥
इत्याख्याय स्थूलभद्रानुज्ञाता निजमाश्रयम् ।
ता ययुः स्थूलभद्रोऽपि वाचनार्थमगाद् गुरुम् ॥ ३० ॥
न ददौ वाचनां तस्याऽयोग्योऽसीत्यादिशन् गुरुः ।
दीक्षादिनात् प्रभृत्येषोऽप्यपराधान् व्यचिन्तयत् ॥ ३१ ॥
चिन्तयित्वा च न ह्यागः स्मरामीति जगाद च ।
कृत्वा न मन्यसे शान्तं पापमित्यवदद् गुरुः ॥ ३२ ॥
स्थूलभद्रस्ततः स्मृत्वा पपात गुरुपादयोः ।
न करिष्यामि भूयोऽदः क्षम्यतामिति चाब्रवीत् ॥ ३३ ॥
न करिष्यसि भूयस्त्वमकार्षीर्यदिदं पुनः ।
न दास्ये वाचनां तेनेत्याचार्यास्तमनूचिरे ॥ ३४ ॥
स्थूलभद्रस्ततः सर्वसंघेनामानयद् गुरुन् ।
महतां कुपितानां हि महान्तोऽलं प्रसादने ॥ ३५ ॥

[illegible] स्त्रीशरीराणि, [illegible] अतएव [illegible] । [illegible] हि [illegible] प्रतिदृष्टप्रविष्टा अपि [illegible] [illegible] भवन्ति, अतएव [illegible] स्तुता एव स्तुताः ॥ १३३ ॥

तथा


दिनरात्रिविपर्यासः स्त्रीशरीरस्य चेद् भवेत् ।
तदैव कामुकः कुर्याद् स्वप्रगोमायुगोपनम् ॥१३४॥

दिनरात्र्योः, तयोर्विपर्यासो विनिमयः दिनभागोऽस्याभवेत्, रात्रिभागो वा दिनः, स्त्रीशरीरस्य स्त्रीदेहस्य चेद् यदि भवेत्, तदा तदैव स्त्रीशरीरस्य कामुकः कामी स्वप्रगोमायुगोपनं स्वप्रगोमाय्वोः रक्षणं कुर्यात् । स्वप्रगोमायुरक्षणं दिवानिशं रक्षणायतनानिपातनार्थम् ; [illegible] हि दिवा प्रस्वपन्ति, गोमा-यवश्च रात्रौ । तत् स्त्रीशरीरस्य विपर्यासे नक्तंदिनं कामुको स्वप्रगोमायुरक्षणव्याकुल एव स्यात्, दूरे तत्परिभोगः ॥ १३४ ॥

तथा—

स्त्रीशस्त्रेणापि चेत् कामो जगदेतज्जिगीषति ।
तुच्छपिच्छमयं शस्त्रं किं नादत्ते स मूढधीः ?॥१३५॥

स्त्रीरूप शस्त्रं स्त्रीशस्त्रं तेन जगद्विजयार्थमुपात्तेन, अपीत्यनादरे, चेद् यदि, कामो मन्मथः, एतज्जगत् त्रैलोक्यात्मकम्, जिगीषति जेतुमिच्छति, तदा स मूढधीः कामः तुच्छं काकादीनां यत् पिच्छं तन्मयं शस्त्रं किं नादत्ते कुतो हेतोर्न गृह्णाति ? ।



तथा, इदमपि निदानत्वे चिन्तयेत् -

यो यः स्याद् बाधको दोषस्तस्य तस्य प्रतिक्रियाम् ।
चिन्तयेद् दोषमुक्तेषु प्रमोदं यतिषु व्रजन् ॥१३७॥

यो यो राग-द्वेष-क्रोध-मान-माया-लोभ-मोह-मत्सरा-ऽसूया-मदादिर्दोषो बाधकः क्लिश्यमानत्वादिकारणात्मनस्तस्य तस्य दोषस्य प्रतिक्रियां प्रतीकारं चिन्तयेत्, तथाहि— रागस्य वैराग्यम्, द्वेषस्य मैत्री, क्रोधस्य क्षमा, मानस्य मार्दवम्, मायाया आर्जवम्, लोभस्य सन्तोषः, मोहस्य विवेकः, मत्सरस्य परोत्कर्षानुमोदभावना, असूयाया अनसूयत्वम्, मदस्य परसम्पदुत्कर्षेऽपि चित्तानाबाधा च प्रतिक्रिया मता । इदं चात्मविषये नाशङ्कनीयम्, दृश्यन्ते हि बहवस्तादृशदोषपरिहारेण गुणवत्तयाऽऽत्मानं बिभ्रतः । अत एवाह— दोषमुक्तेषु यतिषु प्रमोदं व्रजन् । एवं हि दोषमुक्त-मुनिदर्शनेन प्रमोदादात्मन्यपि दोषमोक्षणम् ॥ १३७ ।

तथा—

दुःस्थां भवस्थितिं स्थेम्ना सर्वजीवेषु चिन्तयन् ।
निसर्गसुखसर्गं तेष्वपवर्गं विमार्गयेत् ॥१३८॥

दुःस्थां दुःखहेतुम्, भवस्थितिं संसारावस्थानम्, चिन्तयन् विमृशन्, सर्वजीवेषु तिर्यग्-नारका-नरा-ऽमरेषु ; तथाहि—तिरश्चां वध-बन्ध-ताडन-पारवश्य-क्षुत्-पिपासा-ऽतिभारारोपणा-ऽङ्गच्छेदादिभिः, नारकाणां च स्वाभाविक-परस्परोदीरित-परमाधार्मिक-कृततीव्रानुभावजवेदनामनुभवतां क्रकचदारण--कुम्भीपाक-कूट-

शाल्मलीमसासिपत्र-वैतरणीनरकादिभिः, नराणां च दारिद्र्यव्याधि-पारवश्यवधबन्धादिभिः, सुराणां चेर्ष्या-विषाद-विपक्षसंपद्दर्शन-मरणदुःखानुचिन्तनादिभिर्दुःस्थैव भवस्थितिः, तां स्वेम्ना स्वैरं चिन्तयंस्तेषु सर्वजीवेष्वपवर्गं मोक्षम्, किंविशिष्टम्? निसर्गसुखसर्गं निसर्गेण सुखसर्गो यत्र तम्, विमार्गयेदाशंसेत्—कथं नु नाम सर्वे संसारिणः सकलदुःखविमोक्षेण मोक्षेण संयुज्येरन्निति ॥१३८॥

इदमपि निद्राच्छेदे चिन्तयेत्—

संसर्गेऽप्युपसर्गाणां दृढव्रतपरायणाः ।
धन्यास्ते कामदेवाद्याः श्लाघ्यास्तीर्थकृतामपि ॥१३९॥

संसर्गेऽपि संबन्धेऽपि, उपसर्गाणां सुरादिकृतानाम्, दृढव्रत-परायणाः प्रतिपन्नव्रतपालनपराः, कामदेवाद्याः कामदेवप्रभृतयः, धन्या धर्मधनं लब्धारः, त इति भगवदुपासकत्वेन प्रसिद्धाः। धन्यत्वे विशेषहेतुमाह—श्लाघ्याः प्रशस्यास्तीर्थकृतां श्रीमन्महा-वीरस्य, पूजायां बहुवचनम् ।

कामदेवकथानकं च संप्रदायगम्यम् । स चायम्,—

अनुगङ्गं पतद्धंसश्रेणीभिरिव चारुभिः ।
चैत्यध्वजै राजमाना चम्पेत्यस्ति महापुरी ॥ १ ॥
भोगिभोगायतभुजस्तम्भः कुलगृहं श्रियः ।
जितशत्रुरिति नाम्ना तस्यामासीद् महीपतिः ॥ २ ॥
अभूद् गृहपतिस्तस्यां कामदेवाभिधः सुधीः ।
आश्रयोऽनेकलोकानां महातरुरिवाध्वनि ॥ ३ ॥

लक्ष्मीरिव स्थिरीभूता रूपलावण्यशालिनी।
अभूद् भद्राकृतिर्भद्रा नाम तस्य सधर्मिणी ॥ ४ ॥
निधौ षट् स्वर्णकोट्यः षड् वृद्धौ षड् व्यवहारगाः।
व्रजाः षट् चास्य दशगोसहस्रमितयोऽभवन् ॥ ५ ॥
तदा च विहरन्नुर्वीं तत्रोर्वीमुखमण्डने।
पुण्यभद्राभिधोद्याने श्रीवीरः समवासरत् ॥ ६ ॥
कामदेवोऽथ पादाभ्यां भगवन्तमुपागमत्।
शुश्राव च श्रोत्रसुधां स्वामिनो धर्मदेशनाम् ॥ ७ ॥
कामदेवस्ततो देवनरासुरगुरोः पुरः।
प्रपेदे द्वादशविधं गृहिधर्मं विशुद्धधीः ॥ ८ ॥
प्रत्याख्यात् स विना भद्रां स्त्रीर्व्रजान् षड्व्रजीं विना।
निधौ वृद्धौ व्यवहारे षट् षट् कोटीर्विना वसु ॥ ९ ॥
हलपञ्चशतीं मुक्त्वाऽत्याक्षीत् क्षेत्राण्यनांसि तु।
दिग्यात्रिकाणि वोढ़ूणि पञ्च पञ्च शतान्यृते ॥ १० ॥
दिग्यात्रिकाणि चत्वारि चत्वारि प्रवहन्ति च।
विहाय वहनान्येष प्रत्याख्यद् वहनान्यपि ॥ ११ ॥
विनैकां गन्धकाषायीं स तत्याजाङ्गमार्जनम्।
दन्तधावनमप्यार्द्रामपास्य मधुयष्टिकाम् ॥ १२ ॥
ऋते च क्षीरामलकात् फलान्यन्यानि सोऽमुचत्।
अभ्यङ्गं च विना तैले सहस्रशतपाकिमे ॥ १३ ॥
विना सुगन्धिगन्धाढ्यमुद्वर्तनकमत्यजत्।
विनाष्टावौष्ट्रिकानम्भःकुम्भान् मज्जनकर्म च ॥ १४ ॥

शाल्मलीममाश्लेष-वैतरणीतरणादिभिः, नराणां च दारिद्र्यव्याधि-पारवश्यवधबन्धादिभिः, सुराणां चेर्ष्या-विषाद-विपक्षसंपद्दर्शन-मरणदुःखानुचिन्तनादिभिर्दुःखैव भवस्थितिः, तां खेत्ता स्थैर्येण चिन्तयंस्तेषु सर्वजीवेष्वपवर्गं मोक्षम्, किंविशिष्टम्? निसर्गसुखसर्गं निसर्गेण सुखससर्गो यत्र तम्, विमार्गयेदाशंसेत्—कथं नु नाम सर्वे संसारिणः सकलदुःखविमोक्षेण मोक्षेण संयुज्येरन्निति ॥१३८॥

इदमपि निद्राच्छेदे चिन्तयेत्—

संसर्गेऽप्युपसर्गाणां दृढव्रतपरायणाः ।
धन्यास्ते कामदेवाद्याः श्लाघ्यास्तीर्थकृतामपि ॥१३९॥

संसर्गेऽपि संबन्धेऽपि, उपसर्गाणां सुरादिकृतानाम्, दृढव्रत-परायणाः प्रतिपन्नव्रतपालनपराः, कामदेवाद्याः कामदेवप्रभृतयः, धन्या धर्मधनं लब्धारः, त इति भगवदुपासकत्वेन प्रसिद्धाः। धन्यत्वे विशेषहेतुमाह—श्लाघ्याः प्रशस्यास्तीर्थकृतां श्रीमन्महा-वीरस्य, पूजायां बहुवचनम् ।

कामदेवकथानकं च संप्रदायगम्यम् । स चायम्,—

अनुगङ्गं पतद्धंसश्रेणीभिरिव चारुभिः ।
चैत्यध्वजै राजमाना चम्पेत्यस्ति महापुरी ॥ १ ॥
भोगिभोगायतभुजस्तम्भः कुलगृहं श्रियः ।
जितशत्रुरिति नाम्ना तस्यामासीद् महीपतिः ॥ २ ॥
अभूद् गृहपतिस्तस्यां कामदेवाभिधः सुधीः ।
आश्रयोऽनेकलोकानां महातरुरिवाध्वनि ॥ ३ ॥

लक्ष्मीरिव स्थिरीभूता रूपलावण्यशालिनी।
अभूद् भद्राकृतिर्भद्रा नाम तस्य सधर्मिणी ॥ ४ ॥
निधौ षट् स्वर्णकोट्यः षड् वृद्धौ षड् व्यवहारगाः।
व्रजाः षट् चास्य दशगोसहस्रमितयोऽभवन् ॥ ५ ॥
तदा च विहरन्नुर्वीं तत्रोर्वीमुखमण्डने।
पूर्णभद्राभिधोद्याने श्रीवीरः समवासरत् ॥ ६ ॥
कामदेवोऽथ पादाभ्यां भगवन्तमुपागमत्।
शुश्राव च श्रोतसुधां स्वामिनो धर्मदेशनाम् ॥ ७ ॥
कामदेवस्ततो देवनरासुरगुरोः पुरः।
प्रपेदे द्वादशविधं गृहिधर्मं विशुद्धधीः ॥ ८ ॥
प्रत्याख्यात् स विना भद्रां स्त्रीर्व्रजान् षड्व्रजीं विना।
निधौ वृद्धौ व्यवहारे षट् षट् कोटीर्विना वसु ॥ ९ ॥
हलपञ्चशतीं मुक्त्वाऽत्याक्षीत् क्षेत्राण्यनांसि तु।
दिग्यात्रिकाणि वोढॄणि पञ्च पञ्च शतान्यृते ॥ १० ॥
दिग्यात्रिकाणि चत्वारि चत्वारि प्रवहन्ति च।
विहाय वहनान्येष प्रत्याख्यद् वहनान्यपि ॥ ११ ॥
विनैकां गन्धकाषायीं स तत्याजाङ्गमार्जनम्।
दन्तधावनमप्यार्द्रामपास्य मधुयष्टिकाम् ॥ १२ ॥
ऋते च क्षीरामलकात् फलान्यन्यानि सोऽमुचत्।
अभ्यङ्गं च विना तैलं सहस्रशतपाकिमं ॥ १३ ॥
विना सुगन्धिगन्धाढ्यमुद्वर्तनकमत्यजत्।
विनाष्टावौष्ट्रिकानम्भःकुम्भान् मज्जनकर्म च ॥ १४ ॥

ऋते च क्षौमयुगलाद् वस्त्रं सर्वमवर्जयत् ।
चन्दनागुरुघुसृणान्यपास्यान्यद् विलेपनम् ॥ १५ ॥
जातीस्रजं च पद्मं च विना कुसुममत्यजत् ।
कर्णिकां नाममुद्रां च विहायाभरणान्यपि ॥ १६ ॥
तुरुष्कागुरुधूपेभ्य ऋते धूपविधिं जहौ ।
घृतपूरात् खण्डखाद्यादन्यद् भक्ष्यमवर्जयत् ॥ १७ ॥
काष्ठपेयां विना पेयामोदनं कलमं विना ।
माषमुद्गकलायेभ्य ऋते सूपं च सोऽमुचत् ॥ १८ ॥
तत्याज च घृतं सर्वमृते शारदगोघृतात् ।
शाकं स्वस्तिकमण्डूक्याः पलङ्क्याश्चापरं जहौ ॥ १९ ॥
अन्यत् स्नेहाम्लदाल्यम्लात् तीमनं वारि खाशमः ।
जहौ सुगन्धिताम्बूलाद् मुखवासमथापरम् ॥ २० ॥
ततः प्रभुं स वन्दित्वा ययौ निजनिकेतनम् ।
तद्भार्याप्येत्य जग्राह स्वाम्यग्रे श्रावकव्रतम् ॥ २१ ॥
कुटुम्बभारमारोप्य ज्येष्ठपुत्रे ततः स्वयम् ।
तस्थौ पौषधशालायामप्रमादो व्रतेषु सः ॥ २२ ॥
[illegible] निशाथे [illegible] ।
[illegible] मिथ्यादृष्टिः कोऽप्यागतो सुर ॥ २३ ॥
[illegible] कर्मणः [illegible] ।
[illegible] ॥ २४ ॥
[illegible] ।
[illegible] ॥ २५ ॥

[illegible] ।
[illegible] ॥ ५६ ॥
[illegible] ।
[illegible] ॥ ५७ ॥
[illegible] ।
[illegible] ॥ ५८ ॥
[illegible] ।
[illegible] ॥ ५९ ॥
[illegible] ।
[illegible] ॥ ६० ॥
[illegible] ।
[illegible] च पन्नगान् ॥ ६१ ॥
[illegible] ।
[illegible] जगाद सः ॥ ६२ ॥
[illegible] ! रे ! किमारब्धमिदं त्वया ।
किं स्वर्गमपवर्गं वा वराक ! त्वमपेक्ष्यसि ? ॥ ६३ ॥
मुञ्चारब्धमिदं नो चेदनेन निशितासिना ।
तरोरिव फलं स्कन्धात् पातयिष्यामि ते शिरः ॥ ६४ ॥
तर्जयत्यपि तथैवं समाधेर्न चचाल सः ।
शरभः गैरिभारावैः किं क्षुभ्यति कदाचन ? ॥ ६५ ॥
वासुदेवः शुभध्यानाद् न चचाल यदा तदा ।
व्याजहार तथैवायं द्विस्त्रिस्त्रिदशपांसनः ॥ ६६ ॥

ऋते च क्षौमयुगलाद् वस्त्रं सर्वमवर्जयत् ।
चन्दनागुरुघुसृणान्यपास्यान्यद् विलेपनम् ॥ १५ ॥
जातीस्रजं च पद्मं च विना कुसुममत्यजत् ।
कर्णिकां नाममुद्रां च विहायाभरणान्यपि ॥ १६ ॥
तुरुष्कागुरुधूपेभ्य ऋते धूपविधिं जहौ ।
घृतपूरात् खण्डखाद्यादन्यद् भक्ष्यमवर्जयत् ॥ १७ ॥
काष्ठपेयां विना पेयामोदनं कलमं विना ।
मासमुद्गकलायेभ्य ऋते सूपं च सोऽमुचत् ॥ १८ ॥
तत्याज च घृतं सर्वमृते शारदगोघृतात् ।
शाकं स्वस्तिकमण्डूक्याः पल्लङ्काच्चापरं जहौ ॥ १९ ॥
अन्यत् स्नेहाम्लदाल्यम्लात् तीमनं वारि खाम्भसः ।
जहौ सुगन्धिताम्बूलाद् मुखवासमथापरम् ॥ २० ॥
ततः प्रभुं स वन्दित्वा ययौ निजनिकेतनम् ।
तद्भार्याप्येत्य जग्राह स्वाम्यग्रे श्रावकव्रतम् ॥ २१ ॥
कुटुम्बभारमारोप्य ज्येष्ठपुत्रे ततः स्वयम् ।
तस्थौ पौषधशालायामप्रमादी व्रतेषु सः ॥ २२ ॥
तस्योपस्थस्य तत्राथ निशीथे क्षोभहेतवे ।
पिशाचरूपभृद् मिथ्यादृष्टिः कोऽप्याययौ सुरः ॥ २३ ॥
शिरोरुहाः शिरस्यस्य कर्कशाः कपिशत्विषः ।
चकासामासुरापक्वाः केदारा इव शालयः ॥ २४ ॥
भ्राष्ट्रभित्तिनिभं भालं वभ्रुपुच्छोपमे भ्रुवौ ।
कर्णौ शूर्पाकृती युग्मचुल्लीतुल्या च नासिका ॥ २५ ॥

ततोऽप्यभीतं तं वीक्ष्य शुण्डादण्डेन सोऽग्रहीत् ।
व्योम्न्युल्लालयामास प्रतीयेष च पूलवत् ॥ ४७ ॥
दन्तयामास दन्ताभ्यां पादन्यासैर्ममर्द च ।
धर्मकर्मविरुद्धानां किमकृत्यं दुरात्मनाम् ? ॥ ४८ ॥
अधिसेहे च तत् सर्वं कामदेवो महामनाः ।
मनागपि च न स्थैर्यं जहौ गिरिरिव स्थिरः ॥ ४९ ॥
तस्मिन्नप्रचलिते ध्यानादीदृशेनापि कर्मणा ।
सदर्पः सर्परूपं स विदधे विबुधाधमः ॥ ५० ॥
देवः पूर्ववदेवोचे स तं भापयितुं ततः ।
कामदेवस्तु नाभैषीद् ध्यानसंवर्मितः सुधीः ॥ ५१ ॥
भूयो भूयस्तथोक्त्वा तं निर्भीकं प्रेक्ष्य दुःसुरः ।
आतोद्यमिव वध्रेण स्वभोगेनाभ्यवेष्टयत् ॥ ५२ ॥
निःशूकमिव दशनैर्दन्दशूको ददंश तम् ।
स तु ध्यानसुधामग्नो न तद्बाधामजीगणत् ॥ ५३ ॥
दिव्यरूपं ततः कृत्वा द्युतिद्योतितदिङ्मुखम् ।
सुरः पौषधशालायां विवेशैवमुवाच च ॥ ५४ ॥
धन्योऽसि कामदेव ! त्वं देवराजेन संसदि ।
प्रशंसाऽकारि भवतोऽसहिष्णुस्तामिहागमम् ॥ ५५ ॥
प्रभवः प्राभवेणापि वर्णयन्ति ह्यवस्त्वपि ।
अतः परीक्षितोऽसि त्वं नानारूपभृता मया ॥ ५६ ॥
त्वां यथाऽवर्णयच्छक्रस्तथैवासि न संशयः ।
क्षम्यतामपराधो मे परीक्षणभवस्त्वया ॥ ५७ ॥

ततोऽप्यभीतं तं प्रेक्ष्य शुण्डादण्डेन सोऽग्रहीत् ।
व्योमन्युच्छालयामास प्रतीयेष च पूलवत् ॥ ४७ ॥
दलयामास दन्ताभ्यां पादन्यासैर्ममर्द च ।
धर्मकर्मविरुद्धानां किमकृत्यं दुरात्मनाम् ? ॥ ४८ ॥
अधिसेहे च तत् सर्वं कामदेवो महामनाः ।
मनागपि च न स्थैर्यं जहौ गिरिरिव स्थिरः ॥ ४९ ॥
तस्मिन्नचलिते ध्यानादीदृशेनापि कर्मणा ।
सदर्पः सर्परूपं स विदधे विबुधाधमः ॥ ५० ॥
देवः पूर्ववदेवोचे स तं भापयितुं ततः ।
कामदेवस्तु नाभैषीद् ध्यानसंवर्मितः सुधीः ॥ ५१ ॥
भूयो भूयस्तथोक्त्वा तं निर्भीकं प्रेक्ष्य दुःसुरः ।
आतोद्यमिव वध्रेण स्वभोगेनाभ्यवेष्टयत् ॥ ५२ ॥
निःशूकमेव दशनैर्दंदशूको ददंश तम् ।
स तु ध्यानसुधामग्नो न तद्बाधामजीगणत् ॥ ५३ ॥
दिव्यरूपं ततः कृत्वा द्युतिद्योतितदिङ्मुखम् ।
सुरः पौषधशालायां विवेशैवमुवाच च ॥ ५४ ॥
धन्योऽसि कामदेव ! त्वं देवराजेन संसदि ।
प्रशंसाऽकारि भवतोऽसहिष्णुस्तामिहागमम् ॥ ५५ ॥
प्रभवः प्राभवेणापि वर्णयन्ति ह्यवस्त्वपि ।
अतः परीक्षितोऽसि त्वं नानारूपभृता मया ॥ ५६ ॥
त्वां यथाऽवर्णयच्छक्रस्तथैवासि न संशयः ।
क्षम्यतामपराधो मे परीक्षणभवस्त्वया ॥ ५७ ॥

प्रययावभिधायैवं स देवो देवसद्मनि ।
कामदेवोऽपि शुद्धात्मा प्रतिमां तामपारयत् ॥ ५८ ॥
उपसर्गसहिष्णुं तमश्लाघिष्ट स्वयं प्रभुः ।
सभायां भगवान् वीरो गुरवो गुणवत्सलाः ॥ ५९ ॥
कामदेवो द्वितीयस्मिन्नह्नि पारितपोषधः ।
त्रिजगत्स्वामिनः पादवन्दनार्थमथागमत् ॥ ६० ॥
जगद्गुरुरभाषिष्ट गौतमप्रभृतीनिति ।
गृहिधर्मेऽप्यसावेवमुपसर्गान् विसोढवान् ॥ ६१ ॥
सर्वसङ्गपरित्यागाद् यतिधर्मपरायणैः ।
तद्विशेषेण सोढव्या उपसर्गा भवादृशैः ॥ ६२ ॥
कर्मनिर्मूलनोपायान् श्रावकप्रतिमास्ततः ।
एकादशापि शिश्राय कामदेवः क्रमेण ताः ॥ ६३ ॥
सोऽथ संलेखनां कृत्वा प्रपेदेऽनशनव्रतम् ।
परं समाधिमापन्नः कालधर्ममुपाययौ ॥ ६४ ॥
सोऽरुणाभे विमानेऽभूत् चतुष्पल्यस्थितिः सुरः ।
च्युत्वा ततो विदेहेषूत्पद्य सिद्धिं व्रजिष्यति ॥ ६५ ॥

यथोपसर्गेऽपि निसर्गधैर्यात्
स कामदेवो व्रततत्परः सन् ।
श्लाघ्योऽभवत् तीर्थकृतां तथाऽन्ये-
ऽप्येवंविधा धन्यतमाः पुमांसः ॥ ६६॥१३८ ॥

॥ इति कामदेवकथानकं संपूर्णम् ॥

इदमपि निद्राच्छेदे चिन्तयेत्—

जिनो देवः कृपा धर्मो गुरवो यत्र साधवः।
श्रावकत्वाय कस्तस्मै न श्लाघेताविमूढधीः? ॥१४०॥

श्रावका उक्तनिर्वचनास्तेषां भावः श्रावकत्वं तस्मै श्रावकत्वाय को न श्लाघेत?—सर्वः श्लाघेतैव, मुक्त्वा मोहमूढान्। अत एवाह—अविमूढधीः; मूढबुद्धीनां ह्यतत्त्वदर्शिनां तैमिरिकाणामिव चन्द्रद्वितय-ग्रहणप्रीतिमदर्शिनां मा भूत् श्रावकत्वाय श्लाघा, अमूढबुद्धयस्तु तत्त्वदर्शित्वात् श्लाघन्त एव। तस्मै इति, तत्संबन्धिनं यच्छब्दमाह—यत्र श्रावकत्वे जिनो रागादिदोषजेता देवः पूज्यो न तु रागादिमान्, कृपा दुःखितदुःखप्रहाणेच्छा, धर्मोऽनुष्ठेयरूपो न तु हिंसात्मको यागादिः, साधवः पञ्चमहाव्रतरताः, गुरवो धर्मोपदेष्टारो न तु परिग्रहारम्भसक्ताः॥ १४०॥

तथा, निद्राच्छेदे तांस्तान् मनोरथान् सप्तभिः श्लोकैराह—

जिनधर्मविनिर्मुक्तो मा भूवं चक्रवर्त्यपि।
स्यां चेटोऽपि दरिद्रोऽपि जिनधर्माधिवासितः॥१४१॥

जिनधर्मेण ज्ञान-दर्शन-चारित्ररूपेण विनिर्मुक्तो रहितश्चक्रवर्त्यपि सार्वभौमोऽपि मा भूवं मा जनिषि, तस्य नरकमूलत्वात्; किन्तु स्यां भवेयं चेटोऽपि दासोऽपि दरिद्रोऽपि दुःस्थितोऽपि, कथंभूतः? जिनधर्मेणोक्तस्वरूपेणाधिवासितः॥ १४१॥

तथा—

त्यजन् दुःशीलसंसर्गं गुरुपादरजः स्पृशन् ।
कदाहं योगमभ्यस्यन् प्रभवेयं भवच्छिदे ॥ १४३ ॥

दुःशीला लौकिका लोकोत्तराश्च । तत्र लौकिका दुःशीला विट-भट-भण्ड गणिकादयः, लोकोत्तरास्तु पार्श्वस्थावसन्नकुशील-संसक्तयथाच्छन्दास्तैः संसर्गं संवासादिरूपं, त्यजन् परिहरन् । न च तन्मात्रेण भवतीत्याह—गुरुपादरजः स्पृशन् । अनेन सत्-संसर्गमाह । न चैतावताप्यलमित्याह—योगमभ्यस्यन् योगो रत्नत्रयं ध्यानं वा तमभ्यस्यन् पुनः पुनः परिशीलयन् कदाहं प्रभवेयं प्रभविष्यामि । कस्मै ? भवच्छिदे संसारोच्छेदाय ॥१४३॥

तथा—

महानिशायां प्रकृते कायोत्सर्गे पुराद् बहिः ।
स्तम्भवत् स्कन्धकषणं [1]वृषाः कुर्युः कदा मयि ॥१४४॥

महानिशायां निशीथे, कायोत्सर्गे प्रकृते प्रारब्धे पुराद् बहिर्नगराद् बाह्यप्रदेशे स्तम्भ इव स्तम्भवद् मयि स्कन्धकषणं स्कन्धकण्डूयनं कदा वृषा उत्सृष्टपशवः कुर्युः करिष्यन्ति । इदं च प्रतिमाप्रतिपन्नश्रावकविषयम्, तस्यैव पुराद् बहिष्कृतकायोत्सर्गस्य शिलास्तम्भभ्रान्त्या वृषभैः स्कन्धकषणसंभवः ; प्रेक्षितयत्यवस्थापेक्षं वा, यतीनां जिनकल्पिकादीनां सर्वदा कायोत्सर्गसंभवात् ॥१४४॥

---

(१) छ कदा कुर्युर्वृषा म ।

तथा—

त्यजन् दुःशीलसंसर्गं गुरुपादरजः स्पृशन्।
कदाहं योगमभ्यस्यन् प्रभवेयं भवच्छिदे ॥ १४३ ॥

दुःशीला लौकिका लोकोत्तराश्च। तत्र लौकिका दुःशीला विट-भट-भण्ड गणिकादयः, लोकोत्तरास्तु पार्श्वस्थावसन्नकुशील-संसक्तयथाच्छन्दास्तैः संसर्गं संवासादिरूपं, त्यजन् परिहरन्। न च तन्मात्रेण भवतीत्याह—गुरुपादरजः स्पृशन्। अनेन सत्-संसर्गमाह। न चैतावताप्यलमित्याह—योगमभ्यस्यन् योगो रत्नत्रयं ध्यानं वा तमभ्यस्यन् पुनः पुनः परिशीलयन् कदाहं प्रभवेयं प्रभविष्यामि। कस्मै? भवच्छिदे संसारोच्छेदाय ॥१४३॥

तथा—

महानिशायां प्रकृते कायोत्सर्गे पुराद् बहिः।
स्तम्भवत् स्कन्धकषणं [1]वृषाः कुर्युः कदा मयि ॥१४४॥

महानिशायां निशीथे, कायोत्सर्गे प्रकृते प्रारब्धे पुराद् बहिर्नगराद् बाह्यप्रदेशे स्तम्भ इव स्तम्भवद् मयि स्कन्धकषणं स्कन्धकण्डूयनं कदा वृषा उत्कृष्टपशवः कुर्युः करिष्यन्ति। इदं च प्रतिमाप्रतिपन्नश्रावकविषयम्, तस्यैव पुराद् बहिष्कृतकायोत्सर्गस्य शिलास्तम्भभ्रान्त्या वृषभैः स्कन्धकषणसंभवः; प्रेषितयत्यवस्थापेक्षं वा, यतीनां जिनकल्पिकादीनां सर्वदा कायोत्सर्गसंभवात् ॥१४४॥

---

(१) ख कदा कुर्युर्वृषा म।

तथा—

त्यक्तसङ्गो जीर्णवासा मलक्लिन्नकलेवरः ।

भजन् माधुकरीं वृत्तिं मुनिचर्यां कदा श्रये ? ॥१४२॥

त्यक्ता गृहगृहिणीप्रभृतयः सङ्गा येन स त्यक्तसङ्गः, जीर्णं जरद् वासो यस्य स जीर्णवासाः, मलेन क्लिन्नं कलेवरं यस्य स मलक्लिन्नकलेवरः, मधुकरस्येयं माधुकरी माधुकरीव माधुकरी वृत्तिर्भिक्षा तां भजन् सेवमानः, यदाहुः ;—

[1]जहा दुमस्स पुप्फेसु भमरो आविअइ रसं ।
न य पुप्फं किलामेइ सो य पीणेइ अप्पयं ॥ १ ॥
एमेए समणा मुत्ता जे लोए संति साहुणो ।
विहंगमा व पुप्फेसु दानभत्तेसणे रया ॥ २ ॥
वयं च विक्तिं लब्भामो न य कोवुवहम्मइ ।
अहागडेसु रीयंते पुप्फेसु भमरा जहा ॥ ३ ॥

मुनीनां चर्या मूलगुणोत्तरगुणरूपा तां कदा कर्हि श्रये श्रयिष्यामि, कदाकर्ह्योर्नवा ॥ ५ । ३ । ८ ॥ इति वर्तमाना वर्तमाना ॥ १४२ ॥

---

(१) यथा द्रुमस्य पुष्पेषु भ्रमर आपिबति रसम् ।
न च पुष्पं क्लमयति स च प्रीणात्यात्मानम् ॥ १ ॥
एवमेते श्रमणा मुक्ता ये लोके सन्ति साधवः ।
विहङ्गमा इव पुष्पेषु दानभक्तैषणे रताः ॥ २ ॥
वयं च वृत्तिं लप्स्यामो न च कोऽप्युपहन्यते ।
यथाकृतेषु रीयन्ते पुष्पेषु भ्रमरा यथा ॥ ३ ॥

एते च मनोरथाः क्रमेणोत्तरोत्तरप्रकर्षवन्तः, तथाहि—प्रथमे श्लोके जिनधर्मानुरागमनोरथः, द्वितीये तु यतिधर्मपरिग्रह-मनोरथः, तृतीये तु यतिचर्याकाष्ठाधिरोहणमनोरथः, चतुर्थे तु कायोत्सर्गादिमनोरथः, पञ्चमे तु गिरि-गुहाद्यवस्थितमुनिचर्या-मनोरथः, षष्ठे तु परमसामायिकपरिपाकमनोरथः ॥१४६॥

इदानीमुपसंहरति—

अधिरोढुं गुणश्रेणिं निःश्रेणीं मुक्तिवेश्मनः ।
परानन्दलताकन्दान् कुर्यादिति मनोरथान् ॥१४७॥

अधिरोढुमारोढुं गुणश्रेणिमुत्तरोत्तरगुणस्थानरूपाम्, किं-विशिष्टाम्? निःश्रेणीमिव निःश्रेणीम्, कस्य? मुक्तिलक्षणस्य वेश्मनो मन्दिरस्य, कुर्यात् विदध्यात्, इति श्लोकषट्कोक्तान् मनोरथान्, किंविशिष्टान्? परानन्दलताकन्दान् परश्चासा-वानन्दश्च स एव लता तस्याः कन्दान् कन्दभूतान्। यथा हि कन्दाल्लता प्रभवति तथैतेभ्योऽपि मनोरथेभ्यः परो य आनन्दः परमसामायिकरूपः स प्रभवति। सप्तभिः कुलकम् ॥१४७॥

अथोपसंहरति—

इत्याहोरात्रिकीं चर्यामप्रमत्तः समाचरन् ।
यथावदुक्तवृत्तस्थो गृहस्थोऽपि विशुध्यति ॥१४८॥

इति पूर्वोक्तक्रमेण, अहोरात्रे भवामाहोरात्रिकीं चर्यां समा-चाररूपामप्रमत्तः प्रमादरहितः समाचरन् सम्यक् कुर्वन्, उक्तं

तृतीयः प्रकाशः ।

एकादश मासान् लक्ष्मद्रौ रजोहरणादिमुनिवेष
कृतलोचादिः स्वाश्रयेषु गोकुलादिषु वसन् प्रतिम
श्रमणोपासकाय 'भिक्षां दत्त' इति वदन् धर्मलाभम
इति सुसाधुवत् समाचरत्येकादशी । उक्तं हि :—

'दंसणपडिमा नेया सम्मत्तजुयस्स जा इहं बुंदी
कुग्गहकलंकरहिया मिच्छत्तखओवसमभावा ॥
बीया पडिमा नेया सुद्धाणुव्वयधारणं ।
सामाइयपडिमाओ सुद्धं सामाइयं चिय ॥ २ ॥
अट्ठमीमाइपव्वेसु सम्मं पोसहपालणं ।
सेसाणुट्ठाणजुत्तस्स चउत्थी पडिमा इमा ॥ ३ ॥
निक्कंपो काउस्सग्गं तु पुव्वुत्तगुणसंजुओ ।
करेइ पव्वराईसु पंचमिं पडिवन्नओ ॥ ४ ॥
छट्ठीए बंभयारी सो फासुआहार सत्तमी ।
वज्जे सावज्जमारंभं अट्ठमिं पडिवन्नओ ॥ ५ ॥

(१) दर्शनप्रतिमा ज्ञेया सम्यक्त्वयुतस्य येह तनुः ।
कुग्रहकलङ्करहिता मिथ्यात्वक्षयोपशमभावात् ॥ १ ॥
द्वितीया प्रतिमा ज्ञेया शुद्धाणुव्रतपालनम् ।
सामायिकप्रतिमातः शुद्धं सामायिकमपि च ॥ २ ॥
अष्टम्यादिपर्वसु सम्यक् पौषधपालनम् ।
शेषानुष्ठानयुक्तस्य चतुर्थी प्रतिमेयम् ॥ ३ ॥
निष्कम्पः कायोत्सर्गं तु पूर्वोक्तगुणसंयुतः ।
करोति पर्वरात्रिषु पञ्चमीं प्रतिपन्नकः ॥ ४ ॥
षष्ठ्यां ब्रह्मचारी स प्रासुकाहारः सप्तम्याम् ।

[illegible]

दशम्यां पुनरुद्दिष्टं प्रासुकमपि न भुञ्जीत ॥ ६ ॥

एकादश्यां निस्सङ्गो धरेल्लिङ्गं प्रतिग्रहम् ।

कृतलोचः सुसाधुरिव पूर्वोक्तगुणसादरः ॥७॥ इति ॥१४८॥

इदानीं पञ्चभिः श्लोकैर्निगमयति—

सोऽथावश्यकयोगानां भङ्गे मृत्योरथागमे ।
कृत्वा संलेखनामादौ प्रतिपद्य च संयमम् ॥१४९॥
जन्मदीक्षाज्ञानमोक्षस्थानेषु श्रीमदर्हताम् ।
तदभावे गृहेऽरण्ये स्थण्डिले जन्तुवर्जिते ॥१५०॥
त्यक्त्वा चतुर्विधाहारं नमस्कारपरायणः ।
आराधनां विधायोच्चैश्चतुःशरणमाश्रितः ॥१५१॥
इहलोके परलोके जीविते मरणे तथा ।
त्यक्त्वाशंसां निदानं च समाधिसुधयोक्षितः ॥१५२॥
परीषहोपसर्गेभ्यो निर्भीको जिनभक्तिभाक् ।
प्रतिपद्येत मरणमानन्दः श्रावको यथा ॥१५३॥

व्याख्या—स श्रावकः, अथानन्तरम्, आवश्यका अवश्य-

---

(१) अपरेणाप्यारम्भं नवम्यां नो कारयेत् ।
दशम्यां पुनरुद्दिष्टं प्रासुकमपि न भुञ्जीत ॥ ६ ॥
एकादश्यां निस्सङ्गो धरेल्लिङ्गं प्रतिग्रहम् ।
कृतलोचः सुसाधुरिव पूर्वोक्तगुणसादरः ॥ ७ ॥

पर्यन्ते हि योगाः संयमव्यापारास्तेषां भङ्गे कर्तुमशक्ताविच्छेदं कारणम् , स च द्वितीय-कल्पोपागमे मृत्युसमये संप्राप्ते, संलिख्यते तनूक्रियते शरीरं कषायाश्चानयेति संलेखना, तत्र शरीरसंलेखना क्रमेण क्रमेण भोजनत्यागः, कषायसंलेखना तु क्रोधादिकषाय-परिहारः । तत्र प्रथमायाः कारणमिदम्,—

[1]देहम्मि असंलिहिए सहसा धाऊहिं खिज्जमाणेहिं ।
जायइ अट्टज्झाणं सरीरिणो चरमकालम्मि ॥ १ ॥

द्वितीयायाः पुन[2]रिदम् :—

[3]न ते एयं पसंसामि किसं साहु सरीरयं ।
किंस ते अंगुली भग्गा भावं संलिह मा तुर ! ॥ १ ॥

इत्यादिना प्रबन्धेनोक्तम् । संयमं च यथौचित्येन प्रतिपद्यते । तत्रेयं सामाचारी ;—श्रावकः चिरं सकलस्य श्रावकधर्म-स्योद्यापनार्थमिवान्ते संयमं प्रतिपद्यते तस्य साधुधर्मेणपभूतैव संलेखना, यदाह ;—[4]संलेहणा उ अंते न निओगा जेण पव्वअइ कोई । ततो यः संयमं प्रतिपद्यते स संयमानन्तरं काले संलेखनां कृत्वा मरणं प्रतिपद्यते ; यस्तु न संयमं प्रतिपद्यते तं प्रति सकलो ग्रन्थः 'आनन्दश्रावको यथा' इतिपर्यन्तः संबध्यते ॥१४९॥ .

---

(१) देहेऽसंलिखिते सहसा धातुभिः खिद्यमानैः ।
जायते चार्तध्यानं शरीरिणश्चरमकाले ॥ १ ॥

(२) ग ङ घ -न' ।

(३) न ते एतत् प्रशंसामि कृशं साधो ! शरीरकम् ।
कस्मात् तेऽङ्गुलिर्भग्ना भावं संलिख मा त्वरस्व ॥ १ ॥

(४) संलेखना त्वन्ते न नियोगाद् येन प्रव्रजति कोऽपि ।

अवरेणावि आरंभं नवमी नो करावए ।
दसमीए पुणोद्दिट्ठं फासुअं पि न भुंजए ॥ ६ ॥
एक्कारसीइ निस्संगो धरे लिंगं पडिग्गहं ।
कयलोओ सुसाहु व्व पुव्वुत्तगुणसायरो ॥७॥ इति ॥१४८॥

इदानीं पञ्चभिः श्लोकैर्विधिशेषमाह—

सोऽथावश्यकयोगानां भङ्गे मृत्योरथागमे ।
कृत्वा संलेखनामादौ प्रतिपद्य च संयमम् ॥१४९॥
जन्मदीक्षाज्ञानमोक्षस्थानेषु श्रीमदर्हताम् ।
तदभावे गृहेऽरण्ये स्थण्डिले जन्तुवर्जिते ॥१५०॥
त्यक्त्वा चतुर्विधाहारं नमस्कारपरायणः ।
आराधनां विधायोच्चैश्चतुःशरणमाश्रितः ॥१५१॥
इहलोके परलोके जीविते मरणे तथा ।
त्यक्त्वाशंसां निदानं च समाधिसुधयोक्षितः ॥१५२॥
परीषहोपसर्गेभ्यो निर्भीको जिनभक्तिभाक् ।
प्रतिपद्येत मरणमानन्दः श्रावको यथा ॥१५३॥

[illegible]

[illegible]
[illegible]
[illegible]
[illegible]

[illegible]

[illegible] ॥ १ ॥

[illegible]

[illegible] ॥ २ ॥

[illegible] संयमं प्रतिपद्यन्ते [illegible] ; यत्तु न संयमं प्रतिपद्यन्ते [illegible] ॥ १४८ ॥

(१) [illegible] ॥ १ ॥

(२) [illegible]

(३) [illegible] ॥ २ ॥

(४) [illegible]

अवरेणावि आरंभं नवमीए नो करावए ।
दसमीए पुणुद्दिट्ठं फासुयं पि न भुंजए ॥ ६ ॥
एक्कारसीइ निस्संगो धरे लिंगं पडिग्गहं ।
कयलोचो सुसाहु व्व पुव्वुत्तगुणगायरो ॥ ७ ॥ इति ॥१४८॥

इदानीं पञ्चभिः श्लोकैर्विधिमुपमाह—

सोऽथावश्यकयोगानां भङ्गे मृत्योरथागमे ।
कृत्वा संलेखनामादौ प्रतिपद्य च संयमम् ॥१४९॥
जन्मदीक्षाज्ञानमोक्षस्थानेषु श्रीमदर्हताम् ।
तदभावे गृहेऽरण्ये स्थण्डिले जन्तुवर्जिते ॥१५०॥
त्यक्त्वा चतुर्विधाहारं नमस्कारपरायणः ।
आराधनां विधायोच्चैश्चतुःशरणमाश्रितः ॥१५१॥
इहलोके परलोके जीविते मरणे तथा ।
त्यक्त्वाशंसां निदानं च समाधिसुधयोक्षितः ॥१५२॥
परीषहोपसर्गेभ्यो निर्भीको जिनभक्तिभाक् ।
प्रतिपद्येत मरणमानन्दः श्रावको यथा ॥१५३॥

व्याख्या—स श्रावकः, अथानन्तरम्, आवश्यका अवश्य-

---

(१) अपरेणाप्यारम्भं नवम्यां नो कारयेत् ।
दशम्यां पुनरुद्दिष्टं प्रासुकमपि न भुञ्जीत ॥ ६ ॥
एकादश्यां निस्सङ्गो धरेल्लिङ्गं प्रतिग्रहम् ।
कृतलोचः सुसाधुरिव पूर्वोक्तगुणसादरः ॥ ७ ॥

[1]आमलयम्मि पासो वीरजिणिंदो अ नायसंडम्मि ।
अवसेसा निक्खंता सहसंबवणम्मि उज्जाणे ॥ २ ॥

ज्ञानस्थानानि ;—

[2]उसभस्स पुरिमताले वीरस्सोज्जुवालिआनईतीरे ।
सेसाण केवलाइं जेसुज्जाणेसु पव्वइआ ॥ १ ॥

मोक्षस्थानानि ;—

[3]अट्ठावयचंपोज्जिलपावासंमेअसेलसिहरेसु ।
उसभ-वसुपुज्ज-नेमी वीरो सेसा य सिद्धिगया ॥ १ ॥

तदभावे जन्म-दीक्षा-ज्ञान-मोक्षस्थानप्राप्त्यभावे गृहे यतिवसत्यादौ, अरण्ये शत्रुञ्जयादिषु सिद्धिक्षेत्रेषु, तेष्वपि भुवं निरीक्ष्य प्रमृज्य च जन्तुविवर्जिते स्थण्डिले, इदं च जन्मादिस्थानेष्वपि द्रष्टव्यम् ॥१५०॥ त्यक्त्वा परित्यज्य चतुर्विधाहारमशन-पान-खाद्य-स्वाद्यरूपम्, नमस्कारः पञ्चपरमेष्ठिस्तवः, तत्परायणस्तदनुस्मरणपरः, आराधना ज्ञानाद्याराधना तामतिचारपरिहारेण विधाय चतुर्णामर्हत्-सिद्ध-साधु-धर्माणां शरणं तेषु स्वात्मसमर्पणं चतुः-

---

(१) आमलकपदे पार्श्वो वीरजिनेन्द्रश्च ज्ञातषण्डे ।
अवशेषा निष्क्रान्ता सहस्राम्रवण उद्याने ॥ २ ॥

(२) ऋषभस्य पुरिमताले वीरस्यर्जुबालिकानदीतीरे ।
शेषाणां केवलानि येषूद्यानेषु प्रव्रजिताः ॥ १ ॥

(३) अष्टापद-चम्पोज्जयन्तपापासंमेतशैलशिखरेषु ।
ऋषभ-वासुपूज्य-नेमयो वीरः शेषाश्च सिद्धिगताः ॥ १ ॥

क्षुदार्त्तः शक्तिभाक् साधुरेषणां नातिलङ्घयेत् ।
अदीनो विमनो विद्वान् यात्रामात्रोद्यतश्चरेत् ॥ १ ॥

पिपासितः पथिस्थोऽपि तत्त्वविद् दैन्यवर्जितः ।
न शीतमुदकं वाञ्छेदेषयेत् प्रासुकोदकम् ॥ २ ॥

बाध्यमानोऽपि शीतेन त्वग्-वस्त्र-त्राणवर्जितः ।
वासोऽकल्प्यं नाददीत ज्वलनं ज्वलयेद् न च ॥ ३ ॥

उष्णेन तप्तो नैवोष्णां निन्देच्छायां च न स्मरेत् ।
वीजनं मज्जनं गात्राभिषेकादि च वर्जयेत् ॥ ४ ॥

दष्टोऽपि दंशैर्मशकैः सर्वाहारप्रियत्ववित् ।
त्रासं द्वेषं निरासं न कुर्यात्, कुर्यादुपेक्षणम् ॥ ५ ॥

नास्ति वासोऽशुभं चैतद् तन्नेच्छेत् साध्वसाधु वा ।
नाग्न्येन विप्लुतो जानँल्लाभालाभविचित्रताम् ॥ ६ ॥

न कदाप्यरतिं कुर्याद् धर्मारामरतिर्यतिः ।
गच्छंस्तिष्ठंस्तथासीनः स्वास्थ्यमेव समाश्रयेत् ॥ ७ ॥

दुर्ध्यानसङ्गपङ्का हि मोक्षद्वारार्गलाः स्त्रियः ।
चिन्तिता धर्मनाशाय चिन्तयेदिति नैव ताः ॥ ८ ॥

ग्रामाद्यनियतस्थायी स्थानाबन्धविवर्जितः ।
चर्यामेकोऽपि कुर्वीत विविधाभिग्रहैर्युतः ॥ ९ ॥

श्मशानादौ निषद्यायां स्त्र्यादिकण्टकवर्जिते ।
इष्टानिष्टानुपसर्गान् निरीहो निर्भयः सहेत् ॥ १० ॥

शुभाशुभायां शय्यायां विषहेत सुखासुखे ।
राग-द्वेषौ न कुर्वीत प्रातस्त्याज्येति चिन्तयेत् ॥ ११ ॥

शारीरमानसानेवं स्वपरप्रेरितान् मुनिः।
परीषहान् सहेताभीर्वाक्कायमनसां वशी ॥ २३ ॥
ज्ञानावरणीये वेद्ये मोहनीयान्तराययोः।
कर्मसूदयमाप्तेषु संभवन्ति परीषहाः ॥ २४ ॥
वेद्यात् स्यात् क्षुत् तृषा शीतमुष्णं दंशादयस्तथा।
चर्या शय्या वधो रोगस्तृणस्पर्शमलावपि ॥ २५ ॥
प्रज्ञाज्ञाने तु विज्ञेयौ ज्ञानावरणसंभवौ।
अन्तरायादलाभोऽमी छद्मस्थस्य चतुर्दश ॥ २६ ॥
क्षुत् पिपासा शीतमुष्णं दंशाश्चर्या वधो मलः।
शय्या रोगस्तृणस्पर्शो जिने वेद्यस्य संभवात् ॥ २७ ॥

तथा, उपसर्गेभ्यो निर्भीकः, तत्रोप सामीप्येन उपसर्जना-दुपसृज्यत एभिरिति वा, उपसृज्यन्त इति वोपसर्गाः, ते च ;—

दिव्यमानुषतैरश्चात्मसंवेदनभेदतः।
चतुष्प्रकाराः प्रत्येकमपि ते स्युश्चतुर्विधाः ॥ १ ॥
हास्याद् द्वेषाद् विमर्शाच्च तन्मिश्रत्वाच्च देवताः।
हास्याद् द्वेषाद् विमर्शाद् दुःशीलसङ्गाच्च मानुषाः ॥ २ ॥
तैरश्चास्तु भयक्रोधाहारापत्यादिरक्षणात्।
घट्टनस्तम्भनश्लेषप्रपातादात्मवेदनाः ॥ ३ ॥
यद्वा वात-पित्त-कफ-संनिपातोद्भवा अमी।
परीषहोपसर्गाणामेषां सोढा भवेदभीः ॥ ४ ॥

जिनेष्वाराधनाकारिषु भक्तिभाक् बहुमानभाक्, 'जिनैरपि हि संसारपारावारपारीणैः पर्यन्ताराधनानुष्ठिता' इति बहुमानात्।

आक्रुष्टोऽपि हि नाक्रोशेत् क्षमाश्रमणतां विदन्।
प्रत्युताक्रोष्टरि यतिश्चिन्तयेदुपकारिताम् ॥ १२ ॥
सहेत हन्यमानोऽपि प्रतिहन्यान्न मुनिर्न तु।
जीवानाशात् क्रुधो दोषात् क्षमया च गुणार्जनात् ॥१३॥
नायाचितं यतीनां यत् परदत्तोपजीविनाम्।
याञ्चा दुःखं प्रतीच्छेत् तन्नेच्छेत् पुनरगारिताम् ॥ १४ ॥
परात् परार्थं स्वार्थं वा लभेतान्नादि नापि वा।
माद्येन्न लाभान्नालाभान्निन्देत् स्वमथवा परम् ॥१५॥
उद्विजेत न रोगेभ्यो न च काङ्क्षेच्चिकित्सितम्।
अदीनस्तु सहेद्देहाज्जानानो भेदमात्मनः ॥ १६ ॥
अभूतात्पाणुचेलत्वे संस्तृतेषु तृणादिषु।
सहेत दुःखं तत्स्पर्शभवमिच्छेन्न तान् मृदून् ॥ १७ ॥
ग्रीष्मातपपरिक्लिन्नात् सर्वाङ्गीणान्मलान्मुनिः।
नोद्विजेत न सिस्नासेन्नोद्वर्तयेत्, सहेत तु ॥ १८ ॥
उत्थाने पूजने दाने न भवेदभिलाषुकः।
असत्कारे न दीनः स्यात् सत्कारे स्यान्न हर्षवान् ॥ १९ ॥
प्रज्ञां प्रज्ञावतां पश्यन्नात्मन्यप्राज्ञतां विदन्।
न विषीदेन्नवा माद्येत् प्रज्ञोत्कर्षमुपागतः ॥ २० ॥
ज्ञानचारित्रयुक्तोऽस्मि छद्मस्थोऽहं तथापि हि।
इत्यज्ञानं विषहेत ज्ञानस्य क्रमलाभवित् ॥ २१ ॥
जिनास्तदुक्तं जीवो वा धर्माधर्मौ भवान्तरम्।
परोक्षत्वान्मृषा नैव चिन्तयेत् प्राप्तदर्शनः ॥ २२ ॥

शारीरमानसानेवं स्वपरप्रभवान् मुनिः ।
परीषहान् सहेतासौ वाक्कायमनसां वशी ॥ २३ ॥
ज्ञानावरणीये वेद्ये मोहनीयान्तराययोः ।
कर्मसूदयमाप्तेषु संभवन्ति परीषहाः ॥ २४ ॥
वेद्यात् स्यात् क्षुत् तृषा शीतमुष्णं दंशादयस्तथा ।
चर्या शय्या वधो रोगस्तृणस्पर्शमलावपि ॥ २५ ॥
प्रज्ञाज्ञाने तु विज्ञेयौ ज्ञानावरणसंभवौ ।
अन्तरायादलाभोऽसौ छद्मस्थस्य चतुर्दश ॥ २६ ॥
क्षुत् पिपासा शीतमुष्णं दंशाश्चर्या वधो मलः ।
शय्या रोगस्तृणस्पर्शो जिने वेद्यस्य संभवात् ॥ २७ ॥

तथा, उपसर्गेभ्यो निर्भीकः, तत्रोप सामीप्येन उपसर्जना-दुपसृज्यत एभिरिति वा, उपसृज्यन्त इति वोपसर्गाः, ते च ;—

दिव्यमानुषतैरश्चात्मसंवेदनभेदतः ।
चतुष्प्रकाराः प्रत्येकमपि ते स्युश्चतुर्विधाः ॥ १ ॥
हास्याद् द्वेषाद् विमर्शाच्च तन्मिश्रत्वाच्च दैवताः ।
हास्याद् द्वेषाद् विमर्शाद् दुःशीलसङ्गाच्च मानुषाः ॥ २ ॥
तैरश्चास्तु भयक्रोधाहारापत्यादिरक्षणात् ।
घट्टनस्तम्भनश्लेषप्रपातादात्मवेदनाः ॥ ३ ॥
यद्वा वात-पित्त-कफ-संनिपातोद्भवा इमे ।
परीषहोपसर्गाणामेषां सोढा भवेदसौ ॥ ४ ॥

जिनेष्वाराधनाकारिषु भक्तिभाक् बहुमानभाक्, 'ए-
हि संसारपारावारपारीणैः पर्यन्ताराधनानुष्ठिता' इति बहु

तथा च ;—

[1]निव्वाणमंतकिरिआ सा चोद्दसमेण पढमनाहस्स ।
सेसाण मासिएणं वीरजिणिंदस्स छट्ठेण ॥ १ ॥

एवंभूतः सन् मरणं समाधिमरणं प्रतिपद्येत, आनन्दश्रावको यथेति संप्रदायगम्यम् । स चायम् ;—

अस्त्यपास्तापरपुरं परमाभिर्विभूतिभिः ।
नाम्ना वाणिजकग्राम इति ख्यातं महापुरम् ॥ १ ॥
तत्र प्रजानां विधिवत् पितेव परिपालकः ।
जितशत्रुरिति ख्यातो बभूव पृथिवीपतिः ॥ २ ॥
आसीद् गृहपतिस्तस्मिन् नयनानन्दिदर्शनः ।
आनन्दो नाम मेदिन्यामायात इव चन्द्रमाः ॥ ३ ॥
सधर्मचारिणी तस्य रूपलावण्यहारिणी ।
बभूव शिवनन्देति शशाङ्कस्येव रोहिणी ॥ ४ ॥
निधौ वृद्धौ व्यवहारे चतस्रोऽस्य पृथक् पृथक् ।
हिरण्यकोटयोऽभूवंश्चत्वारश्च व्रजा गवाम् ॥ ५ ॥
तत्पुरादुत्तरप्राच्यां कोल्लाकाख्योपपत्तने ।
आनन्दस्यातिबहवो बन्धुमंत्रिमित्राणोऽभवन् ॥ ६ ॥
तदा च पृथिवीं विहरन् जिनः सिद्धार्थनन्दनः ।
तत्पुरोपवने दूतिपलाशे समवासरत् ॥ ७ ॥

---

(१) निर्वाणमन्तक्रिया सा चतुर्दशेन प्रथमनाथस्य ।
शेषाणां मासिकेन वीरजिनेन्द्रस्य षष्ठेन ॥ १ ॥

ततः सौधर्मकल्पेऽसौ विमाने चारुणप्रभे ।
भविष्यत्यमरवरश्चतुष्पल्योपमस्थितिः ॥ ३० ॥
सततं जागरूकस्य द्वादशव्रतपालने ।
आनन्दस्य ततोऽतीयुर्हायनानि चतुर्दश ॥ ३१ ॥
निशान्ते चिन्तयामास सोऽन्येद्युरिति शुद्धधीः ।
आश्रयः श्रीमतामस्मि भूयसामिह पत्तने ॥ ३२ ॥
विक्षिप्तश्चिन्तया तेषां मा स्म स्खलमहं क्वचित् ।
अङ्गीकृतेऽस्मिन् सर्वज्ञप्रज्ञप्ते धर्मकर्मणि ॥ ३३ ॥
ततो मनसिकृत्यैवं प्रातरुत्थाय कृत्यवित् ।
कोल्लाके पोषधशालां सुविशालामचीकरत् ॥ ३४ ॥
निमन्त्र्य मित्रसंबन्धिबान्धवादीनसावथ ।
भोजयित्वाऽखिलं ज्येष्ठे भारं पुत्रेऽध्यरोपयत् ॥ ३५ ॥
ततश्च पुत्रमित्रादीन् सर्वानप्यनुमान्य सः ।
ययौ पौषधशालायां धर्मकर्मविधित्सया ॥ ३६ ॥
तस्थौ तत्र महात्मासौ कर्मेव कृशयन् वपुः ।
धर्मं भगवदादिष्टमात्मानमिव पालयन् ॥ ३७ ॥
निःश्रेणिकल्पां स्वर्गापवर्गसौधाधिरोहणे ।
श्रावकप्रतिमापङ्क्तिमारुरोह क्रमेण सः ॥ ३८ ॥
तपसा तेन तीव्रेण शुष्कासृक्पिशिताङ्ककः ।
चर्मवेष्टितयष्ट्याभो महासत्त्वो बभूव सः ॥ ३९ ॥
धर्मजागर्यया जाग्रन्निशीथसमयेऽन्यदा ।
अभग्नस्तपसानन्दश्चेतस्येवमचिन्तयत् ॥ ४० ॥

ऋते च मालतीमाल्यात् पद्माच्च कुसुमं जहौ ।
कर्णिकानाममुद्राभ्यामन्यच्चाशेषभूषणम् ॥ १९ ॥
तुरुष्कागुरुधूपेभ्य ऋते धूपविधिं जहौ ।
घृतपूरात् खण्डखाद्यादपरं भक्ष्यमत्यजत् ॥ २० ॥
काष्ठपेयां विना पेयां कलमादन्यदोदनम् ।
माषमुद्गकलायेभ्य ऋते सूपमपाकरोत् ॥ २१ ॥
घृतं च वर्जयामास विना शारदगोघृतात् ।
शाकं स्वस्तिकमण्डूकीं पालक्यां च विना जहौ ॥ २२ ॥
ऋते स्नेहाम्लदाल्यम्लात् तीमनं चाम्बु खाम्बुनः ।
पञ्चसुगन्धिताम्बूलाद् मुखवासं च सोऽमुचत् ॥ २३ ॥
आनन्दः शिवनन्दाया उपेत्याथ समंमदः ।
अशेषं कथयामास गृहिधर्मं प्रतिश्रुतम् ॥ २४ ॥
शिवाय शिवनन्दापि यानमारुह्य तत्क्षणम् ।
भगवत्पादमूलेऽगाद् गृहिधर्मार्थिनी ततः ॥ २५ ॥
तत्र प्रणम्य चरणौ जगत्त्रयगुरोः पुरः ।
प्रपेदे शिवनन्दापि गृहिधर्मं समाहिता ॥ २६ ॥
[illegible] तदा यानं विमानमिव भासुरम् ।
[illegible]मुदिता सा स्वं ययौ ॥ २७ ॥
[illegible] पप्रच्छ गौतमः ।
[illegible] ॥ २८ ॥
[illegible] ।
[illegible] ॥ २९ ॥

उपेत्य पुरतस्तस्य तस्थुषोऽस्य महामुनिः ।
अवन्दत निधानन्दश्चरणौ शिरसा स्पृशन् ॥ ५२ ॥
किं भवत्यवधिज्ञानं भगवन् ! गृहमेधिनः ? ।
इत्यानन्देन पृष्टः सन्नामित्यूचे महामुनिः ॥ ५३ ॥
आनन्दोऽप्यावदत् स्वामिन् ! तर्हि मे गृहमेधिनः ।
अवधिज्ञानमुत्पेदे गुरुपादप्रसादतः ॥ ५४ ॥
आपं च योजनशतीं पूर्वाब्धौ दक्षिणोदधौ ।
पश्चिमाब्धौ च वीक्षेऽहमुदीच्यां त्वा हिमाचलात् ॥ ५५ ॥
ऊर्ध्वं सौधर्मकल्पाद्या पश्यामि भगवन्नहम् ।
अधो रत्नप्रभायान्तु भूम्या आ लोलुपाद् वनात् ॥ ५६ ॥
मुनिरूचेऽवधिज्ञानं जायते गृहमेधिनः ।
न त्वियत्काविविषयं स्थानस्यालोचयस्व तत् ॥ ५७ ॥
आनन्दोऽप्यब्रवीदेतदस्ति मे तत्, सतामपि ।
भावानामभिधाने किं भवेदालोचना क्वचित् ? ॥ ५८ ॥
भवेदालोचना नो चेद् ननु तद् यूयमेव हि ।
आलोचनामादद्ध्वं स्थानस्यास्य संप्रति ॥ ५९ ॥
आनन्देनेत्यभिहिते …ो गौतमस्ततः ।
ययौ श्रीवीरपादा… नायदर्शयत् ॥ ६० ॥
आनन्दस्यावधिज्ञा… तिपत्तिमन् ।
बाढं चावेदयाञ्चक्रे … जगद्गुरोः ॥ ६१ ॥
…लोचनीयं तदि… न किं मया ? ।
नेति … त् प्रभुः ॥ ६२ ॥

यावदुत्थातुमीशोऽस्मि शब्दायितुमपीश्वरः ।
धर्माचार्यश्च भगवान् यावद् विहरते मम ॥ ४१ ॥
संलेखनामुभयथापि कृत्वा मारणान्तिकीम् ।
तावच्चतुर्विधाहारप्रत्याख्यानं करोम्यहम् ॥ ४२ ॥
चिन्तयित्वैवमानन्दस्तथैव विदधेऽपि च ।
विसंवदति चिन्तायाश्चेष्टितं न महात्मनाम् ॥ ४३ ॥
निराकाङ्क्षस्य कालेऽपि समत्वाध्यवसायिनः ।
तस्य जज्ञेऽवधिज्ञानं तदावरणशुद्धितः ॥ ४४ ॥
तत्राजगाम भगवान् श्रीवीरो विहरंस्तदा ।
दूतिपलाशे समवसरणश्चक्रे च देवताम् ॥ ४५ ॥
गौतमश्च तदा भिक्षाचर्यया प्राविशत् पुरे ।
[illegible] कोल्लाके ययावानन्द[illegible] ॥ ४६ ॥
मिलितं तत्र भूयांसं लोकं संजातविस्मयम् ।
[illegible] गणधरो[illegible]विधायिनम् ॥ ४७ ॥
शिष्यो जगद्गुरोर्वीरस्यानन्दो नाम पुण्यधीः ।
[illegible] निर्व्याजः सत्यगापि हि ॥ ४८ ॥
[illegible] तदा [illegible] ।
[illegible] ॥ ४९ ॥
[illegible] ।
[illegible] ॥ ५० ॥
[illegible] ।
[illegible]

उपेत्य पुरतस्तस्य तस्थुषोऽस्य महामुनेः।
अवन्दत निधानन्दश्चरणौ शिरसा स्पृशन् ॥ ५२ ॥
किं भवत्यवधिज्ञानं भगवन्! गृहमेधिनः?।
इत्यानन्देन पृष्टः सन्नामित्यूचे महामुनिः ॥ ५३ ॥
आनन्दोऽथावदत् स्वामिन्! तर्हि मे गृहमेधिनः।
अवधिज्ञानमुत्पेदे गुरुपादप्रसादतः ॥ ५४ ॥
आपं च योजनशतीं पूर्वाब्धौ दक्षिणोदधौ।
पश्चिमाब्धौ च वीक्षेऽहमुदीच्यां त्वा हिमाचलात् ॥ ५५ ॥
ऊर्ध्वं सौधर्मकल्पादा पश्यामि भगवन्नहम्।
अधो रत्नप्रभायास्तु पृथ्व्या आ लोलुपाद् वनात् ॥ ५६ ॥
मुनिरूचेऽवधिज्ञानं जायते गृहमेधिनः।
न त्वियन्मात्रविषयं स्थानस्यालोचयास्य तत् ॥ ५७ ॥
आनन्दोऽप्यब्रवीदेतदस्ति मे तत्, सतामपि।
भावानामभिधाने किं भवेदालोचना क्वचित्? ॥ ५८ ॥
भवेदालोचना नो चेद् ननु तद् यूयमेव हि।
आलोचनामादत्तोर्ध्वं स्थानस्यामुष्य संप्रति ॥ ५९ ॥
आनन्देनेत्यभिहिते साशङ्को गौतमस्ततः।
ययौ श्रीवीरपादान्ते भक्तपानाद्यदर्शयत् ॥ ६० ॥
आनन्दस्यावधिज्ञानमानविप्रतिपत्तिजम्।
वादं चावेदयामास गौतमस्तं जगद्गुरोः ॥ ६१ ॥
आलोचनीयं तदिह किमानन्देन किं मया?।
गौतमेनेति विज्ञप्ते भगवत्यादिशत् प्रभुः ॥ ६२ ॥

माल्यमधुकरोऽहमहमिकासेवासमायातत्रिदशकोटीचाटुकारजय-जयध्वनिप्रतिध्वनितनभोऽङ्गणो मनोमात्रपरिश्रमसंमिलितसकल-वैषयिकसुखलालितो नानासिद्धायतनयात्रासमुत्पन्नहर्षप्रकर्षः सन् प्रमोदभाग् भवति। अथ हेतुमाह—अनुत्तरा अनन्यसाधारणाः प्राज्या बहवो ये पुण्यसंभारास्तान् भजते तद्भाक् ॥ १५४ ॥ ततः कल्पेभ्यश्च्युत्वा मनुष्यायुर्निबन्धेन च्यवनमनुभूय मनुष्येषु विशिष्ट-देशजातिकुलबलैश्वर्यरूपवत्सूत्पद्यौदारिकशरीरत्वेन जन्म लब्ध्वा, भुक्त्वाऽनुभूय भोगान् शब्द-रूप-रस-गन्ध-स्पर्शलक्षणानक्षतपुण्यैरति-शयेन दुर्लभान्, यत् 'किञ्चिद् निमित्तमवाप्य सांसारिकेभ्यः सुखेभ्यो विरक्तो वैराग्यस्यैव परमप्रकर्षयोगेन सर्वविरतिं प्रतिपद्य तत्रैव जन्मनि क्षपकश्रेण्याक्रमणक्रमेण केवलज्ञानमुत्पाद्य निःशेष-कर्मनिर्मूलनेन शुद्धात्मा मुक्तिमाप्नोति। अथ न तत्रैव जन्मनि मुक्तिस्तदा कियत्सु जन्मान्तरेषु मुक्तिः स्यादित्याह—'अन्तर्भवा-ष्टकम्' इति भवाष्टकाभ्यन्तर इत्यर्थः ॥ १५५ ॥

प्रकाशत्रयोक्तमर्थमुपसंहरति—

इति संक्षेपतः सम्यग्रत्नत्रयमुदीरितम् ।
सर्वोऽपि यदनासाद्य नासादयति निर्वृतिम् ॥१५६॥

इति प्रकाशत्रयेण रत्नत्रयं ज्ञानदर्शनचारित्रात्मकं योगत्वेन प्रत्याख्यातमुदीरितं कथितम्। कथम् ? सम्यग् जिनागमाविरोधेन। विस्तरस्यासर्वविदा वक्तुमशक्यत्वादाह—संक्षेपतः। रत्नत्रयं विना-

(1) क ख विहृत्य।

ाल्यमधुकरोऽहमहमिकासेवासमायातत्रिदशकोटीचाटुकारजय-
जयध्वनिप्रतिध्वनितनभोङ्गणो मनोमात्रपरिश्रमसंमिलितसकल-
विषयिकसुखलालितो नानासिद्धायतनयात्रासमुत्पन्नहर्षप्रकर्षः सन्
प्रमोदभाग् भवति । अथ हेतुमाह—अनुत्तरा अनन्यसाधारणाः
प्राज्या बहवो ये पुण्यसंभारास्तान् भजते तद्भाक् ॥ १५४ ॥ ततः
कल्पेभ्यश्च्युत्वा मनुष्यायुर्निबन्धेन च्यवनमनुभूय मनुष्येषु विशिष्ट-
देशजातिकुलबलैश्वर्यरूपवत्सूत्पद्यौदारिकशरीरत्वेन जन्म लब्ध्वा,
भुक्त्वाऽनुभूय भोगान् शब्द-रूप-रस-गन्ध-स्पर्शलक्षणानक्षतपुण्यैरति-
शयेन दुर्लभान्, यत् 'किञ्चिद् निमित्तमवाप्य सांसारिकेभ्यः
सुखेभ्यो विरक्तो वैराग्यस्यैव परमप्रकर्षयोगेन सर्वविरतिं प्रतिपद्य
तत्रैव जन्मनि क्षपकश्रेण्याक्रमणक्रमेण केवलज्ञानमुत्पाद्य निःशेष-
कर्मनिर्मूलनेन शुद्धात्मा मुक्तिमाप्नोति । अथ न तत्रैव जन्मनि
मुक्तिस्तदा कियत्सु जन्मान्तरेषु मुक्तिः स्यादित्याह—'अन्तर्भवा-
ष्टकम्' इति भवाष्टकाभ्यन्तर इत्यर्थः ॥ १५५ ॥

प्रकाशत्रयोक्तमर्थमुपसंहरति—

इति संक्षेपतः सम्यग्रत्नत्रयमुदीरितम् ।
सर्वोऽपि यदनासाद्य नासादयति निर्वृतिम् ॥१५६॥

इति प्रकाशत्रयेण रत्नत्रयं ज्ञानदर्शनचारित्रात्मकं योगत्वेन
प्रत्याख्यातमुदीरितं कथितम् । कथम् ? सम्यग् जिनागमाविरोधेन ।
विस्तरस्यासर्वविदा वक्तुमशक्यत्वादाह—संक्षेपतः । रत्नत्रयं विना-

(1) ड ण किञ्चन ।

॥ अर्हम् ॥

अथ चतुर्थः प्रकाशः ।

—:*:—

धर्मधर्मिणोर्भेदनयमधिकृत्यात्मनो रत्नत्रयं मुक्तिकारणत्वेनोक्तम् । इदानीमभेदनयाश्रयेणात्मनो रत्नत्रयेणैकत्वमाह—

आत्मैव दर्शनज्ञानचारित्राण्यथवा यतेः ।
यत्तदात्मक एवैष शरीरमधितिष्ठति ॥ १ ॥

अथवेति भेदनयापेक्षया प्रकारान्तरस्याभेदनयस्य प्रकाशनार्थम् । आत्मैव न ततो भिन्नानि दर्शनज्ञानचारित्राणि । यतेरिति संबन्धिपदम् । अत्रोपपत्तिमाह—यद् यस्मात् तदात्मक एव दर्शन-ज्ञान-चारित्रात्मक एव तदभेदमापन्न एवैष आत्मा शरीरमधितिष्ठति । आत्मभिन्नानां हि दर्शनादीनां नात्मनि मुक्तिहेतुत्वं स्यात्, देवदत्तसंबन्धिनामिव यज्ञदत्ते ॥ १ ॥

अभेदमेव समर्थयितुमाह—

आत्मानमात्मना वेत्ति मोहत्यागाद्य आत्मनि ।
तदेव तस्य चारित्रं तज्ज्ञानं तच्च दर्शनम् ॥ २ ॥

आत्मानं कर्मतापन्नमात्मन्याधारभूते आत्मना स्वयमेव यो वेत्ति जानीते । एतच्च ज्ञानं न मूढानां भवतीत्याह—मोह-

नात्मनः कर्मभूतस्य पृथक् किञ्चित्, अपि त्वात्मनश्चिद्रूपस्य स्वसंवेदनमेव मृग्यते, नातोऽन्यदात्मज्ञानं नाम, एवं दर्शनचारित्रे अपि नात्मनो भिन्ने। एवं च चिद्रूपोऽयं ज्ञानाद्याख्याभिरभिधीयते। ननु विषयान्तरव्युदासेन किमित्यात्मज्ञानमेव मृग्यते, विषयान्तरज्ञानमेव ह्यज्ञानरूपं दुःखं छिन्द्यात्। नैवम्, सर्वविषयेभ्य आत्मन एव प्रधानत्वात्, तस्यैव कर्मनिबन्धनशरीरपरिग्रहे दुःखितत्वात्, कर्मक्षये च सिद्धस्वरूपत्वात् ॥ ३ ॥

एतदेवाह—

अयमात्मैव चिद्रूपः शरीरी कर्मयोगतः ।
ध्यानाग्निदग्धकर्मा तु सिद्धात्मा स्यान्निरञ्जनः ॥ ४ ॥

अयमिति सकलप्रमाणप्रतिष्ठितश्चिद्रूपश्चेतनस्वभावः, उपयोगलक्षणत्वाज्जीवस्य ; तथा, स एव शरीरी भवति, कर्मयोगात्, न त्वन्ये विषयाः ; तेन न विषयान्तरज्ञानं मृग्यते। आत्मैव च शुक्लध्यानाग्निदग्धकर्माऽशरीरः सन् मुक्तस्वरूपो भवति निरञ्जनो निर्मलः। अतोऽपि कारणादात्मज्ञानं मृग्यते ॥ ४ ॥

तथा—

अयमात्मैव संसारः कषायेन्द्रियनिर्जितः ।
तमेव तद्विजेतारं मोक्षमाहुर्मनीषिणः ॥ ५ ॥

'अयमात्मेव' इति पूर्ववत्। संसारो नारक-तिर्यग्-नरा-ऽमररूपतया। किंविशिष्टः सन्? कषायेन्द्रियनिर्जितः कषाये-

मनसो इत्युपतापकः, तथा, वैरस्य परस्परोपघातात्मनो विरोधस्य सुभूम-परशुरामयोरिव कारणम्,तथा, दुर्गतेर्नरकलक्षणायास्तयोरिव वर्तनी मार्गः क्रोधः ; तथा, शमसुखस्य प्रशमानन्दस्यात्मनि प्रविशतोऽर्गलेवार्गला, तदुपरोधकारित्वात् । पुनः पुनः क्रोधग्रहणं तस्यातिदौष्ट्यज्ञापनार्थम् ॥ ९ ॥

स्व-परोपतापकारित्वेऽपि क्रोधस्य कृशानुदृष्टान्तेन स्वोपतापकत्वं समर्थयते,—

उत्पद्यमानः प्रथमं दहत्येव स्वमाश्रयम् ।
क्रोधः कृशानुवत्पश्चादन्यं दहति वा नवा ॥ १० ॥

तथाविधकारणसंपाते उत्पद्यमानः क्रोधः कृशानुवत् स्वं स्वकीयमाश्रयं, यत्र स उत्पद्यते तं, नियमेन दहति, पश्चात् कृशानुवदेवान्यं दाह्यान्तरं दहति वा नवा, परस्य क्षमाशीलत्वादिना सार्द्रद्रुमादिवत् दग्धुमशक्यत्वात् ।

अत्रान्तरश्लोकाः,—

अर्जितं पूर्वकोट्या यद् वर्षैरष्टभिरूनया ।
तपस्तत् तत्क्षणादेव दहति क्रोधपावकः ॥ १ ॥
शमरूपं पयः प्राज्यपुण्यसंभारसंचितम् ।
अमर्षविषसंपर्कादसेव्यं तत्क्षणाद् भवेद् ॥ २ ॥
चारित्रचित्ररचनां विचित्रगुणधारिणीम् ।
समुत्सर्पन् क्रोधधूमो श्यामलीकुरुतेतराम् ॥ ३ ॥

यो वैराग्यशमीपत्रपुटैः समरसोऽर्जितः ।
शाकपत्रपुटाभेन क्रोधेनोत्सृज्यते स किम् ? ॥ ४ ॥
प्रवर्धमानः क्रोधोऽयं किमकार्यं करोति न ? ।
जज्ञे हि द्वारका द्वैपायनक्रोधानले समित् ॥ ५ ॥
क्रुध्यतः कार्यसिद्धिर्या न सा क्रोधनिबन्धना ।
जन्मान्तरार्जितोर्जस्विकर्मणः खलु तत्फलम् ॥ ६ ॥
स्वस्य लोकद्वयोच्छित्त्यै नाशाय स्वपरार्थयोः ।
धिगहो ! दधति क्रोधं शरीरेषु शरीरिणः ॥ ७ ॥
क्रोधान्धाः पश्य निघ्नन्ति पितरं मातरं गुरुम् ।
सुहृदं सोदरं दारानात्मानमपि निर्घृणाः ॥८॥१०॥

क्रोधस्य स्वरूपमुक्त्वा तज्जयोपायमुपदिशति—

क्रोधवह्नेस्तदह्नाय शमनाय शुभात्मभिः ।
श्रयणीया क्षमैकैव संयमारामसारणिः ॥ ११ ॥

यस्मात् क्रोध एवंविधस्तस्मात् क्रोधवह्नेरह्नाय झटिति शमनाय शान्तये शुभात्मभिः पुण्यात्मभिः, अह्नायग्रहणं झटिति क्रोधोपशमोपदेशार्थम्, क्रोधो हि प्रथममेवाप्रतिहतः सन् विवर्धमानो दवानल इव पश्चात् निवारयितुमशक्यः, यदाह—

[1]अणथोवं वणथोवं अग्गिथोवं कसायथोवं च ।
न हु भे वीससियव्वं थोवं पि हु तं बहुं होई ॥ १ ॥

(1) ऋणस्तोकं वनस्तोकमग्निस्तोकं कषायस्तोकं च ।
न खलु भवता विश्वसितव्यं स्तोकमपि तद् बहु भवति ॥ १ ॥

अयणीया आश्रयितव्या एकैव क्षमा। न हि क्षमामन्तरेण क्रोधोपशमोपायो जगत्यस्ति, क्रोधफलसंप्रदानं तु वैरहेतुत्वेन प्रत्युत क्रोधवृद्धिहेतुः, न तु तत्प्रशमाय इत्येकग्रहणम्। क्षमां विशिनष्टि—संयमारामसारणिः संयम एव नवनवानां संयमस्थानानां तरूणामारोपहेतुत्वेन तद्वृद्धिहेतुत्वेन चारामो विचित्रतरुसमूहात्मकस्तस्य सारणिः कुल्या संयमारामवृद्धिहेतुतया पुष्पफलप्राप्तिहेतुतया च। क्षमा हि प्रशान्तवाहितारूपा चित्तपरिणतिः सा सारणित्वेन रूपिता, नवनवप्रशमपरम्पराप्रवाहरूपत्वात्।

अत्रान्तरश्लोकाः—

अपकारिजने कोपो निरोद्धुं शक्यते कथम्।
शक्यते सत्त्वमाहात्म्याद् यद्वा भावनयाऽनया ॥ १ ॥
अङ्गीकृत्यात्मनः पापं यो मां बाधितुमिच्छति।
स्वकर्मनिहितायास्मै कः कुप्येद् बालिशोऽपि सन् ॥ २ ॥
प्रकुप्याम्यपकारिभ्य इति चेदाशयस्तव।
तत् किं न कुप्यसि स्वस्य कर्मणे दुःखहेतवे ॥ ३ ॥
उपेक्ष्य लोष्टक्षेप्तारं लोष्टं दशति मण्डलः।
मृगारिः शरमाप्रेक्ष्य शरक्षेप्तारमिच्छति ॥ ४ ॥
यैः परः प्रेरितः क्रूरैर्मह्यं कुप्यति कर्मभिः।
तान्युपेक्ष्य परे क्रुध्यन् किं श्वेवे भषण्यियम् ॥ ५ ॥
श्रूयते श्रीमहावीरः क्षान्त्यै म्लेच्छेषु जग्मिवान्।
अयत्नेनागतां क्षान्तिं वोढुं किमिव नेच्छसि ॥ ६ ॥

त्रैलोक्यप्रलयत्राणक्षमाश्चेदाश्रिताः क्षमाम् ।
कदलीतुल्यसत्त्वस्य क्षमा तव न किं क्षमा ? ॥ ७ ॥
तथा किं नाकृथाः पुण्यं यथा कोऽपि न बाधते ? ।
स्वप्रमादमिदानीं तु शोचन्नङ्गीकुरु क्षमाम् ॥ ८ ॥
क्रोधान्धस्य मुनेश्चण्डचण्डालस्य च नान्तरम् ।
तस्मात् क्रोधं परित्यज्य भजोज्ज्वलधियां पदम् ॥ ९ ॥
महर्षिः क्रोधसंयुक्तो निष्क्रोधः कूरगड्डुकः ।
ऋषिं मुक्त्वा देवताभिर्ववन्दे कूरगड्डुकः ॥ १० ॥
अरुन्तुदैर्वचःशस्त्रैस्तुद्यमानो विचिन्तयेत् ।
चेत् तथ्यमेतत् कः कोपोऽथ मिथ्योन्मत्तभाषितम् ॥ ११ ॥
वधायोपस्थितेऽन्यस्मिन् हसेद् विस्मितमानसः ।
वधे मत्कर्मसंसाध्ये हथा नृत्यति बालिशः ॥ १२ ॥
निहन्तुमुद्यते ध्यायेदायुषः क्षय एव नः ।
तदसौ निर्भयः पापात् करोति मृतमारणम् ॥ १३ ॥
सर्वपुरुषार्थचौरे कोपे कोपो न चेत् तव ।
धिक् त्वां स्वल्पापराधेऽपि परे कोपपरायणम् ॥ १४ ॥

सर्वेन्द्रियग्लानिकरं विसर्पं
[illegible] ।
[illegible]
[illegible] ॥ १५ ॥

मानकषायस्य स्वरूपमाह—

विनयश्रुतशीलानां त्रिवर्गस्य च घातकः।
विवेकलोचनं लुम्पन् मानोऽन्धङ्करणो नृणाम् ॥१२॥

विनयश्च गुर्वादिषूपचारलक्षणः, श्रुतं च विद्या, शीलं च सुस्वभावता, तेषां घातकः। जात्यादिमदाध्मातो हि पिशाचकिप्रायो न गुर्वादीनां विनीतो भवति। अविनीतश्च गुरूनशुश्रूषमाणो न विद्यां प्रतिलभते। अतएव सर्वजनावज्ञाकारी स्वस्य दुःस्वभावतां प्रकटयति। न केवलं विनयादीनामेव घातको मानो यावत् त्रिवर्गस्य धर्मार्थकामलक्षणस्य। मदावलिप्तस्य हि नेन्द्रियजयः, तदधीनश्च धर्मः कथं स्यात्?। अर्थोऽपि राजादिसेवापरायत्तवृत्तिर्मानस्तब्धस्य कथं स्यात्?। कामस्तु मार्दवमूल एव, तत् कथं मानस्तब्धे स्थाणाविव भवेत्?। किञ्च, अनन्धोऽन्धः क्रियतेऽनेनेत्यन्धङ्करणो मानः। केषां?। नृणाम्। किं कुर्वन्?। लुम्पन्। किं तत्?। विवेकलोचनं विवेकः कृत्याकृत्यविचारणं स एव लोचनम्, "एकं हि चक्षुरमलं सहजो विवेकः" इति वचनात्। मानवतो हि हठमेवासकुर्वाणस्य विवेकलोचनलोपममवश्यंभावि, तस्मिंश्च सत्यन्धङ्करणत्वं मानस्य सुवचमेव ॥ १२ ॥

इदानीं मानस्य भेदानुपदर्शयंस्तत्फलमाह—

जातिलाभकुलैश्वर्यबलरूपतपःश्रुतैः।
कुर्वन् मदं पुनस्तानि हीनानि लभते जनः ॥१३॥

जातिश्च लाभश्चेत्यादिद्वन्द्वः, तैर्मदं मदलिप्तचित्ततां कुर्वन्, तान्येव जात्यादीनि जन्मान्तरे हीनानि लभते ।

अत्रान्तरश्लोकाः—

जातिभेदान् नैकविधानुत्तमाधममध्यमान् ।
दृष्ट्वा को नाम कुर्वीत जातु जातिमदं सुधीः ॥ १ ॥
उत्तमां जातिमाप्नोति हीनामाप्नोति कर्मतः ।
तत्राशाश्वतिकीं जातिं को नामासाद्य माद्यतु ॥ २ ॥
अन्तरायक्षयादेव लाभो भवति नान्यथा ।
ततश्च वस्तुतत्त्वज्ञो न लाभमदमुद्वहेत् ॥ ३ ॥
परप्रसादशक्त्यादिभवे लाभे महत्यपि ।
न लाभमदमृच्छन्ति महात्मानः कथञ्चन ॥ ४ ॥
अकुलीनानपि प्रेक्ष्य प्रज्ञाश्रीशीलशालिनः ।
न कर्तव्यः कुलमदो महाकुलभवैरपि ॥ ५ ॥
किं कुलेन कुशीलस्य सुशीलस्यापि तेन किम् ।
एवं विदन् कुलमदं विदध्यान्न विचक्षणः ॥ ६ ॥
श्रुत्वा त्रिभुवनैश्वर्यसंपदं वज्रधारिणः ।
[illegible]नादीनामैश्वर्ये कीदृशो मदः ॥ ७ ॥
गुणोज्ज्वलादपि भ्रश्येद् दोषवन्तमपि श्रयेत् ।
[illegible]वैश्वर्ये न मदाय विवेकिनाम् ॥ ८ ॥
[illegible] रोगाद्यैरबलः क्रियते क्षणात् ।
[illegible] बलमदो [illegible] ॥ ९ ॥

उत्तमर्णोऽपि जरसि मृत्यौ कर्मफलान्तरे ।
अवनाशेत्, ततो हन्त ! तेषां जन्ममदो मुधा ॥ १० ॥
सप्तधातुमये देहे चयापचयवर्मिणि ।
जरारुजाभिभाव्यस्य को रूपस्य मदं वहेत् ॥ ११ ॥
सनत्कुमारस्य रूपं तत्क्षयं च विचारयन् ।
को वा सकर्णः स्वप्नेऽपि कुर्याद् रूपमदं किल ॥ १२ ॥
नाभेयस्य तपोनिष्ठां श्रुत्वा वीरजिनस्य च ।
को नाम स्वल्पतपसि स्वकीये मदमाश्रयेत् ॥ १३ ॥
येनैव तपसा त्रुट्येत् तरसा कर्मसंचयः ।
तेनैव मददिग्धेन वर्धते कर्मसंचयः ॥ १४ ॥
स्वबुद्ध्या रचितान्यन्यैः शास्त्राण्याम्नाय लीलया ।
सर्वज्ञोऽस्मीति मदवान् स्वकीयाङ्गानि खादति ॥ १५ ॥
श्रीमद्गणधरेन्द्राणां श्रुत्वा निर्माणधारणे ।
कः श्रयेत् श्रुतमदं सकर्णहृदयो जनः ॥ १६ ॥

केचित्तु ऐश्वर्यतपसोः स्थाने वाल्लभ्यबुद्धिमदौ पठन्ति, उपदिशन्ति च,—

द्रमकैरिव च दुष्कर्मकमुपकारनिमित्तकं परजनस्य ।
कृत्वा यद् वाल्लभ्यकमवाप्यते को मदस्तेन ॥ १ ॥
गर्वं परप्रसादात्मकेन वाल्लभ्यकेन यः कुर्यात् ।
तद्वाल्लभ्यकविगमे शोकसमुदयः परामृशति ॥ २ ॥

(१) ख ध -यधर्मणः ।

तथा —

ग्रहणोद्ग्राहणनवकृतिविचारणार्थावधारणाद्येषु ।
बुद्ध्यङ्गविधिविकल्पेष्वनन्तपर्यायवृद्धेषु ॥ ३ ॥
पूर्वपुरुषसिंहानां विज्ञानातिशयसागरमनन्तम् ।
श्रुत्वा सांप्रतपुरुषाः कथं स्वबुद्ध्या मदं यान्ति ? ॥४॥१३॥

मानस्य स्वरूपं भेदांश्च प्रतिपाद्य, इदानीं समानप्रतिपक्षमुखं मार्दवं मानजयोपायमुपदिशति,—

उत्सर्पयन् दोषशाखा गुणमूलान्यधो नयन् ।
उन्मूलनीयो मानद्रुस्तन्मार्दवसरित्प्लवैः ॥ १४ ॥

मान एव द्रुमः उन्नतिविशेषधारित्वेन। मानद्रुमस्य साधर्म्यमाह,—उत्सर्पयन्नूर्ध्वं नयन् दोषा एव प्रसरणशीलत्वेन शाखा दोषशाखास्ताः, गुणा एव मूलानि गुणमूलानि तान्यधो नयन् न्यक्कुर्वन्। केनोन्मूलनीयः ? मार्दवसरित्प्लवैर्मार्दवमेव सरिन्नदी तस्याः प्लवास्तैः पूरैः प्रसरैः। नदीद्रुमो हि यथा यथा वर्ध-ते तथा तथा गुणमूलानि निरुन्धानि, दोषशाखाश्च विस्तारयति। [illegible] [illegible]

[illegible]

[illegible]

[illegible]

अन्तः स्पृशेद् यत्र यत्राल्पं जात्यादिगोचरम् ।
सद्य तस्य प्रतीकारहेतोर्मार्दवमाश्रयेत् ॥ २ ॥
सर्वत्र मार्दवं कुर्यात् पूज्येषु तु विशेषतः ।
येन पापाद् विमुच्येत पूज्यपूजाव्यतिक्रमात् ॥ ३ ॥
मानाद् बाहुबलिर्बद्धो लताभिरिव पाप्मभिः ।
मार्दवात् तत्क्षणं मुक्तः सद्यः संजातकेवलः ॥ ४ ॥
चक्रवर्ती त्यक्तसङ्गो वैरिणामपि वेश्मसु ।
भिक्षायै यात्यहो ! मानच्छेदायाहो मार्दवम् ॥ ५ ॥
चक्रवर्त्यपि तत्कालदीक्षितो रङ्कसाधवे ।
नमस्यति त्यक्तमानश्चिरं च वरिवस्यति ॥ ६ ॥
एवं च मानविषयं परिमृश्य दोषं
ज्ञात्वा च मार्दवनिषेवणजं गुणौघम् ।
मानं विहाय यतिधर्मविशेषरूपं
सद्यः समाश्रयत मार्दवमेकतानाः ! ॥७॥१४॥

इदानीं मायाकषायस्वरूपमाह—

असूनृतस्य जननी परशुः शीलशाखिनः ।
जन्मभूमिरविद्यानां माया दुर्गतिकारणम् ॥१५॥

असूनृतस्यानृतस्य जननीव जननी, मायामन्तरेण प्रायेणासूनृतस्याभावात्, 'माया' इति वक्ष्यमाणं संबध्यते, माया वञ्चनात्मकः परिणामः, तथा, परशुः कुठारः शीलं सुस्वभावता तदेव

तथा—

ग्रहणोद्ग्राहणनवकृतिविचारणार्थावधारणाद्येषु ।
बुद्ध्यङ्गविधिविकल्पेष्वनन्तपर्यायवृद्धेषु ॥ ३ ॥
पूर्वपुरुषसिंहानां विज्ञानातिशयसागरमनन्तम् ।
श्रुत्वा सांप्रतपुरुषाः कथं स्वबुद्ध्या मदं यान्ति ? ॥४॥१३॥

मानस्य स्वरूपं भेदांश्च प्रतिपाद्य, इदानीं समानप्रतिपक्षभूतं मार्दवं मानजयोपायमुपदिशति,—

उत्सर्पयन् दोषशाखा गुणमूलान्यधो नयन् ।
उन्मूलनीयो मानद्रुस्तन्मार्दवसरित्प्लवैः ॥ १४ ॥

मान एव द्रुर्द्रुम उन्नतिविशेषधारित्वेन । मानद्रुमयोः साधर्म्यमाह,—उत्सर्पयन्नूर्ध्वं नयन् दोषा एव प्रसरणशीलत्वेन शाखा दोषशाखास्ताः, गुणा एव मूलानि गुणमूलानि तान्यधो नयन् न्यक्कुर्वन् । कैरुन्मूलनीयः ? मार्दवसरित्प्लवैर्मार्दवमेव सततवाहितया सरित् तस्याः प्लवैः प्रसरैः । मदद्रुमो हि यथा यथा वर्धते तथा तथा गुणमूलानि तिरोदधाति, दोषशाखाश्च विस्तारयति । तदयं कुठारादिभिरुन्मूलयितुमशक्यो मार्दवभावनासरित्प्रवाहेण समूलमुन्मूलनीय इत्यर्थः ।

अत्रान्तरश्लोकाः—

मार्दवं नाम मृदुता तत्रौद्धत्यनिषेधनम् ।
मानस्य पुनरौद्धत्यं स्वरूपमुपाधिकम् ॥ १ ॥

उन्नतः स्पृशेद् यत्र यत्रोत्कर्षं जात्यादिगोचरम् ।
तत्र तस्य प्रतीकारहेतोर्मार्दवमाश्रयेत् ॥ २ ॥
सर्वत्र मार्दवं कुर्यात् पूज्येषु तु विशेषतः ।
येन पापाद् विमुच्येत पूज्यपूजाव्यतिक्रमात् ॥ ३ ॥
मानाद् बाहुबलिर्बद्धो लताभिरिव पापभिः ।
मार्दवात् तत्क्षणं मुक्तः सद्यः संजातकेवलः ॥ ४ ॥
चक्रवर्ती त्यक्तसङ्गो वैरिणामपि वेश्मसु ।
भिक्षार्थं यात्यहो ! मानच्छेदायात्मदु मार्दवम् ॥ ५ ॥
चक्रवर्त्यपि तत्कालदीक्षितो रङ्कसाधवे ।
नमस्यति त्यक्तमानश्चिरं च वरिवस्यति ॥ ६ ॥
एवं च मानविषयं परिसृश्य दोषं
ज्ञात्वा च मार्दवनिषेवणजं गुणौघम् ।
मानं विहाय यतिधर्मविशेषरूपं
सद्यः समाश्रयत मार्दवमेकतानाः ! ॥७॥१४॥

इदानीं मायाकषायस्वरूपमाह—

असूनृतस्य जननी परशुः शीलशाखिनः ।
जन्मभूमिरविद्यानां माया दुर्गतिकारणम् ॥१५॥

असूनृतस्यानृतस्य जननीव जननी, मायामन्तरेण प्रायेणासूनृतस्याभावात्, 'माया' इति वक्ष्यमाणं संबध्यते, माया वञ्चनात्मकः परिणामः, तथा, परशुः कुठारः शीलं सुस्वभावता तदेव

कूटाः कूटतुलामानाल्पक्रियाकारियोगतः ।
वञ्चयन्ते जनं मुग्धं मायाभाजो वणिग्जनाः ॥ ३ ॥

जटामौञ्जीशिखाभस्मवल्कलाग्न्यादिधारणैः ।
मुग्धं श्राद्धं वञ्चयन्ते पाखण्डा हृदि नास्तिकाः ॥ ४ ॥

अरक्ताभिर्हावभावलीलागतिविलोकनैः ।
कामिनो रञ्जयन्तीभिर्वेश्याभिर्वञ्च्यते जगत् ॥ ५ ॥

प्रतार्य कूटैः शपथैः कृत्वा कूटकपर्दिकाम् ।
धनवन्तः प्रतार्यन्ते दुरोदरपरायणैः ॥ ६ ॥

दम्पती पितरः पुत्राः सोदर्याः सुहृदो निजाः ।
ईशा भृत्यास्तथान्येऽपि माययाऽन्योन्यवञ्चकाः ॥ ७ ॥

अर्थलुब्धा गतघृणा बन्दकारा मलिम्लुचाः ।
अहर्निशं जागरूकान्छलयन्ति प्रमादिवत् ॥ ८ ॥

कारवश्चान्त्यजाश्चैव स्वकर्मफलजीविनः ।
माययाऽलीकशपथैः कुर्वते साधुवञ्चनम् ॥ ९ ॥

व्यन्तरादिकुयोनिस्था दृष्ट्वा प्रायः प्रमादिनः ।
क्रूराश्छलैर्बहुविधैर्बाधन्ते मानवान् पशून् ॥ १० ॥

मत्स्यादयो जलचरान्छलात् स्वापत्यभक्षकाः ।
बध्यन्ते धीवरैस्तेऽपि माययाऽऽनायपाणिभिः ॥ ११ ॥

नानोपायैर्मृगयुभिर्वञ्चनप्रवणैर्जडाः ।
निबध्यन्ते विनाश्यन्ते प्राणिनः स्थलचारिणः ॥ १२ ॥

नभश्चरा भूरिभेदा वराका लावकादयः ।
बध्यन्ते माययाऽलुब्धैः स्वल्पकग्रासगृध्नुभिः ॥ १३ ॥

शाखी तस्य परशुरिव परशुः, छेदकत्वात्; तथा जन्मभूमि-रुत्पत्तिस्थानम्, कासाम्? अविद्यानां मिथ्याज्ञानानाम्। सा च दुर्गतेः कारणमिति प्रधानफलनिर्देशः॥ १५॥

परवञ्चनार्थं प्रयुक्ताया मायायाः परमार्थतः स्ववञ्चनमेव फलमित्याह—

कौटिल्यपटवः पापा मायया बकवृत्तयः।
भुवनं वञ्चयमाना वञ्चयन्ते स्वमेव हि॥१६॥

मायया तृतीयकषायेण भुवनं जगद् वञ्चयमानाः प्रतारयन्तः स्वमेवात्मानमेव वञ्चयन्ते। के? पापाः पापकर्मकारिणः। पापकर्मनिह्नवार्थमेव बकवृत्तयः, यथा बको मत्स्यादिवञ्चनार्थं मन्दं मन्दं विचेष्टते तथा तेऽपि जगद्वञ्चनार्थं तथा चेष्टन्ते यथा बकसदृशा भवन्ति। ननु मायया जगद्वञ्चनम्, तस्याश्च निह्नवः, इति कुत इयन्तं भारं ते वोढुं समर्थाः? इत्याह—कौटिल्यपटवः कौटिल्यपाटवरहितो हि न कदाचित् परं वञ्चयते, नवा कदाचिद् निह्नुत इति, कौटिल्यपाटवे तु द्वयं भवति परवञ्चनं वञ्चनाच्छादनं चेति।

अत्रान्तरश्लोकाः—

कूटषाड्गुण्ययोगेन छलाद् विश्वस्तघातनात्।
अर्थलोभाच्च राजानो वञ्चयन्ते खिलं जनम्॥ १॥
तिलकैर्मुद्रया मन्त्रैः क्षामतादर्शनेन च।
अन्तःशून्या बहिःसारा वञ्चयन्ते द्विजा जनम्॥ २॥

कूटाः कूटतुलामानाशक्रियाकारियोगतः ।
वञ्चयन्ते जनं मुग्धं मायाभाजो वणिग्जनाः ॥ ३ ॥
जटामौञ्जीशिखाभस्मवल्कलाग्न्यादिधारणैः ।
मुग्धं श्राद्धं गर्धयन्ते पाखण्डा हृदि नास्तिकाः ॥ ४ ॥
अरक्ताभिर्भावहावलीलागतिविलोकनैः ।
कामिनो रञ्जयन्तीभिर्वेश्याभिर्वञ्च्यते जगत् ॥ ५ ॥
प्रतार्य कूटैः शपथैः सत्वा कूटकपर्दिकाम् ।
धनवन्तः प्रतार्यन्ते दुरोदरपरायणैः ॥ ६ ॥
दम्पती पितरः पुत्राः सोदर्याः सुहृदो निजाः ।
ईशा भृत्यास्तथान्येऽपि माययाऽन्योन्यवञ्चकाः ॥ ७ ॥
अर्थलुब्धा गतघृणा बन्दकारा मलिम्लुचाः ।
अहर्निशं जागरूकाञ्छलयन्ति प्रमादिनः ॥ ८ ॥
कारवशान्त्यजाश्चैव स्वकर्मफलजीविनः ।
माययाऽलीकशपथैः कुर्वते साधुवञ्चनम् ॥ ९ ॥
व्यन्तरादिकुयोनिस्था दृष्ट्वा प्रायः प्रमादिनः ।
क्रूराश्छलैर्बहुविधैर्बाधन्ते मानवान् पशून् ॥ १० ॥
मत्स्यादयो जलचराश्छलात् स्वापत्यभक्षकाः ।
बध्यन्ते धीवरैस्तेऽपि माययाऽऽनायपाणिभिः ॥ ११ ॥
नानोपायैर्मृगयुभिर्वञ्चनप्रवणैर्जडाः ।
निबध्यन्ते विनाश्यन्ते प्राणिनः स्थलचारिणः ॥ १२ ॥
नभश्चरा भूरिभेदा वराका लावकादयः ।
बध्यन्ते माययाऽत्युग्रैः स्वल्पकग्रासगृध्नुभिः ॥ १३ ॥

शाखी तस्य परशुरिव परशुः, च्छेदकत्वात्; तथा जन्मभूमि रुत्पत्तिस्थानम्, कासाम्? अविद्यानां मिथ्याज्ञानानाम्। सा च दुर्गतेः कारणमिति प्रधानफलनिर्देशः ॥ १५ ॥

परवञ्चनार्थं प्रयुक्ताया मायायाः परमार्थतः स्वात्मवञ्चना फलमित्याह—

कौटिल्यपटवः पापा मायया बकवृत्तयः।
भुवनं वञ्चयमाना वञ्चयन्ते स्वमेव हि ॥१६॥

मायया [illegible] भुवनं जगद् वञ्चयमानाः [illegible] [illegible] वञ्चयन्ते। के? पापाः पापकर्मकारिणः। पाप [illegible] बकवृत्तयः, यथा बको [illegible] [illegible] तथा [illegible] जगद्वञ्चनार्थं तथा चेष्टन्ते यथा [illegible]। ननु मायया जगद्वञ्चनम्, [illegible] [illegible]

[illegible]

इति निगदितमुग्रं कर्म कौटिल्यभाजा-
मृजुपरिणतिभाजां चानवद्यं चरित्रम् ।
तदुभयमपि बुद्ध्या संस्पृशन् मुक्तिकामी
निरुपममृजुभावं संश्रयेच्छुद्धबुद्धिः ॥१२॥१७॥

इदानीं लोभकषायस्वरूपमाह—

आकरः सर्वदोषाणां गुणग्रसनराक्षसः ।
कन्दो व्यसनवल्लीनां लोभः सर्वार्थबाधकः ॥१८॥

आकरः खानिः सर्वदोषाणां प्राणातिपातादीनां 'लोहाद[...] मिव' इति गम्यते ; गुणानां ज्ञानादीनां प्राणिनामिव यद् [...] कवलनं तत्र राक्षस इव राक्षसः ; तथा, कन्दो मूलाधोऽव[...] कासां ?, व्यसनवल्लीनां व्यसनानि दुःखानि तान्येव वल्लयस्ता[...] लोभश्चतुर्थकषायः, तस्य स्वरूपसंग्रहमाह—सर्वार्थबाधकः स[...] मर्थ्यन्त इत्यर्था धर्मार्थकाममोक्षलक्षणास्तेषां बाधकः प्रतिब[...] लोभस्य सर्वदोषाकरत्वम्, गुणघातकत्वम्, व्यसनहेतुत्वं [...] पुरुषार्थघातकत्वं च प्रसिद्धमेव ॥ १८ ॥

लोभस्य दुर्जयत्वं श्लोकत्रयेणाह—

धनहीनः शतमेकं सहस्रं शतवानपि ।
सहस्राधिपतिर्लक्षं कोटिं लक्षेश्वरोऽपि च ॥१९॥
कोटीश्वरो नरेन्द्रत्वं नरेन्द्रश्चक्रवर्तिताम् ।
चक्रवर्ती च देवत्वं देवोऽपीन्द्रत्वमिच्छति ॥२०॥

..na Kriyā Kaumudī, Fasc. 1-2 @ /10/ each	1	4
..a Rupa (Text), Fasc. 2-3, @ /10/ each	1	4
..atmabindu, Fasc. 1, @ /10/ each	0	10
..ctionary of the Kashmiri Language, Part 1	15	0
..adadhara Paddhati Kālasāra Vol. 1, Fasc. 1-7 @ /10/ each	4	6
Ditto Ăchārasāraḥ Vol. II, Fasc. 1-4 @ /10/ each	3	2
..obhilya Grihya Sutra, Vol. 1 @ /10/ each	3	2
Ditto Vol. II, Fasc. 2 @ 1/4/ each	2	8
Ditto (Appendix) Gobhila Parisista	2	0
Ditto Grihya Sangraha	0	10
..patha Brahman of Atharva Veda (Text and English), Fasc. 1-2, @ 1/- each	2	0
..alata	1	14
..stitutes of Vishnu (Text), Fasc. 1-2, /10/ each	1	4
..a Madhava (Text), Fasc. 2-4, @ /10/ each	2	8
..la Viveka, Fasc. 1-7 @ /10/ each	4	6
..armapradīpā, Fasc. 1	1	4
..atantra, Fasc. 1-6 @ /12/ each	4	8
..atha Sarit Sagara (English), Fasc. 1-14 @ 1/- each	14	0
..va Kalpa Lata, Fasc. 1	0	10
..avindravacana Samuccayah	3	8
..ranavali, Fasc. 1-3 @ /10/ each	1	14
..ūrma Purāṇa, Fasc. 1-9 @ /10/ each	5	10
..alita Vistara (Text), Fasc. 2-6 @ /10/ each	3	2
Ditto (English), Fasc. 1-3 @ 1/- each	3	0
..adana Pārijāta, Fasc. 1-11 @ /10/ each	6	14
..aha-bhāṣya pradīpōdyōta, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-12; Vol. III, Fasc. 1-10 @ /10/ each	19	6
Ditto Vol. IV, Fasc. 1-8 @ /4/ each	3	12
..atra, or Maitrayaniya Upanishad, Fasc. 1	0	10
..anutikā Sangraha, Fasc. 1-3 @ /10/ each	1	14
..arkaṇḍēya Purāṇa, (English) Fasc. 1-9 @ 1/- each	9	0
Markandeya Purana (Text), Fasc. 4-7 @ /10/ each	2	8
..imāṃsā Darçana, (Text) Fasc. 9, 11-17 @ /10/ each	5	0
..irror of Composition (English), Fasc. 1-4 @ 1/- each	5	0
..ugdhabodha Vyakarana, Vol. I, Fasc. 1-7 @ /10/ each	4	6
..irukta (2nd edition), Vol. I, Fasc. 1-2 @ 1/4/	2	8
Nirukta (old edition), Vol. I, Fasc. 1, 2, 4, 5, 6, Vol. II, Fasc. 5, 6; Vol. III, Fasc. 1-6; Vol. IV, Fasc. 1-8 @ /10/ each	13	2
..ityācārapaddhati, Fasc. 1-7 @ /10/ each	4	6
..ityācārapradīpa, Vol. I, Fasc. 1-8, Vol. II, Fasc. 1-4 @ /10/ each	7	8
..risimha Tapani of Atharva Veda (Text), Fasc. 1-3 @ /10/ each	1	14
..yayabinduṭīkā, Fasc. 1 @ /10/ each	0	10
..yaya Vartika Tatparya Parisudhi, Fasc. 1-4 @ /10/ each	2	8
Nyayavārtika, (Text), Fasc. 2-7 @ /10/ each	3	12
..yayasarah	2	6
..admawati, Fasc. 1-6 @ 2/- each	12	0
..arāçara Smṛti, Vol. I, Fasc. 2-8, Vol. II, Fasc. 1-6; Vol. III, Fasc. 1-6 @ /10/ each	11	14
..arāçara, Institutes of (English) @ 1/- each	1	0
Pariciṣṭa Pravan (Text), Fasc. 5 @ /10/ each	0	10
..arīksamukha Sutram	1	0
..rabandhacintāmaṇi (English) Fasc. 1-3 @ 1/4/ each	3	12
..rakrita-Paingalam, Fasc. 1-7 @ /10/ each	4	6
..rakrita Lakshanam	1	8
..rthviraj Vijaya, Fasc. 1	0	10
..asarnavam, Fasc. 1-3	3	12
..avisiddhanta Manjari, Fasc. 1	0	10
..aḍdarsana-Samuccaya, Fasc. 1-3 @ /10/ each	1	14
..aduktikarnamrita, Fasc. 1 @ /10/ each	0	10
..amaraicca Kaha, Fasc. 1-7, @ /10/ each	4	6
..amvada Sanhita, Vol. 1, Fasc. 1-4, 6-10; Vol. 2, Fasc. 2-6; Vol. 3, Fasc. 1-7; Vol. 4, Fasc. 1-6; Vol. 5, Fasc. 1-8 @ /10/ each	21	14
Sankara Vijaya (Text) Fasc. 2-3 @ /10/ each	1	4
Sankhya Aphorisms of Kapila (English), Fasc. 2	1	0
Sankhya Pravachana Bhashya, Fasc. 2	0	10
Sāṅkhya Sūtra Vṛtti, Fasc. 1-4 @ /10/ each	2	8
Ditto (English) Fasc. 1-3 @ 1/- each	3	0
..ava Parinahya, Fasc. 1-2	1	4
..ix Buddhist Nyaya Tracts.	0	10

हासशोकद्वेषहर्षानसतोऽप्यात्मनि स्फुटम् ।
स्वामिनोऽग्रे लोभवन्तो नाटयन्ति नटा इव ॥ १० ॥
आरभ्यते पूरयितुं लोभगर्तो यथा यथा ।
तथा तथा महच्चित्रं मुहुरेष विवर्धते ॥ ११ ॥
अपि नामैष पूर्येत पयोभिः पयसां पतिः ।
न तु त्रैलोक्यराज्येऽपि प्राप्ते लोभः प्रपूर्यते ॥ १२ ॥
अनन्ता भोजनाच्छादविषयद्रव्यसंचयाः ।
भुक्तास्तथापि लोभस्य नांशोऽपि परिपूर्यते ॥ १३ ॥
लोभस्त्यक्तो यदि तदा तपोभिरफलैरलम् ।
लोभस्त्यक्तो न चेत् तर्हि तपोभिरफलैरलम् ॥ १४ ॥
मथित्वा शास्त्रसर्वस्वं मयैतदवधारितम् ।
लोभस्यैकस्य हानाय प्रयतेत महामतिः ॥१५॥१८॥२०॥२१॥

लोभस्वरूपं निरूप्य तज्जयोपायमुपदिशति—

लोभसागरमुद्वेलमतिवेलं महामतिः ।
संतोषसेतुबन्धेन प्रसरन्तं निवारयेत् ॥२२॥

लोभं गम्भीरापारत्वेन सागरमिव, उद्वेलमुद्गतवेलं तत्तदुत्कलिकाबाहुल्येन विस्तीर्णच्छायम्, अतिवेलं भृशम्, एतच्च 'निवारयेत्' इति क्रियाया विशेषणम् । 'प्रसरन्तम्' इति लोभसागरस्य विशेषणम् । महामतिर्मुनिः । निवारणकारणमुपदिशति—संतोषसेतुबन्धेन संतोषो लोभप्रतिपक्षभूतो मनोधर्मः स एव सेतुबन्धो

Dana Kriya Kaumudi, Fasc. 1-2 @ /10/ each 1
*Deça Rupa (Text), Fasc. 2-3, @ /10/ each 1
Dhatupatha, Fasc. 1, @ /10/ each 0
Dictionary of the Kashmiri Language, Part 1 15
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1-7 @ /10/ each 4
Ditto Ācārasāra Vol. II, Fasc. 2-4 @ /10/ each 3
Gobhiliya Grihya Sutra, Vol. I, @ /10/ each 3
Ditto Vol. II, Fasc. [illegible]-2 @ 1/4/ each 2
Ditto (Appendix) Gobhila Parisista 2
Ditto Grihya Sangraha 0
Gopatha Brahman of Atharva Veda (Text and English), Fasc. 1-2, @ 1/- each 2
Haralata 1
Institutes of Vishnu (Text), Fasc. 1-2, /10/ each 1
Kala Madhava (Text), Fasc. 2-4, @ /10/ each 2
Kāla Viveka, Fasc. 1-7 @ /10/ each 4
Karmapradipa, Fasc. 1 1
Kātantra, Fasc. 1-6 @ /12/ each ... 4
Katha Sarit Sagara (English), Fasc. 1-14 @ 1/- each 14
Kavi Kalpa Lata, Fasc. 1 0
Kavindravacana Samuccayah 3
Kiranavali, Fasc. 1-3 @ /10/ each 1
Kūrma Purāṇa, Fasc. 1-9 @ /10/ each ... 5
*Lalita Vistara (Text), Fasc. 2-6 @ /10/ each ... 3
Ditto (English), Fasc. 1-3 @ 1/- each ... 3
Madana Pārijāta, Fasc. 1-11 @ /10/ each ... 6
Maha-bhāṣya pradipōdyōta, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-12; Vol. III, Fasc. 1-10 @ /10/ each 19
Ditto Vol. IV, Fasc. [illegible] @ [illegible] each ... 3
Maitri, or Maitrayaniya Upanishad, Fasc. 1 0
Manutikā Sangraha, Fasc. 1-3 @ /10/ each 1
Mārkaṇḍēya Purāṇa, (English) Fasc. 1-9 @ 1/- each 9
*Markandeya Purana (Text), Fasc. 4-7 @ /10/ each ... 2
*Mimamsā Darsana, (Text) Fasc. 9, 11-17 @ /10/ each 5
Mirror of Composition (English), Fasc. 1-4 @ 1/- each 5
Mugdhabodhia Vyakaraṇa, Vol. I, Fasc. 1-7 @ /10/ each 4
Nirukta (2nd edition), Vol. I, Fasc. 1-2 @ 1/4/ 2
*Nirukta (old edition), Vol. I, Fasc. 1, 2, 4, 5, 6; Vol. II, Fasc. 5, 6; Vol. III, Fasc. 1-6; Vol. IV, Fasc. 1-8 @ /10/ each 13
Nityācārapaddhati, Fasc. 1-7 @ /10/ each 4
Nityācārapradipa, Vol. I, Fasc. 1-8, Vol. II, Fasc. 1-4 @ /10/ each ... 7
Nrisimha Tapani of Atharva-Veda (Text), Fasc. 1-3 @ /10/ each ... 1
Nyayabindutikā, Fasc. 1 @ /10/ each 0
Nyaya Vartika Tatparya Parisudhi, Fasc. 1-4 @ /10/ each 2
*Nyayavārtika, (Text), Fasc. 2-7 @ /10/ each 3
Nyayasarah 2
Padumawati, Fasc. 1-6 @ 2/- each 12
Parāçara Smṛti, Vol. I, Fasc. 2-8, Vol. II, Fasc. 1-6; Vol. III, Fasc. 1-6 @ /10/ each 11
Parāçara, Institutes of (English) @ 1/- each 1
*Pariçista Parvan (Text), Fasc. 5 @ /10/ each 0
Pariksamukha Sutram 1
Prabandhacintāmaṇi (English) Fasc. 1-3 @ 1/4/ each 3
Prakrita-Paingalam, Fasc. 1-7 @ /10/ each 4
Prakrita Lakshanam 1
Prthviraj Vijaya, Fasc. 1 0
Rasarnavam, Fasc. 1-3 3
Ravisiddhanta Manjari, Fasc. 1 0
Saddarsana-Samuccaya, Fasc. 1-3 @ /10/ each 1
Sādukti-karnamrita, Fasc. 1 @ /10/ each 0
Samaraicca Kaha Fasc. 1-7, @ /10/ each 4
*Samvada Sanhita, Vol. [illegible], Fasc. 1-4, 6-10; Vol. 2, Fasc. 2-6; Vol. 3, Fasc. 1-7; Vol. 4, Fasc. 1-6; Vol. 5, Fasc. 1-8 @ /10/ each ... 21
*Sankara Vijaya (Text) Fasc. 2-3 @ /10/ each 1
*Sankhya Aphorisms of Kapila (English), Fasc. 2 1
*Sankhya Pravachana Bhashya, Fasc. 2 0
Sāṅkhya Sūtra Vritti, Fasc. 1-4 @ /10/ each ... ...

BIBLIOTHECA INDICA

A COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.
NEW SERIES, NO. 1444

योगशास्त्रम् ।

स्वोपज्ञविवरणसहितम् ।



THE YOGAŚASTRA,

With the commentary called
SVOPAJNAVIVARANA.

BY

ŚRI HEMACHANDRĀCHĀRYA.

EDITED BY

ÇASTRA VIÇĀRADA JAINĀCARYA
ÇRĪ VIJAYA DHARMA SŪRI.

FASCICULUS VI.

Calcutta:
PRINTED BY BISHNU PADA HAZRA, AT THE SANSKRIT PRESS
No. 124-2-1 Manicktolla Street,
AND PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL, 1, PARK STREET.
1921.

विनेन्द्रियजयं नैव कषायाञ्जेतुमीश्वरः।
हन्यते हैमनं जाड्यं न विना ज्वलितानलम् ॥२४॥

समकालसंभविनोरपि कषायजयेन्द्रियजययोः प्रदीपप्रकाशयोरिवास्ति कार्यकारणभावः; अत उक्तम्—इन्द्रियजयं विना न कषायजयः। हन्यते इत्यादिना दृष्टान्तः। हैमनजाड्यसदृशाः कषायाः, ज्वलितानलप्रायश्चेन्द्रियजयः। हेमन्ते भवं हैमनम्, हेमन्ताद् वा तलुक् च ॥६।३।८१॥ इत्यनेनाणि तलोपे वृद्धौ च सिद्धम् ॥ २४ ॥

इन्द्रियजयः कषायजयहेतुत्वेनोक्तः, अजितानां त्विन्द्रियाणां न कषायजयहेतुत्वं प्रत्युतापायहेतुत्वमेवेत्याह—

अदान्तैरिन्द्रियहयैश्चलैरपथगामिभिः।
आकृष्य नरकारण्ये जन्तुः सपदि नीयते ॥२५॥

इन्द्रियाण्येव हया अश्वा इन्द्रियहयास्तैश्चलैरेकत्रानवस्थायिभिः प्रकृत्या, अदान्तैरजितैः सद्भिरपथगामिभिरुन्मार्गचारिभिराकृष्य बलात्कारेण कृष्ट्वा जन्तुः प्राणी, नरका एवारण्यं विविधभीतिहेतुत्वाद् नरकारण्यं तस्मिन् सपदि तत्क्षणाद् नीयते। यथाऽदान्तो हयोऽपथगामित्वेन स्वमारोहकमरण्ये नयति तथैवाजितैरिन्द्रियैर्जन्तुर्विविधापायबहुले नरके नीयत इत्यर्थः ॥२५॥

कथमजितानीन्द्रियाणि नरकं नयन्तीत्याह—

इन्द्रियैर्विजितो जन्तुः कषायैरभिभूयते ।
वीरैः कृष्टेष्टकः पूर्वं वप्रः कैः कैर्न खण्ड्यते ? ॥२६॥

इन्द्रियाणि जेतुमशक्तोऽत एव तैर्विजितः, यान् जेतुमिन्द्रियजय उपदिश्यते तैरेव प्रत्युत कषायैरभिभूयते । कषायाभिभूतश्च नरकं यातीति सुप्रसिद्धमेव । ननु यदीन्द्रियजयेऽशक्तो जन्तुः, तर्हीन्द्रियजनितैव बाधास्तु, कोऽवसरः कषायबाधायाः ? इत्याशङ्कामपनेतुं दृष्टान्तमाह—वीरैर्विक्रान्तैः कृष्टा इष्टका यस्मात् स कृष्टेष्टकः वप्रः प्राकारः पूर्वं प्रथमम्, पश्चात् कैः कैरवीरैरपि एकैकेष्टकाशकलकर्षणेन न खण्ड्यते न खण्डशो नीयते ?। अयमर्थः—यथा वीरपुरुषपातितच्छिद्रः प्राकारः कर्मकरप्रायाणामपि गम्यो भवति तथैव वप्रप्रायः प्राणी वीरप्रायैरिन्द्रियैर्भग्नप्राय इतरपुरुषप्रायैः कषायैर्बाध्यते, इन्द्रियानुसारित्वात् कषायाणाम् ॥ २६ ॥

न केवलमनिर्जितैरिन्द्रियैः कषायाभिभूतो जन्तुर्नरके नीयते, यावदिहलोकेऽपि अनिर्जितानीन्द्रियाण्यपायकारणान्येवेत्याह—

कुलघाताय पाताय बन्धाय च वधाय च ।
अनिर्जितानि जायन्ते करणानि शरीरिणाम् ॥२७॥

शरीरिणां जन्तूनां करणानीन्द्रियाणि अनिर्जितानि यदा-न्मानि जायन्ते । कस्मै ?। कुलघाताय कुलघातो वंशोच्छेदः

पाताय पातो राज्यादिभ्रंशः, बन्धाय बन्धो नियमनम्, वधाय वधः प्राणनिग्रहः। तत्र कुलघातायेन्द्रियाणि रावणस्येव। तस्य निर्जितेन्द्रियस्य परदारान् रिरंसमानस्य रामलक्ष्मणाभ्यां कुल-क्षयः कृत इत्युक्तपूर्वम्। पातायेन्द्रियाणि सौदासस्येव। स हि राज्यं पालयन् मांसप्रियतया नानाविधैर्मांसैरात्मानं प्रीणयन्नेकदा सूपकारैः संस्कृते मांसे विडालादिभिर्भक्षिते सति तस्मिन् दिने धार्मिकैः श्रावकजनै राजानं प्रसाद्यामारिपटहे दापिते जीववधा-भावादन्यमांसाप्राप्तौ सुलभस्य कस्यचिड्डिम्भस्य मांसं परिवेष्य राजा परितोषितः। स चैकान्ते सूपकारान् शपथदानपूर्वकं पप्रच्छ। तैश्च यथास्थिते कथिते मानुषमांसगृद्ध्या सकलनगरे डिम्भमानुषग्रहणाय स्वपुरुषान् नियुक्तवान्। एतच्च ज्ञात्वा पौरजानपदैर्मन्त्रिभिश्च भीतभीतैरेकमतीभूय मद्यपानप्रमत्तो बद्ध्वाऽरण्ये विमुक्तः। स च राज्यात्, कुलात् परिवाराच्च पतितो-ऽरण्ये श्वापद इव दुःखमनुबभूव। बन्धायेन्द्रियाणि चण्डप्रद्योत-स्येव। वधाय मृत्यवे इन्द्रियाणि रावणस्येवेत्युक्तपूर्वम्।

अत्रान्तरश्लोकाः—

इन्द्रियैः स्वार्थविवशैः कस्को नैव विडम्ब्यते।
अपि विज्ञातशास्त्रा[1]र्थैर्विचेष्टन्ते बालका इव ॥ १ ॥

---

(1) स ब -र्थाश्चेष्यन्ते।

एवं सामान्येनेन्द्रियदोषानभिधाय स्पर्शनादीन्द्रियाणां प्रत्येकमपि दोषानाह —

वशास्पर्शसुखास्वादप्रसारितकरः करी ।
आलानबन्धनव्यसनमासादयति तत्क्षणात् ॥२८॥
पयस्यगाधे विचरन् गिलन् गलगतामिषम् ।
मैनिकस्य करे दीनो मीनः पतति निश्चितम् ॥२९॥
निपतन् मत्तमातङ्गकपोले गन्धलोलुपः ।
कर्णतालतलाघाताद् मृत्युमाप्नोति षट्पदः ॥३०॥
कनकच्छेदसंकाशशिखालोकविमोहितः ।
रभसेन पतन् दीपे शलभो लभते मृतिम् ॥ ३१ ॥
हरिणो हारिणीं गीतिमाकर्णयितुमुद्धुरः ।
आकर्णाकृष्टचापस्य याति व्याधस्य वेध्यताम् ॥३२॥

स्पष्टाः नवरं वशा हस्तिनी, गलो रज्जुबद्धो लोहकण्टकः, मीनान् हन्तीति मैनिको धीवरः, कर्णताल एव तलचपेटस्तेनाघातः, गीतिर्गीतम् ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥

उपसंहरति —

एवं विषय एकैकः पञ्चत्वाय निषेवितः ।
कथं हि युगपत् पञ्च पञ्चत्वाय भवन्ति न ? ॥३३॥

विषय इन्द्रियस्य गोचरः इन्द्रियप्रकरणेऽपि यद् विषयस्य

दोषदर्शनम्, तद् विषयद्वारेणैवेन्द्रियाणां दोषजनकत्वमिति दर्शनार्थम्। एकैको विषयो गजादीनां पञ्चत्वाय मरणाय। यस्तु पुमान् सर्वेषु विषयेष्वासक्तस्तं प्रत्याह—कथं हि युगपत् पञ्चापि विषयाः सेविताः पञ्चत्वाय न भवन्ति?—अपि तु भवन्त्येवेति। यदाह—

पञ्चसु सक्ताः पञ्च विनष्टा यत्रागृहीतपरमार्थाः।
एकः पञ्चसु सक्तः प्रयाति भस्मान्ततां मूढः ॥ १ ॥ ३३ ॥

इन्द्रियदोषानभिधाय तज्जयोपदेशमाह—

तदिन्द्रियजयं कुर्याद् मनःशुद्ध्या महामतिः।
यां विना यमनियमैः कायक्लेशो वृथा नृणाम् ॥ ३४ ॥

यस्मादेवंविधानर्थसार्थसमर्थकानीन्द्रियाणि तत् तस्मादिन्द्रियाणां भावेन्द्रियाणां जयं कुर्यात्। द्विविधानि हीन्द्रियाणि, द्रव्येन्द्रियाणि भावेन्द्रियाणि च। तत्र द्रव्येन्द्रियाणि स्पर्शनेन्द्रियाद्याकारपरिणतानि पुद्गलद्रव्याणि, भावेन्द्रियाणि स्पर्शादिष्वभिलाषोपायरूपाणि तेषां जयो लौल्यपरिहारेणावस्थानम्।

अत्रान्तरश्लोकाः—

अजितेन्द्रियग्रामो यतो दुःखैः प्रबाध्यते।
तस्माज्जयेदिन्द्रियाणि सर्वदुःखविमुक्तये ॥ १ ॥
न चेन्द्रियाणां विजयः सर्वथैवाप्रवर्तनम्।
रागद्वेषविमुक्त्या तु प्रवृत्तिरपि तज्जयः ॥ २ ॥

अजन्तो विषयोऽस्पर्शैरिन्द्रियैः स्वसंश्रयः ।
रागद्वेषौ पुनस्तत्र मतिमान् परिवर्जयेत् ॥ ३ ॥
दान्तदान्तानीन्द्रियाणि सदा संयमयोगिनाम् ।
अदान्तानि हितार्थेषु हतान्यहितवस्तुषु ॥ ४ ॥
जितान्यक्षाणि मोक्षाय संसारायाऽजितानि तु ।
तदेतदन्तरं ज्ञात्वा यद् युक्तं तत् समाचर ॥ ५ ॥
स्पर्शे रतौ च तूल्यादेरुपलादेश्च कर्कशे ।
भव स्वस्थो जित्वा जेता स्पर्शनमिन्द्रियम् ॥ ६ ॥
रसे स्वादौ च भक्ष्यादेरितरस्मिन्नथापि वा ।
प्रीत्यप्रीती विमुच्योच्चैर्जिह्वेन्द्रियजयी भव ॥ ७ ॥
घ्राणदेशमनुप्राप्ते शुभे गन्धेऽपरत्र वा ।
ज्ञात्वा वस्तुपरीणामं घ्राणेन्द्रियजयं कुरु ॥ ८ ॥
मनोज्ञं रूपमालोक्य यदिवा तद्विलक्षणम् ।
त्यजन् हर्षं जुगुप्सां च जय त्वं चक्षुरिन्द्रियम् ॥ ९ ॥
स्वरे श्रव्ये च वीणादेः खरोष्ट्रादेश्च दुःश्रवे ।
रतिं जुगुप्सां च जयन् श्रोत्रेन्द्रियजयी भव ॥ १० ॥
कोऽपि नास्तीह विषयो मनोज्ञ इतरोऽपि वा ।
य इन्द्रियैः नोपभुक्तस्तत्स्वास्थ्यं किं न सेव्यते ॥ ११ ॥
शुभा अप्यशुभायन्ते शुभायन्तेऽशुभा अपि ।
विषयास्तत् क्व रज्येत विरज्येत क्व चेन्द्रियैः ॥ १२ ॥
स एव रुच्यो द्वेष्यो वा विषयो यदि हेतुतः ।
शुभाशुभत्वं भावानां तन्न तत्त्वेन जातुचित् ॥ १३ ॥

एवं विमृश्य विषयेषु शुभाशुभत्व-
मौपाधिकं तदविमुक्तिविरक्तचेताः ।
इन्द्रियार्थमधिकृत्य जहीहि रागं
द्वेषं तथेन्द्रियजयाय कृताऽभिलाषः ॥ १४ ॥

अथैवं दुर्जयेन्द्रियजयं प्रति कोऽसाधारण उपाय इत्याह मनःशुद्धा मनसो निर्मलत्वेन सत्यन्यान्यपि यमनियमा... आसनप्राणायामादीनीन्द्रियजयकारणानि किन्तु साधकतम... शुद्धिरेव । अन्यानि तु नैकान्तिकात्यन्तिकानि वा, ... शुद्धे हि मनसि यमनियमादीनि सन्त्यपि नेन्द्रियजयनिबन्धनानि, ... एतदेवाह — यां विना यमिनामित्यादि । यां मनःशुद्धिं विना ... मूलगुणा नियमा उत्तरगुणास्तैकफलत्वाद् ... कायक्लेशः स तृणां पूरुषाणां वृथा । सा च मनःशुद्धिः ... ... भवति ... । कस्यचित् तु यमनिय... ... निवृत्तिर्मनसि भवति ॥ ३४ ॥

... तदाह —

... अपारं ... निरङ्कुशः ।
[illegible] संसाराऽवनिगते आत्मनाम् ॥ ३५ ॥

[illegible]

तदपि कुतः निर्गतकल्पभावनादिनिवारकत्वात् अङ्कुशो यस्मा-
त् तथा । प्रपातयति प्रकर्षेण पातयति संसार एवावर्तप्रधानो
गर्तस्तत्र । जगत्त्रयीमिति । न च कश्चिद् जन्तुर्जगत्त्रयेऽप्यस्ति
यो निरङ्कुशेन मनसा संसारावर्तगर्ते न पात्यते । जगत्त्रयगतानां
जन्तूनां संसारावर्तगर्ते पातनाद् जगत्त्रयीं पातयतीति उपचारा-
द्युक्तम् ॥ ३५ ॥

पुनरनियन्त्रितं मनसि दोषमाह—

तप्यमानांस्तपो मुक्त्यै गन्तुकामान् शरीरिणः ।
वात्येव तरलं चेतः क्षिपत्यन्यत्र कुत्रचित् ॥ ३६ ॥

तप्यमानान् कुर्वाणान् किं तत्तपः । तथा मुक्त्यै मोक्षे
गन्तुकामान् गन्तुमध्यवसितान् शरीरिणो जन्तून् । तरलमेकत्रा-
ऽनवस्थायि चेतो मानसं कर्तृ क्षिपत्यन्यत्र कुत्रचित् मोक्षादन्यत्र
नरकादौ । किंवद् वात्येव, यथान्यत्र गन्तुकामान् मनुष्यादीन्
वातसमूहो विवक्षिताद् देशात् अन्यत्र नयति, एवं तरलं
चेतोऽपि ॥ ३६ ॥

पुनरनियन्त्रितस्य मनसो दोषमाह—

अनिरुद्धमनस्कः सन् योगश्रद्धां दधाति यः ।
पद्भ्यां जिगमिषुर्ग्रामं स पङ्गुरिव हस्यते ॥ ३७ ॥

न निरुद्धं चापल्यात् व्यावर्तितं मनो येन सोऽनिरुद्धमनस्कः
सन् योगश्रद्धां अहं योगीत्यभिमानं यो दधाति धारयति स हस्यते
विवेकिभिः । क इव कथम्भूतः पङ्गुरिव पद्भ्यां पादाभ्यां ग्रामान्तरं

जिगमिषुः। पादप्रचाररूपो हि मनोरोधस्तदभावे कथं पङ्गु-ग्रामान्तरजिगमिषातुल्या योगश्रद्धेति ॥ ३७ ॥

न केवलमनिरुद्धमनस्कस्य योगश्रद्धा विफला यावदशुभ-कर्माणि बहुतराण्यस्य प्रादुःषन्तीत्युत्तरार्द्धेन प्रतिपादयितुं पूर्वार्द्धेन कारणं मनोरोधमुपदिशति—

मनोरोधे निरुध्यन्ते कर्माण्यपि समन्ततः।
अनिरुद्धमनस्कस्य प्रसरन्ति हि तान्यपि ॥ ३८ ॥

मनसो रोधो विषयेभ्यो निवारणं तस्मिन् सति निरुध्यन्ते प्रतिबाध्यन्ते आश्रवनिरोधात् कर्माण्यपि ज्ञानावरणादीन्यति-प्रबलानि समन्ततः सामस्त्येन। मनोरोधायत्तत्वात् कर्मरोधस्य। प्रकृतं योजयति अनिरुद्धमनस्कस्य पुंसस्तान्यपि कर्माणि प्रसरन्ति विवर्द्धन्ते मनःप्रसराधीनत्वात् कर्मप्रसरस्य ॥ ३८ ॥

तदेतन्निश्चित्य मनोनियन्त्रणाय यत्नः कार्य इत्येतदाह—

मनःकपिरयं विश्वपरिभ्रमणलम्पटः।
नियन्त्रणीयो यत्नेन मुक्तिमिच्छुभिरात्मनः ॥३९॥

मनो भावमन एव कपिर्मर्कटः। अयमिति सर्वेषां स्व-संवेदनसिद्धः कपित्वरूपेण साधर्म्यमाह—विश्वस्मिन् जगति परिभ्रमणमन्यान्यविषयग्रहरूपमनवस्थानं तत्र लम्पटो लोलुप-स्तदेवंविधो मनःकपिर्नियन्त्रणीयो निरोद्धव्यः। चापलं परि-त्याज्योचिते विषये परिस्थाप्यः। यत्नेन तत्त्वाभ्यासरूपेण।

किं कुर्वद्भिः मुक्तिं मोक्षमिच्छन्तीत्येवंशीलास्तैरात्मनः स्वस्य । मनश्चापत्लनिरोधस्य साध्या हि मुक्तिरिति ॥ ३९ ॥

इदानीमिन्द्रियजयहेतुं मनःशुद्धिं प्रस्तौति—

दीपिका खल्वनिर्वाणा निर्वाणपथदर्शिनी ।
एकैव मनसः शुद्धिः समाम्नाता मनीषिभिः ॥४०॥

एकैव सा यमनियमादिरहितापि मनःशुद्धिः दीपिकेव दीपिका, किंविशिष्टा ?, अनिर्वाणा अविध्याता, निर्वाणस्य मोक्षस्य पन्था निर्वाणपथस्तं दर्शयतीत्येवंशीला निर्वाणपथदर्शिनी, मुमुक्षो इति शेषः, समाम्नाता पारम्पर्येण कथिता, कैः, मनीषिभिः पूर्वाचार्यैः, यदाह—

ज्ञाने ध्याने दाने माने मौने सदोद्यतो भवतु ।
यदि निर्मलं न चित्तं तदा हुतं भस्मनि समग्रम् ॥१॥४०॥

मनःशुद्धेरन्वयव्यतिरेकाभ्यां गुणान्तरदर्शनेनोपदेशमाह—

सत्यां हि मनसः शुद्धौ सन्त्यसन्तोऽपि यद्गुणाः ।
सन्तोऽप्यसत्यां नो सन्ति सैव कार्या बुधैस्ततः ॥४१॥

यद् यस्मात् सत्यां विद्यमानायां मनसः शुद्धावसन्तोऽप्यविद्यमाना अपि सन्ति भवन्ति । तत्फलसद्भावाद् गुणाः क्षान्त्यादयः, सन्तो विद्यमाना अपि गुणा असत्यां मनसः शुद्धौ नो सन्ति न सन्त्येव, तत्फलाभावात् । ततः कारणादन्वयव्यतिरेकाभ्यां निश्चितफला सैव मनःशुद्धिः कार्या बुधैर्विवेकिभिः ॥४१॥

ये तु आस्तामेषा मनःशुद्धिः, तपोबलेनैव मु
साधयिष्यामः, इति प्रतिपद्यन्ते, तान् प्रत्याह—

मनःशुद्धिमबिभ्राणा ये तपस्यन्ति मुक्तये ।
त्यक्त्वा नावं भुजाभ्यां ते तितीर्षन्ति महार्णव

मनःशुद्धिमबिभ्राणा अधारयन्तो ये मुक्तये मु
तपस्यन्ति तपःक्लेशमनुभवन्ति, ते दुर्ग्रहग्रहिलाः संनि
परित्यज्य महार्णवं भुजाभ्यां तरीतुमिच्छन्ति । यथा ना
महार्णवो भुजाभ्यां दुस्तरः, तथा मनःशुद्धिमन्तरेण
मुक्तिर्दुष्प्रापा ॥४२॥

ये तु ध्यानं तपःसहितं मुक्तिदं इति वदन्तो
मुपेक्षन्ते, ध्यानमेव तु कर्मक्षयकारणं इति प्रतिप
प्रत्याह —

तपस्विनो मनःशुद्धिविनाभूतस्य सर्वथा ।
ध्यानं खलु मुधा चक्षुर्विकलस्येव दर्पणः ॥

तपस्विनोऽपि ध्यानं, खलु निश्चयेन, मुधा । किं विशि
सर्वथा मनःशुद्धिविनाभूतस्य लेशेनापि मनःशुद्धिरहितस्य
मनःशुद्धिरहितानामपि तपोध्यानबलेन नवमग्रैवेयकं या
श्रूयते, तथापि तत् प्रायिकम्, न च तत् फलत्वेन विव
मोक्षस्यैव फलरूपत्वात् । अतो ध्यानं मुधा । यथा
रूपनिरूपणकारणमपि चक्षुर्विकलस्य मुधा, तथा ध्या
भावः ॥४३॥

उपसंहरति—

तदवश्यं मनःशुद्धिः कर्तव्या सिद्धिमिच्छता ।
तपःश्रुतयमप्रायैः किमन्यैः कायदण्डनैः ॥४४॥

तत् तस्मात् अवश्यं नियमेन मनःशुद्धिः कर्त्तव्या । सिद्धिं मोक्षमभिलषता । आवश्यकत्वे हेतुमाह—किमन्यैः कायदण्डनैः । कायो दण्ड्यत एभिरिति कायदण्डनास्तैः, कैः ?, तपःश्रुतयमप्रायैः—तपोऽनशनादि, श्रुतमागमः, यमा महाव्रतानि । प्रायग्रहणाद् नियमादयो गृह्यन्ते । अत्रेदमनुयोक्तव्यम्—केयं मनसः शुद्धिः ? लेश्याविशुद्ध्या मनसो निर्मलत्वम् । काः पुनर्लेश्याः ? कृष्णनीलकापोततेजःपद्मशुक्लवर्णद्रव्यसाचिव्यादात्मनस्तदनुरूपः परिणामः, यदाह—

कृष्णादिद्रव्यसाचिव्यात् परिणामो य आत्मनः ।
स्फटिकस्येव तत्रायं लेश्याशब्दः प्रवर्त्तते ॥ १ ॥

तत्र कृष्णवर्णपुद्गलसन्निधाने य आत्मनोऽशुद्धतमः परिणामः सा कृष्णलेश्या । नीलद्रव्यसन्निधाने य आत्मनोऽशुद्धतरः परिणामः सा नीललेश्या । कापोतवर्णद्रव्यसान्निध्यात्तदनुरूपोऽशुद्ध आत्मपरिणामः कापोतलेश्या । तेजोवर्णद्रव्यसान्निध्यात्तदनुरूपः शुद्ध आत्मपरिणामस्तेजोलेश्या । पद्मवर्णद्रव्यसान्निध्यात्तदनुरूपः शुद्धतर आत्मपरिणामः पद्मलेश्या । शुक्लवर्णद्रव्यसान्निध्याच्छुद्धतम आत्मपरिणामः शुक्ललेश्या ।

'विडिमक्कोडणमइओ जो बेइ तरुं तु छिंद मूलाओ ।
सो वट्टइ किण्हाए साल महल्लाओ नीलाए ॥ ५ ॥
हवइ पसाहा काऊ गुच्छे तेऊ फलाणि पम्हाए ।
पडियाणि सुक्कलेसा अहवा अन्नं उआहरणं ॥ ६ ॥
चोरा गामवहत्थं विणिग्गया एगु बेइ घाएह ।
जं पेच्छह तं सव्वं दुपयं चउप्पयं वावि ॥ ७ ॥
बीओ माणुस पुरिसे य तइओ साउहे चउत्थो य ।
पंचमओ जुज्झंते छट्ठो उण तत्थिमं भणइ ॥ ८ ॥
एक्कं ता हरह धणं बीअं मारेह मा कुणह एयं ।
केवल हरह धणं ता उवसंहारो इमो तेसिं ॥ ९ ॥
सव्वे मारेह त्ति वट्टइ सो किण्हलेसपरिणामो ।
एवं कमेण सेसा जा चरमो सुक्कलेसाए ॥ १० ॥

---

(१) विटपाक्रोटमयो योऽब्रवीत् तरुं तु छिन्त मूलतः ।
स वर्तते कृष्णायां शाखा महतीर्नीलायाम् ॥ ५ ॥
भवति प्रशाखाः (छिन्तेति) कापोती गुच्छांस्तैजसी फलानि पद्मा ।
पतितानि शुक्ललेश्या अथवाऽन्यदुदाहरणम् ॥ ६ ॥
चौरा ग्रामवधार्थं विनिर्गता एको ब्रवीति घातयत ।
यं प्रेक्षध्वं तं सर्वं द्विपदं चतुष्पदं वापि ॥ ७ ॥
द्वितीयो मनुष्यान्, पुरुषान् तृतीयः सायुधांश्चतुर्थस्तु ।
पंचमस्तु युध्यतः षष्ठः पुनस्तत्रेदं भणति ॥ ८ ॥
एकं तावद् हरत धनं द्वितीयं मारयत मा कार्षीतत् ।
केवलं हरत धनं तत् तदुपसंहारस्त्वयं तेषाम् ॥ ९ ॥
सर्वान् मारयतेति वर्तते स कृष्णलेश्यापरिणामः ।
एवं क्रमेण शेषा यावच्चरमः शुक्ललेश्यायाम् ॥ १० ॥

सकलं हित्वा आत्मा भावमनोरूपः स्वकीये स्वरूपे परमशुद्धि-लक्षणेऽवतिष्ठते स्थिरो भवति ॥ ४५ ॥

अथ रागद्वेषयोर्दुर्जयत्वं श्लोकत्रयेणाह—

आत्मायत्तमपि स्वान्तं कुर्वतामत्र योगिनाम् ।
रागादिभिः समाक्रम्य परायत्तं विधीयते ॥ ४६ ॥

आत्मायत्तमपि आत्मनि निमग्नमपि स्वान्तं मनः कुर्वतां योगिनामत्र जगति रागादिभी रागद्वेषाभ्यां तदविनाभूतेन च मोहेन समाक्रम्य रक्तं द्विष्टं मूढं च कृत्वा परायत्तमात्मनोऽनधीनं क्रियते ॥४६॥

तथा—

रक्ष्यमाणमपि स्वान्तं समादाय मनाग् मिषम् ।
पिशाचा इव रागाद्याश्छलयन्ति मुहुर्मुहुः ॥४७॥

रक्ष्यमाणमपि गोप्यमानमपि यमनियमादिभिर्मन्त्रतन्त्रप्रायैः स्वान्तं भावमनः, समादाय पुरस्कृत्य मनाग् मिषं स्वल्पं छलं प्रमादरूपं, छलयन्ति—आत्मवशं कुर्वन्ति। क एते? रागादयः क इव? पिशाचा इव। मुहुर्मुहुरिति यदा यदा प्रमादलेशोऽपि भवति तदा तदा छलयन्ति। यथा हि पिशाचा मन्त्रादिकृत-रक्षमपि साधकं छलं प्राप्यात्मवशं कुर्वन्ति, तथा रागादयोऽपि योगिमन इति ॥४७॥

तथा —

रागादितिमिरध्वस्तज्ञानेन मनसा जनः ।
अन्धेनान्ध इवाकृष्टः पात्यते नरकावटे ॥ २८ ॥

रागादय एव सम्यग्दर्शनविघातहेतुत्वात् तिमिरमज्ञानविप्लवः तेन ध्वस्तं ज्ञानं तत्त्वालोको यस्य तेन तथाविधेन मनसा आकृष्टो जनो नरकावटे नरककूपे पात्यते । केन क इव । अन्धेनान्ध इव । रागादिभिरन्धीकृतेन मनसा जनोऽप्यन्धः, तस्य मार्गादर्शकत्वात् । ततो यथाऽन्धेनान्धः समाकृष्योऽवटे पात्यते तथाऽन्धेन मनसा अन्धो जनो नरकावटे पात्यते ।

अत्रान्तरश्लोकाः—

द्रव्यादिषु रतिप्रीती राग इत्यभिधीयते ।
तेष्वेवारतिमप्रीतिं चाहुर्द्वेषं मनीषिणः ॥ १ ॥
उभावेतौ दृढतरं बन्धनं सर्वजन्मिनाम् ।
सर्वदुःखानोकहानां मूलकन्दौ प्रकीर्तितौ ॥ २ ॥
कः सुखे विस्मयस्मेरो दुःखे कः कृपणो भवेत् ? ।
मोक्षं को नाप्नुयाद् [illegible] स्यातां न चेदिह ॥ [illegible]
रागेण [illegible] [illegible] ण चेतसः ।
[illegible] [illegible] वपि ॥ ४ ॥
दोषाः [illegible] [illegible] विचारकाः ।
[illegible] [illegible] परिच्छदः ।

तयोर्मोहः पिता बीजं नायकः परमेश्वरः ।
ताभ्यामभिन्नतत्त्वः सर्वदोषपितामहः ॥ ६ ॥
एवमेते वशौ दोषा नातो दोषान्तरं क्वचित् ।
तैरमी जन्तवः सर्वे भ्रमन्ति भववारिधौ ॥ ७ ॥
स्वभावेन हि जीवोऽयं स्फटिकोपलनिर्मलः ।
उपाधिभूतैरेतैस्तु तादात्म्येनावभासते ॥ ८ ॥
अराजकमहो ! विश्वं यदेभिः पश्यतोहरैः ।
ह्रियते ज्ञानसर्वस्वं स्वरूपमपि जन्मिनाम् ॥ ९ ॥
ये जन्तवो निगोदेषु येऽपि चासन्नमुक्तयः ।
सर्वत्राकृतवारणा पतत्येषां पताकिनी ॥ १० ॥
मुक्त्या वैरं किमेतेषां मुक्तिकामैः सहाथवा ।
येनोभयसमायोगस्तैर्भवन् प्रतिषिध्यते ॥ ११ ॥
दोषक्षयक्षमाणां हि किमुपेक्षाक्षमार्हताम् ।
जगदाश्चर्यकरं यत्र शान्तं दोषप्रदीपनम् ॥ १२ ॥
व्याघ्रव्यालजलाग्निभ्यो न बिभेति तथा मुनिः ।
लोकद्वयापकारिभ्यो रागादिभ्यो भृशं यथा ॥ १३ ॥
वर्त्मातिसंकटमहो ! योगिभिः समुपाश्रितम् ।
रागद्वेषौ व्याघ्रसिंहौ पार्श्वतो यस्य तिष्ठतः ॥१४॥४८॥

अथ रागद्वेषजयोपायमुपदिशति—

अस्ततन्द्रैरतः पुंभिर्निर्वाणपदकाङ्क्षिभिः ।
विधातव्यः समत्वेन रागद्वेषद्विषज्जयः ॥ ४९ ॥

यत एवंविधौ रागद्वेषौ, अतः कारणादस्ततन्द्रैर्निरस्तप्रमादैः

संतापहेतुनाऽनशनादिरूपेणार्थात् साम्यरहितेन जन्मकोटिभिर्बहुभिरपि जन्मभिः ॥ ५१ ॥

कथमन्तर्मुहूर्तमात्रेण साम्यं सर्वकर्मापनायकमित्याह—

कर्म जीवं च संश्लिष्टं परिज्ञातात्मनिश्चयः ।
विभिन्नीकुरुते साधुः सामायिकशलाकया ॥५२॥

सामायिकमेव समत्वमेव शलाका वंशादिमयी तया विभिन्नीकुरुते पृथक् करोति साधुर्यतिः। किं विभिन्नीकुरुते ?। कर्म जीवं च संश्लिष्टं संपृक्तम्, यथा श्लेपद्रव्यसंपृक्तानां पात्रादीनां शलाकया पृथग्भावः क्रियते तथा जीवकर्मणोरपि तादात्म्येन संबद्धयोः सामायिकेनेति । अयमेव कर्मक्षयः । न हि कर्मपुद्गलानामात्यन्तिकः क्षयः संभवति, नित्यत्वात् तेषाम्, आत्मनस्तु पृथग्भूतानि कर्माणि क्षीणानि इत्युच्यन्ते । ननु वाङ्मात्रमेतद् यत् सामायिकशलाकया साधुः कर्माणि पृथक् करोतीत्याह — परिज्ञातात्मनिश्चयः परिज्ञातः पुनः पुनः संविदित आत्मनिश्चय आत्मनिर्णयो येन स तथा। अयमर्थः—आत्मज्ञानमभ्यस्यंस्तथाविधावरणापगमेन तथा पुनः पुनः स्वसंवेदनेनात्मनिश्चयं दृढं करोति यथात्मरूपाद् भिन्नरूपाणि आत्मरूपावारकाणि च कर्माणि परमसामायिकबलेन निर्जरयति ॥५२॥

न केवलमात्मनिश्चयबलेन कर्माणि पृथक् करोति यावदात्मनि परमात्मदर्शनमपि भवतीत्याह—

रागादय एव ध्वान्तं तिरोधायकत्वात् ध्वान्तं तस्य विध्वंसस्तस्मिन् सति। केन?। सामायिकमेवांशुमानादित्यस्तेन। ततः किं स्यात्?। स्वस्मिन्नात्मनि परमात्मनः स्वरूपं योगिनः पश्यन्ति। सर्वेऽपि ह्यात्मानस्तत्त्वतः परमात्मान एव, केवलज्ञानस्य येन तेनांशेन सर्वत्र भावात्, यत् पारमर्षम् '(१)सव्वजीवाणं पि अ णं अक्खरस्साणंतभागो निच्चुग्घाडिओ चेव।' केवलं रागद्वेषादिदोषकलुषितत्वान्न साक्षात् परमात्मस्वरूपाभिव्यक्तिः। सामायिकांशुसम्प्रकाशनेन तु रागादितिमिरेऽपगते आत्मन्येव परमात्मस्वरूपमभिव्यक्तं भवति ॥ ५३ ॥

इदानीं साम्यप्रभावं व्यनक्ति —

स्निह्यन्ति जन्तवो नित्यं वैरिणोऽपि परस्परम्।
अपि स्वार्थकृते साम्यभाजः साधोः प्रभावतः ॥५४॥

अपि स्वार्थकृते स्वार्थनिमित्तमपि साम्यवतः साधोः प्रभावात् नित्यवैरिणोऽप्यहिनकुलादयः स्निह्यन्ति परस्परं मैत्रीं कुर्वन्ति। अयमर्थः—ईदृशः साम्यस्य महिमा यदेतत् स्वनिमित्तं कृतमपि परेषु नित्यवैरिषु पर्यवस्यति, यत् स्तुवन्ति विद्वांसः—

देवाकृष्य करेण केशरिपदं दन्ती कपोलस्थलीं
कण्डूयत्यहिरेव बभ्रुपुरतो मार्गं निरुध्य स्थितः।
व्याघ्रव्यात्तविशालवक्त्रकुहरं जिघ्रत्यजस्रं मृगो
यत्रैवं पशवः प्रशान्तमनसस्तामर्थये त्वद्भुवम् ॥ १ ॥

---

(१) सर्वजीवानामप्यक्षरस्यानन्तभागो नित्योद्घाटित एव।

लौकिका अपि साम्यवतां योगिनां स्तुतिमाहुर्यथा—तत्सन्निधौ वैरत्याग इति। अत्रान्तरश्लोकाः—

चेतनाचेतनैर्भावैरिष्टानिष्टतया स्थितैः ।
न मुह्यति मनो यस्य तस्य साम्यं प्रचक्षते ॥ १ ॥
गोशीर्षचन्दनालेपे वासीच्छेदे च बाहयोः ।
अभिन्ना चित्तवृत्तिश्चेत् तदा साम्यमनुत्तरम् ॥ २ ॥
अभिष्टोतरि च प्रीते रोषान्धे चापि शप्तरि ।
यस्याविशेषणं चेतः स साम्यमवगाहते ॥ ३ ॥
न हूयते तप्यते न दीयते वा न किञ्चन ।
अहो ! अमूल्यक्रीतेयं साम्यमात्रेण निर्वृतिः ॥ ४ ॥
प्रयत्नकृष्टैः क्लिष्टैश्च रागाद्यैः किमुपासितैः ? ।
अयत्नलभ्यं हृद्यं च श्रय साम्यं सुखावहम् ॥ ५ ॥
परोक्षार्थप्रतिक्षेपात् स्वर्गमोक्षावपह्नुताम् ।
साम्यशर्म स्वसंवेद्यं नास्तिकोऽपि न निह्नुते ॥ ६ ॥
कविप्रलापरूढेऽस्मिन्नमृते किं विमुह्यसि ? ।
स्वसंवेद्यरसं मूढ ! पिब साम्यरसायनम् ॥ ७ ॥
खाद्यलेह्यचूष्यपेयरसेभ्यो विमुखा अपि ।
पिबन्ति यतयः स्वैरं साम्यामृतरसं मुहुः ॥ ८ ॥
कण्ठपीठे लुठन् भोगिभोगो मन्दारदाम च ।
यस्याप्रीत्यै नवा नो वा प्रीत्यै स समतापतिः ॥ ९ ॥
न गूढं किञ्चनाचार्यमुष्टिः काचिद् न चापरा ।
बालानां सुधियां चैकं साम्यं भवरुजौषधम् ॥ १० ॥

अतिक्रूरतरं कर्म शान्तानामपि योगिनाम् ।
यद् घ्नन्ति साम्यशस्त्रेण रागादीनां कुलानि ते ॥ ११ ॥
अयं प्रभावः परमः समत्वस्य प्रतीयताम् ।
यत् पापिनः क्षणेनापि पदमियति शाश्वतम् ॥ १२ ॥
यस्मिन् सति सफलतामसत्यऽफलतां व्रजेत् ।
रत्नत्रयं नमस्तस्मै समत्वाय महौजसे ॥ १३ ॥
विगाह्य सर्वशास्त्रार्थमिदमुच्चैस्तरां ब्रुवे ।
इहामुत्र स्वपरयोर्नान्यत् साम्यात् सुखाकरम् ॥ १४ ॥
संसर्गेऽप्युपसर्गाणामपि कृत्यावुपस्थिते ।
नैतत्कालोचितं किञ्चित् साम्यादौपयिकं परम् ॥ १५ ॥

रागद्वेषादिशत्रुप्रतिहतिनिपुणां साम्यसाम्राज्यलक्ष्मीं
भुक्त्वा भुक्त्वा निरन्ताः शुभगतिपदवीं लेभिरे प्राणभाजः ।
तेनैतद् मानुषत्वं सपदि सफलतां नेतुकामैर्निकामं
साम्ये निर्मामसौख्यप्रचयपरिचिते न प्रमादो विधेयः ॥१६॥५४॥

नन्ववगतमेतत् सर्वदोषनिवारणकारणं समत्वम्, प्रीताः स्मः, यदि तु साम्ये प्रत्यप्युपायः कश्चन स्यात् । तदुपायेऽप्युपायान्तरं सोपस्करं स्यात्, तदा निराकाङ्क्षाः प्रमोदामहे, इत्येतद् गतमि मत्वा श्लोकद्वयमाह

साम्यं स्याद् निर्ममत्वेन तत्कृते भावनाः श्रयेत् ।
अनित्यतामशरणं भवमेकत्वमन्यताम् ॥ ५५ ॥

अशौचमाश्रवविधिं संवरं कर्मनिर्जराम् ।
धर्मस्वाख्याततां लोकं द्वादशीं बोधिभावनाम् ॥५६॥

साम्यं यथोक्तस्वरूपं निर्ममत्वेनोपायेन स्यात् । ननु साम्य-निर्ममत्वयोः को भेदः ? । उच्यते – साम्यं राग-द्वेषयोरुभयोरपि प्रतिपक्षभूतम्, निर्ममत्वं रागस्यैकस्य प्रतिपक्षभूतम् । तद्दोषद्वय-निवारणाय साम्ये चिकीर्षिते भवति बलवत्तरस्य रागस्य प्रति-पक्षभूतं निर्ममत्वमुपायः । यथा हि बलवत्यां सेनायां बलवत्तरस्य कस्यचिद् विनाश इतरेषां विनाशाय, तथा रागनिग्रहहेतु-निर्ममत्वं हीनबलानां द्वेषादीनां विनाशायेति । अलं प्रसङ्गेन । निर्ममत्वस्याप्युपायं दर्शयति—तत्कृते निर्ममत्वनिमित्तं भावना अनुप्रेक्षाः श्रयेद् योगी । प्रकृता भावना नामतः कथयति—अनित्यतामित्यादि, स्पष्टं चैतत् ॥ ५५ ॥ ५६ ॥

तदाद्या । तद्यथा इत्युपस्कारपूर्वकमनित्यताख्यां प्रथमां भावनां दर्शयति—

यत्प्रातस्तन्न मध्याह्ने यन्मध्याह्ने न तन्निशि ।
निरीक्ष्यते भवेऽस्मिन् ही ! पदार्थानामनित्यता ॥५७॥
शरीरं देहिनां सर्वपुरुषार्थनिबन्धनम् ।
प्रचण्डपवनोद्धूतघनाघनविनश्वरम् ॥ ५८ ॥
कल्लोलचपला लक्ष्मीः संगमाः स्वप्नसंनिभाः ।
वात्याव्यतिकरोत्क्षिप्ततूलतुल्यं च यौवनम् ॥ ५९ ॥

इदं तु मा स्म शङ्किष्ठाः कुशास्त्रैरपि मोहितः।
कुतोऽप्युपायतः कायो निरपायो भवेदिति ॥ १० ॥
ये मेरुं दण्डसात् कर्तुं पृथ्वीं वा छत्रसात् क्षमाः।
तेऽपि त्रातुं स्वमन्यं वा न मृत्योः प्रभविष्णवः ॥ ११ ॥
आ कीटादा च देवेन्द्रात् प्रभावन्तकशासने।
अनुन्मत्तो न भाषेत कथञ्चित् कालवञ्चनम् ॥ १२ ॥
पूर्वेषां चेत् क्वचित् कश्चिज्जीवन् दृश्येत तद् वयम्।
मनोरथातीतमपि प्रतीमः कालवञ्चनम् ॥ १३ ॥
अनित्यं यौवनमपि प्रतियन्तु मनीषिणः।
बलरूपापहारिण्या जरसा जर्जरीभवेत् ॥ १४ ॥
यौवने कामिनीभिर्ये काम्यन्ते कामलीलया।
निकामकृतथूत्कारं त्यज्यन्ते तेऽपि वार्द्धके ॥ १५ ॥
यदर्जितं बहुक्लेशैरभुक्ता यच्च पालितम्।
तद् याति क्षणमात्रेण निधनं धनिनां धनम् ॥ १६ ॥
उपमानपदं किं स्यात् फेनबुद्बुदविद्युताम्।
धनस्य नश्यतोऽवश्यं पश्यतामपि तद्गताम् ? ॥ १७ ॥
समागमाः सापगमाः सुहृद्भिर्बन्धुभिर्निजैः।
स्वस्य वाऽन्यस्य वा नाशे विकृतेऽपकृतेऽपि वा ॥ १८ ॥
ध्यायन्ननित्यतां नित्यं मृतं पुत्रं न शोचति।
नित्यताग्रहमूढस्तु कुड्यभङ्गेऽपि रोदिति ॥ १९ ॥

एतच्छरीरधनयौवनबान्धवादि
तावद् न केवलमनित्यमिहासुभाजाम्।

विश्वं सचेतनमचेतनमप्यशेष-

मुत्पत्तिधर्मकमनित्यमुशन्ति सन्तः ॥२०॥५७॥५८॥५९॥

अनित्यताभावनामुपसंहरन्नुपदर्शयति --

इत्यनित्यं जगद्वृत्तं स्थिरचित्तः प्रतिक्षणम् ।
तृष्णाकृष्णाहिमन्त्राय निर्ममत्वाय चिन्तयेत् ॥६०॥

इति पूर्वोक्तप्रकारेण जगद्वृत्तं जगत्स्वरूपमनित्यं प्रतिक्षणं चिन्तयेदवधारयेत्, स्थिरचित्तो निश्चलचित्तः सन् । किमर्थम् ? निर्ममत्वाय—अनित्यत्वादिभावनासाध्यवीतरागत्वनिमित्तम्। किं. विशिष्टाय ? । तृष्णाकृष्णाहिमन्त्राय—तृष्णा रागः सैव कृष्णाहिस्तस्या मन्त्राय मन्त्रस्वरूपाय । अहिशब्दः स्त्रीलिङ्गोऽप्यस्तीति नोपमानोपमेययोर्भिन्नलिङ्गत्वम् । अनित्यता ॥ ६० ॥

अथाशरणभावनामुपदिशति —

इन्द्रोपेन्द्रादयोऽप्येते यन्मृत्योर्यान्ति गोचरम् ।
अहो ! तदन्तकातङ्के कः शरण्यः शरीरिणाम् ? ॥६१॥

इन्द्रः सुरनाथः, उपेन्द्रो वासुदेवस्तावादी येषां सुरमनुष्यादीनां, चक्रवर्तिपरिहारेणोपेन्द्रग्रहणं लोके मृत्युकाले शरणत्वोपहासपरम्, तेऽपि यद् यस्माद् मृत्योर्गोचरं वशं यान्ति ; अहो इति विस्मये, तत् तस्मादन्तकातङ्के मृत्युभये उपस्थिते कः शरण्यः शरणे साधुः शरीरिणां जन्तूनाम् ?—कोऽपि नास्तीत्यर्थः ॥ ६१ ॥

तथा—

पितुर्मातुः स्वसुर्भ्रातुस्तनयानां च पश्यताम् ।
अत्राणो नीयते जन्तुः कर्मभिर्यमसद्मनि ॥ ६२ ॥

पित्रादीनां पश्यतां ताननादृत्यैवात्राणोऽशरणो जन्तुः कर्मभिः परभववेदनीयैः शुभाशुभैर्यमसद्मनि यमालये नीयते । एतच्च लोकप्रसिद्ध्यपेक्षम्, न पुनर्यमसद्मनि कश्चिद् नीयते, अपि तु चतुर्गतिस्वरूपे संसारे तत्तदुचितैः कर्मभिस्तत्र तत्र नीयत इति परमार्थः ॥ ६२ ॥

तथा—

शोचन्ति स्वजनानन्तं नीयमानान् स्वकर्मभिः ।
नेष्यमाणं तु शोचन्ति नात्मानं मूढबुद्धयः ॥ ६३ ॥

शोचन्ति शोकविषयतां नयन्ति स्वजनान् बन्धून्, अन्तमवसानं नीयमानान् स्वकर्मभिर्यमान्तर्वर्तिमार्गैर्मूढबुद्धय इत्युत्तरेण योगः । आत्मानं तु स्वकर्मभिरेवान्तं नेष्यमाणं न शोचन्ति । संनिहित-परित्यागे हि व्यवहितं प्रति कारणं वाच्यम्, संनिहितश्चात्मा, स च शोचनीयतां गतः व्यवहितस्य स्वजनादेः शोचनं दूरितोऽस्तु नियत्नमेव ॥ ६३ ॥

अशरणभावनामुपदिशति—

संसारे दुःखदावाग्निज्वलज्ज्वालाकरालिते ।
वने मृगार्भकस्येव शरणं नास्ति देहिनः ॥ ६४ ॥

संसारे शरणं देहिनो नास्ति । [illegible]

मृगार्भकस्येव । किंविशिष्टे संसारे ? । दुःखमेव दावाग्निस्तस्य ज्वलन्त्यो या ज्वाला दुःखस्यैव पर्यायास्तैः करालिते रौद्रे । पुनः किं विशिष्टे ? । दुःखो दुःखविशेषो दावाग्निस्तस्य ज्वलन्त्यो या ज्वालास्ताभिः करालिते [illegible] । अशरणभावना ।

अत्रान्तरश्लोकाः —

अष्टाङ्गेनायुर्वेदेन जीवातुभिरथागदैः ।
मृत्युंजयादिभिर्मन्त्रैस्त्राणं नैवास्ति मृत्युतः ॥ १ ॥

खड्गपञ्जरमध्यस्थचतुरङ्गचमूवृतः ।
रङ्कवत् कृष्यते राजा हठेन यमकिङ्करैः ॥ २ ॥

जलमध्यस्थितस्तम्भमूर्धपञ्जरमध्यगम् ।
राज्ञः प्रियसुतं मृत्युरकर्षीन्यस्य का कथा ? ॥ ३ ॥

षष्टिं पुत्रसहस्राणि सगरस्यापि चक्रिणः ।
तृणवत् त्राणरहितान्यदहज्ज्वलनप्रभः ॥ ४ ॥

आस्कन्द्य स्कन्दकाचार्यं मुनिपञ्चशतीं घ्नतः ।
न कश्चिदभवत् त्राता पालकादन्तकादिव ॥ ५ ॥

यथा मृत्युप्रतीकारं पशवो नैव जानते ।
विपश्चितोऽपि हि तथा धिक् प्रतीकारमूढताम् ॥ ६ ॥

येऽसिमात्रोपकरणाः कुर्वते क्ष्मामकण्टकाम् ।
यमभ्रूभङ्गभीतास्तेऽप्यास्ये निदधतेऽङ्गुलीः ॥ ७ ॥

स्नेहादाश्लिष्य शक्रेणार्धासनेऽध्यास्यते स्म यः ।
श्रेणिकः सोऽप्यशरणोऽश्नोतव्यां प्राप तां दशाम् ॥ ८ ॥

मुनीनामप्यपापानामसिधारोपमैर्व्रतैः ।
न शक्यते कृतान्तस्य प्रतिकर्तुं कदाचन ॥ ९ ॥
अशरण्यमहो ! विश्वमराजकमनायकम् ।
यदेतदप्रतीकारं ग्रस्यते यमरक्षसा ॥ १० ॥
योऽपि धर्मप्रतीकारो न सोऽपि मरणं प्रति ।
शुभां गतिं ददानस्तु प्रतिकर्तेति कीर्त्यते ॥ ११ ॥

एवं विश्वमनाकुलः कवलयन्नाब्रह्म कीटावधि
शान्तिं याति कथञ्चनापि न खलु त्रैलोक्यभीमो यमः ।
नैवास्य प्रतिकारकर्मणि सुराधीशोऽप्यलंभूष्णुता-
मालम्बेत शरण्यवर्जितमिदं हा ! हा ! जगत् ताम्यति ॥१२॥

अशरणभावना ॥ ६४ ॥

अथ संसारभावनां श्लोकत्रयेणाह—

श्रोत्रियः श्वपचः स्वामी पत्तिर्ब्रह्मा कृमिश्च सः ।
संसारनाट्ये नटवत् संसारी हन्त ! चेष्टते ॥ ६५ ॥

संसारो नानायोनिषु सञ्चरणं स एव नाट्यं नटकर्म तत्र नटवत् नर्तकवत् संसारी जन्तुश्चेष्टते विविधां चेष्टां करोतीति । हन्तेत्यामन्त्रणे । कीदृशेन चेष्टते ? श्रोत्रियो वेदपारगः स एव श्वपचो भवति, स्वामी प्रभुः स एव पत्तिर्भवति, ब्रह्मा प्रजापतिः स एव कृमिर्भवति । यथेदं च विपर्यासादौ, तेन श्वपचः श्रोत्रियः, पत्तिः स्वामी, कृमिर्ब्रह्मा, इत्यपि द्रष्टव्यम् । यथा हि नाट्ये विविधवर्णकादियोगात् रूपान्तरं नटाः

प्रतिपद्यन्ते तथैव संसारी विविधकर्मोपाधिः श्रोत्रियादितां प्रतिपद्यते, न पुनरस्य तथाविधं परमार्थतो रूपमस्ति ॥ ६५ ॥

तथा—

न याति कतमां योनिं कतमां वा न मुञ्चति ।
संसारी कर्मसम्बन्धादवक्रयकुटीमिव ॥ ६६ ॥

योनिमेकेन्द्रियादिलक्षणां कतमां न याति ? सर्वामपि यातीत्यर्थः, कतमां वा योनिं न मुञ्चति ? सर्वामपि मुञ्चतीत्यर्थः, संसारी जन्तुः । कुतो हेतोरित्याह—कर्मसम्बन्धात् ; अवक्रयकुटीमिव भाटककुटीमिव । यथा हि तथाविधोपयोगहेतोर्गृहमेधी एकां कुटीं प्रविशति, उपयोगाभावे तां मुञ्चति ; उपयोगान्तराच्च कुट्यन्तरमादत्ते, परिहरति च ; एवं नियतकर्मोपभोगहेतोरेकां योनिं जन्तुः प्रविशति, तद्योग्यकर्मोपभोगानन्तरं तु तां विमुञ्चति, योन्यन्तरं तूपादत्ते पुनश्च परिहरति, न पुनर्नियतः कोऽपि योनिपरिग्रहोऽस्तीति ॥ ६६ ॥

तथा—

समस्तलोकाकाशेऽपि नानारूपैः स्वकर्मतः ।
वालाग्रमपि तन्नास्ति यन्न स्पृष्टं शरीरिभिः ॥ ६७ ॥

इहाकाशं द्विविधं—लोकाकाशमलोकाकाशं च । यत्र धर्माधर्मजीवपुद्गलानां सम्भवोऽस्ति तल्लोकाकाशम्, इतरत्त्वलोकाकाशम्, यदाह ;—

धर्मादीनां वृत्तिर्द्रव्याणां यत्र भवति तत् क्षेत्रम् ।
तैर्द्रव्यैः सह लोकस्तद्विपरीतं ह्यलोकाख्यम् ॥ १ ॥

ततः समग्रेऽपि लोकाकाशे चतुर्दशरज्ज्वात्मके वालाग्रमपि वालाग्रप्रमाणमपि तत् क्षेत्रं नास्ति यत् शरीरिभिरुत्पद्य-मानैर्विपद्यमानैश्च न स्पृष्टम् । अत्र हेतुमाह— किंविशिष्टैः शरीरिभिः ? सूक्ष्मबादरप्रत्येकसाधारणैकेन्द्रियभेदतो द्वित्रिचतु-रक्षेन्द्रियभेदतश्च यथायोग्यं नानारूपैः । नानारूपत्वमपि कुतः ? । स्वकर्मतः, न त्वीश्वरादिप्रेरणया, यदाहुः परे—

अज्ञो जन्तुरनीशः स्यादात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ॥ १ ॥

तत्रेश्वरप्रेरणा यदि कर्मनिरपेक्षा तदा विश्वस्य वैश्वरूप्यं विलीयेत । कर्मसापेक्षतायां त्वीश्वरस्यास्वातन्त्र्यं वैफल्यं वा स्यादिति कर्मैवास्तु प्रेरकम्, किमीश्वरेण ? यदवोचाम वीत-रागस्तोत्रे—

कर्मापेक्षः स चेत् तर्हि न स्वतन्त्रोऽस्मदादिवत् ।
कर्मजन्ये च वैचित्र्ये किमनेन शिखण्डिना ? ॥ १ ॥

अत्रान्तरश्लोकाः—

संसारिणश्चतुर्भेदाः श्वभ्रतिर्यग्नरामराः ।
प्रायेण दुःखबहुलाः कर्मसम्बन्धबाधिताः ॥ १ ॥
आद्येषु त्रिषु नरकेषूष्णं शीतं परेषु च ।
चतुर्थे शीतमुष्णं च दुःखं क्षेत्रोद्भवं त्विदम् ॥ २ ॥

नरकेषु शशीतिषु चेत् पतेल्लोहपर्वतः ।
विलीयेत विशीर्येत तदा भुवमनाप्नुवन् ॥ ३ ॥
उदीरितमहादुःखा अन्योन्येनासुरैश्च ते ।
इति त्रिविधदुःखार्त्ता वसन्ति नरकावनौ ॥ ४ ॥
समुत्पन्ना घटीयन्त्रेष्वधार्मिकसुरैर्बलात् ।
आकृष्यन्ते लघुद्वाराद् यथा सीसशलाकिकाः ॥ ५ ॥
गृहीत्वा पाणिपादादौ वज्रकण्टकसङ्कटे ।
आस्फाल्यन्ते शिलापृष्ठे वासांसि रजकैरिव ॥ ६ ॥
दारुदारं विदार्यन्ते दारुणैः क्रकचैः क्वचित् ।
तिलपेषं च पिष्यन्ते चित्रयन्त्रैः क्वचित् पुनः ॥ ७ ॥
पिपासार्त्ताः पुनस्तप्तत्रपुसीसकवाहिनीम् ।
नदीं वैतरणीं नामावतार्यन्ते वराककाः ॥ ८ ॥
छायाभिकाङ्क्षिणः क्षिप्रमसिपत्रवनं गताः ।
पत्रशस्त्रैः पतद्भिस्ते छिद्यन्ते तिलशोऽसकृत् ॥ ९ ॥
आश्लेष्यन्ते च शाल्मल्यो वज्रकण्टकसङ्कटाः ।
तप्तायःपुत्रिकाः क्वापि स्मारितान्यवधूरतम् ॥ १० ॥
संस्मार्य मांसलोलत्वमाश्यन्ते मांसमङ्गजम् ।
प्रख्याप्य मधुलौल्यं च पाय्यन्ते तापितं त्रपु ॥ ११ ॥
भ्राष्ट्रकन्दुमहाशूलकुम्भीपाकादिवेदनाः ।
अश्रान्तमनुभाव्यन्ते भृज्यन्ते च भटित्रवत् ॥ १२ ॥
छिन्नभिन्नशरीराणां पुनर्मिलितवर्ष्मणाम् ।
नेत्राद्यङ्गानि कृष्यन्ते वककङ्कादिपक्षिभिः ॥ १३ ॥

एवं महादुःखहताः सुखांशेनापि वर्जिताः ।
गमयन्ति बहुं कालमात्रयस्त्रिंशसागरम् ॥ १४ ॥
तिर्यग्गतिमपि प्राप्ताः सम्प्राप्यैकेन्द्रियादिताम् ।
तत्रापि पृथिवीकायरूपतां समुपागताः ॥ १५ ॥
हलादिशस्त्रैः पाट्यन्ते मृद्यन्तेऽश्वगजादिभिः ।
वारिप्रवाहैः प्लाव्यन्ते दह्यन्ते च दवाग्निना ॥ १६ ॥
व्यथ्यन्ते लवणाचाम्लमूत्रादिसलिलैरपि ।
लवणक्षारतां प्राप्ताः क्वथ्यन्ते चोष्णवारिणि ॥ १७ ॥
पच्यन्ते कुम्भकाराद्यैः कृत्वा कुम्भेष्टकादिसात् ।
चीयन्ते भित्तिमध्ये च कृत्वा कर्दमरूपताम् ॥ १८ ॥
केचिच्छाणैर्निघृष्यन्ते विपच्य क्षारसृत्पुटैः ।
टङ्कान्दुकैर्विदार्यन्ते पाट्यन्तेऽद्रिसरित्प्लवैः ॥ १९ ॥
अप्कायतां पुनः प्राप्तास्ताप्यन्ते तपनांशुभिः ।
घनीक्रियन्ते तुहिनैः संशोष्यन्ते च पांशुभिः ॥ २० ॥
क्षारेतररसाश्लेषाद् विपद्यन्ते परस्परम् ।
स्थाल्यन्तस्था विपच्यन्ते पीयन्ते च पिपासितैः ॥ २१ ॥
तेजस्कायत्वमासाद्य विध्याप्यन्ते जलादिभिः ।
घनादिभिः प्रकुट्यन्ते ज्वाल्यन्ते चेन्धनादिभिः ॥ २२ ॥
वायुकायत्वमप्याप्ता हन्यन्ते व्यजनादिभिः ।
शीतोष्णादिद्रव्ययोगाद् विपद्यन्ते क्षणे क्षणे ॥ २३ ॥
प्राचीनाद्यास्तु सर्वेऽपि विराध्यन्ते परस्परम् ।
मुखादिवातैर्बाध्यन्ते पीयन्ते चोरगादिभिः ॥ २४ ॥

वनस्पतित्वं दशधा प्राप्ताः कन्दादिभेदतः ।
छिद्यन्ते चाथ भिद्यन्ते पच्यन्ते चाग्नियोगतः ॥ २५ ॥
संशोष्यन्ते निपिष्यन्ते प्लुष्यन्तेऽन्योन्यघर्षणैः ।
क्षारादिभिश्च दह्यन्ते संधीयन्ते च भोक्तृभिः ॥ २६ ॥
सर्वावस्थासु खाद्यन्ते भज्यन्ते च प्रभञ्जनैः ।
क्रियन्ते भस्मसाद् दावैरुन्मूल्यन्ते सरित्प्लवैः ॥ २७ ॥
सर्वेऽपि वनस्पतयः सर्वेषां भोज्यतां गताः ।
सर्वैः शस्त्रैः सर्वदाऽनुभवन्ति क्लेशसन्ततिम् ॥ २८ ॥
द्वीन्द्रियत्वे च ताप्यन्ते पीयन्ते पूतरादयः ।
चूर्ण्यन्ते कृमयः पादैर्भक्ष्यन्ते चटकादिभिः ॥ २९ ॥
शङ्खादयो निखन्यन्ते निकृष्यन्ते जलौकसः ।
गण्डूपदाद्याः पात्यन्ते जठरादौषधादिभिः ॥ ३० ॥
त्रीन्द्रियत्वेऽपि सम्प्राप्ते षट्पदीमत्कुणादयः ।
विमृज्यन्ते शरीरेण ताप्यन्ते चोष्णवारिणा ॥ ३१ ॥
पिपीलिकास्तु तुद्यन्ते पादैः सम्मार्जनेन च ।
अदृश्यमानाः कुन्थ्वाद्या मथ्यन्ते चासनादिभिः ॥ ३२ ॥
चतुरिन्द्रियताभाजः सरघाभ्रमरादयः ।
मधुभक्षैर्विराध्यन्ते यष्टिलोष्टादिताडनैः ॥ ३३ ॥
ताड्यन्ते तालवृन्ताद्यैर्द्राग् दंशमशकादयः ।
ग्रस्यन्ते गृहगोधाद्यैर्मक्षिकामर्कटादयः ॥ ३४ ॥
पञ्चेन्द्रिया जलचराः खादन्त्यन्योन्यमुत्सुकाः ।
धीवरैः परिगृह्यन्ते गिल्यन्ते च बकादिभिः ॥ ३५ ॥

उत्कीत्यन्ते त्वचयद्भिः प्राप्यन्ते च भटित्रताम् ।
भोक्तुकामैर्विपच्यन्ते निगाल्यन्ते वसार्थिभिः ॥ ३६ ॥
स्थलचारिषु चोत्पन्ना अबला बलवत्तरैः ।
मृगाद्याः सिंहप्रमुखैर्मार्यन्ते मांसकाङ्क्षिभिः ॥ ३७ ॥
मृगयासक्तचित्तैश्च क्रीडया मांसकाम्यया ।
नरैस्तत्तदुपायेन हन्यन्तेऽनपराधिनः ॥ ३८ ॥
क्षुधापिपासाशीतोष्णातिभारारोपणादिना ।
कशाङ्कुशप्रतोदैश्च वेदनां प्रसहन्त्यमी ॥ ३९ ॥
खेचरास्तित्तिरशुककपोतचटकादयः ।
श्येनसिञ्चानगृध्राद्यैर्ग्रस्यन्ते मांसगृध्नुभिः ॥ ४० ॥
मांसलुब्धैः शाकुनिकैर्नानोपायप्रपञ्चतः ।
संगृह्य प्रतिहन्यन्ते नानारूपैर्विडम्बनैः ॥ ४१ ॥
जलाग्निशस्त्रादिभवं तिरश्चां सर्वतो भयम् ।
कियद् वा वर्ण्यते स्वस्वकर्मबन्धनिबन्धनम् ॥ ४२ ॥
मनुष्यत्वेऽनार्यदेशे समुत्पन्नाः शरीरिणः ।
तत् तत् पापं प्रकुर्वन्ति यद् वक्तुमपि न क्षमम् ॥ ४३ ॥
उत्पन्ना आर्यदेशेऽपि चण्डालश्वपचादयः ।
पापकर्माणि कुर्वन्ति दुःखान्यनुभवन्ति च ॥ ४४ ॥
आर्यवंशसमुद्भूता अप्यनार्यविचेष्टिताः ।
दुःखदारिद्र्यदौर्भाग्यनिर्दग्धा दुःखमासते ॥ ४५ ॥
परसम्पत्प्रकर्षेणापकर्षेण स्वसम्पदाम् ।
परप्रेष्यतया दग्धा दुःखं जीवन्ति मानवाः ॥ ४६ ॥

रुग्जरामरणैर्ग्रस्ता नीचकर्मकदर्थिताः ।
तां तां दुःखदशां दीनाः प्रपद्यन्ते दयास्पदम् ॥ ४७ ॥
जरा रुजा मृतिर्दास्यं न तथा दुःखकारणम् ।
गर्भवासो यथा घोरनरके वाससन्निभः ॥ ४८ ॥
सूचिभिरग्निवर्णाभिर्भिन्नस्य प्रतिरोम यत् ।
दुःखं नरस्याष्टगुणं तद् भवेद् गर्भवासिनः ॥ ४९ ॥
योनियन्त्राद् विनिष्क्रामन् यद् दुःखं लभते भवी ।
गर्भवासभवाद् दुःखात् तदनन्तगुणं खलु ॥ ५० ॥
बाल्ये मूत्रपुरीषाभ्यां यौवने रतचेष्टितैः ।
वार्द्धक्ये श्वासकासाद्यैर्जनो जातु न लज्जते ॥ ५१ ॥
पुरीषशूकरः पूर्वं ततो मदनगर्दभः ।
जराजरद्गवः पश्चात् कदापि न पुमान् पुमान् ॥ ५२ ॥
स्याच्छैशवे मातृमुखस्तारुण्ये तरुणीमुखः ।
वृद्धभावे सुतमुखो मूर्खो नान्तर्मुखः क्वचित् ॥ ५३ ॥
सेवाकर्षणवाणिज्यपाशुपाल्यादिकर्मभिः ।
क्षपयत्यफलं जन्म धनाशाविह्वलो जनः ॥ ५४ ॥
क्वचिच्चौर्यं क्वचिद् द्यूतं क्वचिद् नीचैर्भुजङ्गता ।
मनुष्याणामहो ! भूयो भवभ्रमनिबन्धनम् ॥ ५५ ॥
सुखित्वे कामललितैर्दुःखित्वे दैन्यरोदनैः ।
नयन्ति जन्म मोहान्धा न पुनर्धर्मकर्मभिः ॥ ५६ ॥
अनन्तकर्मप्रचयक्षयक्षममिदं क्षणात् ।
मानुषत्वमपि प्राप्ताः पापाः पापानि कुर्वते ॥ ५७ ॥

ज्ञानदर्शनचारित्ररत्नत्रितयभाजने ।
मनुजत्वे पापकर्म स्वर्णभाण्डे सुरोपमम् ॥ ५८ ॥
संसारसागरगतेः शमिलायुगयोगवत् ।
लब्धं कथञ्चिद् मानुष्यं हा ! रत्नमिव हार्यते ॥ ५९ ॥
लब्धे मानुष्यके स्वर्ग-मोक्षप्राप्तिनिबन्धने ।
हा ! नरकाद्युपायेषु कर्मस्वृत्तिष्ठते जनः ॥ ६० ॥
आशास्यते यत् प्रयत्नादनुत्तरसुरैरपि ।
तत् सम्प्राप्तं मनुष्यत्वं पापैः पापेषु योज्यते ॥ ६१ ॥
परोक्षं नरके दुःखं प्रत्यक्षं नरजन्मनि ।
तत्प्रपञ्चः प्रपञ्चेन किमर्थमुपवर्ण्यते ? ॥ ६२ ॥
शोकामर्षविषादेर्ष्यादैन्यादिहतबुद्धिषु ।
अमरेष्वपि दुःखस्य साम्राज्यमनुवर्तते ॥ ६३ ॥
दृष्ट्वा परस्य महतीं श्रियं प्राग्जन्मजीवितम् ।
अर्जितस्वल्पसुकृतं शोचन्ति सुचिरं सुराः ॥ ६४ ॥
विराद्धा बलिनान्येन प्रतिकर्तुं तमक्षमाः ।
तीक्ष्णेनामर्षशल्येन दोदूयन्ते निरन्तरम् ॥ ६५ ॥
न कृतं सुकृतं किञ्चिदाभियोग्यं ततो हि नः ।
दृष्टोत्तरोत्तरश्रीका विषीदन्तीति नाकिनः ॥ ६६ ॥
दृष्ट्वान्येषां विमानस्त्रीरत्नोपवनसम्पदम् ।
यावज्जीवं विपच्यन्ते ज्वलदीर्ष्यानलोर्मिभिः ॥ ६७ ॥
हा प्राणेश ! प्रभो ! देव ! प्रसीदेति सगद्गदम् ।
परैर्मुषितसर्वस्वा भाषन्ते दीनवृत्तयः ॥ ६८ ॥

प्राप्तेऽपि पुण्यतः स्वर्गे कामक्रोधभयातुराः ।
न स्वस्थतामश्नुवते सुराः कान्दिशीकदृशः ॥ ६९ ॥
अथ च्यवनचिह्नानि दृष्ट्वा दृष्ट्वा विलप्य च ।
विलीयन्तेऽथ जल्पन्ति क्व निलीयामहे वयम् ? ॥ ७० ॥

तथाहि—

अम्लाना अपि हि माला: सुरद्रुमसमुद्भवाः ।
म्लानीभवन्ति देवानां वदनाम्भोरुहैः समम् ॥ ७१ ॥
हृदयेन समं विष्वग् विश्लिष्यत्सन्धिबन्धनाः ।
महाबलैरप्यकम्प्याः कम्पन्ते कल्पपादपाः ॥ ७२ ॥
अकालप्रतिपन्नाभ्यां प्रियाभ्यां च सहैव हि ।
श्रीह्रीभ्यां परिमुच्यन्ते कृतागस इवामराः ॥ ७३ ॥
अम्बरश्रीरपमला मलिनीभवति क्षणात् ।
अप्यकस्माद्विस्मरैरघौघैर्मलिनैर्घनैः ॥ ७४ ॥
अदीना अपि दैन्येन विनिद्रा अपि निद्रया ।
आश्रीयन्ते मृत्युकाले पक्षाभ्यामिव कीटिकाः ॥ ७५ ॥
विषयेष्वतिरज्यन्ते न्यायधर्मविबाधया ।
अपथ्यान्यपि यत्नेन स्पृहयन्ति मुमूर्षवः ॥ ७६ ॥
नीरुजामपि भज्यन्ते सर्वाङ्गोपाङ्गसन्धयः ।
भाविदुर्गतिपातोत्थवेदनाविवशा इव ॥ ७७ ॥
पदार्थग्रहणेऽकस्माद् भवन्त्यपटुदृष्टयः ।
परेषां सम्पदुत्कर्षमिव प्रेक्षितुमक्षमाः ॥ ७८ ॥
गर्भावासनिवासोत्थदुःखागमभयादिव ।

प्रकम्पतरलैरङ्गैर्भापयन्ते परानपि ॥ ७९ ॥
निश्चितच्यवनाश्चिह्नैर्लभन्ते न रतिं क्वचित्।
विमाने नन्दने वाप्यामङ्गारालिङ्गिता इव ॥ ८० ॥
हा! प्रियाः! हा! विमानानि! हा वाप्यो! हा! सुरद्रुमाः!।
क्व द्रष्टव्याः पुनर्यूयं हतदैव वियोजिताः ? ॥ ८१ ॥
अहो! स्मितं सुधावृष्टिरहो! बिम्बाधरः सुधा।
अहो! वाणी सुधावर्षिण्यहो! कान्ता सुधामयी ॥ ८२ ॥
हा! रत्नघटिताः स्तम्भाः! हा! श्रीमन्मणिकुट्टिम!।
हा! वेदिकाः! रत्नमय्यः! कस्य यास्यथ संश्रयम्? ॥ ८३ ॥
हा! रत्नसोपानचिताः कमलोत्पलमालिताः।
भविष्यन्त्युपभोगाय कस्येमाः पूर्णवापयः? ॥ ८४ ॥
हे! पारिजात! मन्दार! सन्तान! हरिचन्दन!।
कल्पद्रुम! विमोक्तव्यः किं भवद्भिरयं जनः? ॥ ८५ ॥
हा! हा! स्त्रीगर्भनरके वस्तव्यमवशस्य मे।
इहाऽशुचिरसास्वादः कर्तव्यो मयका मुहुः ॥ ८६ ॥
इहा हा! जठराङ्गारशकटीपाकसम्भवम्।
मया दुःखं विसोढव्यं बद्धेन निजकर्मणा ॥ ८७ ॥
रतेरिव निधानानि क्व तास्ताः सुरयोषितः?।
क्वाशुचिस्यन्दबीभत्सा भोक्तव्या नरयोषितः? ॥ ८८ ॥
एवं स्वर्लोकवस्तूनि स्मारं स्मारं दिवौकसः।
विलपन्तः क्षणस्यान्तर्विध्यायन्ति प्रदीपवत् ॥ ८९ ॥

(नवभिः कुलकम् ॥)

एवं नास्ति सुखं चतुर्गतिजुषामप्यत्र संसारिणां
दुःखं केवलमेव मानसमथो शारीरमत्यायतम् ।
ज्ञात्वैवं ममतानिरासविषये ध्यायन्तु शुद्धाशया
अश्रान्तं भवभावनां भवभयच्छेदोन्मुखत्वं यदि ॥ ९० ॥

॥ संसारभावना ॥ ६७ ॥

अथैकत्वभावनां श्लोकद्वयेनाह—

एक उत्पद्यते जन्तुरेक एव विपद्यते ।
कर्माण्यनुभवत्येकः प्रचितानि भवान्तरे ॥ ६८

एकोऽसहाय उत्पद्यते शरीरसम्बन्धमनुभवति जन्तुः प्राणी
विपद्यते शरीरेण वियुज्यते, कर्माणि ज्ञानावरणीयादी
भवान्तरे पूर्वजन्मनि प्रचितानि कृतानि अनुभवति वेदय
भवान्तरग्रहणमुपलक्षणम्, इहजन्मकृतानामप्यनुभवात्, यदा
भगवन्तः ;—[1]परलोअकडाकम्मा इहलोए वेइज्जंति, इहलोअक
कम्मा इहलोए वेइज्जंति ॥ ६८ ॥

तथा—

अन्यैस्तेनार्जितं वित्तं भूयः संभूय भुज्यते ।
स त्वेको नरकक्रोडे क्लिश्यते निजकर्मभिः ॥ ६

तेनैकेन जन्तुनाऽर्जितं महारम्भपरिग्रहादिनोपार्जितं वि
मन्यैः सम्बन्धिबन्धुभृत्यप्रभृतिभिः सम्भूय मिलित्वा भूयः

---

(1) परलोककृतानि कर्माणि इहलोके वेद्यन्ते ।
इहलोके कृतानि कर्माणि इहलोके वेद्यन्ते ।

पुनर्भुज्यते वित्तस्य विनियोगः क्रियते। स तु वित्तस्यार्जयिता एको भोक्तृलोकविरहितो नरकक्रोडे नरकोत्सङ्गे क्लिश्यते बाध्यते निजकर्मभिर्धनार्जनकालप्रचितैः पापकर्मभिः ॥

अत्रान्तरश्लोकाः—

दुःखदावाग्निभीष्मेऽस्मिन् विततें भवकानने ।
बम्भ्रमीत्येक एवासौ जन्तुः कर्मवशीकृतः ॥ १ ॥
ननु जीवस्य मा भूवन् सहाया बान्धवादयः ।
शरीरं तु सहायोऽस्तु सुखदुःखानुभूतिदम् ॥ २ ॥
नायाति पूर्वभवतो न याति च भवान्तरम् ।
ततः कायः सहायः स्यात् संफेटमिलितः कथम् ? ॥ ३ ॥
धर्माधर्मौ समासन्नौ सहायाविति चेद् मतिः ।
नैषा सत्या, न मोक्षेऽस्ति धर्माधर्मसहायता ॥ ४ ॥
तस्मादेको बम्भ्रमीति भवे कुर्वन् शुभाशुभे ।
जन्तुर्वेदयते चैतदनुरूपे शुभाशुभे ॥ ५ ॥
एक एव समादत्ते मोक्षश्रियमनुत्तराम् ।
सर्वसम्बन्धिविरहाद् द्वितीयस्य न सम्भवः ॥ ६ ॥
यद् दुःखं भवसम्बन्धि यत् सुखं मोक्षसम्भवम् ।
एक एवोपभुङ्क्ते तद् न सहायोऽस्ति कश्चन ॥ ७ ॥
यथैवैकस्तरन् सिन्धुं पारं व्रजति तत्क्षणात् ।
न तु हस्तपाणिपादादिसंयोजितपरिग्रहः ॥ ८ ॥
तथैव धनदेहादिपरिग्रहपराङ्मुखः ।
स्वस्थ एको भवाम्भोधेः पारमासादयत्यसौ ॥ ९ ॥

एकः पापात् पतति नरके याति पुण्यात् स्वरेकः
पुण्यापुण्यप्रचयविगमाद् मोक्षमेकः प्रयाति ।
एवं ज्ञात्वा चिरमवितथां निर्ममत्वस्य हेतो-
रेकत्वाख्यामवहितधियो भावनां भावयन्तु ॥ १० ॥

॥ एकत्वभावना ॥ ६९ ॥

अथान्यत्वभावनामाह—

यत्रान्यत्वं शरीरस्य वैसदृश्याच्छरीरिणः ।
धनबन्धुसहायानां तत्रान्यत्वं न दुर्वचम् ॥ ७० ॥

यत्रेति प्रक्रमार्थमव्ययम् । अन्यत्वं भेदः शरीरस्य कायस्य । कस्माद् भेदः ? शरीरिण आत्मनः सकाशात् । कुतो हेतोः ? । वैसदृश्यात् । प्रतीतमेव हि वैसदृश्यं शरीरशरीरिणोर्मूर्तत्वामूर्तत्वाभ्याम्, अचेतनत्वचेतनत्वाभ्याम्, अनित्यत्वनित्यत्वाभ्याम्, भवान्तरेष्वगमनगमनाभ्यां च । तत्रेति प्रक्रमोपसंहारे, शरीरिणः सकाशादन्यत्वं न दुर्वचं न दुर्भणम् । केषाम् ? धनबन्धुसहायानां धनानां धनधान्यादिभेदैर्नवविधानाम्, बन्धूनां मातृपितृपुत्रादीनाम्, सहायानां सुहृत्-सेवक-पत्त्यादीनाम् । अयमर्थः— यो जीवात् शरीरस्योपपत्त्या भेदं ग्राहितः स धनादिभ्यो भेदं ग्राहयितुं सुशक एवेति ॥ ७० ॥

न केवलमन्यत्वभावनाया निर्ममत्वमेव फलम्, किन्तु महत् फलान्तरमप्यस्ति, तदित्याह —

योो देहधनबन्धुभ्यो भिन्नमात्मानमीक्षते ।
क्व शोकशङ्कुना तस्य हन्तातङ्कः प्रतन्यते ॥ ७१ ॥

यः प्राणी देहाद् धनाद् बन्धुभ्यश्च भिन्नमात्मानं स्वमीक्षते विवेकालोकेन, तस्य भेदप्रेक्षितुः क्व नैवेत्यर्थः, शोकशङ्कुना शोकशल्येन, हन्तेति हर्षार्थमव्ययम्, आतङ्कः पीडा प्रतन्यते क्रियते ।

अत्रान्तरश्लोकाः—

इहान्यत्वं भवेद् भेदः स वैलक्षण्यलक्षणः ।
आत्मदेहादिभावानां साक्षादेव प्रतीयते ॥ १ ॥
देहाद्या इन्द्रियग्राह्या आत्मानुभवगोचरः ।
तदेतेषामनन्यत्वं कथं नामोपपद्यते ॥ २ ॥
आत्मदेहादिभावानां यद्यन्यत्वं स्फुटं ननु ।
ततो देहप्रहारादौ कथमात्मा प्रपीड्यते ॥ ३ ॥
सत्यं येषां शरीरादौ भेदबुद्धिर्न विद्यते ।
तेषां देहप्रहारादावात्मपीडोपजायते ॥ ४ ॥
ये तु देहात्मनोर्भेदं सम्यगेव प्रपेदिरे ।
तेषां देहप्रहारादावपि नात्मा प्रपीड्यते ॥ ५ ॥
तथाहि लोहचक्रेण चैरेयोपचनेन च ।
देहबाधेऽप्यबाधात्मा तद्भेदज्ञोऽन्तिमो जिनः ॥ ६ ॥
नमिर्धनात्मभेदज्ञः पूर्दाहेऽपीन्द्रमब्रवीत् ।
दाहेऽपि मिथिलापुर्यां न मे किमपि दह्यते ॥ ७ ॥

भेदं विद्वान् न पीड्येत पितृदुःखेऽप्युपस्थिते ।
आत्मीयत्वाभिमानेन भृत्यदुःखेऽपि मुह्यति ॥ ८ ॥
अस्वत्वेन गृहीतः सन् पुत्रोऽपि पर एव हि ।
स्वकीयत्वेन भृत्योऽपि स्वपुत्रादतिरिच्यते ॥ ९ ॥
ममेति मतिमाश्रिताः परतरेऽपि वस्तुन्यहो !
निबध्य दधतितरां स्वमिह कोशकारा इव ।
विविच्य तदिदं मुहुर्वितथभावनावर्जनाद्
भजेत ममताच्छिदे सततमन्यत्वभावनाम् ॥ १० ॥

॥ अन्यत्वभावना ॥ ७१ ॥

अथाशुचित्वभावनामाह—

रसासृग्मांसमेदोऽस्थिमज्जाशुक्रान्त्रवर्चसाम् ।
अशुचीनां पदं कायः शुचित्वं तस्य तत् कुतः ? ॥७२॥

रसो भुक्तपीतान्नपानपरिणामजो निस्यन्दः, असृग् रक्तं रससम्भवो धातुः, मांसं पिशितमसृक्सम्भवम्, मेदो वसा मांससम्भवम्, अस्थि कीकसं मेदःसम्भवम्, मज्जा सारोऽस्थिसम्भवः, शुक्रं रेतो मज्जासम्भवम्, अन्त्रं पुरीतत्, वर्चो विष्ठा, एतेषामशुचिद्रव्याणां पदं स्थानं कायः । तत् तस्मात् तस्य कायस्य कथं शुचित्वम्—न कथंचिदित्यर्थः ॥ ७२ ॥

ये त्वत्रापि शुचित्वमानिनस्तान्प्रत्याह —

नवस्रोतःस्रवद्विस्ररसनिःस्यन्दपिच्छिले ।
देहेऽपि शौचसङ्कल्पो महन्मोहविजृम्भितम् ॥७३॥

नवभ्यो नेत्रश्रोत्रनासामुखपायूपस्थेभ्यः स्रोतोभ्यो निर्गमद्वारेभ्यः स्रवन् क्षरन् विस्रमामगन्धिर्योऽसौ रसस्तस्य निःस्यन्दो निर्यासस्तेन पिच्छिलो यः कायस्तस्मिन्नपि शौचसङ्कल्पः शुचित्वाभिमानी यः स महद् गुरुतरं मोहस्य विजृम्भितम् ।

अत्रान्तरश्लोकाः—

शुक्रशोणितसम्भूतो मलनिःस्यन्दवर्धितः ।
गर्भे जरायुसंछन्नः शुचिः कायः कथं भवेत् ? ॥ १ ॥
मातृजग्धान्नपानोत्थरसं नाडीक्रमागतम् ।
पायं पायं विवृद्धः सन् शौचं मन्येत कस्तनौ ? ॥ २ ॥
दोषधातुमलाकीर्णं कृमिगण्डूपदास्पदम् ।
रोगभोगिगणैर्जग्धं शरीरं को वदेत् शुचि ॥ ३ ॥
सुस्वादून्यन्नपानानि क्षीरेक्षुविकृती अपि ।
भुक्तानि यत्र विष्ठायै तच्छरीरं कथं शुचि ? ॥ ४ ॥
विलेपनार्थमासक्तः सुगन्धिर्यक्षकर्दमः ।
मलीभवति यत्राशु क्व शौचं तत्र वर्ष्मणि ? ॥ ५ ॥
जग्ध्वा सुगन्धि ताम्बूलं सुप्तो निश्युत्थितः प्रगे ।
जुगुप्सते वक्त्रगन्धं यत्र तत् किं वपुः शुचि ? ॥ ६ ॥
स्वतः सुगन्धयो गन्धधूपपुष्पस्रगादयः ।
यत्सङ्गाद् यान्ति दौर्गन्ध्यं सोऽपि कायः शुचीयते ? ॥ ७ ॥
अभ्यक्तोऽपि विलिप्तोऽपि धौतोऽपि घटकोटिभिः ।
न याति शुचितां कायः शुण्डाघट इवाशुचिः ॥ ८ ॥

मृज्जलानलवातांशुस्नानैः शौचं वदन्ति ये ।
गतानुगतिकैस्तैस्तु विहितं तुषकण्डनम् ॥ ९ ॥

शरीरकस्यैवमशौचभावनां
मदाभिमानस्मरसाददायिनीम् ।
विभावयन् निर्ममतामहाभरं
वोढुं दृढः स्याद् बहुनोदितेन किम् ? ॥ १० ॥

॥ अशौचभावना ॥ ७३ ॥

अथास्रवभावनामाह—

मनोवाक्कायकर्माणि योगाः कर्म शुभाशुभम् ।
यदास्रवन्ति जन्तूनामास्रवास्तेन कीर्तिताः ॥ ७४ ॥

मनश्च वाक् च कायश्च मनोवाक्कायास्तेषां कर्माणि व्यापारा योगशब्देनोच्यन्ते ; तत्रात्मना शरीरवता सर्वप्रदेशैर्गृहीता मनोयोग्याः पुद्गलाः शुभादिमननार्थं करणभावमालम्बन्ते, तत्सम्बन्धादात्मनः पराक्रमविशेषो मनोयोगः । स च पञ्चेन्द्रियाणां समनस्कानां भवति । तथा, आत्मना शरीरवता वाग्योग्यपुद्गला गृहीता विसृज्यमाना वाक्त्वेन करणतामापद्यन्ते, तेन वाक्करणेन सम्बन्धादात्मनो भाषणशक्तिर्वाग्योगः । सा च द्वीन्द्रियादीनाम् । कायः शरीरमात्मनो निवासस्तद्योगाज्जीवस्य वीर्यपरिणामः काययोगः । ते चामी त्रयोऽपि मनोवाक्कायसम्बन्धादभिसम्बन्धादिदृष्टकार्ये [illegible] वीर्यपरिणतिविशेषा योगा शुभ-कर्म, तद्यथा ;—

'[1]योगो वीरिअं थामो उच्छाह परिक्कमो तहा चेट्ठा।
सत्ती सामत्थं चिअ जोगस्स हवंति पज्जाया ॥ १ ॥

एते च स्थविरस्य दुर्बलस्य वा आलम्बनयष्ट्यादिवज्जीवस्योपग्राहकाः। तत्र मनोयोग्यपुद्गलात्मप्रदेशपरिणामो मनोयोगः, भाषायोग्यपुद्गलात्मप्रदेशपरिणामो वाग्योगः, काययोग्यपुद्गलात्मप्रदेशपरिणामो गमनादिक्रियाहेतुः काययोगः। एते योगाः, यस्मात् शुभं सद्वेद्यादि, अशुभमसद्वेद्यादि कर्माश्रवन्ति प्रसुवते, तेन कारणेनाश्रवा इति कीर्तिताः, आस्रूयते कर्मभिरित्याश्रवाः। एतेषां च कारणभूतानामपि कर्तृत्वमिहोक्तम्, स्वातन्त्र्यविवक्षणात्, यथा असिश्छिनत्ति इति ॥ ७४ ॥

'योगाः कर्म शुभाशुभमाश्रवन्ति' इत्युक्तम्, कार्याणां च कारणानुकारित्वं दृष्टम्, इति शुभानां शुभकर्महेतुत्वम्, अशुभानामशुभकर्महेतुत्वं च विवेकेन दर्शयति—

मैत्र्यादिवासितं चेतः कर्म सूते शुभात्मकम्।
कषायविषयाक्रान्तं वितनोत्यशुभं पुनः ॥ ७५ ॥

मैत्रीमुदिताकरुणोपेक्षालक्षणाभिश्चतसृभिर्भावनाभिर्वासितं भावितं चेतो मनः कर्तृ, शुभात्मकं पुण्यात्मकं कर्म सूते। तच्च सद्वेद्य-सम्यक्त्व-हास्य-रति-पुरुषवेद-शुभायु-र्नाम-गोत्र-लक्षणम्। तदेव मनः, कषायाः क्रोधादयो, विषिण्वन्ति बध्नन्ति संसारिणं

---

(१) योगो वीर्यं स्थामोत्साहः पराक्रमस्तथा चेष्टा।
शक्तिः सामर्थ्यमेव योगस्य भवन्ति पर्यायाः ॥ १ ॥

काम्यमानाः सन्त इन्द्रियार्थाः स्पर्शादयो विषयाः, कषायाश्च विषयाश्च तैराक्रान्तं वशीकृतं वितनोति करोत्यशुभमसद्वेद्यादि कर्म ॥ ७५ ॥

तथा—

शुभार्जनाय निर्मिथ्यं श्रुतज्ञानाश्रितं वचः ।
विपरीतं पुनर्ज्ञेयमशुभार्जनहेतवे ॥ ७६ ॥

निर्मिथ्यमवितथम्, तच्च जैनमेव वचनं भवतीत्याह—श्रुतज्ञानाश्रितं वचः, श्रुतज्ञानं द्वादशाङ्गं गणिपिटकं तदाश्रितं तदविरोधेन वर्तमानं वचो वाग्योगः स शुभस्य कर्मणोऽर्जनाय। तदेव वचो विपरीतं मिथ्या श्रुतज्ञानविरोधि चाशुभस्य कर्मणोऽर्जनाय ॥ ७६ ॥

तथा—

शरीरेण सुगुप्तेन शरीरी चिनुते शुभम् ।
सततारम्भिणा जन्तुघातकेनाशुभं पुनः ॥ ७७ ॥

शरीरेण कायेन सुगुप्तेनासच्चेष्टापरिहारेण कायोत्सर्गादावस्थायां निश्चेष्टेन शरीरी जन्तुश्चिनुते करोति शुभं सद्वेद्यादि कर्म। सततारम्भिणा पुनर्नित्यारम्भिणा अत एव जन्तुघातकेन प्राणिव्यापादकेनाशुभं कर्मासद्वेद्यादि चिनोति। इति शुभाशुभयोगमूलत्वेन शुभाशुभकर्मणां जन्मप्रतिपादनादास्रवभावनाऽभिहिता ॥ ७७ ॥

शुभयोगानां शुभफलहेतुत्वं प्रसङ्गादुक्तम्। भावनाप्रकरणे त्वशुभयोगानामशुभफलहेतुत्वं वैराग्योत्पादनाय प्रतिपादनीयम्, इत्युक्तानुक्तानशुभहेतून् संगृह्णाति—

कषाया विषया योगाः प्रमादाविरती तथा।
मिथ्यात्वमार्तरौद्रे चेत्यशुभं प्रति हेतवः॥ ७८॥

कषायाः क्रोध-मान-माया-लोभलक्षणाः, नोकषायाश्च कषाय-सहचरिता हास्यरत्यरतिभयशोकजुगुप्सापुंस्त्रीनपुंसकवेदलक्षणा नव कषायशब्देन गृह्यन्ते, विषयाः काम्यमानाः स्पर्शादयः, योगा मनोवाक्कायकर्मलक्षणाः, प्रमादोऽज्ञान-संशय-विपर्यय-राग-द्वेष-स्मृतिभ्रंश-धर्मानादर-योगदुष्प्रणिधानभेदादष्टधा, अवि-रतिर्नियमाभावः, मिथ्यात्वं मिथ्यादर्शनम्, आर्त-रौद्रे ध्यान-भेदावुक्तपूर्वौ, इत्येतेऽशुभं कर्म प्रति हेतवः। नन्वेते बन्धं प्रति हेतुत्वेनोक्ताः, यदाह वाचकमुख्याः;—मिथ्यादर्शनाविरति-प्रमादकषाययोगा बन्धहेतवः इति, तत् किमाश्रवभावनायां बन्धहेतूनामेतेषामभिधानम्?। सत्यम्, आश्रवभावनेव बन्ध-भावनापि न सद्भिर्भावनात्वेनोक्ता, आश्रवभावनयैव गतार्थत्वात्। आश्रवेण ह्युपात्ताः कर्मपुद्गला आत्मना सहैकीभावेन बन्ध इत्य-भिधीयते, यदाह;—सकषायत्वाज्जीवः कर्मणो योग्यान् पुद्गला-नादत्ते स बन्धः इति। ततश्च बन्धाश्रवयोर्भेदो न विवक्षितः। ननु कर्मपुद्गलैः सह क्षीरनीरन्यायेनात्मनः सम्बन्धो बन्ध उच्यते, तत् कथमाश्रव एव बन्धः?। सत्यमेतत्, तथाप्या[illegible]

पात्तानां कर्मपुद्गलानां कथं बन्धः स्यात् ?। इत्यतोऽपि कर्मपुद्गलादानहेतावास्रवे बन्धहेतूनामभिधानमदुष्टम्। ननु तथापि बन्धहेतूनां पाठो निरर्थकः। नैवम्, बन्धास्रवयोरेकत्वेनोक्तत्वात्, आस्रवहेतूनामेवायं पाठ इति सर्वमवदातम्।

अत्रान्तरश्लोकाः—

यः कर्मपुद्गलादानहेतुः प्रोक्तः स आस्रवः।
कर्माणि चाष्टधा ज्ञानावरणीयादिभेदतः॥ १॥
ज्ञानदर्शनयोस्तद्वत् तद्धेतूनां च ये किल।
विघ्ननिह्नवपैशून्याशातनाघातमत्सराः॥ २॥
ते ज्ञानदर्शनावारकर्महेतव आस्रवाः।
देवपूजा गुरूपास्तिः पात्रदानं दया क्षमा॥ ३॥
सरागसंयमो देशसंयमोऽकामनिर्जरा।
शौचं बालतपश्चेति सद्वेद्यस्य स्युरास्रवाः॥ ४॥
दुःखशोकवधास्तापाक्रन्दने परिदेवनम्।
स्वान्योभयस्थाः स्युरसद्वेद्यस्यामी इहास्रवाः॥ ५॥
वीतरागे श्रुते संघे धर्मे सर्वसुरेषु च।
अवर्णवादिता तीव्रमिथ्यात्वपरिणामिता॥ ६॥
सर्वज्ञसिद्धदेवापह्नवो धार्मिकदूषणम्।
उन्मार्गदेशनाऽनर्थाग्रहोऽसंयतपूजनम्॥ ७॥
असमीक्षितकारित्वं गुर्वादिष्ववमानना।
इत्यादयो दृष्टिमोहस्यास्रवाः परिकीर्तिताः॥ ८॥

कषायोदयतस्तीव्रः परिणामो य आत्मनः ।
चारित्रमोहनीयस्य स आस्रव उदीरितः ॥ ९ ॥
उत्प्रासनं सकन्दर्पोपहासो हासशीलता ।
बहुप्रलापो दैन्योक्तिर्हासस्यामी स्युरास्रवाः ॥ १० ॥
देशादिदर्शनौत्सुक्यं चित्रे रमणखेलने ।
परचित्तावर्जनं चेत्यास्रवाः कीर्तिता रतेः ॥ ११ ॥
असूया पापशीलत्वं परेषां रतिनाशनम् ।
अकुशलप्रोत्साहनं चारतेरास्रवा अमी ॥ १२ ॥
स्वयं भयपरीणामः परेषामथ भापनम् ।
त्रासनं निर्दयत्वं च भयं प्रत्यास्रवा अमी ॥ १३ ॥
परशोकाविष्करणं स्वशोकोत्पादशोचने ।
रोदनादिप्रसक्तिश्च शोकस्येते स्युरास्रवाः ॥ १४ ॥
चतुर्वर्णस्य सङ्घस्य परिवादजुगुप्सने ।
सदाचारजुगुप्सा च जुगुप्सायाः स्युरास्रवाः ॥ १५ ॥
ईर्ष्याविषयगार्द्ध्ये च मृषावादोऽतिवक्रता ।
परदाररतासक्तिः स्त्रीवेदस्यास्रवा इमे ॥ १६ ॥
स्वदारमात्रसन्तोषोऽनीर्ष्या मन्दकषायता ।
अवक्राचारशीलत्वं पुंवेदस्यास्रवा इति ॥ १७ ॥
स्त्रीपुंसानङ्गसेवोग्राः कषायास्तीव्रकामता ।
पाषण्डस्त्रीव्रतभ्रंशः षण्ढवेदास्रवा अमी ॥ १८ ॥
साधूनां गर्हणा धर्मोन्मुखानां विघ्नकारिता ।
मधुमांसविरतानामविरत्यभिवर्णनम् ॥ १९ ॥

पात्रे दानं तपःश्रद्धा रत्नत्रयाविराधना।
कल्याणानि परीणामौ लेश्ययोः पद्मपीतयोः ॥ २१ ॥
बालतपोऽग्नितोयादिसाधनोल्लम्बनानि च ।
अव्यक्तसामायिकता देवस्यायुष आस्रवाः ॥ २२ ॥
मनोवाक्कायवक्रत्वं परेषां विप्रतारणम् ।
मायाप्रयोगो मिथ्यात्वं पैशून्यं चलचित्तता ॥ २३ ॥
सुवर्णादिप्रतिच्छन्दकरणं कूटसाक्षिता ।
वर्णगन्धरसस्पर्शान्यथापादनानि च ॥ २४ ॥
अङ्गोपाङ्गच्यावनानि यन्त्रपञ्जरकर्म च ।
कूटमानतुलाकर्मान्यनिन्दात्मप्रशंसनम् ॥ २५ ॥
हिंसानृतस्तेयाब्रह्ममहारम्भपरिग्रहाः ।
परुषासभ्यवचनं शुचिवेषादिना मदः ॥ २६ ॥
मौखर्याक्रोशौ सौभाग्योपघातः कार्मणक्रिया ।
परकौतूहलोत्पादः परिहासविडम्बना ॥ २७ ॥
वेश्यादीनामलङ्कारदानं दावाग्निदीपनम् ।
देवादिव्याजाद् गन्धादिचौर्यं तीव्रकषायता ॥ २८ ॥
चैत्यप्रतिश्रयारामप्रतिमानां विनाशनम् ।
अङ्गारादिक्रिया चैत्यशुभस्य नाम्न आस्रवाः ॥ २९ ॥
एते एवान्यथारूपास्तथा संसारभीरुता ।
प्रमादहानं सद्भावार्पणं क्षान्त्यादयोऽपि च ॥ ४० ॥
दर्शने धार्मिकाणां च संभ्रमः स्वागतक्रिया ।
आस्रवाः शुभनाम्नोऽथ तीर्थकृन्नाम्न आस्रवाः ॥ ४१ ॥

भक्तिरर्हत्सु सिद्धेषु गुरुषु स्थविरेषु च ।
बहुश्रुतेषु गच्छे च श्रुतज्ञाने तपस्विषु ॥ ४२ ॥
आवश्यके व्रतशीलेष्वप्रमादो विनीतता ।
ज्ञानाभ्यासस्तपस्त्यागौ शक्तितश्च प्रभावना ॥ ४३ ॥
संघे समाधिजननं वैयावृत्त्यं च साधुषु ।
अपूर्वज्ञानग्रहणं विशुद्धिर्दर्शनस्य च ॥ ४४ ॥
प्राच्यस्तीर्थंनामाभ्यामेते विंशतिराश्रवाः ।
एको द्वौ वा त्रयः सर्वे वाऽन्यैः स्पृष्टा जिनेश्वरैः ॥ ४५ ॥
परस्य निन्दावज्ञोपहासाः सद्गुणलोपनम् ।
सदसद्दोषकथनमात्मनस्तु प्रशंसनम् ॥ ४६ ॥
सदसद्गुणशंसा च स्वदोषाच्छादनं तथा ।
जात्यादिभिर्मदश्चेति नीचैर्गोत्राश्रवा अमी ॥ ४७ ॥
नीचैर्गोत्राश्रवविपर्यासो विगतगर्वता ।
वाक्कायचित्तैर्विनय उच्चैर्गोत्राश्रवा अमी ॥ ४८ ॥
दाने लाभे च वीर्ये च तथा भोगोपभोगयोः ।
सव्याजाव्याजविघ्नोऽन्तरायकर्मण आश्रवाः ॥ ४९ ॥

प्रस्तावतः खलु शुभाश्रव एष उक्तो
वैराग्यकारणमसौ न तु देहभाजाम् ।
ज्ञात्वा तदेवमशुभाश्रव एव भाव्यो
भव्यैर्जनैः सपदि निर्ममतानिमित्तम् ॥ ५० ॥

॥ आश्रवभावना ॥ ७८ ॥

अथ संवरभावनामाह—

सर्वेषामाश्रवाणां तु निरोधः संवरः स्मृतः।
स पुनर्भिद्यते द्वेधा द्रव्यभावविभेदतः॥ ७९ ॥

सर्वेषां पूर्वोक्तानामाश्रवाणां निरुध्यन्तेऽनेनेति निरोधः संवर उक्तः संव्रियतेऽनेनेति कृत्वा। स चायोगिकेवलिनामेव। इदं च सर्वसंवरस्य स्वरूपम्। एकद्वित्र्याद्यास्रवनिरोधस्तु सामर्थ्याद् देशसंवरः। स चायोगिकेवलिनः प्राग्गुणस्थानकेषु। सर्वसंवरो देशसंवरश्च प्रत्येकं द्रव्यभावभेदेन द्विविधः॥ ७९ ॥

द्वैविध्यमेवाह—

यः कर्मपुद्गलादानच्छेदः स द्रव्यसंवरः।
भवहेतुक्रियात्यागः स पुनर्भावसंवरः॥ ८० ॥

कर्मपुद्गलानामाश्रवद्वारेणादानं प्रवेशनं तस्य यच्छिद्यतेऽनेनेति च्छेदः स द्रव्याणां संवरो द्रव्यसंवरः। भावसंवरस्तु संसारकारणभूतायाः क्रियाया आत्मव्यापाररूपायास्त्याग इति॥ ८० ॥

इदानीं कषाया विषया योगा इत्यादिनाऽभिहितानामशुभकर्महेतूनां प्रतिपक्षभूतानुपायान् स्तौति—

येन येन ह्युपायेन रुध्यते यो य आश्रवः।
तस्य तस्य निरोधाय स स योज्यो मनीषिभिः॥८१॥

स्पष्टः॥ ८१ ॥

तदाह — 'नो इहलोगट्ठयाए तवमहिट्ठिज्जा, नो परलोगट्ठयाए तवमहिट्ठिज्जा, नो कित्तिवण्णसद्दसिलोगट्ठयाए तवमहिट्ठिज्जा, नन्नत्थ निज्जरट्ठयाए तवमहिट्ठिज्जा' इत्येका निर्जरा । द्वितीया तु [illegible] कारणेन पूर्वोक्तेन वर्जिता । अत्र [illegible] [illegible], इति [illegible] [illegible], यथा—

> [illegible] नात्यर्थं [illegible] [illegible] ।
> [illegible] न त्यजति [illegible] [illegible] ॥ १ ॥ ८६ ॥

सकामामपि निर्जरां व्याचष्टे —

ज्ञेया सकामा यमिनामकामा त्वन्यदेहिनाम् ।
कर्मणां फलवत् पाको यदुपायात् स्वतोऽपि हि ॥८७॥

सकामा निर्जराऽभिलाषवतां यमिनां यतीनां विज्ञेया । ते हि कर्मक्षयार्थं तपस्तप्यन्ते । अकामा तु कर्मक्षयलक्षणफल-निरपेक्षा निर्जराऽन्यदेहिनां यतिव्यतिरिक्तानामेकेन्द्रियादीनां प्राणिनाम् ; तथाहि —एकेन्द्रियाः पृथिव्यादयो वनस्पतिपर्यन्ताः शीतोष्णवर्षाजलाग्निशस्त्राद्यभिघातच्छेदभेदादिनाऽसह्यं कर्मा-नुभूय नीरसं कर्म स्वप्रदेशेभ्यः परिशाटयन्ति । विकलेन्द्रियाश्च क्षुत्पिपासाशीतोष्णादिभिः, पञ्चेन्द्रियतिर्यञ्चश्च छेदभेददाहशस्त्रा-

(1) नो इहलोकार्थं तपोऽधितिष्ठेत्, नो परलोकार्थं तपोऽधितिष्ठेत् । नो कीर्तिवर्णशब्दश्लोकार्थं तपोऽधितिष्ठेत्, न अन्यत्र निर्जरार्थात् तपोऽधितिष्ठेत् ।

तत्र निर्जरोक्तिः, यदाह ;—

यद्वद् विशोषणादुपचितोऽपि यत्नेन जीर्यते दोषः ।
तद्वत् कर्मोपचितं निर्जरयति संवृतस्तपसा ॥ १ ॥ ८८ ॥

तच्च बाह्याभ्यन्तरभेदेन द्विविधम् तत्र बाह्यं तपस्तावद् भेदेनाह—

अनशनमौनोदर्यं वृत्तेः संक्षेपणं तथा ।
रसत्यागस्तनुक्लेशो लीनतेति बहिस्तपः ॥ ८९ ॥

अशनमाहारस्तत्परित्यागोऽनशनम् । तद् द्विधा – इत्वरं यावज्जीविकं च । इत्वरं नमस्कारसहितादि श्रीमन्महावीरतीर्थे षण्मासपर्यन्तम्, श्रीनाभेयतीर्थे तु संवत्सरपर्यन्तम्, मध्यमतीर्थकरतीर्थेषु त्वष्टौ मासान् यावत् । यावज्जीविकं तु पादपोपगमनेङ्गिनीभक्तप्रत्याख्यानभेदात् त्रिविधम् । तत्र पादपोपगमनं द्विधा—सव्याघातमव्याघातं च । तत्र सतोऽप्यायुषः समुपजातव्याधिविधुरेणोत्पन्नमहावेदनेन वा देहिना यदुत्क्रान्तिः क्रियते तत् सव्याघातम् । निर्व्याघातं तु—

'[1]निप्फाइआ य सीसा गच्छो परिपालिओ महाभागो ! ।
अब्भुज्जिओ विहारो अहवा अब्भुज्जयं मरणं ॥ १ ॥

इति दशावयःपरिणामे सति त्रस-स्थावरविरहिते स्थण्डिले पादपवद् निश्चेष्टस्य येन तेन संस्थानेन प्रशस्तध्यानव्यापृतान्तः-

(1) निष्पादिताश्च शिष्या गच्छः परिपालितो महाभाग ! ।
अभ्युद्यतो विहारोऽथवाऽभ्युद्यतं मरणम् ॥ १ ॥

[illegible]

[illegible]

[illegible]

[illegible]

[illegible] ॥ १ ॥

[illegible] क्रियते ।

यथा, [illegible] प्रायश्चित्तानां, [illegible]

[illegible] पारा[illegible]

[illegible] पाराञ्चिकम् । [illegible]

बहिष्करणम् ।

एतच्च छेदपर्यन्तं प्रायश्चित्तं व्रणचिकित्सातुल्यं पूर्वसूरिभि-रभिहितम् । तत्र तनुरतीक्ष्णमुखो रुधिरमप्राप्तस्त्वग्लग्नः शल्यो देहादुद्ध्रियते, न तत्र व्रणस्य मर्दनं विधीयते, शल्यस्याल्प[त्वे] व्रणस्याल्पत्वात् । द्वितीये तु लग्नोद्धृतशल्ये मर्दनं क्रि[यते] न तु कर्णमलेन पूर्यते । तृतीये तु दूरतरगतशल्ये शल्यो[द्धरण]मलनकरणमलपूरणानि क्रियन्ते । चतुर्थे तु शल्यकर्षण[रुधिर]रुधिरगालनानि वेदनापहारार्थं क्रियन्ते । पञ्चमे तु गा[ढा]वगाढशल्योद्धरणं, ततो गमनादिचेष्टा निषिध्यते । ष[ष्ठे] मितभोज्यभोजनोऽभोजनो वा शल्योद्धारानन्तरं भवति

---

(१) उत्तिष्ठ निषीद वा भिक्षां हिण्ड मात्रकं प्रेक्षस्व ।
कुपितप्रियबान्धवस्य करोतीतरोऽपि तूष्णीकस्तु ॥

अश्रद्धेयमसद्भूतं परस्परविरोधि च ।
वस्तु प्रलपतां धर्मः कः पुराणविधायिनाम् ? ॥ ५ ॥
असद्भूतव्यवस्थाभिः पराद्रव्यं जिघृक्षताम् ।
मृत्पानीयादिभिः शौचं स्मार्तादीनां कुतो ननु ? ॥ ६ ॥
ऋतुकाले व्यतिक्रान्ते भ्रूणहत्याविधायिनाम् ।
ब्राह्मणानां कुतो ब्रह्म ब्रह्मचर्यापलापिनाम् ? ॥ ७ ॥
अदित्सतोऽपि सर्वस्वं यजमानाज्जिघृक्षताम् ।
अर्थार्थं त्यजतां प्राणान् क्वाकिञ्चन्यं द्विजन्मनाम् ? ॥ ८ ॥
दिवसे च रजन्यां च सुखमापृच्छ्य भक्षताम् ।
भक्ष्याभक्ष्याविवेकानां सौगतानां कुतस्तपः ? ॥ ९ ॥
मृद्वी शय्या प्रातः पेया मध्ये भक्तं सायं पानम् ।
द्राक्षाखण्डं रात्रेर्मध्ये शाक्योपज्ञः साधुर्धर्मः ! ॥ १० ॥
स्वल्पेष्वप्यपराधेषु क्षणात् शापं प्रयच्छताम् ।
लौकिकानामृषीणां न क्षमालेशोऽपि दृश्यते ॥ ११ ॥
जात्यादिमददुर्वृत्तपरिनर्तितचेतसाम् ।
क्व मार्दवं द्विजातीनां चतुराश्रमवर्तिनाम् ॥ १२ ॥
दम्भसंरम्भगर्भाणां वक्रवृत्तिजुषां बहिः ।
भवेदार्जवलेशोऽपि पाखण्डव्रतिनां कथम् ? ॥ १३ ॥
गृहिणीगृहपुत्रादिपरिग्रहवतां सदा ।
द्विजन्मनां क्वचं मुक्तिर्लोभैकश्रुम्लवेश्मनाम् ? ॥ १४ ॥
परम्रद्विष्टमूढानां केवलज्ञानशालिनाम् ।
ततो भगवतामेषां धर्मस्वाख्याततार्हताम् ॥ १५ ॥

योजनानि मुक्त्वा मध्येऽशीतौ योजनेषु अणपन्निप-पणपन्निप्रभृतयस्तथैव दक्षिणोत्तरव्यवस्थिता अष्टौ व्यन्तरनिकायाः, तत्रैव द्वौ द्वाविन्द्रौ ।

तथा, रत्नप्रभायाः पृथिव्याः समतलादुपरि सप्तसु नवत्यधिकेषु योजनशतेषु ज्योतिषामधस्तलप्रदेशः. तदुपरि दशयोजनेषु सूर्यः, तदुपर्यशीतियोजनेषु चन्द्रः, तदुपरि विंशतियोजनेषु तारा ग्रहाश्च । एवमयं ज्योतिर्लोको दशोत्तरं योजनशतं बाहल्येन। एकादशभिर्योजनशतैरेकविंशत्युत्तरैर्जम्बूद्वीपकमेरुमस्पृशन् सर्वासु दिक्षु मण्डलिकया व्यवस्थितं ज्योतिश्चक्रं ध्रुववर्जं भ्राम्यति, लोकान्तं च एकादशभिर्योजनशतैरेकादशोत्तरैरस्पृशन् मण्डलिकया तिष्ठति, यदाह ;—

[1]एक्कारसेक्कवीसा सयमक्काराहिआ य एक्कारा ।
मेरु अलोगा बाहं जोइसचक्कं चरइ ठाइ ॥ १ ॥

अत्र सर्वोपरि किल स्वातिनक्षत्रम्, सर्वेषामधो भरणिनक्षत्रम्, सर्वदक्षिणो मूलः, सर्वोत्तरश्चाभीचिः । तत्र जम्बूद्वीपे द्वौ चन्द्रौ द्वौ सूर्यौ । लवणसमुद्रे चत्वारश्चन्द्राः सूर्याश्च । धातकीखण्डे द्वादशचन्द्राः सूर्याश्च । कालोदे द्विचत्वारिंशच्चन्द्राः सूर्याश्च। पुष्करवरार्धे द्वासप्ततिश्चन्द्राः सूर्याश्च । इत्येवं मनुष्यलोके द्वात्रिंशं चन्द्रशतं सूर्यशतं च भवति । अष्टाशीतिर्ग्रहाः, अष्टाविंशति-

(१) एकादशैकविंशति शतान्येकादशाधिकानैकादश ।
मेरु-अलोकाभ्यां बहिर्ज्योतिश्चक्रं चरति तिष्ठति ॥ १ ॥

Dāna Kriyā Kaumudī, Fasc. 1-2 @ /10/ each	1	4
*Dasa Rupa (Text), Fasc. 2-3, @ /10/ each	1	4
Dharmabindu, Fasc. 1, @ /10/ each	0	10
Dictionary of the Kashmiri Language, Part I	15	0
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1-7 @ /10/ each	4	6
Ditto Āchārasārah Vol. II, Fasc. 1-4 @ /10/ each	3	2
Gobhiliya Grihya Sutra, Vol. I.	3	2
Ditto Vol. II. Fasc. 1-2 @ 1/4/ each	2	8
Ditto (Appendix) Gobhila Parisista	2	0
Ditto Grihya Sangraha	0	10
Haralata	1	14
Institutes of Vishnu (Text), Fasc. 2, /10/ each		10
Kāla Viveka, Fasc. 1-7 @ /10/ each	4	6
Karmapradiph, Fasc. I	1	4
Kātantra, Fasc 1-6 @ /12/ each	4	8
Katha Sarit Sagara (English), Fasc 4-14 @ 1/- each	11	0
Kavi Kalpa Lata, Fasc 1	0	10
Kavindravacana Samuccayah	3	8
Kiranavali, Fasc. 1-3 @ /10/ each	1	14
*Krityatnakar, Fasc. 1	0	10
Kūrma Purāṇa, Fasc 1-9 @ /10/ each .. .	5	10
*Lalita Vistara (English), Fasc 1-3 @ 1/- each	3	0
Madana Pārijāta, Fasc 1-11 @ /10/ each	6	14
Mahā-bhāṣya-pradipōdyōta, Vol I, Fasc 1-9 ; Vol. II, Fasc. 1-12; Vol. III, Fasc. 1-10 @ /10/ each	19	6
Ditto Vol. IV, Fasc. 1-5 @ 1/4/ each	6	4
Maitri, or Maitraniya Upanishad, Fasc 1-2 @ /10/ each ...	1	4
Manuṭikā Sangraha, Fasc 1-3 @ /10/ each	1	14
Mārkaṇḍēya Purāṇa, (English) Fasc 1-9 @ 1/- each	9	0
*Markandeya Purana (Text), Fasc 4-7 @ /10/ each	2	8
*Mīmāṁsā Darçana, (Text) Fasc 9-11, 17 @ /10/ each	5	0
Mirror of Composition (English), Fasc 2-4	2	0
Mugdhabodha Vyakarana, Vol I. Fasc 1-7 @ /10/ each	4	6
Nirukta (2nd edition), Vol I, Fasc 1-2 @ 1/4/	2	8
*Nirukta (old edition), Vol. IV, Fasc 1-8 @ /10/ each	5	0
Nityācārapadhati, Fasc 1-7 @ /10/ each.	4	6
Nityācārapradipa, Vol. I, Fasc 1-8, Vol II, Fasc. 1-4 @ /10/ each ...	7	8
Nyaya Vartika Tatparya Parisudhi, Fasc 1-6 @ /10/ each		8
*Nyāyavārtika, (Text), Fasc. 2-7 @ /10/ each	2	12
Nyayasarah	2	0
Padumawati, Fasc. 1-6 @ 2/ each	12	0
Parāçara Smṛti, Vol. I. Fasc 2-8, Vol II, Fasc 1-6, Vol III, Fasc. 1-5 @ /10/ each	11	4
Parāçara, Institutes of (English) @ 1/- each	1	0
*Pariçista Parvan (Text), Fasc 5 @ /10/ each	0	10
Parikṣamukha Sutram . ..	1	0
Prabandhacintāmaṇi (English) Fasc 1-3 @ 1/4/ each . ..	3	12
Prakrita-Paingalam, Fasc. 1-7 @ /10/ each	4	6
Prithviraj Vijaya, Fasc 1-2 @ /10/ each .	1	4
Rasarnavam, Fasc. 1-3 .	5	12
Rasasiddhanta Manjari, Fasc. 1	0	10
Saddarsana-Samuccaya, Fasc 2-3 @ /10/ each .. .	1	4
Sadukti-karnamrita, Fasc 1 to 2 @ /10/ each	1	4
Samaraicca Koha Fasc. 1-7, @ /10/ each	4	[illegible]
*Samaveda Sanhita, Vol 1, Fasc 1-4, 6-10, Vol 2, Fasc 2-6, Vol 3, Fasc. 1-7; Vol 4, Fasc 1-6; Vol. 5, Fasc 1-8 @ /10/ each ..	21	[illegible]
*Sankara Vijaya (Text) Fasc 2-3 @ /10/ each ...	1	4
*Sankhya Aphorisms of Kapila (English), Fasc 2 .	1	[illegible]
*Sankhya Pravachana Bhashya, Fasc. 2	0	10
Sāṅkhya Sūtra Vṛtti, Fasc. 1-4 @ /10/ each	[illegible]	[illegible]
Ditto (English) Fasc 1-2 @ 1/- each	[illegible]	[illegible]
Siva Parinayah, Fasc 1-2 @ /10/ each	1	4
Six Buddhist Nyaya Tracts, ...	[illegible]	[illegible]
Smriti Prakasha, Fasc 1	[illegible]	[illegible]
Srāddha Kriyā Kaumudī, Fasc 1-6 @ /10/ each	[illegible]	[illegible]
Srauta Sutra of Latyayana (Text), Fasc 1-9 @ /10/ each	[illegible]	[illegible]
Sri Sanjnavasvam, Fasc 1-3 @ /10/ each ...	[illegible]	[illegible]
[illegible] Fasc 1 @ 1/- each	[illegible]	[illegible]